कृपासुधासरिद्यस्य विश्वमाप्लावयन्त्यपि ।
नीचगैव सदा भाति तं श्रीचैतन्यमाश्रये ॥
मन्दोऽपि कश्चिच्चैतन्यदासनामा समासतः ।
कृष्णकर्णामृतव्याख्यां वितनोति सतां मुदे ॥
कृष्णसंबन्धमात्रेऽपि प्रीतिर्येषां सदा भवेत् ।
तैरेव शोध्यतामेषा टीका नाम्ना सुबोधनी ॥

अथ सकलगुणधामा श्रीलीलाशुकनामा परमोत्कण्ठया निजेष्टदैवतलीलाभूमि-दिदृक्षया श्रीवृन्दावनं गच्छन्पथि पथि प्रतिदिनं प्रस्थानसमये निजातिप्रियप्रातः-

1-2. All words from पल्लवोऽस्त्री to रागे lost in GA. 4. GB omits तच्चरण. GB किं वक्तव्यं for किमिति. 6. GB कल्पनया for कल्पितया कथया, and व्याख्यायन्ते for व्याख्यानं कुर्वते. 10. CB आप्लावयत्यपि. 11. CD transposes तं and श्रीचैतन्यं. 12. CB, CD मन्दोऽपि कश्चिच्चैतन्यपादपद्ममधून्मदः. 13. CB, CD समासतः for सतां मुदे; CC transposes सतां and मुदे. 15. CC सुबोधिनी (but सुबोधनी in the final colophon). 16-17 and 1-4 of p. 6. CB, CD omit all words from अथ to आचरति and read instead: अथ भक्तसुखसतृष्णा-प्रातःशय्योत्थितश्रीराधाकृष्णचरितवर्णनमयं ग्रन्थमारभमाणः सकलगुणधामा श्रीलीला-शुकनामा परमभागवतविभुः श्री(CD श्रीमद्)भगवद्भक्तिरसावेशोच्छलितचित्तस्तन्त्रेण स्व(CD आत्म)गुरोर्निजेष्टदैवतस्य (CD inserts च) चरणस्मरणरूपमङ्गलमाचरति. 17. CA श्रीवृन्दावनदर्शनाय for श्रीवृन्दावनं.

शय्योत्थितराधाकृष्णतत्कालीनलीलाविशेषस्फूर्त्युच्छलितरागावेशवैवश्येन यद्यज्जगाद तत्तत्सत्सङ्गिभिः क्रमेण व्यलेखि। तत्र प्रथमप्रस्थानमङ्गलदिने दैन्यस्वाभाव्येन कथं ममायोग्यस्य तद्दर्शनं सेत्स्यतीति चिन्ताव्याकुलस्तदैव स्फुरितस्वगुरोश्चरण-प्रभावस्मरणरूपमङ्गलमाचरति—चिन्तामणिरिति। सोमगिरिनामा मे गुरुर्जयति सर्वोत्कर्षेण वर्तते। यतश्चिन्तामणिः। चिन्तनमात्रेण सर्वाभीष्टपूरकतयास्य चिन्तामणित्वं सर्वोत्कर्षता (!) च। किं वा, जयति तं प्रति प्रणतोऽस्मीत्यर्थः। एवं स्वायोग्यतां संभाव्य तत्प्रभावेनैव स्वेष्टदेवताप्यनुकूला स्यादित्याह—

आचार्यचैत्यवपुषा स्वगतिं व्यनक्ति

(भा० ११. २९. ६) इति न्यायेन शिक्षागुरुर्भगवांश्च जयति। कोऽसौ भगवानित्याशङ्क्याह—शिखिपिच्छो मौलिः शिरोभूषणं यस्य सः। अनेन श्रीवृन्दावनविहारित्वसूचनया स्वयंभगवत्त्वं ज्ञापितम्। तत्रैव तदादिप्रसिद्धेः। जयतीति वर्तमानप्रयोगेन नित्यता चास्य। तच्छिक्षारूपानुकूल्येनैवात्मनो दुर्लभा-मप्यभीष्टसिद्धिं संपादयन्नाह—यत्पादेति। यस्याचिन्त्यानन्तशक्तेः श्रीकृष्णस्य पादावेव सर्वसंकल्पसंपादकतया कल्पतरू। तयोर्ये पल्लवा अङ्गुलयस्तेषां शेखरेष्व-ग्रेषु जयश्रीर्लीलासु द्यूतनर्मजलकेल्यादिषु स्वयंवरस्तद्गुणगणैर्वशीभूयानन्यगति-

1. CA ०रागानुवेश०. 3. CC स्यादिति for सेत्स्यतीति. 4. CC सोमगिरिस्तन्नामा. 5. CD विजयते for वर्तते. CB, CD कीदृक् for यतः. 5. CD यद्वा, CB अथ वा for किं वा. 6. CA नतो for प्रणतो०. 7. CB, CD omit all words from एवं to स्यादित्याह. CC स्वेष्टदेवोऽप्यनुकूलः. 8. CB, CC insert तथा before आचार्य०. 10. CB शिखिपिच्छैः 11. CB ०सूचनायाः. CD inserts अस्य after ०सूचनया. CB, CD शिखिपिच्छानां (CD ०पिच्छादिभूषा-) वैशिष्ट्यस्य तत्रैव प्रसिद्धेः for तत्रैव तदादिप्रसिद्धेः. 12-13. CB, CD omit all words from जयतीति to यत्पादेति and read instead तदेव बोधयन्नाह. 13. CB, CD insert स्वयंभगवतः before श्रीकृष्णस्य. 14. CD संपादनमात्र for संपादक, but, after this, all words from ०तया to ०गतिकत्वेन (l. 14-15) are dropped. 15. CB, CC नखाग्रेषु for अग्रेषु. CB द्यूतादिनर्म०. CB ०गुणैः for ०गुणगणैः.

कत्वेनाश्रयणं तद्रसं तज्जन्यं सुखं लभते। स्वसेवावसरं प्राप्नोतीत्यर्थः। जया सर्वोत्कृष्टा चासौ श्रियामय्यंशिनीत्वाच्छ्रीश्चेति जयश्रीः श्रीराधैव लीलायां स्वयंवर-रसं लभते। तदालम्बनतामाप्नोतीति स्वाभीष्टार्थः ॥१

सारङ्गरङ्गदा

यद्भावभावितधियः प्रणयोत्थवाचां
मुद्रापि दुर्गमतमा मुनिपुंगवानाम्।
रासोत्सुकं मदनमोहनमच्युतं तं
राधासमेधितरसोल्लसितं नतोऽस्मि ॥
कृपासुधासरिद्यस्य विश्वमाप्लावयन्त्यपि।
नीचगैव सदा भाति तं श्रीचैतन्यमाश्रये ॥
रमन्ती कृष्णमाधुर्यकेलिसौन्दर्यसंपदम्।
कैश्चिन्न भावजा सम्यग् ज्ञेया लीलाशुकस्य गीः ॥
मन्दोऽपि कश्चिच्छ्रीरूपपादाम्भोजमधून्मदः।
कृष्णकर्णामृतव्याख्यां विवृणोति यथामति ॥
स्पष्टे बाह्यदशोक्त्यर्थे निर्बन्धं परिमुञ्चता।
निगूढोऽन्तर्दशोक्त्यर्थो व्याख्येयः साग्रहं मया ॥
मदास्यमरुसंचारखिन्नां गां गोकुलोन्मुखीम्।
सन्तः पुष्णन्त्विमां स्निग्धाः कर्णकासारसंनिधौ ॥

1. CB, CD आप्नोति for प्राप्नोति. CD यद्वा for जया. 2. CC omits इति before जयश्रीः. 2-3. CB, CD omit all words from चासौ to स्वाभीष्टार्थः and read instead: श्रीर्लीलायां स्वयंवरेण रसं (CD स्वयंवररसं) लभत इत्यभीष्टा(CD इत्यभि) पादकोर्थः. CB continues: नानारसनिर्जयनिजाश्रितसंसारजयादिरूपा श्रीगुरोरपि चरणमाश्रयते॥ श्रीगुरवे नमः। श्रीकृष्णः सत्यः। तत्कीदृशं. 5. KA is missing at the beginning, six folios being lost. 9. See Mangala-śloka 1 of Subodhanī. This verse also occurs in Kṛṣṇadāsa's Caitanya-caritāmṛta, Ādi xvi, 1 as a Mangala-śloka. 11. KC वसन्ती for रमन्ती. 13. KD ०पदाम्भोज०. 17. KB, KD, KC (margin) मत्स्वान्तमरु०.

सद्भक्तभावगन्धर्वगान्धर्वरसलम्पटैः ।
सारङ्गैः शोध्यतामेषा टीका सारङ्गरङ्गदा ॥

अथ दाक्षिणात्यः कृष्णवेण्वापश्चिमतीरवासी पण्डितकवीन्द्रः श्रीबिल्वमङ्गल-नामा कश्चिद्ब्राह्मणः किलासीत् । स च पूर्वदुर्वासनाप्रेरितस्तत्पूर्वतीरवासिन्यां संगीतविद्याधिकृतकिंनरीनिकरायां कस्यांचिच्चिन्तामणिनाम्न्यां वेश्यायामतीवासक्तो बभूव । स च कदाचित्प्रावृट्तमिस्रायां जीमूतमन्द्रगर्जितजातहृच्छयोऽन्ध इवागणितगमनप्रत्यूहचयः स्वगृहान्निर्गत्य तां नदीं हस्ताभ्यां शवालम्बनेनोत्तीर्य कीलितकवाटं तदावासद्वारमाससाद । तत्रापि तत्रत्यैरश्रुतफूत्कारशत इतस्ततो भ्रमन् भित्तिगर्तेऽर्धप्रविष्टकृष्णभुजङ्गपुच्छमालम्ब्य भित्तिमुल्लङ्घ्य प्रणालिकामध्ये निपतन्मूर्छितो बभूव । ततः सा सखीभिः सह विद्युद्रोचिषा तं दृष्ट्वा हा कष्टमिति वदन्ती तमानीयोपचारैः सुस्थं चक्रे । ततस्तेन कथितं तदागमनवृत्तान्तं श्रुत्वा जातवेपथुः सा सनिर्वेदं तमाह—अहो सकलशास्त्रज्ञमपि भवन्तं मूढं विना कोऽन्यः परिणतिविरसरसलेशार्थमात्मानं घातयेत्, हा धिग्धिगस्तु मां याहं पापीयसी कपटभावैः पुरुषान्प्रतार्य तेषां मनोधनानि चाहरम्, अहो एतादृश्यासक्तिर्यदि भगवति श्रीकृष्णे जायते तदा किं न स्यात्, श्वः सर्वं परित्यज्य श्रीकृष्णभजनमेव मया कार्यम् । इति निश्चित्य तां रात्रिं तं शुश्रूषमाणा, सखीभिः सह, श्रीकृष्णस्य श्रीराधया सह रासकुञ्जादिलीलामयगीतान्यगासीत् । स चापि तद्वाक्यमाकर्ण्य जातनिर्वेदः स्वं भर्त्सयन्मयापि श्वः सर्वं त्यक्त्वा भगवद्भजनमेव कार्यमिति चिन्तयन्नुन्निद्र एव तद्गीतश्रवणमात्रेण प्रोद्बुद्धपूर्वसिद्धप्रेमाङ्कुरस्तं राधा-कान्तमेव प्राणकोटिदयितं दयितं मन्यमानः प्रातस्तां नमस्कृत्य तेनैव पथा तन्नदीतीरस्थं सोमगिरिनामानं वैष्णवोत्तममासाद्य निवेदितस्ववृत्तान्तस्तस्माच्छ्री-

1. KP ०भाग० for ०भाव०. 3. KB कृष्णावेगवानदीपश्चिम० ; KP ०तीरनिवासी ; KC ०तीरवासि-. KP पण्डितः. 4. KB ०पूर्वतीरनिवासिन्यां. 6. KD; KP ०मन्द० for ०मन्द्र०. 7. KB ०प्रत्यूहनिचयः. KP शवावलम्बनेन. 8. KB ०फुत्कारशतैः. 10. KB omits हा. 11. KP स्वागमन०. 12. KP सकलशास्त्रविशारदमपि. 16. KP रात्रीं. 17. KP omits श्रीकृष्णस्य. 18. KB तद्वाक्यजातनिर्वेदः ; KD तद्वाक्यजातनिर्वेदमनाः for तद्वाक्यमाकर्ण्य जातनिर्वेदः. 19. KP inserts श्री before राधाकान्तं. 20. KP omits the second दयितं.

मद्गोपालमन्त्रराजमग्रहीत् । गृहीतमन्त्र एव प्रोद्बुद्धानुरागः कम्पाश्रुपुलकादिव्याकुलः श्रीवृन्दावनगमनोत्कण्ठितोऽपि गुरुसेवार्थं कतिचिद्दिनानि तत्रैवावात्सीत् । तत्रापि श्रीकृष्णलीलादिवर्णनमयग्रन्थांश्चकार । तद्दृष्ट्वा गुरुणा लीलाशुक इति ख्यापितोऽभूत् । तत्र स्वीयैरुपद्रुतस्तत एव संन्यासं चक्रे । ततः परोत्कण्ठया श्रीगुरुं विज्ञाप्य श्रीवृन्दावनाय प्रतस्थे । गच्छंश्च पथि पथि प्रथमं तत्स्फूर्तिसमुच्छलितप्रेमप्रवाहजोत्कण्ठाकल्लोलपतितं शून्यमिवात्मानं मत्वा तत्तल्लीलाविशिष्टस्य तस्य स्फूर्तिं प्रार्थयन्, ततो मथुरामण्डलागतो लीलाविशेषस्फूर्त्युच्छलितानुरागसिन्धूद्गतलालसावर्तग्रसितस्तद्दर्शनं प्रार्थयन्, ततो मथुरागतस्तत्स्फूर्तौ साक्षात्कारं मन्वानः, ततो वृन्दावनागतस्तं साक्षाद्दृष्ट्वा वाङ्मनसागोचरत्वेन तं वर्णयंश्च यद्यत्प्रललाप तत्तत्सर्वं तत्सङ्गिवैष्णवैस्तदा तदैव लिखित्वा स्थापितमासीत् । ततो वृन्दावने कतिदिनान्यवात्सीत् । पश्चात्कृष्णेन स्वलीलां प्रवेशितः । इति गुरुपरंपरागता सार्वलौकिकी प्रसिद्धिरिति ।

अथ प्रेमोन्मत्तः स्वालयाच्छ्रीवृन्दावनाय प्रस्थानं कुर्वन्नेव श्रीलीलाशुकः स्वगुरोः स्वगुरुत्वेनैव स्वेष्टदैवतस्य च संकीर्तनरूपं मङ्गलमाचरति । इदं मङ्गलाचरणमन्येषां ग्रन्थकाराणामिवेप्सितपूर्तिविघ्ननिरसनप्रयोजनं न भवति । प्रेमोन्मादप्रलापेऽस्मिन् ग्रन्थकरणप्रस्तावाभावात् । तत्रापि दाक्षिणात्यानां सामान्यानामेव संस्कृतोक्तिरित्यस्य तु कवीन्द्रत्वात्पद्योक्तिः । किं तु शुद्धवैष्णवानां स्वभावोऽयं यच्छयनभोजनगमनादिषु गुर्विष्टदेवस्मरणम् । तद्यथा—चिन्तामणिरिति । सोमगिरिस्तन्नामा मे मम गुरुर्जयति सर्वोत्कर्षेण वर्तते । कीदृक्—चिन्तामणिः ।

P. 8, l. 21. KP तं नदीतीरस्थं. KB निवेदितवृत्तान्तः. 2. KB ०वृन्दावनविलोकनोत्कण्ठितोऽपि ; KC ०वृन्दावनागमनो०. 3. KB तान् दृष्ट्वा. KP सोमगिरिगुरुणा. 4. KP प्रख्यापितो for ख्यापितो, and अत्र for तत्र. KB omits ततः. KD परमोत्कण्ठया. 6. KB ०प्रवाहसोत्कण्ठा०. 7. KB एतस्य for तस्य, and तत्स्फूर्तिं for स्फूर्तिं. KP ०मथुरामण्डलगतो. KB, KC insert ततः before लीला०. 9. KD inserts प्रलपन् after मन्वानः. 10. KP तत्सङ्गिभिः. 11. KD, KP श्रीकृष्णेन. 12. KC, KP insert हि before गुरुपरंपरा०. 13. KP inserts लालसया after स्वालयात्. 14. KD स्वेष्टदेवस्य. 18. KP गुर्विष्टदेवतास्मरणं. KC omits तद्यथा चिन्तामणिरिति. KD जयतीत्यादि for इति.

आश्रयमात्रेणाभीष्टपूरकत्वाच्चिन्तामणित्वं सर्वोत्कर्षता (!) चास्य। किं वा, जयति तं प्रति प्रणतोऽस्मीत्यर्थः। तथा हि काव्यप्रकाशे (१. १. वृत्ति)—

जयत्यर्थेन नमस्कार आक्षिप्यते।

अतस्तं प्रति प्रणतोऽस्मीत्यर्थ इति। तथा ममेष्टदेवो भगवांश्च जयति। कोऽयं भगवानित्याह—शिखिपिञ्छमौलिः। शिखिपिञ्छैस्तान्येव वा मौलिः शिरोभूषणं यस्य स इति श्रीवृन्दावनविहारी श्रीकृष्ण एव। जयतीति वर्तमानप्रयोगेन नित्यलीला सूचिता।

आचार्यचैत्यवपुषा स्वगतिं व्यनक्ति

(भा० ११. २९. ६) इति,

ददामि बुद्धियोगं तम्

(भगवद्गीता १०. १०) इत्यादि,

आचार्यं मां विजानीयात्

(भा० ११. १७. २७) इत्यादि दिशा, तथा (भक्तिरसामृत० २. १. १३१)—

कर्णाकर्णि सखीजनेन विजने दूतीस्तुतिप्रक्रिया
पत्युर्वञ्चनचातुरीगुणनिका कुञ्जप्रयाणे निशि।
वाधिर्यं गुरुवाचि वेणुविरुतावुत्कर्णतेति व्रता-
न्कैशोरेण तवाद्य कृष्ण गुरुणा गौरीगणः पाठ्यते॥

इत्यादि दिशा च तस्य तत्तन्माधुर्याद्यनुभवादौ स एव मे गुरुरित्याह स कीदृक्—मे शिक्षागुरुः। वक्ष्यते चैतत्—

प्रेमदं च मे

(श्लो० १०४) इत्यादौ। शिखिपिञ्छमौलिरिति तच्छ्रीविग्रहस्फूर्त्या

साक्षान्मन्मथमन्मथः

4. KB omits इति. KP inserts मे after तथा. 5. KC इत्यत्राह, KP इत्यत आह for इत्याह. The Bengal Mss of Subodhanī and Sāraṅgaraṅgadā generally read पिञ्छ for पिच्छ throughout. Read पिञ्छ for पिच्छ on p. 6. line 10. 7. KB नित्यतास्य for नित्यलीला. 14. KB, KD दूतिस्तुति०. 18. KD omits मे after एव. 19. KP omits मे.

(भा० १०. ३२. २) इत्यादिना,

यन्मर्त्यलीलौपयिकम्

(भा० ३. २. १२) इत्यादिना,

गोप्यस्तपः किमचरन्

(भा० १०. ४४. १४) इत्यादिना च वर्णिततत्तन्माधुर्यमनुभूय तत्तदङ्गोपमानयोग्यपदार्थान्मनसि विचिन्त्य तेषामतीवायोग्यतामालोच्य तत्पदनखशोभयैव ते निर्जिता इति स्फूर्त्या, तथा श्रीराधायास्तन्माधुर्याकृष्टचित्ततास्फूर्त्या च शब्दश्लेषेण समादधदाह—यत्पादेति। यस्य श्रीकृष्णस्य पादावेव कौमल्यारुण्यसर्वाभीष्टपूरकत्वादिना कल्पतरुपल्लवौ तयोः शेखरेषु तदङ्गुलिनखाग्रेषु लीलया यः स्वयंवरस्तद्रसं तज्जन्यसुखं जयश्रीर्लभते। तदेव वक्ष्यते—

कमलविपिनवीथीगर्वसर्वंकषाभ्याम् (श्लो० १२)

वदनेन्दुविनिर्जितः शशी (श्लो० ६६)

इत्यादौ बहुत्र। श्लेषेण द्यूतनर्मजलकेलिसुरतादिषु च जयेनोत्कर्षेण श्रीः शोभा यस्याः। किं वा, सौन्दर्यादिपातिव्रत्यादिसौभाग्यवैदग्ध्यादिभिर्गौर्याद्यरुन्धत्यादिव्रजकिशोरिकाकुलादयोऽपि निर्जिता यया सा। जययोगाज्जया सा चासौ श्रियोऽप्यंशिनीत्वाच्छ्रीश्च जयश्रीः श्रीराधैव।

नारायणस्त्वम्

(भा० १०. १४. १४) इत्यादौ,

नारायणोऽङ्गम्

(तत्रैव) इत्यादिदिशा,

विष्णुर्महान्स इह यस्य कलाविशेषो
गोविन्दमादिपुरुषं तमहं भजामि ॥

(ब्रह्मसंहिता ५. ४८) इत्यादिदिशा च कृष्णस्य मूलनारायणत्वेन तत्प्रेयस्यास्तस्या

5. KB, KD वर्णिततन्माधुर्य० ; KP वर्णितं for वर्णित०. KP तदङ्गोपमान०. 9. KD तदङ्गुलिनखरा०. 10. KD तज्जन्यं सुखं. KB, KP वक्ष्यति. 13. KD ०जलकेलिषु सुरता०. 15. KB ०किशोरिकादयो०. 16. KP omits श्री in श्रीराधा. 20. KP inserts च after दिशा. 23. KP इति for इत्यादि. KC omits तस्याः.

अपि मूललक्ष्मीत्वात्। ईदृशी सापि स्वस्य लज्जाशीलत्वात्सदैवाधोमुखस्थित्या प्रथमं तच्छ्रीचरणनखदर्शनात्तच्छोभाब्धिमग्ननेत्रा मोहिता सती लीलया गाढानुरागेण ये भावोद्गारविशेषास्तैर्धर्ममर्यादालज्जादित्यागपूर्वको यः स्वयंवरस्तद्रसं लभते। तन्माधुर्याणां स्वानुरागस्य च प्रतिक्षणं नवनवत्वेनानुभवाद्वर्तमानप्रयोगः। केषांचिन्मते सोमगिरेरपि विशेषणं यत्पादेत्यादि। अत्र कामाद्यरिषड्वर्गचक्षुरादीन्द्रियपञ्चक्लेशोत्थद्विषष्ट्यन्तरायाणां जयसंपत्तिर्यत्पादनखावलम्बिनीत्यर्थः। किं वा, वर्त्मोद्देशगुरुर्मन्त्रगुरुः शिक्षागुरुरिति गुरुत्रयेष्टदेवस्मरणमिति। केचिदाहुः—अत्र चिन्तामणिः सा वेश्या जयति। तद्वाङ्मात्रेण स्वस्य जातानुरागत्वात्तस्याः सर्वोत्कर्षता (!) ॥१

अस्ति स्वस्तरुणीकराग्रविगलत्कल्पप्रसूनाप्लुतं
वस्तु प्रस्तुतवेणुनादलहरीनिर्वाणनिर्व्याकुलम्।
स्रस्तस्रस्तनिरुद्धनीविविलसद्गोपीसहस्रावृतं
हस्तन्यस्तनतापवर्गमखिलोदारं किशोराकृति ॥२

कृष्णवल्लभा

एवं भगवतः श्रीकृष्णस्य जयरूपं मङ्गलं निरूप्य लीलाशुकनामा कविः संप्रति वर्णनीयपरमरहस्यलीलातदुपकरणसहितस्य सच्चिदानन्दसान्द्रैकरसघनविग्रहस्य किशोराकृतेस्तस्यैव परमपुरुषार्थशिरोमणितां दर्शयितुं प्रतिजानीते—

1. KP कीदृशी for ईदृशी. KP अधोमुखी स्थित्वा. 2. KC सत्तच्छोभा०. 3. KD भावोद्गम०. 4-5. KD omits केषांचिन्मते. 5-6. KC, KP ०त्रिषयादि० for ०द्विषष्टि०; KD reads for the whole compound : कामादिषड्वर्गचक्षुरादीन्द्रियपञ्चाविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः क्लेशोत्थद्विषष्ट्यन्तरायाणां. See Vācaspati Miśra on Sāṃkhya-kārikā 48. 6. KP पादनखरा०. 16. GA ०लीलातदुपकरणसहितस्य; GB ०लीलातदुपकरणरहितस्य.

अस्तीति। वस्त्वस्तीति संबन्धः। वसति भक्तानां हृदये। तत्रैवाविर्भावात्। तथा चोक्तं बिल्वमङ्गले (द्वितीय शतक, श्लो० ८३)—

गोपालाङ्गनकर्दमे विहरसे विप्राध्वरे लज्जसे
ब्रूषे गोशतहुंकृतैः स्तुतिशतैर्मौनं विधत्से सताम्।
दास्यं गोकुलसुन्दरीषु कुरुषे स्वाम्यं न दान्तात्मसु
ज्ञातं कृष्ण तवाङ्घ्रिपङ्कजयुगं प्रेमैकलभ्यं परम्॥

यद्वा, वस्त आच्छादयति व्याप्नोति सर्वम्। एतेन पूर्णम्। वस्यन्ति स्वरूपतो रसचमत्कारतः प्रभातिशयाच्च स्तम्भोपलक्षितसात्त्विकमहाभावालिङ्गिताः सर्वे एव भवन्ति यस्मादिति वा। वस निवासे, वस आच्छादने, वसु स्तम्भे धातवः (धा० १. १०५४, २. १३, ४. १०५)। वसेरौणादिकस्तुन् (उणादिसूत्र १. ७६)। वस्तु परमार्थभूतं तापत्रयोन्मूलनात्।

विनाच्युताद्वस्तुतरां न वाच्यम् (भा० १०. ४६. ४३)
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् (भा० १. १. २)

इति च श्रीभागवते। अस्ति त्रिकालाबाध्यरूपेण वर्तते। न हि पूर्णभक्तानां कदाचिदपि तदभावं भवति। तर्हि किं वेदान्तवेद्यं निराकारं ब्रह्मैव प्रतिज्ञायते, न—किशोराकृति। किशोरी कैशोरविशिष्टाकृतिः श्रीमूर्तिर्यस्य तत्।

कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।
कैशोरमा पञ्चदशाद्यौवनं तु ततः परम्॥

(भक्तिरसामृत० २. १. १२०)। तत्र

आद्यं मध्यं तथा शेषं कैशोरं त्रिविधं भवेत्।

1. GB हृदीति तत्तस्य for हृदये. 2. On this passage from Bilvamangala, see Introduction p. xvii. 4. GB ०हुंकृते and श्रुतिशतैः. 6. GB प्रेमैकल्पं सदा. 7. GB इति पूर्णत्वमुक्तम् for एतेन पूर्णम्. 9. GB inserts इति before धातवः. 14. GA पूर्णभक्तीनां. 14-15. All words from इति च to तर्हि missing in GC. 15. GA (after correction) तद्भानं. GB omits किं. GB ब्रह्म for ब्रह्मैव. 16. GB नेत्याह for न. 20. GB मतं for भवेत्.

(तत्रैव १२३)। तत्राद्यं कैशोरम्—

वर्णस्योज्ज्वलता कापि नेत्रान्ते चारुणच्छविः ।
रोमावलिप्रकटता कैशोरे प्रथमे सति ॥

(तत्रैव १२४)। अथ मध्यमम्—

ऊरुद्वयस्य बाह्वोश्च कापि श्रीरुरसस्तथा ।
मूर्तेर्मधुरिमाद्यं च कैशोरे सति मध्यमे ॥

(तत्रैव १२६)। अथ शेषम्—

पूर्वतोऽप्यधिकोत्कर्षं बाढमङ्गानि बिभ्रति ।
त्रिवलिव्यक्तिरित्याद्यं कैशोरे चरमे सति ॥

(तत्रैव १२९) इति रसामृतसिन्धौ। यद्वा, किशोरं च तदकृति चेति। न विद्यते कृतिः करणं यत्र तदकृति। नित्यानन्दविग्रहत्वात्। किशोरं च तदाकृति चेति वा। आ ईषत्क्रियते ब्रह्मानन्दपर्यन्तमनेनेत्याकृति। ब्रह्मानन्दस्याभेदेनास्वाद्यमानत्वाद्भगवदानन्दस्य तु भेदेनास्वाद्यमानत्वाद् ब्रह्मानन्दाद्भगवदानन्दसिन्धोः परमोत्कर्षचमत्कारः शर्करातद्भोजिनोरिवेति भावः। तथोक्तं चतुर्थे (भा० ४. ९. १०)—

या निर्वृतिस्तनुभृतां तवपादपद्म-
ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भू-
त्किं त्वन्तकासिलुलितात्पततां विमानात् ॥

तथा च श्रुतयः (भा० १०. ८७. २१)—

दुरवगमात्मतत्त्वनिगमाय तवात्ततनो-
श्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः ।
न परिलपन्ति केचिदपवर्गमपीश्वर ते
चरणसरोजहंसकुलसङ्गविसृष्टगृहाः ॥

4. The folios of GA appear to be displaced here. GB reads तथा मध्यम् for अथ मध्यमम्. 11. GB omits अकृति after यत्र तत्. 14. GB तथा चोक्तं for तथोक्तं. 19. GB दशमे for च श्रुतयः. 20. GB cites only the first Pāda of the verse, followed by इति.

केचिदिति—

एवंभूता भक्तिरसिका विरलाः

इति व्याख्यातं श्रीधरस्वामिभिः (भावार्थदीपिका १०. ८७. २१=१०. ८७. १७ वङ्गीय सं०)। व्याख्यातं च सर्वज्ञैर्भाष्यकृद्भिः—

मुक्ता अपि लीलाविग्रहं कृत्वा भजन्ते

इति ।

मधुद्विट्-
सेवानुरक्तमनसामभवोऽपि फल्गुः ॥

इति पञ्चमे (भा० ५. १४. ४४)। तस्य सौन्दर्यस्यातिमनोहरत्वमाह—स्वस्तरुणी-कराग्रविगलत्कल्पप्रसूनाप्लुतम्। स्वरिति। स्वस्तरुण्यः स्वर्गतरुण्यः शचीप्रभृतय-स्तासां करेभ्यो विगलन्ति यानि कल्पप्रसूनानि। कल्पः कल्पतरुः। भीमो भीमसेनवत्। तस्य प्रसूनानि पुष्पाणि। तैराप्लुतं व्याप्तम्। यद्वा,

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥

इत्युक्तेः स्वः-शब्देन तृतीयलोकमारभ्योपरितनाः सर्व एव लोका गृहीताः। तेन तद्वर्तितरुण्यः सुखरूपा लक्ष्म्याद्यास्तासां करेभ्यो विगलन्ति यानि कल्पप्रसूनानि। कल्प्यन्तेऽमलाद्याकारेणेति कल्पानि तद्रूपाणि च यानि प्रसूनानि तैर् आ समन्ता-त्प्लुतं स्नातम्। विगलदित्यस्यायं भावः—परंपरयापि श्रीकृष्णस्पर्शो भवेदिति बुद्ध्या तत्संगमकामनया वा तदाराधनायाञ्जलिषु पुष्पाणि गृहीतानि, तदैवो-

1-3. GB omits all words from केचिदिति to श्रीधरस्वामिभिः. 4-6. The line व्याख्यातं च up to इति also occurs in Śrīdhara's commentary, *loc. cit.* 9. GB तत्सौन्दर्यस्य. 9-10. GB स्वस्तरुणीति for all the words from स्वस्तरुणी० to स्वरिति. 10. स्वस्तरुण्यः lost in GA. GC स्वर्गताः for स्वर्ग-. GB अप्सरसः for स्वर्गतरुण्यः शचीप्रभृतयः. 11-12. GB omits all words from कल्पः to पुष्पाणि. 13. This verse is cited in Jhalakikara's Nyāya-kośa, p. 1059 (Bombay 1928). 14. GB अभिलाषोपपन्नं. 15. GB गृह्यन्ते for गृहीताः. 18. GB inserts अपि after श्रीकृष्णस्पर्शः. 19. GA तत्सङ्गकामनया.

परिनिहितलोचनश्रीकृष्णमुखावलोकनेन जनितपरमानन्दनिःस्यन्दसात्त्विकभावानां स्वचिकीर्षितप्रसूनवर्षविस्मृतौ कराग्रात्प्रसूनानां विगलनम्, भगवतश्च भक्तकामपूरकत्वाद्विगलत्तामपि प्रसूनानां स्वीकारः। संप्रति वेणुनादेन विश्वमोहकत्वमाह—प्रस्तुतवेणुनादलहरीनिर्वाणनिर्व्याकुलम्। प्रस्तुतः प्रारब्धस्तत्तद्विचित्ररागादिरूपाण्युत्थापयितुम्। प्रस्तुतस्तत्तत्प्रस्तावोचितो वा। संकेतनर्मादौ यो वेणुनादो वेणोर्वंशीभेदस्य नादस्तस्य लहरी ग्रामस्तत्र यन्निर्वाणं मूर्छना तेन निर्व्याकुलं नितरां व्याकुलयति मोहयति तत्।

निर्वाणं च सुखे मोक्षे मूर्छनायां च मुक्तके

इति नानार्थः। लहरी सुव्यवस्थितसमूहः।

स्वराणां सुव्यवस्थानां समूहो ग्राम इष्यते

इति। स च त्रिधा—षड्जग्रामो मध्यमग्रामो गान्धारग्रामश्चेति।

षड्जः स्वराणां जनको यतः स्याद्ग्रामे ततो मुख्यतयैष एव।
रागेषु सग्रामजनित्वमेव दृष्टं ततो ग्रामयुगं न हीष्टम्।
आरोहणं च क्रमशोऽवरोहः सप्तस्वराणामिति मूर्छनोक्ता॥

तथा च—

सप्त स्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः।
स स्वरो यः श्रुतिस्थाने स्वनन् हृदयरञ्जकः॥
स्वरः संमूर्छितो यत्र रागतां प्रतिपद्यते।
मूर्छनामिति तामाह भरतो ग्रामसंभवाम्॥

इति। तत्र वंशो यथा—

वर्तुलः सरलश्चैव पर्वदोषविवर्जितः।
वैणवः खादिरो वापि रक्तचन्दनजोऽथवा॥

1. GB चोपरि० for उपरि०. निहितलोचन lost in GA. 2. GA भक्तिविषयक० for भक्त०. 3. GB omits अपि before प्रसूनानां. 4. GB reads प्रस्तुतेति for the whole phrase प्रस्तुत etc. 4-5. All words from प्रस्तुतः to उत्थापयितुं lost in GA. 5. GB उपस्थापयितुं for उत्थापयितुं, and उपक्रान्तः for प्रस्तुतः. 6. GA तज्जनित- for तत्र यन्निर्वाणं. GB omits निर्व्याकुलं. 7. GB inserts इति before तत्. 10. GA drops स्वराणां सु. 21. See footnote p. 17.

श्रीखण्डजोऽथ सौवर्णो हस्तिदन्तमयोऽथवा ।
राजतस्ताम्रजो वापि लोहजः स्फाटिकोऽथवा ॥
कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोधितः ।
वंशभेदास्तु बहवो लिख्यन्ते विस्तरान्न हि ॥

इति । तत्र चत्वार उत्तमा वंशाः—

महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा ।
चत्वार उत्तमा वंशा मातङ्गमुनिसंमताः ॥
दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः ।
द्वादशाङ्गुलमानस्तु विजयः परिकीर्तितः ।
चतुर्दशाङ्गुलमितो जय इत्यभिधीयते ॥

एष त्रिधा भवेद्वेणुर्मुरली वंशिकेत्यपि ।

(भक्तिरसामृत० २. १. १४६-१४७) । तत्र वेणुः —

पाविकाख्यो भवेद्वेणुर्द्वादशाङ्गुलदैर्घ्यभाक् ।
स्थौल्येऽङ्गुष्ठमितः षड्भिरेष रन्ध्रैः समन्वितः ॥
हस्तद्वयमितायामा मुखरन्ध्रसमन्विता ।
चतुःस्वरा छिद्रयुक्ता मुरली चारुनादिनी ॥

(तत्रैव) । वंशी—

अर्धाङ्गुलान्तरोन्मानं तारादिविवराष्टकम् ।
ततोऽङ्गुलान्तरे यत्र मुखरन्ध्रं तथाङ्गुलम् ॥
शिरो वेदाङ्गुलं पुच्छं त्र्यङ्गुलं सा तु वंशिका ।
नवरन्ध्रा स्मृता सप्तदशाङ्गुलमिता बुधैः ॥
दशाङ्गुलान्तरा स्याच्चेत्सा तारमुखरन्ध्रयोः ।
महानन्देति विख्याता तथा संमोहनीति च ॥

5. GA omits इति. 6. तथा lost in GA. P. 16, l. 21-22, and 1-4, also 6-10. According to the Śabda-kalpadruma, which cites these two passages, they are from the Saṃgīta-dāmodara : they are not traceable in the Saṃgīta-darpaṇa of Dāmodara (Pt I, ed. Sourindra Mohan Tagore, Calcutta 1881). 23. GB संमोहिनी.

भवेत्सूर्यान्तरा सा चेत्तत आकर्षणी मता ।
आनन्दिनी तथा वंशी भवेदिन्द्रान्तरा यदि ॥
गोपानां वल्लभा सेयं वंशुलीति च विश्रुता ।
क्रमान्मणिमयी हैमी वैणवीति त्रिधा च सा ॥

(तत्रैव २. १. १४९-१५३) इति । यद्वा, प्रस्तुतः प्रकृष्टतया स्तुतो गोपीभिर्वेणुरिति । अयं वेणुर्धन्यो यः स्वच्छन्दं श्रीगोविन्दाधररसं पिबन्नुन्मदो मुहुर्मुहुर्मधुरं शब्दायते । यथा चोक्तं श्रीभागवते (१०. २१. ९)—

गोप्यः किमाचरदयं कुशलं स्म वेणो-
र्दामोदराधरसुधामपि गोपिकानाम् ।
भुङ्क्ते स्वयं यदवशिष्टरसं ह्रदिन्यो
हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथार्याः ॥

इति । तस्य वेणोर्नादस्तस्य लहरीभिस्तरङ्गैर्निर्वाणा मुक्ताः । निर्गतो बाणो वेधको येभ्यः । येषां हृदयं वेद्धुं केऽपि न शक्नुवन्ति तेऽपि । निर्व्याकुला नितरां व्याकुला यस्मात् । उक्तं च श्रीदशमे (भा० १०. ३५. १४)—

विविधगोपचरणेषु विदग्धो
वेणुवाद्य उरुधा निजशिक्षाः ।
तव सुतः सति यदाधरबिम्बे
दत्तवेणुरनयत्स्वरजातीः ॥

सति यशोदे । स्वरजातीर्निषादर्षभादिस्वरालापभेदान् (भावार्थदीपिका) ।

सवनशस्तदुपधार्य सुरेशाः
शक्रशर्वपरमेष्ठिपुरोगाः ।
कवय आनतकन्धरचित्ताः
कश्मलं ययुरनिश्चिततत्त्वाः ॥

इति (भा० १०. ३५. १५) । तत्ताः स्वरजातीः सवनशो मन्द्रमध्यतारभेदेन

8. GC does not quote the entire verse but cites simply गोप्यः किमाचरदिति. 12. GB omits इति. 13. GB inserts ते after येभ्यः. 14. GC omits श्री in श्रीदशमे. 16-18. GC omits from उरुधा to स्वरजातीः.

(भावार्थदीपिका)। तस्य परमरसिकत्वमाह— स्रस्तस्रस्तनिरुद्धनीविविलसद्गोपीसहस्रावृतम् । स्रस्ता स्रस्ता श्रीकृष्णसौन्दर्यावलोकनान्महाकामविवशतया पुनः पुनः स्रस्ता निरुद्धा च या नीविर्वस्त्रग्रन्थिस्तया विलसन्तीनां विशेषेण लसन्तीनां शोभमानानां गोपीनां सहस्रैरावृतम् आ समन्ताद्वृतं वेष्टितम् । निरुद्धेत्यनेन ग्रन्थिमोचने जाते पुनर्बन्धनसामर्थ्यं नास्त्येवेति करेण रोधमात्रमुक्तम् । उक्तं हि श्रीदशमस्कन्धपञ्चाध्याय्याम् (१०. २९. ४६)—

बाहुप्रसारपरिरम्भकरालकोरु-
नीवीस्तनालभननर्मनखाग्रपातैः ।
क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणा-
मुत्तम्भयन् रतिपतिं रमयांचकार ॥

इति । तस्य परमपुरुषार्थप्रदत्वमाह—हस्तन्यस्तनतापवर्गम् । हस्ते न्यस्तो नतानां भक्तानामपवर्गो मोक्षः कार्यावसानसाकल्यं वा येन तत् । परमकारुणिकत्वेन भक्तकामपूरकत्वात् । यद्वा, नतानां भक्तानां हस्ते न्यस्तोऽर्पितोऽपवर्गो मोक्षो येन । मद्भक्ता अपि मोक्षं दातुं समर्था इति भावः ।

स्यादपवर्गस्त्यागे मोक्षे कार्यावसानसाकल्ये

इति मेदिनी (गान्त० ४१) । सर्वप्रकारेणोत्कृष्टत्वमाह—अखिलोदारम् । अखिलेभ्यो ब्रह्मरुद्रादिभ्य उदारं महत् । तत्सेव्यमित्यर्थः । सर्वशक्तिमत्त्वात् । यद्वा, अखिलस्य सर्वस्योदारं ज्ञातृ । सर्वज्ञमित्यर्थः । प्रकरणादखिलासु सर्वासु गोपीषूदारं दक्षिणं वा ।

उदारो ज्ञातृमहतोर्दक्षिणेऽपि च

[इति] मेदिनी (रान्त० ११७) ॥ शार्दूलविक्रीडितं छन्दः—

अर्काश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् (छन्दोमञ्जरी २) ॥२

1. GB does not cite the whole Pratīka स्रस्तस्रस्त० but reads only स्रस्तेति. 3. GB, GC omits विशेषण लसन्तीनां. 4. GB omits वृतं. 6. GB श्रीदशमे only ; GC श्रीदशमे पञ्चाध्याये. 7. GC does not quote the whole verse but cites बाहुप्रसारेति only. 11. GC हस्तेति for हस्तन्यस्तनतापवर्गम्. 12-13. GC omits haplologically all words from अपवर्गो to भक्तानां. 16. GC omits अखिलोदारं. 18. GB omits सर्वासु.

सुबोधनी

एवं ब्रुवन्नन्तरुद्यदुत्कण्ठावेशात्पुरः स्फुरन्तं सपरिकरं श्रीकृष्णं पश्यन्निवाह— अस्तीति। वस्त्वस्ति। वसन्त्यस्मिन्नन्तर्भवन्ति प्राकृताप्राकृताः सर्व इति वस्तु सर्वाश्रयं किमपि। अस्ति नित्यं विराजते। वृन्दावन इति शेषः। किं निर्विशेषं ब्रह्म, न—किशोरी प्रोद्यन्नवयौवनाकृतिः स्वरूपं यस्य तत्। तर्हि किं नारायणः, न—अखिलेष्ववतारेषूदारं तदवतारि महत्। तदेव विशेषयन्नाह—प्रस्तुता वादिता ये वेणोर्नादास्तेषां लहर्यः स्वरग्राममूर्छनादिरूपास्तरङ्गास्तासु निर्वाणं मनआदीनां लयस्तेन निर्व्याकुलं तदानन्दावेशेन विवशमित्यर्थः। वेणुवादनवैशिष्ट्यं न विशेषान्तरमाह—तदाकृष्टानां स्वःस्त्रीणां तद्दर्शनविवशानां कम्पमानकराग्रेभ्यो विगलन्ति यानि कल्पप्रसूनानि तैराप्लुतं परितोऽन्वितम्। तथैव सर्वोपमर्द्यसाधारणवैशिष्ट्यमाह—स्रस्ता वेणुनादश्रवणावेशेन स्थानाद्गलिताः पुनर्बद्धा अपि स्रस्ताः,

2. Before एवं CC inserts श्रीराधाकृष्णाय नमः ॥. CB, CD omit all words from एवं to पश्यन्निवाह and read instead : अथ गुरुमेव (CD शिक्षागुरुमेव) निजेष्टदेवरूपं (CD निजेष्टदेवतत्वेन) निरूपयिष्यन् गाम्भीर्यस्वाभाव्येन सामान्यतो निर्दिशन्नाह. 3. CB, CD omit all words from वस्त्वस्ति to वस्तु and read instead : वसन्ति प्राकृताः सर्वेऽस्मिन्निति वस्तु. 4. CB, CD श्रीवृन्दावने. 4-5. CB, CD तत्कीदृशं for किं निर्विशेषं ब्रह्म, न. 5-6. CB, CD पुनः कीदृशं for all words from तर्हि to न. 6. CB, CD omit all words from अवतारेषु to विशेषयन्नाह and read instead अप्राकृतेषूदारं (CD प्रादुर्भावेषू०) सर्वाभीष्टदातृ। तदेवोपपादयति—हस्ते न्यस्तोऽर्पितो नतानां कृतप्रणाममात्राणामपवर्गो मोक्षो भक्तियोगश्च येन तथा (CD तत्तथा). CC तद्व्यञ्जकवैशिष्ट्यमाह for तदेव विशेषयन्नाह. CD च for वादिता. 7. CD वेणुनादाः for वेणोर्नादाः. CB, CD insert या before लहर्यः. CA omits तरङ्गाः. CC तेषु for तासु. 8. CC तदावेशविवशं. CD तदावेशेन. CB, CD निश्चलं for विवशं. 8-9. CB, CD omit all words from वेणुवादन० to आह, and read instead अतएव. 8. CA ०वाद० for वादन०. 9. CC वैशिष्ट्यान्तरं for विशेषान्तरं. CB, CD तन्नादा० for तदा०. CB, CD omit तद्दर्शनविवशानां. 10-11. CB, CD omit all words from परितोऽन्वितं to ०वैशिष्ट्यमाह and read instead : व्याप्तम्। तथा (CD स्रस्ता). 10. CC सर्वोपमाद्य०. 11. CC ०वैशिष्ट्यावधि for ०वैशिष्ट्यं. CB, CD निरुद्धाः for बद्धा अपि स्रस्ताः.

अतः करेण निरुद्धा नीव्यो यासां ताश्च। वयःसौन्दर्यवैदग्ध्यानुरागाद्यैर्विलसन्त्यश्च या गोप्यस्तासां सहस्रैरावृतम्। अतः स्वस्य लीलाविशिष्टतया हस्ते न्यस्तोऽर्पितो नतानां भक्तानामाधुनिकाश्रितसमाधानार्थमपवर्गो मोक्षो भक्तियोगश्च येन ॥२

सारङ्गरङ्गदा

अथ पथि पथ्यागच्छतोऽस्य बाह्यदशायां साधकरीत्योत्कण्ठया भक्तिसिद्धान्तोद्गारिणी तत्कालमेवान्तरावेशात्सिद्धवल्लालसया केवलरसोद्गारिण्युक्तिः। अतस्तद्दशाद्वयवासित्वादेकैव सार्थद्वयमुद्गिरति। तत्रान्तर्दशोत्थार्थो विवृत्य बाह्यदशोत्थार्थस्तु संक्षिप्य मया दर्शयितव्यः। यद्यप्युन्मादप्रलापेऽत्र तस्य तत्तदनुसंधानादिकं नास्ति तथापि शुद्धप्रेमैव भक्तिसिद्धान्तं रसं चाविरुद्धमेव स्फोरयति। शुद्धप्रेम्णः स्वभावोऽयं यत्सिद्धान्तविरुद्धं रसाभासं वा मोहोन्मादादावपि न स्पृशति। तत्र प्रथमं गच्छन्तं तमनुगच्छतां वैष्णवानां स्वामिन्किमर्थं त्वया गम्यते किं तत्रास्तीति प्रश्नात्तान्प्रति प्राभववैभवांशावतारशक्त्यावेशावतारादिस्वविलास-बाल्यपौगण्डादिस्वप्रकाश-रूप-स्वस्वरूपाणां तथा चिच्छक्तेस्तद्विलासानन्तवैकुण्ठानां मायाशक्तेस्तद्वैभवानन्तब्रह्माण्डानां जीवशक्तेश्च परमाश्रयभूतं तं श्रीभागवतादावाश्रयत्वेनोक्तं सर्वोत्तमं सर्वभजनीयं परतत्त्वरूपं वस्तु निरूपयंस्तत्कालमेवान्तरावेशात्तादृशं श्रीकृष्णं पुरः स्फुरन्तं विलोक्य प्रलपन्नाह—अस्तीति। अस्य बाह्यार्थः—किमपि वस्त्वस्ति सदा विराजते। श्रीवृन्दावन इति शेषः।

1. CC omits from ण (in करेण) to वयःसौन्दर्य. CB, CD omit अतः करेण निरुद्धाः. 1-3. CB, CD omit all words from नीव्यो यासां to भक्तियोगश्च येन and read instead : स्रंसनाभिवारिता या नीव्यस्ताभिः शोभितानां गोपीनां सहस्रैरावृतम्; CB continues : यतोऽखिलासु तासूदारमुदारचेष्टितमिति वा. 3. CA ०समानार्थं for ०समाधानार्थं 5. KC गच्छतो० for आगच्छतो०. 7. KD ०वासितत्वात् for वासित्वात्; KB एकत्रैव for एकैव. KB, KC अत्रान्तर्दशोत्थोऽर्थो. 7-8. KB बाह्यदशोत्थोऽर्थः. KP यद्युन्माद०. 9. KC स्फोटयति. 11. KC अत्र for तत्र. KP प्रथमः. KB omits तं. 12. KP किं त्वत्रास्ति. KP reads प्रश्नान् and omits तान्. 13. KB ०रूपस्वरूपाणां. 14. KP परमाश्रयभूतानां. 15. KC परमतत्त्व०. 16. KC omits अस्तीति. KB ०वृन्दावनविहारी for वृन्दावने.

वसन्त्यस्मिन्प्रागुक्तानि, तथा वसति कालत्रयेऽप्येकरूपतया दीव्यति, इत्यर्थद्वयेऽप्यौणादिकतुन्-प्रत्ययाद् (उणादिसूत्र १. ७६) वस्तु। सामान्यनिर्देशान्नपुंसकत्वम्। ननु किं निराकारं ब्रह्म, नेत्याह—किशोराकृति। किशोरी प्रोद्यन्नवयौवनाकृतिः स्वरूपं यस्येति जीववद्देहदेहिभेदो निरस्तः। तथा हि श्रीभागवते (१. १. २)—

वेद्यं वास्तवमत्र वस्तु

इति,

विनाच्युतं वस्तु परं न वाच्यम्

इति (भा० १०. ४६. ४३)

नातः परं यद्भवतः स्वरूपम्

इति च (भा० ३. ९. ३)। ननु भगवद्रूपाणि सर्वाण्येव किशोराकृतीनि तत्र कतरदिदमित्यत्राह—प्रस्तुतवेण्विति। रासे व्रजसुन्दरीणामाकर्षणार्थं प्रस्तुता ये वेणोर्नादास्तेषां या लहर्यः स्वरग्राममूर्छनादिरूपास्तरङ्गास्तज्जन्यं यन्निर्वाणं परमानन्दस्तासु मनआदीनां लयो वा तेन निर्व्याकुलम्। निरित्यव्ययमभावार्थः। अव्याकुलमित्यर्थः। निर्मक्षिकवद्व्याकुलेभ्यो निर्गतमिति वा। तत्र मग्नचित्तादित्वान्निश्चलमित्यर्थः।

निर्वाणं सुखमोक्षयोः

इति विश्वात्। तथा सायं पुष्पाण्यवचिन्वत्यस्तन्नादाकृष्टा याः स्वस्तरुण्यस्तासां तन्माधुर्यदर्शनविवशानां कम्पमानकराग्रेभ्यो विगलन्ति यानि कल्पप्रसूनानि कल्पतरुपुष्पाणि तैराप्लुतम्। प्रेमवैवश्यात्कल्पतरुस्थाने कल्प इत्युक्तिः। किं वा, साहचर्यबलादेकदेशेनापि पदार्थो बोध्यते। तथा—स्रस्तस्रस्ता वेणुनादश्रवणाद्गुरुभर्तृपुरत एव स्रस्ता लज्जाभयतः स्वस्थाने बद्धा अपि पुनः स्रस्ताः, अतः करेण रुद्धाः।

1-2. KP इत्यर्थद्वयोरप्यौ०. 3. KP प्रत्यहं for प्रोद्यत्-. 7. KP विनाच्युताद्वस्तुतरां न. 11. KP इत्यत्र for तत्र. 13. KP स्वरग्रामास्त्रयो मूर्छनास्त्वेकविंशतिरूपास्तरङ्गा०. 14. KC, KP च for वा. 16. The quotation is not found in the printed text of the Viśvakośa. 18. KB, KD omit कल्पप्रसूनानि. 21. KB, KP ०भर्तृपुर एव. KB निरुद्धाः for रुद्धाः.

कासांचित्तद्बन्धनकालविलम्बासहिष्णुत्वात्कराभ्यां निरुद्धा नीव्यो यासां ताश्च वयःसौन्दर्यवैदग्ध्यानुरागाद्यैर्विलसन्त्यश्च या गोप्यस्तासां सहस्रैरावृतं परितो वेष्टितम्। अतः श्रीभागवतोक्तरासविलासारम्भि श्रीकृष्णरूपं तद्वस्तु, न त्वागमध्यानोक्तम्। अन्येषामावरणानामत्राग्रेऽप्यनुक्तत्वात्। तथा— हस्ते न्यस्तो नतानां स्वभजनोन्मुखानामपवर्गः स्वपार्षदरूपानन्ददेहदानेन लिङ्गदेहभङ्गो येन। तदुक्तम् (भा० ११. २९. ३४)

मर्त्यो यदा त्यक्तसमस्तकर्मा

इत्यादौ। यद्वा, अपवर्गः प्रेमभक्तियोगो येन। तथा पञ्चमस्कन्धे गद्यम् (भा० ५. १९. १९) —

यथावर्णविधानमपवर्गश्च भवति

इत्यत्र भक्तियोगलक्षण इति। तथैव व्याख्यातं श्रीस्वामिचरणैः। तथाखिलेभ्यः कल्पवृक्षादिभ्य उदारम्। वाञ्छातिरिक्तदातृत्वात्। तथा हि (भा० ५. १९. २७)—

स्वयं विधत्ते भजतामनिच्छता-
मिच्छापिधानं निजपादपल्लवम् ॥

इति। किं वा, अखिलैर्भजनीयनायकसद्गुणैरुदारमुत्तमम्॥ अन्तर्दशोत्थस्त्वेवम् —इदं किमपि वस्त्वस्ति पुरो विराजते। वसन्त्यस्मिन्सौन्दर्यमाधुर्यवैदग्ध्यादिसद्गुणादीनीति वस्तु। यद्वा, वस्ते स्वमाधुर्यवेणुगीतादिजनितमोहमूर्छादिभावैरात्मारामाद्यप्राणिपर्यन्तानां विशेषतः स्त्रीणां ततोऽपि नितरां व्रजसुन्दरीणां चित्त-

1. KB कासांचिद्बन्धन०. 2-3. KD omits परितो वेष्टितम्. 4. KC inserts अपि before अग्रे. KP हस्तेन. 7. KB, KD cite all the four pādas of the verse. 8. KB inserts च after तथा and reads वाक्यं for गद्यं. 10 KP वर्णा० for यथावर्णा०. 11. KC ०योगलक्षणं. KC व्याख्यातं च तथा for तथैव व्याख्यातं. KB inserts च before अखिलेभ्यः. 12. KB तदुक्तं for तथा हि. 13. KC, KP quote only the first pāda. 15. KC, KP इत्यादि for इति. KC, KP omit भजनीय, and read महदत्युत्तमं for उत्तमं. KD अन्तर्दशोत्थार्थस्त्वेवम्. 17. KC, KD omit इति before वस्तु. KC inserts च सन्तति (?) after वस्ते. 17. KB ०मूर्छादिविभावैः. 18. KP आत्मारामादिभ्यः प्राणपर्यन्तानां. KP अतितरां for नितरां.

माच्छादयतीति वस्तु। कीदृशम्—किशोराकृति। तथा, साध्व्यः परतन्त्रा गोप्यः कथमेष्यन्ति कथं वा रासो भवेदिति व्याकुलमपि वेणुनादलहरीभिर्यन्निर्वाणं तदाकृष्टवल्लवीनां काञ्चीनूपुरादिध्वनिश्रवणजानन्दस्तेन निर्व्याकुलमव्याकुलम्। तथा, हस्ते न्यस्त इच्छया वेणुनादेनैव संपादितो नतानां स्वचरणाश्रयोन्मुखीनां तासां गुर्वादिवारणधर्मलज्जादिशृङ्खलाभ्यो मोक्षो येन। तदुक्तम्—

या माभजन्दुर्जरगेहशृङ्खलाः
संवृश्च्य

(भा० १०. ३२. २२) इत्यादौ। अखिलासु वल्लवीषूदारं तत्तदभीष्टविलासपूर्त्या सर्वमनोरथदातृ। तदुक्तं श्रीजयदेवैः (गीतगोविन्द १. ४८)—

विश्वेषामनुरञ्जनेन

इत्यादौ। किं वा, अखिलैर्भजनीयसद्गुणैरुदारं महदत्युत्तममित्यर्थः। अन्यत्समम्॥—

आकृष्य राधां व्रजसुभ्रुवां गणाद्रङ्ग्या तया गूढविलासलाभतः।
कुञ्जे रसास्वादविशेषलब्धये प्रारम्भि रासो रसिकेन्द्रमौलिना॥
पश्चान्मया बाह्यदशोत्थमर्थं संगृह्णतादावपि वक्तुमर्हम्।
अन्तर्दशोत्थः सविशेषमर्थः पूर्वं निजेष्टः किल कथ्यतेऽसौ॥

अथास्य तद्वेश्यावक्त्राच्छ्रीराधायाः श्रीकृष्णानुरागादिश्रवणजातलोभत्वाद्रागानुगामार्गेणैव भजनम्। तत्र रागानुगामार्गेऽनुत्पन्नरतिसाधकभक्तैरपि स्वेप्सितसिद्धदेहं मनसि परिकल्प्य भगवत्सेवादिकं क्रियते। जातरतीनां तु स्वयमेव

1-2. KP reads ननु गोप्यः for तथा and omits गोप्यः before कथं. 2. KB, KC, KP व्याकुलः for व्याकुलं. KD प्रस्तुतवेणुनाद०. KP insert तथा before वेणु०. 1-2. KC reads the sentence beginning with साध्व्यः and ending with भवेदिति after अव्याकुलम्. 3. KP कृष्णा० for आकृष्ट०. 4. KD, KP omit अव्याकुलं. KP inserts च after तथा. 5. KP inserts अपवर्गः before मोक्षः. 8. KB सुन्दरीषु, KP वल्लीषु for वल्लवीषु. 9. KP जयदेवचरणैः. 11. KB नायक०, KD भजनीयनायक० for भजनीय०. KC omits अति before उत्तमे. 14. KC संगृह्णता. 16. KP तथास्य for अथास्य, and कृष्णे for श्रीकृष्णा-. 16-17. KP omits रागानुगामार्गेणैव भजनम् तत्र. 17. KC अत्र for तत्र.

तद्देहस्फूर्तिः। अस्य तूत्पन्ना मधुरजातीया रतिः क्रमेणानुरागदशां प्राप्तास्ति, अतस्तद्देहस्फूर्तिः सदैव। यथा रसामृतसिन्धौ (१. २. ६१, ६०, ७५-७७)—

इष्टे स्वारसिकी रागः परमाविष्टता भवेत्।
तन्मयी या भवेद्भक्तिः सात्र रागात्मिकोच्यते॥
विराजन्तीमभिव्यक्तं व्रजवासिजनादिषु।
रागात्मिकामनुसृता या सा रागानुगोच्यते॥
रागात्मिकैकनिष्ठा ये व्रजवासिजनादयः।
तेषां भावाप्तये लुब्धो भवेदत्राधिकारवान्॥
तत्तद्भावादिमाधुर्ये श्रुते धीर्यदपेक्षते।
नात्र शास्त्रं न युक्तिं च तल्लोभोत्पत्तिलक्षणम्॥

इति। तथोज्ज्वलनीलमणौ (स्थायिभावप्रकरण ५३-५४)—

स्याद्दृढेयं रतिः प्रेमा प्रोद्यन्स्नेहः क्रमादयम्।
स्यान्मानः प्रणयो रागोऽनुरागो भाव इत्यपि॥
बीजमिक्षुः स च रसः स गुडः खण्ड एव सः।
स शर्करा सिता सा च सा यथा स्यात्सितोपला॥

इति। तत्रानुरागलक्षणम् (तत्रैव १३४)—

सदानुभूतमपि यः कुर्यान्नवनवं प्रियम्।
रागो भवन्नवनवः सोऽनुराग इतीर्यते॥

इति। तथैवाग्रे व्यक्तीभविष्यति॥२

1. KP ०देहस्फूर्तेः. 1-2. KB प्राप्ता ततस्तद्देह०; KP प्राप्तास्ततस्तद्देह०. 2. KD रसामृते. 11. KB, KD यथा, KP अथ for तथा. 14. KP गूडः. 15. KP सा शर्करा. KC, KP सा स्यात् for सा च. 17. KP कुर्वन् for कुर्यात्. 18. KB भवेत् for भवन्. 19. After अग्रे KB inserts सर्वत्र, KD सर्वं.

चातुर्यैकनिदानसीमचपलापाङ्गच्छटामन्थरं
लावण्यामृतवीचिलोलितदृशं लक्ष्मीकटाक्षादृतम् ।
कालिन्दीपुलिनाङ्गनप्रणयिनं कामावताराङ्कुरं
बालं नीलममी वयं मधुरिमस्वाराज्यमाराध्नुमः ॥३

कृष्णावल्लभा

इदानीं प्रतिज्ञातस्यैव सच्चिदानन्दसान्द्रैकरसघनमूर्तेः श्रीकृष्णस्य परमाराध्यत्वं दर्शयति—चातुर्येति । अमी वयं नीलं बालमाराध्नुमः । अमी इति भावनावेशेन हृदि साक्षात्कृतपरमानन्दविग्रहाः । वयमिति सहचराः, एकयूथाभिप्रायेण । नीलं श्यामं फुल्लेन्दीवरकान्तम् । शृङ्गाररससर्वस्वमित्यर्थः । शृङ्गाररसस्य श्यामत्वात् ।

शृङ्गारः श्यामवर्णोऽयं कथितः कृष्णदैवतः

इति संगीते । बालं किशोरम् ।

आ षोडशाद्भवेद् बालः

इत्युक्तेः । बलते संभजते गोपीकदम्बमिति वा । ज्वलादित्वादण् (पा० ३. १. १४०) । आराध्नुमः आराधयामः । कीदृशम्—चातुर्यैकनिदानसीमचपलापाङ्गच्छटामन्थरम् । चातुर्यं चतुरता तस्यैकं मुख्यं निदानं कारणं तस्य सीमावधिभूता चासौ चपलापाङ्गच्छटा नेत्रान्तकान्तिपरंपरा तया मन्थरयति स्तम्भयति व्रजवल्लवीस्तम् । स्तम्भोपलक्षितसात्त्विकभावयुताः करोतीत्यर्थः । यद्वा, चातुर्यमेकं मुख्यं निदानं कारणं तस्य सीमा अवधिभूता याश्चपलापाङ्गच्छटाः । चपलावद्विद्युदिव वर्तमानानां गोपसुन्दरीणामपाङ्गास्तेषां छटास्तरङ्गाः । छुट छेदार्थः (धा० ६. ८४) । औणादिकाप्रत्यये उदञ्चेति उकारस्याकारः सिद्धः । ताभिर्मन्थरं मन्थानद्रव्यवत्संक्षुब्धम् । एतेन लीलाविग्रहस्य दधिपात्रता ध्वन्यते ।

1. PS ०निधान० for ०निदान०. 2. PS ०लालित० for ०लोलित०. 8. GA सहचरानेकयूथ०. 13. GA inserts बालं after वा. 14. GB does not cite the whole pratīka but only चातुर्येति. 18. GB विद्युद्वत् for विद्युदिव. 20. GA उदञ्चेति. GA, GB उकारस्याकारो. GA सिद्धम्.

मन्थरः कोषफलयोर्बन्धे मन्थानशैलयोः ।
कुसुम्भ्यां न द्वयोर्मन्दे पृथौ वक्रेऽभिधेयवत् ।।

इति मेदिनी (रान्त० १९८)। अथ वा, चातुर्दस्यैकं निदानं व्रजसुन्दरीसंघस्तस्मिन्सीमा, अर्थाद् राधा, तस्याश्चपलापाङ्गच्छटामन्थरम् । सीमा त्वादिपुराणे—

त्रैलोक्ये पृथिवी धन्या तत्र वृन्दावनं पुरी ।
तत्रापि गोपिकाः पार्थ तत्र राधा तनुर्मम ।।

इति । पुनः कीदृशम्—लावण्यामृतवीचिलोलितदृशम् । लावण्यमेवामृतं तस्य वीचिभिस्तरङ्गैर्लोलिते विमर्दिते दृशौ यस्य । यद्वा, लावण्यामृतस्य वीचिर्ययोस्तादृश्यौ लोलिते च दृशौ यस्य तम् । लुल विमर्दे सौत्रः (धा० १. ३३६)। णिचि सिद्धम् । अत्र स्निग्धा दृष्टिः, यथा (संगीतरत्नाकर ७. ३९७)—

विकाशिस्निग्धमधुरा चतुरे बिभ्रती भ्रुवौ ।
कटाक्षिणी साभिलाषा दृष्टिः स्निग्धाभिधीयते ।।

लावण्यलक्षणं यथा रसामृतसिन्धौ

मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु लावण्यं तदिहोच्यते ।।

पुनः कीदृशम्—लक्ष्मीकटाक्षादृतम् । लक्ष्मीः श्रीराधा । उक्तं च मत्स्यपुराणे (१३. २६, ३५, ३८)—

वाराणस्यां विशालाक्षी विमला पुरुषोत्तमे ।
रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने ।।

1. GA वधे for बन्धे. 4. GB आदित्यपुराणे. 5. This verse does not occur in the printed text (ed. Veṅkaṭeśvara Press, Bombay Śaka 1829 = A.D. 1907) of the Ādi-purāṇa. Also cited from the Ādi-purāṇa by Kṛṣṇadāsa in his Caitanya-caritāmṛta Ādi iv, 216. 7. GB cites only लावण्येति for the whole pratīka लावण्यामृत etc. 9. GC omits णिचि सिद्धम्. 10. GB omits अत्र. 14-15. This verse does not occur in the printed text of the Bhakti-rasāmṛta, but is found in the Ujjvala-nīla-maṇi, Uddīpana-prakaraṇa, verse 26, and in the Rasārṇava-sudhākara of Siṅgabhūpāla (ed. Trivandrum 1916), i. 181 (p. 41). 16. GB लक्ष्मीति for लक्ष्मीकटाक्षादृतम्. GB मात्स्ये for मत्स्यपुराणे.

इति। तस्याः कटाक्षेणादृतं महागौरवपात्रीकृतम्। राधायाः कटाक्षेण परमादरं मन्यत इत्यर्थः।

अपाङ्गौ नेत्रयोरन्तः कटाक्षोऽपाङ्गदर्शने

इत्यमरः (२. ६. ९४)। तथा च संगीतरत्नाकरे (७. ३९६)—

यद्गतागतविश्रान्तिवैचित्र्येण विवर्तनम्।
तारकायाः कलाभिज्ञास्तं कटाक्षं प्रचक्षते॥

इति। यद्वा, लक्ष्मीं कटाक्षयन्ति स्वसौभाग्येनेति लक्ष्मीकटाक्षाः श्रीराधाद्या गोप्यस्ताभिरादृतम्। दृगङ्गभङ्गीभिः सेवितमित्यर्थः। तथा च श्रीदशमे पञ्चदशाध्याये श्रीकृष्णोक्तिः (भा० १०. १५. ८)—

धन्येयमद्य धरणी तृणवीरुधस्त्व-
त्पादस्पृशो द्रुमलताः करजाभिमृष्टाः।
नद्योऽद्रयः खगमृगाः सदयावलोकै-
र्गोप्योऽन्तरेण भुजयोरपि यत्स्पृहा श्रीः॥

तत्रैवान्यत्रोद्धववाक्यं यथा (भा० १०. ४७. ६०)—

नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः
स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठ-
लब्धाशिषां य उदगाद् व्रजसुन्दरीणाम्॥

इति। पुनः कीदृशम्—कालिन्दीपुलिनाङ्गनप्रणयिनम्। कलिं द्यति खण्डयतीति यमुनाजनकत्वात्कलिन्दः पर्वतः। पृषोदरादित्वात् (पा० ६. ३. १०९) निपातः।

4. GB तदुक्तं for तथा च. 8-9. GB omits all words from तथा च to श्रीकृष्णोक्तिः and reads instead: तदुक्तं दशमे. 10. GB reads only धन्येयमद्य धरणीत्यादिना, omitting the rest of the verse. 14. GB omits all words from तत्र to यथा and reads instead तथा only. 15-18. GB omits the second and third pāda of the verse, but marks the omission by the sign °. 15. GB श्रियोऽङ्गज. 19. GB omits कीदृशं and the pratīka कालिन्दी etc. 20. GB सूयः for पर्वतः. GB omits पृषोदरादित्वान्निपातः.

तद्भवा कालिन्दी यमुना। तस्याः पुलिनमेवाङ्गनं विहरणस्थानं तत्र प्रणयः स्नेहो यस्य तम्। तत्रैव स्थितत्वात्। तमाराधयाम इति भावः। पुनः कीदृशम्—कामावताराङ्कुरम्। कामावतारस्याङ्कुरो यस्मात्। यद्वा, कामस्यावतारा भावहावकटाक्षलीलादृक्पातादयस्तेषामङ्कुरं प्रोद्गमस्थानम्। पुनः कीदृशम्—मधुरिमस्वाराज्यम्। मधुरिम्णो माधुर्यातिशयस्य स्वाराज्यमशेषवैभवम्।

रूपं किमप्यनिर्वाच्यं तनोर्माधुर्यमुच्यते

(उज्ज्वल०, उद्दीपनप्रकरण ३५)। यद्वा, मधुरिम्णि स्वाराज्यमनन्याधीनत्वं यस्य, मधुरिमा मधुररसः स एव स्वाराज्यं यस्येति वा, तम्। मधुररसरूपमित्यर्थः॥ शार्दूलविक्रीडितं छन्दः॥३

सुबोधनी

अथैतत्स्फूर्त्यानन्दावेशेन स्वसङ्गिनः स्वान्तर्भाव्यगोपीगणमुख्यनिजाश्रयं व्यञ्जयन्वयमपि तदेवाराधयाम इत्याह—अमी वयं बालं किशोरमाराधयामः। पूर्वं किशोरत्वेनोक्तत्वाद्।

बाल्यमापोडशाब्दान्तम्

इत्युक्तेर्बाल-शब्दप्रयोगः केवलक्रीडैकपरताज्ञापकः। स्वपूर्वदशास्फूर्त्यादसः प्रयोगः। कथं तमेवाराधयथ—मधुरिम्णां स्वाराज्यम्। तत्सर्वमत्रैव सुलभमित्यर्थः। कीदृशं बालम्—इन्द्रनीलमणिस्वच्छम्। किशोरत्वमापादयन्नाह— चातुर्याणा-

1. GB विहार० for विहरण०. 2-3. GB omits कीदृशं and कामावताराङ्कुरम्. 4. GB हावभावकटाक्ष०. GB omits कीदृशं and the pratika मधुरिम etc. 7. GB omits यद्वा. 8-9. GB omits तम् and शार्दूलविक्रीडितं छन्दः. 11-12. CB, CD omit all words from अथैतत् to इत्याह and read instead : तदेव विशदयन्नाह—चातुर्येति। 15. CD inserts च after उक्तेः and reads केवलं for केवल-. 15-16. CB, CD omit all words from स्वपूर्वदशास्फूर्त्या to सुलभमित्यर्थः and read instead : आत्मनोयोग्यतालोकाददसः प्रयोगः। तत्कारुण्यपात्रावकलनाद् बहुत्वम्. 16. CC तदेवाराधयामः. 17. CC नीलं for बालं. CB, CD omit बालं, and read ०मणिवच्छ्यामं for ०मणिस्वच्छं. CA किशोरत्वादयं तन्माधुर्यं for किशोरत्वं. CB, CD एवापादयति for आपादयन्नाह.

मिङ्गितमात्रेणाभीष्टज्ञापकानां यानि मुख्यान्यादिकारणानि तेषामवधिरूपो यस्तम् । कथं चातुर्यावगतिः—चपलापाङ्गस्य या छटा तां मन्थयति स्वविषयकभावोद्दीपनैः स्तब्धां करोतीति तम् । तन्मन्थरीकरणमपि किमर्थम्—तस्या लावण्यामृततरङ्गेन लोलिते सतृष्णीकृते दृशौ यस्य तम् । अतएव लक्ष्म्याः श्रीराधायाः कटाक्षे आदृतं सादरम् । साभिलापमित्यर्थः । यमुनापुलिनस्थस्य तस्य राधिकासाहचर्यस्य युक्तत्वात् ।

देवत्वे देवदेहा सा मानुषत्वे च मानुषी

इत्यादि विष्णुपुराणे (१.९.१४३) तथोक्तेः । कथं वा तदभिलापो ज्ञातः—कालिन्द्याः पुलिनमेवाङ्गनं तत्र प्रणयिनम् । तदाशया तत्र सदा स्थितमित्यर्थः । स्वाभिलापमात्रेण कथं तत्सिद्धिः—कामस्य स्वविषयाभिलापस्य योऽवतारः प्राकट्यं तस्याङ्कुरः प्ररोहो यस्मात्तम् ॥३

1-4. CB, CD omit all words from चातुर्याणां (P. 29, l. 17) to अतएव (l. 4) and read instead : यमुनायाः पुलिनमेवाङ्गनं तत्र प्रणयिनं कदाचिदाशया स्थितमित्यर्थः । तेनादृतमिति वा (CD omits) । तमेवाह (CD तदेवाह). 2. CC छटया for या छटा. 3. CA omits इति after करोति. CC कथं for किमर्थं. 5. CB omits सादरं. CB, CD read तेनादृतमिति वा after इत्यर्थः. 5-8. CA omits all words from यमुनापुलिनस्थस्य to ज्ञातः. 5. CD यमुनायाः for यमुना-. 6. CB, CD श्रीराधिकायाः साहचर्यस्यैव. 8. CB, CD श्रीविष्णुपुराणे. CB omits कथं to ज्ञातः; CD reads यतस्तस्याः for it ; after which CB, CD read : लावण्यामृतवीचि(CD omits वीचि)-तरङ्गैर्लोलिते सतृष्णीकृते दृशौ यस्य तम् । अतएव चातुर्याणामिङ्गितमात्रेणाशेषाभीष्टज्ञापकानां यानि मुख्यान्यादिकारणानि तेषामवधिरूपस्य चपलापाङ्गस्य छटा या तां मन्थरयति स्तब्धां करोतीति तं (CB omits तं, CD omits इति). 9-10. CB, CD omit all words from कालिन्द्याः to तत्सिद्धिः, and read instead : तथा करणसामर्थ्यं द्योतयन्नाह. 10. CB, CD प्रेमविशेषस्य for स्वविषयाभिलाषस्य. 11. After यस्मात्तं, CB, CD continue : प्रेमैव गोपरामाणां काम इत्यगमत्प्रथाम् इति सनत्कुमारतन्त्रोक्तेः (CD omits सनत्कुमार) । अतो माधुर्यस्य साम्राज्यम् । तत्सर्वत्रैव सुलभमित्यर्थः ॥

सारङ्गरङ्गदा

ततः श्रीकृष्णपार्श्वे सर्वमुख्यायाः पूर्वश्रुतानुरागसौभाग्यायाः श्रीराधायाः पार्श्वस्थसखीनां तदुपासिकानां मध्ये आत्मानं तादृशीमेकां जानन्नाह—चातुर्येति। अमी वयं तत्परिवाररूपा बालं किशोरमाराध्नुमश्रामरान्दोलनताम्बूलदानादिना सेवामहे। पूर्वं किशोराकृतित्वेन निरूपितत्वादग्रेऽपि तल्लीलाया एव वर्णितत्वात्स्मृत्यलंकारादिषु त्रिविधवयोविवेचने

बाल्यमाषोडशाब्दान्तम्

इति प्रसिद्धेश्च बाल-शब्देनात्र किशोर एवोच्यते। अन्यथा व्याख्यायां कामावताराङ्कुरत्वासंभवात्। एवमग्रेऽपि ज्ञेयम्। कीदृशम्—नीलमिन्द्रनीलमणिवच्छ्यामम्। मूर्तं शृङ्गाररसमित्यर्थः। यदुक्तम् (गीतगोविन्द १. ४८)—

शृङ्गारः सखि मूर्तिमान्

इति। तथा, रासरङ्गकालिन्दीपुलिनमेव माधवीचतुःशालिकाया अङ्गनं तत्र प्रणयिनम्। सदा तत्र विलसन्तमित्यर्थः। तथा, प्रबललज्जावाम्याभ्यां परमोत्कण्ठायामप्यधोमुखतया स्थिताया लक्ष्म्याः श्रीराधायाः कटाक्षे तत्प्राप्तावादृतं सादरम्। तथा, परितः स्थितास्वप्यन्यासु श्रीराधाया एव लावण्यामृतवीचिभिर्लोलिते सतृष्णीकृते दृशौ यस्य तम्। अतोऽन्यास्त्यक्त्वा तया सह रहोलीलोत्कण्ठया सर्वसमाधानपूर्वकमन्यालक्षितप्रेरणया तन्निष्क्रमणस्वनिष्क्रमणादिषु तस्य तत्तच्चातुरीस्फूर्त्याह—चातुर्येति। चातुर्याणां नेत्रान्तादिद्वारैव तत्तज्ज्ञापनरूपाणां यानि मुख्यानि निदानान्याद्रिकारणानि तेषां सीमावधिरूपश्चपलश्च योऽपाङ्गस्तस्य

2. KP ज्ञापयन् for जानन्. KC, KP omit चातुर्येति. 4. KB, KP insert वयं before सेवामहे. 8-9. KB, KD omit all words from अन्यथा to असंभवात् and read instead : तथा (KD अथ वा) बालं च कामावतारस्य तत्प्राकट्यस्याङ्कुरो यस्मिन्निति किशोरमित्यर्थः. 9-10. KB KP, ०नीलमणिश्यामं. 12. KP omits तथा. 13-14. KB परोत्कण्ठया. 14. KP अधोमुखस्थितायाः 17. KB तन्निष्क्रामणादिषु तस्य; KP तन्निष्क्रामणस्वनिष्क्रामणादिषु तस्य. 18. KB omits तत्तत्; KP reads for it तत्र च. KB omits चातुर्येति. 19. KB omits मुख्यानि. 11. KP, KC सीमा अवधि रूपश्च पुनश्चपलो (KC पुनश्च).

छटया तां मन्थरयति स्तब्धां करोतीति तम् । अतो लक्ष्म्यास्तस्याः कटाक्षे आदृतं सादरम् । संकेतज्ञानमिदं ज्ञापयत्वियमिति तदभिलपन्तमित्यर्थः । यद्वा,

श्रियः कान्ताः कान्तः परमपुरुषः

(ब्रह्मसंहिता ५. ५६) इत्यादि,

लक्ष्मीसहस्रशतसंभ्रमसेव्यमानम्

(तत्रैव ५. २९) इत्यादि ब्रह्मसंहिताद्यनुसारेण लक्ष्मीणां व्रजदेवीनां कटाक्षैरादृतमपि चातुर्यैकनिदानसीमायाश्चपलायास्तल्लीलार्थं जातचापल्यायाः श्रीराधाया योऽपाङ्गस्तच्छटाभिर्मन्थरं जातस्तब्धतया तत्तत्क्रियादिष्वप्यशक्तम् । तथा

प्रेमैव गोपरामाणां काम इत्यगमत्प्रथाम्

इत्याद्यनुसारेण कामस्य तद्विषयकप्रेमविशेषस्य योऽवतारः प्राकट्यं तस्याङ्कुरः प्ररोहो यस्मात्तम् । सर्वमाधुर्यमनुभूयाह—मध्विति । मधुरिम्णां स्वाराज्यम् । तत्सर्वमत्रैव सुलभमित्यर्थः । तत्रास्य तस्याः सख्येनानुगतिः

राधापयोधरोत्सङ्ग

(श्लो० ७६) इत्यादौ

ये वा शैशवचापलव्यतिकरा राधावरोधोन्मुखाः

(श्लो० १०६) इत्यादौ च सुव्यक्तैव ॥ वाह्यदशार्थस्त्वेवम्—स्वसङ्गिनः प्रत्येव न केवलं तादृशं वस्त्वस्त्येव वयमपि तदुपास्महे इत्याह—अमी वयम् ।

जानन्त एव जानन्तु

1. KP omits तम्. KC inserts यद्वा before अतो. 2. KP ०ज्ञापनं for ज्ञानं. KP तदभिलसन्तं. KC तथा for यद्वा. KP inserts तथा after यद्वा. 6. KB कटाक्षादृतमपि. 7. KC, KP तादृक्चातुर्याणामवधिरूपः (KC ०रूपायाः) for चातुर्यैकनिदानसीमायाः. 8. KB स्तब्धतया for जातस्तब्धतया. KB ०क्रियादेः for क्रियादिषु. KP inserts वा after अशक्तं. 9. This verse is said to be taken from Gotamīya-tantra, but it does not occur in the printed text of the work. Sometimes it is ascribed to Sanatkumāra-tantra. It is cited in Bhakti-rasāmṛta 1. 2. 70 (तथा च तन्त्रे). 10. KD जाततद्विषयक० for तद्विषयक०. 12. KP सर्वत्रैव for सर्वमत्रैव. KP अनुरागतः for अनुगतिः. 13. KC, KP omit उत्सङ्ग.

(भा० १०. १४. ३८) इत्यादिना,

नायं सुखापो भगवान्

(भा० १०. ६. २१) इत्यादिना च विधिशुकादिभिः स्तुतं बालमाराध्नुम इति। स्वरवैकृत्येनाश्चर्यद्योतनम्। स्वस्य तद्बहिर्मुखपूर्वदशास्मृत्यादसः प्रयोगः। तान्क्रोडीकृत्य बहुत्वप्रयोगश्च। तमेवाश्रयणीयनायकसद्गुणैर्विशिनष्टि। तत्र कालिन्दीति सदा विलासित्वमुक्तम्। मधुरिमेति रुचिरत्वम्। तासामाकर्षणे उपेक्षाप्रत्यायकवाग्भङ्गीप्रार्थनादिचातुरीस्फूर्त्याह—चातुर्येति। अनेन वैदग्ध्यम्। चपलेति मोहनत्वम्। चपलानां तासामपाङ्गच्छटाभिर्मन्थरं स्तब्धमिति प्रेमवश्यत्वम्। तस्या मुखेन्दुदर्शनादुच्छलितो यो लावण्यामृतार्णवस्तदमृतवीचिभिर्लोलिताः सतृष्णीकृतास्तस्याः पश्यतां च दृशो येनेति सौन्दर्यम्। वेणुनादाकृष्टाया नभःस्थिताया लक्ष्म्या अपि कटाक्षैरादृतं सादरं सलालसमीक्ष्यमाणमिति नारीगणमनोहारित्वम्। कामानां चतुर्व्यूहान्तर्गतप्रद्युम्नाख्यस्वस्वरूपाणां शाखास्थानीयानां तदंशलेशाभासरूपाणामनन्तब्रह्माण्डान्तर्गतप्राकृतकामानां पत्रस्थानीयानामवतारस्य प्राकट्यस्याङ्कुरं प्रथमोद्भिन्नकोमलस्कन्धांशम्। प्राकृताप्राकृतकन्दर्पनिदानवृन्दावनाभिनवकन्दर्पमित्यर्थः। आगमादौ कामगायत्र्या कामबीजेन च तस्य तद्रूपेणोपास्यत्वात्। कोटिमदनविमोहनाशेषचित्ताकर्षकसहजमधुरतमलावण्यामृतपारार्णवेन महानुभावचयानुभूयमानतत्तन्महाप्रभावनिवहेन श्रीमदनगोपालरूपेणाधुनापि वृन्दावने विराजमानत्वाच्च। अनेन सर्वावतारबीजत्वसर्वमाधुर्ये उक्ते॥

रासलीला जयत्येषा यया संयुज्यतेऽनिशम्।
हरेर्विदग्धताभेर्या राधासौभाग्यदुन्दुभिः॥३

3. KP omits च. 3-4. KC स्वरविकृत्या. 5. KB, KC omit च after बहुत्वप्रयोगः. KB ०नायकगुणैः; KP ०नायकं सद्गुणैः. 6. KB (margin as in text) विहारित्वं for विलासित्वं 7. KP ०वाग्भङ्गि०. 8. KB, KD मनोहरत्वं for मोहनत्वं. KD inserts यद्वा before चपलानां. KC, KP प्रेमवैवश्यत्वम्. 9. KC तस्य for तस्याः. 10. KB वा for च. 11. KC, KP omit अपि. 12. KP कामादीनां for कामानां. 15. KB omits तस्य. 16. KP कोटिनन्दनविमोहन०. KP ०मधुरतर०. 17. KP ०महाभावनिवहेन. KD श्रीमन्मदनगोपाल०. KB, KD prefix श्री to वृन्दावने. 19. KP मया for यया. KC संदुह्यते, KD संजुष्यते for संयुज्यते.

बर्होत्तंसविलासकुन्तलभरं माधुर्यमग्नाननं
प्रोन्मीलन्नवयौवनं प्रविलसद्वेणुप्रणादामृतम् ।
आपीनस्तनकुड्मलाभिरभितो गोपीभिराराधितं
ज्योतिश्चेतसि नश्चकास्तु जगतामेकाभिरामाद्भुतम् ॥४

कृष्णवल्लभा

इदानीं हृदि तत्स्फूर्तिमाशास्ते—बर्हेति। ज्योतिः प्रकाशकम् । यत्प्रकाशेन सर्वं प्रकाशते तदित्यर्थः। एतेन सर्वोज्ज्वलत्वं दर्शितम् । नोऽस्माकं चेतसि चकास्तु प्रकाशताम् । ज्योतिरिति किं ब्रह्म, न—गोपीभिराराधितं सेवितम् । ब्रह्मापि स्त्रीणामाराधितं भवति, न तथा—आपीनस्तनकुड्मलाभिरापीना अतिकठिनाः स्तना एव पद्मकुड्मला यासां ताभिः। नवकिशोरीभिरित्यर्थः। यद्वा, आ ईषत्पीना नवकिशोरीत्वात्स्तनकुड्मला यासां ताभिः। अन्यापि देवता कुड्मलैराराध्यते ।

कुड्मलो मुकुलोऽस्त्रियाम्

इत्यमरः (२.४.१६)। सर्वतः परमानन्दरूपत्वं चाह—जगतामेकाभिरामाद्भुतम् । जगतां जगद्वर्तिनां मध्ये एकं मुख्यम् । अभिराममभिरमयत्यानन्दयति तच्चाद्भुतं चेति। एतादृशसौन्दर्यमन्यत्र कुत्रापि नास्ति। अत्रैवोपक्षीणमित्यर्थः। तदुक्तं तृतीये (भा० ३.२.१२)—

विस्मापनं स्वस्य च सौभगर्द्धेः
परं पदं भूषणभूषणाङ्गम् ॥

1. PS ०विलासि० for ०विलास०. 4. PS चकास्ति. 6. GB प्रकाशनेन. 7. GB omits तत्. GB omits एतेन सर्वोज्ज्वलत्वं दर्शितम्. 8. GB reads तर्हि for ज्योतिरिति, and नेत्याह for न. 9. GB इत्याह for न तथा. GB omits आपीनस्तनकुड्मलाभिः. 14. GB omits जगतामेकाभिरामाद्भुतम्. 15. GB omits अभिरामं and inserts इति after आनन्दयति. 15. GB तच्च तदद्भुतं for तच्चाद्भुतं. 16. GB एतादृक् for एतादृश-.

इति। तत्राप्यद्भुतमाश्चर्यानन्तचमत्काररूपत्वादिति तदेव ज्योतिरवयवविभागेन विशिनष्टि—बर्होत्तंसविलासकुन्तलभरम्। बर्हनिर्मितेनोत्तंसेन शिरोभूषणेन विलासो यस्य। तथाभूतः कुन्तलभरो यस्येति पुनर्बहुव्रीहिः। यद्वा, बर्हलाञ्छितो यो नानाकुसुमरचित उत्तंसः शिरोभूषणं तस्य विलासो येन। तथाभूतः कुन्तलभरो यस्य तत्।

चिकुरः कुन्तलो बालः

इत्यमरः (२. ६. ९५.)। विलासलक्षणं यथा रसामृतसिन्धौ

गतिस्थानासनादीनां मुखनेत्रादिकर्मणाम्।
तात्कालिकं तु वैशिष्ट्यं विलासः प्रियसङ्गजम्॥

पुनः कीदृशम्—माधुर्यमग्नाननम्। माधुर्ये मधुररसे मग्नमिव कृतमज्जनमिवाननं यस्य तत्।

सर्वावस्थाविशेषेषु माधुर्यं रमणीयता

(साहित्यदर्पण ३. ९७)। यद्वा, माधुर्ये रसे मग्नानां भक्तानामननं जीवनम्। अन प्राणने (धा० २. ६१)। पुनः कीदृशम्—प्रोन्मीलन्नवयौवनम्। प्रकर्षेणोन्मीलदाविर्भवन्नवयौवनं यस्य तत्। उन्मीलदिति नित्यप्रवृत्तवर्तमाने शत्रन्तम्। अनवस्थयेव तस्य नवयौवनमिति भावः। पुनः कीदृशम्—प्रविलसद्वेणुप्रणादामृतम्। प्रकर्षेण विलसञ्शोभमानो यो वेणुस्तस्य प्रकृष्टो नाद एवामृतं यत्र। ज्योतिष्यामृतारोपाच्चन्द्रत्वं व्यङ्ग्यम्॥ शार्दूलविक्रीडितम्॥४

1. GA आश्चर्यमनन्त०. 2. GB reads only बर्हेति for the whole pratīka बर्होत्तंस etc. 3. GB omits पुनर्बहुव्रीहिः. 7. GB omits यथा. This verse is not found in the Bhakti-rasāmṛta-sindhu, but occurs in Ujjvala-nīla-maṇi, Anubhāva-prakaraṇa, verse 27. 10. GB omits कीदृशं माधुर्यमग्नाननं. GC omits माधुर्ये and कृतमज्जनमिव. 12. GC विशेषे तु. 13. GC मग्नाननं for मग्नानां भक्तानां. 14. GB omits कीदृशं प्रोन्मीलन्नवयौवनम्. 15. GB omits नित्यप्रवृत्तवर्तमाने. 16. GA इव, GC च for एव (after अनवस्थया). GB omits कीदृशं प्रविलसद्वेणुप्रणादामृतम्. 18. GB चन्द्रसाम्यम् for चन्द्रत्वं व्यंग्यं. GB omits शार्दूलविक्रीडितं; GC inserts छन्दः after this word.

सुबोधनी

तत्रायं क्रमः—एकेन स्वनियमकथनम्। ततस्तद्दर्शनप्रार्थनं त्रयस्त्रिंशता। ततः स्फूर्तिसाक्षात्कारयोर्भ्रमः पञ्चभिः। पुनर्दर्शनोत्कण्ठा सप्तभिः। ततः साक्षाद्दर्शनात्तद्वर्णनमष्टाविंशत्या। ततस्तेन सहोक्तिः सप्तदशभिः।

ततः स्फूर्त्यपगमे दैन्योदयात्सोत्कण्ठं प्रार्थयते—नश्चेतसि ज्योतिः कान्तिपुञ्ज आविर्भवतु। कीदृशम्—जगतामेकं केवलमभिरामं च तदद्भुतं च यत्। तदेव व्यनक्ति—प्रकर्षेणोन्मीलन्नवयौवनं चरमकैशोरं यस्य तत्। एतज्ज्ञानं कुतः—माधुर्ये मग्नं कृतमञ्जनमाननं यस्य। तत्रापि वैशिष्ट्यमाह—बर्होत्तंसस्य यो विलासो मन्दानिलान्दोलनं तद्युक्तः कुन्तलकलापो यस्य। अन्यच्च—प्रविलसन्तो ये वेणोः प्रणादास्त एवामृतानि यस्मिन्। ततोऽपि विशिष्टं तमाह—गोपीभिः स्वस्वाभिरुचितया सेवितम्। कीदृशीभिः—अतिनिविडानि स्तनमुकुलानि यासां ताभिः। अनेन लक्ष्म्याः परिजनसाहित्यं व्यञ्जितम्॥४

सारङ्गरङ्गदा

अथास्य बाह्ये तिस्रो दशा दृश्यन्ते। प्रथमस्फूर्तौ स्फूर्तिज्ञानम्। ततः स्फूर्तिसाक्षात्कारयोर्भ्रमः। ततः साक्षात्कारः। इति॥ तत्रास्य मधुरजातीयभावा-

2-4. CB, CD omit this paragraph (from अत्रायं to सप्तदशभिः). 5. CB, CD omit all words from ततः to ज्योतिः and read instead : अथ स्वचेतसि तदाविर्भावं (CD °भावनं) सामान्यतया प्रार्थयते—बर्होत्तंसेति। नोऽस्माकं चेतसि ज्योतिश्चकास्तु. 6. CB, CD insert इति दैन्योक्तिः after आविर्भवतु. 6-7. CB, CD omit all words from जगतामेकं to व्यनक्ति. 7. CC omits तत् after यस्य, and reads तज्ज्ञानं for एतज्ज्ञानं. CB omits एतज्ज्ञानं कुतः; CD reads तथा for it. 8. CC inserts यतो before माधुर्ये. CB, CD माधुर्यसामग्रीः for तत्रापि वैशिष्ट्यम्. 9. CB, CD तथा for अन्यच्च. CB विलसन्तो for प्रविलसन्तो. 10. CC तान्येव for त एव. After यस्मिन् CB, CD insert : सूक्ष्म(CD शुष्क)स्थावरादिजीवद(CD °जीवक)त्वादमृतत्वम्, and read तथा च for ततोऽपि विशिष्टं तमाह. 11. Before कीदृशीभिः CB, CD insert : अतएव पश्यतां स्मरतामेकाभिरामं च तदद्भुतं चेति तत्. CC स्तनकुड्मलानि for स्तनमुकुलानि. 15. KP अत्र for तत्र.

श्रयत्वात्पूर्वरागविप्रलम्भोत्पन्नलालसादशोत्पन्नास्ति। तयान्तःस्फूर्तावपि बाह्यदशोत्थदैन्यवैकल्यादिवासितमनस्तया रासविलासिनस्तस्य स्फूर्तिप्रार्थनमेवाष्टादशभिः।

तानि स्पर्शसुखानि ते च तरलाः

(गीतगोविन्द ३. १५) इत्यादौ

सा विम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्धते ॥

(तत्रैव) इतिवत्। तत एकेन स्वनिश्चयकथनम्। ततो गोपीनां रासान्तर्हितकृष्णदर्शनोत्कण्ठाप्रलापस्फूर्त्या तद्दर्शनप्रार्थनं त्रयस्त्रिंशता। ततः स्फूर्तिसाक्षात्कारयोर्भ्रमः पञ्चभिः। ततः पुनर्दर्शनप्रार्थनं सप्तभिः। ततः साक्षाद्दर्शनाद्वाङ्मनसागोचरत्वेन तद्वर्णनमष्टाविंशत्या। ततस्तेन सहोक्तिः प्रत्युक्तिः सप्तदशभिरिति क्रमः॥

तत्रादौ तया सह निभृतलीलोत्कण्ठया सर्वसमाधानार्थं

बाहुप्रसार

(भा० १०. २९. ४६) इत्यादिवत्, तथा तस्यास्तासां च तदुत्कण्ठां वर्धयितुम्

उत्तम्भयन् रतिपतिम्

(तत्रैव) इत्यादिवच्च ताभिः सह विलसतस्तस्य स्फूर्त्या स्वसमानसखीः प्रत्याह— बर्होत्तंसेत्यादि। प्रथमं तल्लावण्यच्छटोच्छलिततद्भूषणाम्बरगोपीलावण्यभूषणादिज्योतिःपुञ्जं निर्विशेषतयानुभूयेव जाताह्लादो लोभात्ससंभ्रममाह—इदं ज्योतिः स्वपरप्रकाशकं मनोनेत्ररसायनं वस्तु नश्चेतसि चकास्तु। ईषद्विशेषस्फूर्त्याह—कुण्डलमण्डिगण्डाधरस्मितादीनां माधुर्ये तत्प्रवाहे मग्नं कृतमज्जनमाननं यस्य तत्। समग्रविशेषस्फूर्त्याह—प्रकर्षेणोन्मीलन्नवयौवनं चरमकैशोरं यस्य तत्। तथा,

3. KP स्पर्शसुखादीनि. KB omits ते च तरलाः. 5. KB omits all words from सा to विषयासङ्गेऽपि. 7. KB omits ततः before एकेन. KB ०फलम् for ०कथनम्. 8. KD तद्दर्शनाय प्रार्थनं. 8-9. KB ०साक्षात्कारित्वे भ्रमः. 9. KC, KP पुनर्दर्शनोत्कण्ठा for ततः पुनर्दर्शनप्रार्थनं. KP साक्षात्तद्दर्शना०. 13. KC omits तस्याः and च, and reads तदुत्कण्ठाः. KP omits च. 16. KC, KD, KP omit बर्होत्तंसेत्यादि. KP omits the words तल्लावण्यच्छटोच्छलित and reads ०तद्भूषणाम्बरं गोपी०. 17. KB इति, KC एव for इव.

बर्होत्तंसस्य यो विलासो नृत्यगत्या मन्दानिलेन चान्दोलनं तद्युक्तः कुन्तलभरस्तत्कलापो यस्य। तथा, स्वरालापादिभङ्गीभिः प्रकर्षेण विलसन्तो ये वेणोः प्रकृष्टा नादास्त एवातिमधुरत्वाच्छुष्कस्थावरादिजीवदत्वाच्चामृतानि यस्मिन्। तथा, गोपीभिरभितश्चुम्बनालिङ्गनादिभिराराधितं सेवितम्। आपीनानि स्तनकुट्मलानि यासां ताभिः। तथा, जगतां तत्स्पर्शतृष्णयाभितः कुटिलं भ्रमन्तीनां तासां मध्य एकस्यां श्रीराधायामभि सर्वतोभावेन यो रामो रमणं तेन पश्यतां स्मरतां चाद्भुतं चमत्कारकारकम्। तया सह मिथः स्कन्धन्यस्तहस्ततया कृतनृत्यत्वात्। वाद्ये—तान्प्रत्येवाह। अर्थः स एव। किं वा, त्रिजगतां यदेकं प्रधानमभिराममद्भुतं च तत् ॥४

मधुरतरस्मितामृतविमुग्धमुखाम्बुरुहं
मदशिखिपिच्छलाञ्छितमनोज्ञकचप्रचयम्।
विषयविषामिषग्रसनगृध्नुनि चेतसि मे
विपुलविलोचनं किमपि धाम चकास्तु चिरम् ॥५

कृष्णावल्लभा

पुनरपि श्रीकृष्णविग्रहस्फूर्तिं प्रार्थयते—मधुरतरेति द्वाभ्याम्। किमप्यद्भुतं धाम ज्योतिरनुभवैकमात्रगम्यं मे मम चेतसि चिरं चिरकालं चकास्तु प्रकाशताम्। असंभावनायां लोट्। असंभावनामाह, कथंभूते चेतसि—विषयाविषामिषग्रसनगृध्नुनि।

1. KC मन्दानिलान्दोलनं. KC, KP तद्युक्तकुन्तल०. 2. KC, KP omit प्रकर्षेण. 3. KC, KD insert तानि before यस्मिन्. 4. KB omits सेवितं. 8-9. KC, KP omit यत् before एकं, and insert it before तत्. 8. KP inserts च before अद्भुतं. 10. PS ०पिञ्छ०. 13. PS चकास्ति. 15. GB तत्स्फूर्तिं for श्रीकृष्णविग्रहस्फूर्तिं GB मधुरेति. GA omits द्वाभ्यां. 16. GB omits चिरकालं. 17. GB संभावनायां. GB omits the pratīka विषयविष etc. and reads instead विषयेति only.

विशेषेण सिन्वन्ति बध्नन्तीति विषयाः। वि-पूर्वक-षिञ् (? सिन्व, धा० १. ६२१) बन्धने धातुः। हिरण्यगर्भपदवीपर्यन्तेन्द्रियभोग्यानि त एव विषामिषाणि विष-संपृक्तपललानि, मांसानि विषरूपाणि वा। यद्वा, त एव विषाणि तान्येवामिषाणि लोभ्यवस्तूनि। तेषां ग्रसनायादनाय गृध्नुन्यभिकाङ्क्षावति। ग्रस अदने (धा० १०. २०६), गृधु अभिकाङ्क्षायाम् (धा० ४. १३६) च धातुः।

आमिषं पललं लोभ्ये संभोगेऽपि च

[इति] मेदिनी। तद्धाम निराकृति साकृति वा तत्राह—मधुरतरस्मितामृत-विमुग्धमुखाम्बुरुहम्। अतिशयेन मधुरं मधुरतरं यत्स्मितं हास्यभेदस्तदेवामृतं तेन विमुग्धं विशेषेण मुग्धं सुन्दरं मुखमेवाम्बुरुहं कमलं यस्य तत्।

मुग्धः सुन्दरमूढयोः

इति विश्वः (धान्त० १०)। स्मितलक्षणं यथा नाट्यलोचने

ईषद्विकशितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः।
अलक्षितद्विजद्वारमुत्तमानां स्मितं भवेत्॥

पुनः कीदृशम्—मदशिखिपिच्छलाञ्छितमनोज्ञकचप्रचयम्। मदा मत्ता ये शिखिनो मयूरास्तेषां पिच्छैर्लाञ्छितोऽङ्कितो मनोज्ञानां सुन्दराणां कचानां केशानां प्रचयः समूहो यस्मिंस्तत्। माद्यच्छिखित्वेन पिच्छस्य स्फीतता व्यज्यते। माद्यति रसेन मदयति गोपसुन्दरीर्वा मदः। स चासौ शिखिपिच्छलाञ्छितमनोज्ञकच-

1-2. GB omits all words from विपूर्वक० to धातुः. The षिञ् is conjectural in GA. 2. GA धातोः. GB सत्यलोक० for हिरण्यगर्भपदवी० 3. GA, GC omit मांसानि. 4. GA ग्रस्. 5. GB धातू. 6. The quotation occurs in a somewhat different form in मेदिनीकोश (षान्त ३१); cf. विश्वकोश षान्त० २४. 7. GB omits all words from तद्धाम to तत्राह and reads instead: तत्साकारत्वेन वर्णयति. Instead of the whole phrase मधुरतर etc GB reads मधुरेति. 8. GB omits मधुरतरं. 9. GB omits मुग्धं. 11. GB omits यथा. 13. द्वार lost in GA. 14. GB omits कीदृशं and reads मदेति for the whole phrase मदशिखि etc. 15. GA सुन्दरीणां for सुन्दराणां. 16-17. GB माधुर्यातिशयेन for माद्यति रसेन.

प्रचयश्चेति यस्येति वा। पुनः कीदृशम्—विपुलविलोचनम्। विपुले विशाले विशिष्टे विलोलतामदघूर्णतारुण्यादिना लोचने यस्य तत्। प्राक् समस्ताङ्गमनुभूय श्रीमुखनिरीक्षणं कृतम्, तत्र स्मितामृतादिष्वेव मनो निमग्नमिति समुदायार्थः ।। कोकिलकं छन्दः –

हयऋतुसागरैर्यतियुतं यदि कोकिलकम् (छन्दोमञ्जरी २) ।।५

सुबोधनी

पुनः स्वचेतसोऽयोग्यतां निवेदयंस्तथैव सलालसं प्रार्थयते – मम चेतसि किमपि पूर्वोक्तानिर्वचनीयं धाम कान्तिपुञ्जश्चिरकालं व्याप्योदेतु। कीदृशे – विषय एव विषवद्दाहकत्वाद्विषम्, तथाप्यमृतवदामिषं लोभ्यम्, तस्य ग्रसने गृध्नु लम्पटं यत्तस्मिन्। तर्हि कथं प्रार्थनेत्याशङ्क्य तस्यैव तन्निदानत्वं व्यञ्जयन्नाह— मधुरतरं यत्स्मितं तदेवामृतं तेन विमुग्धमतिमनोहरं मुखाम्बुजं यस्य। तथा, विपुले विलोचने यस्य। किं च, यौवनमदयुक्तानां शिखिनां पिञ्छैर्लाञ्छितश्चिह्नितः स्वभावतो मनोज्ञश्च केशसमूहो यस्य। शिखिनां मदनोत्कपिञ्छानां स्फीतत्वम्। तन्माधुर्यस्य सर्वलोभनीयत्वात्प्रार्थ्यत इत्यर्थः ।।५

1. GA, GC omit यस्येति. GB omits कीदृशं विपुलविलोचनं. 2. GC लोलता for विलोलता. प्राक् सम lost in GA. 5. All Mss तदेव for यदि. 7. CB, CD अतिलोभेन चेतसो- for स्वचेतसो-. CD inserts मधुरतरस्मितेति after प्रार्थयते. 8. CB, CD किमप्यनिर्वचनीयं. CA, CC कान्तिपुञ्जं; CB, CD कान्तिपूरं. CB, CC omit कीदृशे. 10. CB, CD omit all words from तर्हि to व्यञ्जयन्नाह and read instead : कीदृशं धाम. 11. CB, CD omit तदेवामृतं and अति (in अतिमनोहरं). CC मुखाम्बुरुहं for मुखाम्बुजं. 11-12. CD omits all words from तथा to विलोचने यस्य. 12. CB, CD तथा for किं. CA यौवनयुक्तानां; CB, CD अस्मत्पिञ्छान्येवायम- (CD ०पिञ्छान्य)वतंसयतीति सौभाग्यमदयुक्तानां for यौवनमदयुक्तानां. CA omits चिह्नितः, and inserts कचप्रचयः before केशसमूहो. 13-14. CB, CD omit all words from शिखिनां to इत्यर्थः. 13. For the words मदनोत्क- CC reads (corrupt) रमदोरमदतोक्त्या.

सारङ्गरङ्गदा

पुनरतिमाधुर्यस्फूर्त्या ताः प्रति सलालसमाह—मधुरतरेति। पूर्वरीत्येदं किमप्यनिर्वचनीयं धाम मम चेतसि चिरं चकास्तु। ननु चित्तसंतापकस्यास्य स्मृतिलालसयालमित्यत्र चित्तं तच्च दूषयन्नाह, कीदृशे—विशेषेण सिनोति स्वमाधुर्य-मधुनि मनोभृङ्गं बध्नातीति विषयम्। तच्च विषवद्दाहकत्वाद्विषं च। तथाप्यमृत-वदामिषं लोभ्यं यदेतद्धाम तस्य यद्ग्रसनं झटित्यात्मसात्करणं तत्र गृध्नु लम्पटं यत्तस्मिन्। तदुक्तम् (विदग्धमाधव २. १८)—

पीडाभिर्नवकालकूटकटुतागर्वस्य निर्वासनो
निःस्यन्देन मुदां सुधामधुरिमाहंकारसंकोचनः।
प्रेमा सुन्दरि नन्दनन्दनपरो जागर्ति यस्यान्तरे
ज्ञायन्ते स्फुटमस्य वक्रमधुरास्तेनैव विक्रान्तयः॥

इत्यादौ। तत्र हेतुमाह—मधुरतरं यत्स्मितामृतं तेन विमुग्धं मनोहरं मुखाम्बुरुहं यस्य। तथा, विपुले विलोचने यस्य। तथा, अस्मत्पिञ्छान्येवायमव-तंसयतीति सौभाग्यमदयुक्तास्तथा नवघननिन्दिततत्कान्तिदर्शनोद्गतानङ्गमदयुक्ताश्च ये शिखिनस्तेषां पिञ्छैर्लाञ्छितः स्वभावमनोज्ञश्च कचप्रचयो यस्य। मध्यपदलोपी समासः। मदातिशयात्त एव मदरूपा इति वा। शिखिनां मत्ततोक्त्या पिञ्छानां स्फीततोक्ता॥ बाह्ये तु—विषयो वनितादिः। अन्यत्समम्। अतः स एव कृपया चेत्स्फुरति तदैव तत्स्फुरणम्, अन्यथा तदपि दुलर्भमिति दैन्यम्।

आमिषं पलले लोभ्ये

इति मेदिनी।

लोभ्यवस्तुनि

इति कोशः॥५

2. KB मधुरेत्यादि for मधुरतरेति. 3. KB अनिर्वाच्यं for अनिर्वचनीयं. 5. KD ०मधुना for ०मधुनि 7. KB यत् for तत्. 8. KC ०कटुतागर्वस्येत्यादौ, omitting निर्वासनो and the second and third pādas. 12. KC inserts च after इत्यादौ. KD हेत्वन्तरं for हेतुं. 14. KD ०निन्दितकान्ति०. KB ०दर्शनेनोद्गता०. KB omits च before ये. 17. KB omits तु after बाह्ये. 20. Not found in the printed text of the मेदिनीकोश, but occurs in विश्वकोश, षान्त० २४. 21. भोग्यवस्तुनि in Medinī. KB omits लोभ्यवस्तुनीति कोशः. 6A.

मुकुलायमाननयनाम्बुजं विभो-
र्मुरलीनिनादमकरन्दनिर्भरम् ।
मुकुरायमाणमृदुगण्डमण्डलं
मुखपङ्कजं मनसि मे विजृम्भताम् ॥६

कृष्णवल्लभा

अपि च, विभोस्तस्यैव सकलसौन्दर्यनिधेर्मुखपङ्कजं मे मनसि विजृम्भतां प्रकाशताम् । एतेन निजमनसः सरोरूपता व्यज्यते। तद्विशिनष्टि—मुरलीनिनादमकरन्दनिर्भरम्। मुरल्या निनाद एव मकरन्दस्तेन निर्भरं पूर्णम्। अन्यदपि पङ्कजं मकरन्दभरितं भवति। यद्वा, मुरलीनिनादमकरन्देन नितरां बिभर्ति पोषयति। निजपरिवारमानन्दयतीत्यर्थः। पुनः कीदृशम्—मुकुलायमाननयनाम्बुजम् । मुकुलायमाने मुरलीनिनादविशेषसंजातातितोषतस्तत्तदानन्देन मुकुलप्राये भवती नयनाम्बुजे यस्य। अम्बुजसमानतया स्वमुखस्य चन्द्रता ध्वन्यते। चन्द्रसंबन्धादम्बुजस्य मुद्रणमुचितमेव। पुनः कीदृशम्—मुकुरायमाणमृदुगण्डमण्डलम् । मुकुरायमाणे दर्पणप्राये प्रतिबिम्बग्राहित्वान्मृदुनी कोमले गण्डमण्डले यस्य ।

दर्पणे मुकुरादर्शौ (२.६.१४०) गण्डौ कपोलौ, (२.६.९०)

इत्यमरः ॥ मञ्जुभाषिणी छन्दः—

सजसा जगौ च यदि मञ्जुभाषिणी (छन्दोमञ्जरी २) ॥६

6. GB omits तस्यैव. 7-8. GB cites only मुरलीति for the pratīka मुरलीनिनाद etc. 10-11. GB omits कीदृशं and reads मुकुलेति for the pratīka मुकुलायमान etc. 11. GB ०संजातातिसंतोषानन्देन ; GC ०संजातातितोषस्तदानन्देन. 12. GC मुखचन्द्रस्य for स्वमुखस्य. 13-14. GB omits कीदृशं, and reads मुकुरेति for the pratīka मुकुरायमाण etc.

सुबोधनी

अथ तन्मुखाब्ज एव लग्नमनस्कतया तदाविर्भावं प्रार्थयते—विभोर्मुखपङ्कजं मे मनसि विशेषेण प्रकाशताम् । विभोर्मुखपङ्कजमित्यनिर्वचनीयत्वम् । पङ्कजत्वं व्यनक्ति—मुरलीनिनाद एव मकरन्दस्तेन पूर्णम् । पुनरप्यनिर्वचनीयत्वमाह—मुकुले इवाचरती नयनाम्बुजे यस्मिन् । अनेन विलासरसमग्नत्वं ध्वनितम् । अब्जेऽब्जद्वयभावादद्भुतोपमेयम् । न केवलमिदमन्यदपि—मुकुरे इवाचरती प्रतिबिम्बग्राहिणी कोमले गण्डमण्डले यस्मिन् । प्रथमपद्ये प्रकाशताम्, द्वितीये चिरम्, तृतीये विशेषेणेति क्रमेणोत्कण्ठाधिक्यमेवोक्तम् । एवमग्रेऽपि ॥६

सारङ्गरङ्गदा

अथ तच्छ्रीमुखाब्जलग्नमनस्तया सलालसमाह—विभोस्तन्माधुर्यचातुर्यसंपत्पूर्णस्य मुखपङ्कजं मे मनसि मनःसरसि विजृम्भताम् । कीदृशम्— मुरलीनिनाद एव मकरन्दस्तेन निर्भरं पूर्णम् । तथा, प्रोज्ज्वलेन्द्रनीलमणिमुकुर इवाचरती

2. CB, CD तच्छ्रीमुखाब्ज०. CB तल्लग्न०. CB आविर्भावनं, CD सलालसं for आविर्भावं. CB, CD insert मुकुलायमानेति after प्रार्थयते. 3. CD inserts एव after विशेषेण. CB, CD insert चातुर्यमाधुर्यादीनामधिकाधिकस्फूर्त्यानन्दाभिप्रायेण विभुत्वम् (CD omits विभुत्वं) after प्रकाशताम्. CB omits विभोः. CA अनिर्वचनीयपङ्कजत्वं. CB, CD insert च ध्वन्तिं after अनिर्वचनीयत्वम्. 4. CB, CD एवाह for व्यनक्ति. CB, CD omit all words from मुरलीनिनाद to आह, and insert them, preceded by तथा, after नयनाम्बुजे यस्मिन्, inserting निर्भरं before and इत्यर्थः after पूर्णं. 5. CA, CD इवाचरन्ती. 6. CB, CD omit all words from अब्जे to अन्यदपि. CB reads किं च before मुकुरे. CA, CD इवाचरन्ती. 7. CB, CD insert अब्जेऽब्जद्वयाभावादद्भुतोपमेयम् after ०मण्डले यस्मिन्. CC ०द्वयाभावादद्भुतोपमेयम्. 8. CD श्लोकत्रयेण for क्रमेण. 10. KP अथ श्रीमन्मुखाब्ज०. KD inserts मुकुलेति after आह. KP omits चातुर्य. The Ms KA begins here from र्यचातुर्यसंपत्पूर्णस्य. 11. KC, KP omit मनसि. 12. KA, KB इवाचरन्ती ; KD इवाचरति ; KP इवाचरतीति.

मुकुरायमाणे मृदुनी गण्डमण्डले यस्मिन्। तथा, स्मरमदेन भावोद्गारेण च मुकुलायमाने नयनाम्बुजे यस्मिन्। स्फुटपद्मोपरि दरविकसितपद्मयुगलं चेत्स्यात्तत्समित्यद्भुतोपमेयम्। किं वा, श्रीगण्डमुकुरसंक्रमितानि तेन मुखपङ्कजेन सह सख्यं कर्तुमिवागतानि तासां भावोद्गारमुकुलायमाननयनाम्बुजानि, श्रीराधायास्तादृशे नयनाम्बुजे खञ्जरीटस्थानीये वा, यस्मिन्।—बाह्यार्थः स्पष्ट एव॥ प्रथमे प्रकाशताम्, द्वितीये चिरम्, तृतीये विशेषेणेति श्लोकत्रये क्रमेणोत्कण्ठाधिक्यम्। एवमग्रेऽपि ज्ञेयम्॥६

कमनीयकिशोरमुग्धमूर्तेः
कलवेणुक्वणिताद्दृताननेन्दोः।
मम वाचि विजृम्भतां मुरारे-
र्मधुरिम्णः कणिकापि कापि कापि॥७

कृष्णवल्लभा

अथ कीर्तन एव तन्मधुरिमाणमिच्छन्, धन्यास्ते येषां निर्मले मनसि विभुमुखपङ्कजं प्रकाशते, मम पुनः केवलमिदमेव प्रार्थनीयमित्याह—कमनीयेति। मुरारेः श्रीकृष्णस्य मधुरिम्णः कणिकापि। अल्पा कणा कणिका सापि। अल्पार्थे कन्।

प्रत्ययस्थात्

इति सूत्रेण (पा० ७. ३. ४४) पूर्वस्यात इत्। मम वाचि विजृम्भतां प्रकाशताम्। प्रार्थनायां लोट्। ननु

इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्

[इति] मधुरद्रव्यस्यैव माधुर्यं निर्वक्तुमशक्यम्, श्रीकृष्णस्य तु मधुरिमा कथमुच्यताम्, तत्राह—कापि कापि या काचित्। सर्वा मास्त्वित्यर्थः। मुरारि-

1. KP omits यस्मिन् after ०मण्डले. 2. KB, KC दरविकसितं पद्म०. KP inserts तदा after चेत्यस्यात्. 3. KB, KD अभूतोपमेयम्. 5. KB नयनाम्बुजं. KC, KP खञ्जन० for खञ्जरीट०. KB ०स्थानीयं. KP स्पष्ट इव. 16. GC कन्-प्रत्ययः. 19. GB अदिति for प्रत्ययस्थात्. 21. GB वक्तुं for निर्वक्तुं.

रित्यादिनामानि न केवलं यौगिकानि, मुरवधात्पूर्वमपि तच्छ्रुतेः। यथा, गोविन्दाभिषेचनसमय एव गोविन्दनाम्ना प्रचारे तत्पूर्वमपि

शयानं पातु गोविन्दः

इति गोविन्दनामश्रवणात्। तेन सर्वेषामेव नाम्नां श्रीकृष्णाभिधेयत्वम्। व्युत्पत्तिरकिंचित्करी, तथापि स्वमनोविनोदनार्थं क्रियते। मुरदैत्यस्यारिरित्यनेन वीर्योत्कर्षचमत्कारः। यद्वा, मुर बन्धने धातुः। मुरति बध्नातीति मुराविद्या, तस्या अरिः शत्रुस्तस्य। कथंभूतस्य मुरारेः—कमनीयकिशोरमुग्धमूर्तेः। कमनीया कान्तिमती काम्या वा। स्पृहणीयेति यावत्। किशोरी कैशोरविशिष्टा मुग्धा सुन्दरी मूर्तिर्यस्य तस्य। कमनाः कामुक्यो गोप्यस्तासां संबन्धिनीयम्, तदेकलक्ष्यत्वात्। सा चासौ किशोरी मुग्धा चेति मूर्तिर्यस्य तस्येति वा। पुनः कीदृशस्य—कलवेणुक्वणितादृताननेन्दोः। कलं मधुरास्फुटं यद्वेणोः क्वणितं तेनादृत आननेन्दुर्यस्य। कलवेणुक्वणितमादृतं येन तथाभूत आननेन्दुर्यस्य वा। यद्वा, कलयति वशीकरोति गोपसुन्दरीः स्वनादेन यो वेणुस्तस्य यत्क्वणितं तेन हेतुनादरच्छलेन स्पर्शाद्यर्थं सस्मितसभावसाभिलाषसचुम्बनादिभिरादृत आननेन्दुर्याभिः प्रेमरूपाभिर्गोपीभिस्तस्य। तथा च गीतगोविन्दे (१. ४६)—

साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति-
व्याजादुद्भटचुम्बितस्मितमनोहारी हरिः पातु वः ॥

इति ॥ औपच्छन्दसिकं छन्दः। तल्लक्षणम्—

षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः।
न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः।
तत्रैवान्तेऽधिके गुरौ स्यादौपच्छन्दसिकं कवीन्द्रहृद्यम् ॥

(छन्दोमञ्जरी ५) ॥७

1. GB omits ॰र्. 2. GB ॰नाम्नः प्रचारात्पूर्वमप्यभूत् for नाम्ना प्रचारे तत्पूर्वमपि. 6. The Dhātupāṭha (6. 53) reads मुर संवेष्टने. 7. GB किंभूतस्य for कथंभूतस्य. GB reads only कमनीयेति for the pratīka कमनीयकिशोर etc. 9. GB omits तस्य after यस्य. GB कामनाः. GB कमनीया, GC येयं for इयं. 10. GB च तु for चेति. 11. GB omits कीदृशस्य and the pratīka कलवेणु etc. 12. GB inserts इति for वा. 16-17. GB omits all words from इति व्याहृत्य to the end of the verse. 18. GB इत्यादिना for इति.

सुबोधनी

ततस्तन्मूर्तिमाधुर्यस्फूर्त्या सदैन्यमाह—मुरारेर्मधुरिम्णः कणिकाप्यत्यल्पकणोऽपि मम वाच्याविर्भवतु। मनस्याविर्भावस्तावदास्ताम्। तथापि कापि कापीत्यतिदैन्यम्। तथाप्रार्थने हेतवः—कमनीया किशोरी मुग्धा मनोहरा मूर्तिर्यस्य। तथा, कलवेणुक्वणितैरादृतः सर्वतः प्रशस्तो मुखेन्दुर्यस्य ॥७

सारङ्गरङ्गदा

अथ तन्माधुर्याब्धिस्फूर्त्यादिरसेऽप्येतद्वर्णनेन कृष्णादर्शनविक्लवां प्रियसखीं प्रीणयामीति तदभ्यस्यंस्तदाननस्फूर्त्या स्तम्भितः सन्नाह—मुरारेर्मुरा कुत्सा तदरेस्तद्रहितस्य परमसुन्दरस्यास्य मधुरिम्णः कणिकापि मम वाचि विजृम्भताम्। अल्पकणः कणी। पश्चादत्यल्पार्थे कः कणिका। सातिसूक्ष्मेत्यर्थः। तत्रापि कापि कापि कैशोरसौष्ठवसवेणुमुखसंबन्धिनीत्यर्थः। तां तामेव प्रकाशयति, कीदृशः—कमनीया किशोरी मुग्धा मनोहरा च मूर्तिर्यस्य। तथा कलवेणुक्वणितैरादृतः सेवितः, तैः प्रशस्यो वा, मुखेन्दुर्यस्य ॥ बाह्ये—दैन्योदयाच्चित्ते स्फूर्तिस्ताव-

2. CC पुनः for ततः. CB, CD omit all words from ततः to सदैन्यमाह and read instead : अथ तथामनस्कतया दैन्योदयादाह—कमनीयेति. 3. Before मम CB, CD insert न तु मधुरिणा आकारः (CB आकारस्य). CC omits मम and reads वाच्याविर्भवतु after आस्ताम्. CB, CD omit all words from वाच्याविर्भवतु to आस्ताम् and read instead : चेतस्याविर्भावस्तावदास्तां वाच्यप्या(CB वाच्या)विर्भवतु. Before तथापि CB, CD insert तस्या अपि कापि कणिका, and read तस्या अपि for तथापि, omitting the first कापि. CB, CD दैन्योक्तिः for अतिदैन्यम्. 4. CA तथा प्रार्थयते कोऽपि लवः ; CB, CD तां तामेवाह कीदृशः for तथा प्रार्थने हेतवः. 5. CB omits all words from तथा कल० to मुखेन्दुर्यस्य. CC, CD प्रशस्यो for प्रशस्तो. 7. KA अतः for अथ. KC तद- for कृष्णा- 8. KD inserts कमनीयेति after सन्नाह. 9. KP omits अस्य. 10. KA, KD अल्पः कणः KC अल्पार्थे. KP कन् for कः. 13. KC, KP insert वेणुभिः after तैः. All Mss प्रशंस्यः.

दास्ताम्, वाच्यपि। तत्राप्यतिदैन्यात्—न तु स माधुरीणामाकरः, स एव किं तु तन्मधुरिमा। तत्राप्यतितरां दैन्योदयात्—न तु स मधुरिमसिन्धुः, किं तु तत्कणिकापि ययाखिलब्रह्माण्डमेवाप्लावितं स्यात्। ततोऽप्यतितमां दैन्योदयात्—कापि कापि या कापीत्युक्तिः ॥७

मदशिखण्डिशिखण्डविभूषणं
मदनमन्थरमुग्धमुखाम्बुजम्।
व्रजवधूनयनाञ्जनरञ्जितं
विजयतां मम वाङ्मयजीवितम् ॥८

कृष्णावल्लभा

एवं श्रीकृष्णमधुरिमाणं भावयंस्तत्साक्षात्कारं प्रार्थयते—मदेति। मम वाङ्मयजीवितं वस्तु विजयतां सर्वोत्कर्षस्वरूपावस्थामाविष्करोत्वित्यर्थः। विजयतामिति

विपराभ्यां जेः

(पा० १. ३. १९) इत्यात्मनेपदम्। वाङ्मयं वागात्मकम्। यथा मम तद्रसकेलिगुणाद्यभिधायिनी वाक् तथैवाविर्भवेदित्यर्थः। वागधीनमिति वा। यदैवाहं तन्नामादि कीर्तयामि प्रीत्या तदैवाहूतमिव हृद्यायाति। तादृशं च जीवितं प्राणरूपं च। प्राणतुल्यमिति नोक्तम्। तस्यैव प्राणानामपि प्राणत्वात्। वस्तुतोऽतिप्रेमास्पदत्वात्। अतएवास्य कीर्तनं विना न जीवनं सफलमिति। यद्वा, वाङ्मयं जीवितं यस्मात्तत्। निजरसविलासवर्णनेनास्वादगोचरीभूय जीवनप्रदमित्यर्थः।

1. KC, KP ननु स मधुरिमाकरः for न तु स माधुरीणामाकरः. 2. KP omits सः before मधुरिम०. 3. KA ययाखिलं ब्रह्मा०. KB omits अपि after ततः. 7. PS ०नयनाञ्चलवञ्चितं. 11. GB omits विजयतामिति. 13. GB reads वाक् after मम, omitting it before तथैव. 14. GB आविभवतु for आविर्भवेत्. 15. GC तत्प्रीत्या for प्रीत्या. 17. GB inserts च after प्रेमास्पदत्वात्. GB भवति for इति. 18. GB omits तत् after यस्मात्.

तत्किम्, विशेषणमर्यादया विशेषयन्नाह—मदेति। मदशिखण्डिशिखण्डविभूषणम्। माद्यतीति मदः। मदो हर्षे। स चासौ शिखण्डी च। प्रशंसायामिन्। तस्य यः शिखण्डः पिच्छं तेन विशिष्टं भूषणमलंकृतिर्यस्य तत्।

शिखण्डस्तु पिच्छबर्हे नपुंसके

इत्यमरः (२.५.३२)। एतेन विच्छित्तिनामा हावो दर्शितः।

आकल्पकल्पनाल्पापि विच्छित्तिः कान्तिपोषकृत्

इति (उज्ज्वल०, अनुभावप्रकरण ३२)। तथा च हरिवंशे (२.११.१०)—

एकेनामलपत्रेण कण्ठसूत्रावलम्बिना।
रराज बर्हिपत्रेण मन्दमारुतकम्पिना॥

इति मदशिखण्डिशिखण्डस्य विभूषणमलंकृतिर्यस्माद्वा। तत्तु तत्रैवाधिकं शोभत इत्यर्थः। पुनः कीदृशम्—मदनमन्थरमुग्धमुखाम्बुजम्। मदयति हर्षयतीति मदनम्। मथ्नाति मनांसीति मन्थरम्। तच्च तत् तन्मुग्धं सुन्दरं मुखाम्बुजं यस्य तत्। यद्वा, मदनं कामं मन्थरयति मन्थद्रव्यवदाकुलयति। मन्थरवत्तत्स्तम्भयति वा। मदनमन्थरं तन्मुग्धं मुखाम्बुजं यस्य। मदनोऽपि यन्मुखलावण्यमालोक्य मन्थरो जात इति वाक्यार्थः।

साक्षान्मन्मथमन्मथः

इति भागवतेऽप्युक्तम् (भा० १०.३२.२)। पुनः कीदृशम्—व्रजवधूनयनाञ्जनरञ्जितम्। चुम्बनादधरलग्नतन्नयनाञ्जनमित्यर्थः। तथा च गीतगोविन्दे (८.३)—

कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपम्

1. GB omits all words from तत्किं to आह and reads instead : तद्विशिनष्टि. GB omits the pratīka मदशिखण्डि etc. 2. GB transposes माद्यतीति मदः and मदो हर्षे. 11. GB omits कीदृशं and reads मदनेति for the pratīka मदनमन्थर etc. 12. GB transposes मथ्नाति and मनांसि. GB यत्र for यस्य. 13. GB inserts शैलवत् after मन्थरवत्, and इति after स्तम्भयति. 17. GB omits अप्युक्तम्. GB omits कीदृशं and reads व्रजेति for the pratīka व्रजवधू. etc. 19. The letters विर lost in GA.

इति। यद्वा, व्रजवधूभिर्नयनाञ्जनवद्रञ्जितमनुरागविषयीकृतम्। तन्नयनाञ्जने रञ्जितमञ्जनच्छद्मनानुरक्तं वा। यद्वा, सर्वतः स्थितानां व्रजवधूनां सर्वाङ्गप्रतिबिम्बितेषु तत्कज्जलप्रतिबिम्बात्। अथवा व्रजवधू[नयना]नामञ्जना कान्तिमती गतिर्भावहावसहितदृक्पातकटाक्षरूपा तया रञ्जितं हर्षयुक्तम्। अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (धा० ७. २१)॥ द्रुतविलम्बितं छन्दः—

द्रुतविलम्बितमाह नभौ भरौ (छन्दोमञ्जरी २)॥८

सुबोधनी

ततस्तन्माधुर्यमयस्ववाचां तत्तत्स्वरूपत्वेन स्फूर्त्या सहर्षमाह—मम वाङ्मयजीवितं विजयतां स्वविषयकवचनरूपत्वेन विराजताम्। कीदृशम्—मदेति। पूर्ववत्तस्य रत्यङ्कचिह्नस्फूर्त्याह—मदनेन प्रियाधरमधुपानजहर्षेण मन्थरं सालसमतएव मुग्धं मुखाम्बुजं यस्य। तदेव व्यनक्ति—व्रजवध्वाः श्रीराधाया नयनाञ्जनेन रञ्जितं चित्रितम्॥८

सारङ्गरङ्गदा

अथ मनसि तन्माधुर्यं वर्णयंस्तस्य तया सह रहोलीलोत्कण्ठास्फूर्त्या तद्दर्शनोत्कण्ठया सहर्षमाह—तद्वर्णनवासितमनस्तया वाग्वाच्ययोरेकतास्फूर्त्येदं मम

3. GB व्रजाङ्गना० for व्रजवधू०. GA कान्तिमतां. 4. GB omits कटाक्ष in ०दृक्पातकटाक्षरूपा. हर्षयुक्तं lost in GA. GB अञ्जु. 8. CB, CD omit all words from ततः to आह and read instead: ततोऽप्यतिदैन्योदयात्तत्रापि तदसंभावयन्नाह—मदशिखण्डीति. CC तत० for तत्तत्०. 9. CA स्वविषयकवचनमेव; CD स्वविषयकत्वचनत्वेन; CC स्वविषयकरूपेण. CB, CD अप्याविर्भवत्वित्यर्थः (CD omits अपि) for विराजतां. 10-11. CB, CD omit all words from तस्य रत्यङ्क० to मुग्धं and read instead: तत्रापि निजाभीष्टविषयकभावविशेषान्वितत्वमाह—मदयति हर्षयतीति मदनः कामः प्रियाविषयोऽ-(CB ०विषया)भिलाषस्तेन मन्थरं हास्यकटाक्षादिषु स्तब्धमतएव मनोहरं. 11. CB यतो, CD ततो for तदेव व्यनक्ति. CB, CD तस्या for श्रीराधायाः. 11-12. नयनाञ्जनैः for नयनाञ्जनेन.

वाङ्मयजीवितं विजयताम्। तल्लीलार्थं गच्छत्वित्यर्थः। यद्वा, मम वाङ्मयं च तस्या जीवितं जीवनहेतुश्च तद्विजयताम्। का मम चिन्तेत्यर्थः।

आयुर्घृतम्

इतिवत्। कीदृशम्—मदेति। पूर्ववदुच्छलितमदनेन मन्थरं तत्तत्क्रियासु सालसं मुग्धं च मुखाम्बुजं यस्य। मदनमपि मन्थरयति स्तम्भयति मुग्धं मुखाम्बुजं यस्येति वा। मिथश्चुम्बनेन व्रजवधूनां नयनाञ्जनै रञ्जितम्।

नयनगलकपोलं दन्तवासो मुखान्तः-
स्तनयुगलललाटं चुम्बनस्थानमाहुः ॥

(रतिरहस्य ७. १) इति ॥ वाह्ये—तद्दौर्लभ्यं कथयतः स्वान्प्रति।

कृद्विहितो भावो द्रव्यवत्प्रकाशते

(महाभाष्य, पा० ३. १. ६७) इति न्यायात्। तन्माधुर्यमयस्ववाचां तत्स्वरूपत्वेन स्फूर्त्या सहर्षमाह—इदं विजयताम्। का मम चिन्तेत्यर्थः ॥८

पल्लवारुणपाणिपङ्कजसङ्गिवेणुरवाकुलं
फुल्लपाटलपाटलीपरिवादिपादसरोरुहम्।
उल्लसन्मधुराधरद्युतिमञ्जरीसरसाननं
वल्लवीकुचकुम्भकुङ्कुमपङ्किलं प्रभुमाश्रये ॥९

1. KP omits विजयतां, inserts रहः before तल्लीलार्थं, and reads गच्छन् for गच्छतु. 2. KB, KP तस्य for तस्याः. KP omits च before तत्, and KA, KB omit तत्. KD inserts सा before का. 3. This well known illustration of Lakṣaṇā occurs in many works on Alaṃkāra (e.g. Rudraṭa vii. 83; Mammaṭa ii. 12); also Taitt. Saṃhitā 2. 3. 2. 2 and Mahābhāṣya 1. 1. 59 (Vār. 6). 4-5. KP inserts मानसं after मन्थरं and omits सालसं. 5-6. KA, KD मुग्धमुखाम्बुजं (after स्तम्भयति). 6. KC, KP transpose चुम्बनेन and व्रजवधूनां, and read अञ्जनैः for नयनाञ्जनैः. 7. KP नयनयुगकपोलं. KD, KP मुखान्त-. 10. भवति for प्रकाशते in the Mahābhāṣya. 12. KD inserts अपि after का. 13-16. The verse is lost in GA.

कृष्णवल्लभा

अथ परमोज्ज्वलभावाविष्टः कविर्व्रजसुन्दरीरमणं संश्रयते—पल्लवेति। प्रभुं प्रकर्षेण भवन्ति सर्वे कामा यस्मादिति तमाश्रये सम्यक्सेवे। कीदृशम्—पल्लवारुणपाणिपङ्कजसङ्गिवेणुरवाकुलम्। पल्लववत्पल्लवादपि वारुणो यः पाणिः स एव पङ्कजम्। सुगन्धशीलत्वात्। तत्सङ्गी यो वेणुस्तस्य रवेण ध्वनिनाकुलयति सर्वव्रजतरुणीरिति। ण्यन्तात्पचाद्यच् (पा० ३. १. १३४)। यद्वा, तत्सङ्गी तदासक्तिमान्यो वेणुस्तस्य रवः स एव अकुलः कुलमर्यादात्याजको यत्र। पाणेः पङ्कजत्वेन निरूपणाद्वेणोः कलहंसता श्रीकृष्णस्यामृतसरस्ता च व्यञ्जिता। पुनः कीदृशम्—फुल्लपाटलपाटलीपरिवादिपादसरोरुहम्। फुल्ला विकशिता या पाटला रक्ता पाटली पाटलिपुष्पम्।

पुष्पमूले बहुलम्

(वार्त्तिक, पा० ४. ३. १६६) इति सूत्रेणाण्-प्रत्ययस्य लुक्। अतिरक्तलाभाय रक्तेति। तां परिवदितुं निन्दितुं शीलं यस्य तत्तथाभूतं पादरूपं सरोरुहं रक्तकमलं यस्य तम्। पङ्कजत्वेन कदाचिन्मुद्रिततापि स्यादत उक्तम्—फुल्लेति। पुनः कीदृशम्—उल्लसन्मधुराधरद्युतिमञ्जरीसरसाननम्। उल्लसन्त्य उद्गच्छन्त्यो या मधुराधरे द्युतयः कान्तयस्तासां मञ्जरीभिः। ता एव मञ्जर्यो वा। ताभिः सरसं रसो माधुर्यादिस्तत्सहितमाननं यस्य। यद्वा, उल्लसदुच्चैर्लसच्छोभमानं मधु मादकं वस्तु तद्राति ददाति। सा चासावधरद्युतिमञ्जरी चेति। अन्यापि मञ्जरी मधु प्रयच्छतीति प्रसिद्धम्। तया सरसा रससहिता गोपीर् आ समन्ताद-

2. GA मनोरमोज्ज्वल० for अथ परमोज्ज्वल०. 3. GB omits प्रभुं and inserts प्रभुः after यस्मादिति. 4. GB पल्लवेति for the pratīka पल्लवारुणा etc. GB पल्लव इव for पल्लववत्. 5-7. GA omits haplologically all words from पङ्कजं to स एव. 8. GA कलहंसरूपता. 9. GB omits कीदृशं and the phrase फुल्लपाटल० etc., and reads for the latter फुल्लेति. 12. GB inserts वा before लुक्. 15. GB omits कीदृशं and the phrase उल्लसन्मधुरा etc., and reads for the latter उल्लसदिति. 16. GA कान्तय एव for ता एव 17. GB उदुच्चैः for उल्लसदुच्चैः.

निति जीवयतीति तम्। पुनः कीदृशम्—वल्लवीकुचकुम्भकुङ्कुमपङ्किलम्। वल्लवीनां गोपसुन्दरीणां कुचकुम्भगतकुङ्कुमेन पङ्किलम्। कुङ्कुममित्युपलक्षणम्। कर्पूरागुरु-कस्तूरीकर्दमितकलेवरमित्यर्थः। इदं तु किशोराकृति श्रीकृष्णचन्द्रस्य लीलावपु-र्गोपसुन्दरीणामेवेति ताभिः स्वकुचगतकुङ्कुमेन मुद्रा दत्तेति भावः। पङ्किलमित्यनेन खेलन्मन्मथपरिश्रमखेदामृतरसप्रवाहरूपपरिरम्भणातिशयो व्यज्यते। हस्तयोः पादयो-रधरस्य च द्युतीनां रागेण वल्लवीकुचकुङ्कुमपङ्किलतया च सर्वाङ्गरागयुक्तेन तेन तन्मनोरागो द्विगुणीकृतः। तेन तदाश्रयं विना न जीवामीति भावः॥ चर्चरी छन्दः। तल्लक्षणम्—

रसजा जभराश्च चर्चरी ॥९

सुबोधनी

तस्य स्ववाङ्मयत्वमप्यसंभाव्य शरणापत्तिमात्रं प्रार्थयन्पूर्वोक्तं विवृणोति— प्रभुमयोग्यमपि योग्यं कर्तुं समर्थमाश्रये। कीदृशम्—पल्लवादप्यरुणयोः पाणि-पङ्कजयोः सङ्गी यो वेणुस्तस्य रवैराकुलं तदावेशविवशम्। प्रियोरश्चन्दनाक्तचरण-स्फूर्त्याह—फुल्लानि पाटलाणि पुष्पाणि यस्यां तां पाटलीं परिवदितुं स्वश्रीतारुण-कान्त्या तुच्छीकर्तुं शीलं यस्य तादृशं पादपद्मं यस्य तम्। सहजारुणमपि प्रियोरश्चन्दनाक्ततया पाटलत्वम्। तथा, उल्लसन्ती या तन्नेत्रचुम्बनलग्नाञ्जन-

1. GB omits कीदृशं and reads वल्लवीति for the phrase वल्लवीकुच etc. 2. GB गोपीनां for गोपसुन्दरीणां. 2-3. GB कर्पूरागुरुकस्तूरीणाम्, तत्कर्दमित०. 7. GB inserts हेतुना before तदाश्रयं. 9. Cf. प्राकृतपिङ्गल (ed. Nirṇaya Sāgara Press, Bombay 1894) ii. 231-32. 11. CB, CD omit all words from तस्य to विवृणोति, and read instead: तत्र तामालक्ष्य (CD तथाप्ययोग्यतामालक्ष्य) शरणापत्ति (CD शरणापत्तिमात्रं) प्रार्थयते—पल्लवेति. 12. CB, CD insert शरणं व्रजामि after आश्रये. CB पल्लवादरुणयोः; CD पल्लववद०. 13-14. CB, CD omit all words from प्रियोरश्चन्दनाक्त० to पाटलीं and read instead: शरणापत्त्योद्रिक्तभक्त्याह—विकशितपाटलपाटल्यौ. 15. CC पादपल्लवं for पादपद्मं. 15-16. CB सहजारुणयोस्तयो(CD ०योः प्रियोर)श्चन्दनाक्ततया. 16. For तथा CB, CD read पाटलपाटल्योरीषद्भेदः। पुनरुक्तपाठविशेषमाह(CD ०विशेषेणाह). CB मधुराधरस्य द्युति० for तन्नेत्र-चुम्बनलग्नाञ्जनमधुराधरद्युति०. CC ०लग्नाञ्जनेन for ०लग्नाञ्जन०.

मधुराधरद्युतिमञ्जरी तया सरसमाननं यस्य। तदेव व्यनक्ति—वल्लव्यास्तस्याः कुचकुम्भकुङ्कुमैः पङ्किलं चर्चिताङ्गम् ।।९

सारङ्गरङ्गदा

अथ रासविलासिनस्तस्य तत्तन्माधुर्यस्फूर्त्या प्रेमवैवश्यादपूर्वमिव तं मत्वा बाह्यदशावासितमनस्तया स्फूर्तिप्रार्थनवत्सलालसमाह द्वाभ्याम्। प्रभुमेकेन वपुषैवानन्तगोपीवाञ्छापूर्तिसमर्थमहमाश्रये। कीदृशम्—पल्लवादप्यरुणयोः पाणिपङ्कजयोः सङ्गी यो वेणुस्तस्य रवैः स्वरोल्लासैस्ता आकुलयतीति तम्। तदुक्तम्—

तदनङ्गवर्धनम्

(भा० १०. २९. ४) इति। नृत्ये ताभिरनङ्गतप्तकुचेषु न्यस्तत्वादपूर्वकान्तिश्रीचरणस्फूर्त्याह—तदुरोजस्पर्शात्फुल्लं च सहजारुणमपि स्तनचरणप्रस्वेदपङ्किलतत्कर्पूरमिश्रितचन्दनरूषितत्वात्पाटलं च तत् ।

श्वेतरक्तस्तु पाटलः

(अमरकोश १. ४. १५) इत्युक्तेस्तच्च। अतः पाटलीं परिवदितुं शीलं यस्य तादृशं पादसरोरुहं यस्य तम्। फुल्लानि पाटलानि यस्यां तां पाटलीमिति वा। पाटलपाटल्योरीषद्भेदो वा ज्ञेयः। तथा, तन्नेत्रचुम्बनलग्नाञ्जनेन स्मितकान्त्या चोल्लसन्ती सुधासारादपि मधुरा च याधरस्य सितश्यामारुणा द्युतिमञ्जरी तया सरसमाननं यस्य। तथा, वल्लवीनां कुचकुम्भकुङ्कुमैः पङ्किलं चर्चिताङ्गम्। वेणुनादैस्ता व्याकुलीकृत्य ताभिश्चुम्बनालिङ्गनादिकं कृतवानिति भावः ।।—बाह्यार्थः स्पष्टः ।।९

1. CB, CD स्वाभीष्टमेव द्योतयन्नाह for तदेव व्यनक्ति. CB, CD श्रीराधायाः for तस्याः. 2. CD कुचकुङ्कुमैः. CB, CD omit पङ्किलं. 4. KB, KP तत्० for तत्तत्०. 6. KP अनन्तकोटिगोपी०. KB ०वाञ्छापूरणा०, KD ०वाञ्छापूर्तेः for ०वाञ्छापूर्तिं. 7. KC, KP transpose स्वरोल्लासैः (KP स्मरोल्लासैः) and ताः. KB यदुक्तम्. 8. KC, KP omit तत्. 9. KP ०दृप्तकुचेषु for ०तप्तकुचेषु. 10. KA तद्वक्षोज० for तदुरोज०. KP ०प्रस्वेदपङ्किलं तत्०. 11. KC, KP ०चन्दनारुणारूषित०. 13. KB, KP परिवादितुं, KC परिवादयितुं. 15. KA ०लग्नकज्जलेन for ०लग्नाञ्जनेन. 16. KB स्मितश्यामा०, KP शितश्यामा०. KA ०श्यामारुणाधरद्युति०. 18. KB कृतवानसीति शेषः.

अपाङ्गरेखाभिरभङ्गुराभि-
रनङ्गरेखारसरञ्जिताभिः ।
अनुक्षणं वल्लवसुन्दरीभि-
रभ्यस्यमानं विभुमाश्रयामः ॥१०

कृष्णवल्लभा

संप्रति स्वाभिमतरूपेणाविर्भावार्थमाह—अपाङ्गेति । विविधरूपेण भक्तानुग्रहार्थमाविर्भवतीति विभुस्तमाश्रयामः शरणं व्रजामः । बहुवचनेन भगवच्छरणाय सजातीयसङ्गोऽपि परमसाधनमिति सूचितम् । कथंभूतम्—वल्लवानां गोपानां सुन्दरीभिर्विशिष्टस्त्रीभिः । तथा चामरसिंहे (२. ६. ३-४)—

विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना ।
प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥
सुन्दरी रमणी रामा

इति । अपाङ्गलेखाभिः करणरूपाभिः । अपाङ्गानां नेत्रान्तानां लेखाभिः रेखाभिः । रलयोरैक्यात् ।

श्रेणी रेखास्तु राजयः

इत्यमरः (२. ३. ४) । यद्वा, अपाङ्गेषु रेखावत्कज्जलरेखावत्स्थिता दीर्घीभूता दृष्टयस्ताभिः । अनुक्षणं क्षणे क्षणेऽभ्यस्यमानं विषयीक्रियमाणम् । गच्छागच्छ तिष्ठोत्तिष्ठेत्यादिवद्वशीक्रियमाणमित्यर्थः । सन्ततदृष्टितोऽपि तृप्तौ जातायां विरतिः

1. In GA eight folios are lost, and the text and commentary on verses 10-24 are consequently missing. 1-2. Gopālabhaṭṭa reads अपाङ्गलेखा० and अनङ्गलेखा०. 6. GC करोति for आह. 6-7. GC inserts विभुं before भक्ता० and omits विभुः after इति. 7. GB भगवच्छरणागतस्य. 8. GB कीदृशं for कथंभूतं. GB वल्लवसुन्दरीभिर्गोपविशिष्टस्त्रीभिः. 13. GB omits अपाङ्गलेखाभिः करणरूपाभिः. GB पंक्तिभिः करणरूपाभिः for रेखाभिः. 14. GB omits रलयोरैक्यात्. 16. GB अपाङ्गेषु या रेखा कज्जलरेखावद्दीर्घीभूता 18. GB सततावलोकने for all words from सन्तत० to जातायां.

स्यात्, सा तु नास्तीत्याह—अभङ्गुराभिरविच्छिन्नप्रवाहरूपाभिः। स्वतस्तृप्त्या भज्यते न, किं तु विषयस्यान्यतोगमनादिनैवेति भावः। यद्वा, अभ्यस्तोऽभ्यस्यनीयो मानो यस्मिंस्तम्। तन्मुखमधुरिमावलोकनान्मानस्यानवस्थितेः। तथा च शरणः (पद्यावली २३५)—

मुरारिं पश्यन्त्याः सखि सकलमङ्गं न नयनं
कृतं यच्छृण्वन्त्या हरिगुणगणं श्रोत्रनिचितम्।
समं तेनालापं सपदि रचयन्त्या मुखमयं
विधातुर्नैवायं घटनपरिपाटीमधुरिमा॥

इति। यस्या अपाङ्गरेखा यादृशी तदाह—अनङ्गलेखारसरञ्जिताभिः। अनङ्गः कामस्तस्य लेखा परंपरा तया यो रसस्तेन रञ्जिताभिः। रसाभिव्यञ्जिकाभिरित्यर्थः। ताभिर्हि नानाश्चर्यविनोदैः कोटिशो महाद्भुता अनङ्गा आवर्त्यन्त इत्यत्र कान्ता दृष्टिः स्निग्धा च। यथा (संगीतरत्नाकर ७. ३८५)—

आपिबन्तीव दृश्यं या सविकाशातिनिर्मला।
सभ्रूक्षेपकटाक्षा सा कान्ता मन्मथवर्धिनी॥

स्निग्धालक्षणं पूर्वमेवोक्तम्। अनङ्गेति वल्लीविशेषणं वा। अनङ्गलेखः कामलेखः श्रीकृष्णं प्रति, तत्र य आ सर्वतो रसस्तेन रञ्जिताभिः। अनङ्गेन कामेन कृतो लेखो निजवक्षोरुहादौ कस्तूरिकया श्रीकृष्णमूर्तेर् आ सम्यक् लेखनं तेनैवोद्भूतो यो रसस्तेन रञ्जिताभिर्वा। श्रीकृष्णप्रेषितानङ्गलेखेना रसरञ्जिताभिर्वा। तत्र कामलेखो यथा रसामृतसिन्धौ—

स लेखः कामलेखः स्याद्यः स्वप्रेमप्रकाशकः।
युवत्या यूनि यूना च युवत्यां संप्रहीयते॥
निरक्षरः साक्षरश्च कामलेखो द्विधा भवेत्॥

1. GB omit तु after सा. 9. GB अपाङ्गलेखां वर्णयति for all words form यस्याः to तदाह. GB अनङ्गेति for अनङ्गलेखारसरञ्जिताभिः. 15. GC अनङ्गरेखारसरञ्जिताभिः for अनङ्गेति. 18. GB तैरेवो॰ for तेनैवो॰. 20. The following quotations are not found in the Bhakti-rasāmṛta-sindhu, but occurs in the Ujjvala-nīla-maṇi, Śṛṅgāra-bheda-prakaraṇa, 59-61, 62-64.

तत्र च निरक्षरः—

सुरक्तपल्लवमयश्चन्द्रार्धादिनखाङ्कभाक् ।
वर्णविन्यासरहितो भवदेष निरक्षरः ॥

अथ साक्षरः—

गाथामयी लिपिर्यत्र स्वहस्ताङ्कः स साक्षरः ।

यथा जगन्नाथवल्लभे (२ अङ्क)—

सुइरं विज्झसि हिअअं लम्भइ मअणो क्खु दुज्जसं बलिअं ।
दीससि सअलदिसासु दीसइ मअणो ण कुत्तावि ॥

बन्धोऽब्जतन्तुना रागः किं वा कस्तूरीकामसी ।
पृथुपुष्पदलं पत्रं मुद्रा हृत्कुङ्कुमैरिह ॥

इति ॥१०

सुबोधनी

पुनस्तत्सखीभिः सलालसमीक्ष्यमाणमाश्रयन्नाह—पूर्ववद्भिमुमाश्रयामः । तदीक्षणीयत्वं व्यनक्ति—वल्लवसुन्दरीभिर्निरन्तरमपाङ्गरेखाभिरविच्छिन्ननेत्रान्तदृष्टिधाराभिः पुष्पाद्याहरणकाले नेत्राग्रे तत्स्फूर्त्यर्थं मुहुरावर्त्यमानम् । सखीस्वभावा-

1-10. The whole passage from तत्र च to हृतकुङ्कुमैरिह is taken directly from Ujjvala-nīla-maṇi. 4. GB omits अथ साक्षरः. 5. GB स्वहस्ताङ्कितसाक्षरः. 6. GB तथा for यथा. 10. After हृत्कुङ्कुमैरिह GB inserts तत्र श्लोकः—सुचिरं विध्यसि हृदयं लभ्यते मदनः खलु दुर्जयो बलवत्। दृश्यसे सकलदिशासु दृश्यते मदनो न कुत्रापि॥ which is a छाया of the preceding Prakrit verse; GC inserts उपेन्द्रवज्रा छन्दः। उपेन्द्रवज्रा जगौ गः (corrupt). But the metre is उपजाति. 13. CB, CD omit all words from पुनः to आह and read instead: ततः स्वाभीष्टमेव सपरिकरमाश्रयन्नाह—अपाङ्गेति. CC ईक्षमानं. 13-14. CB कीदृशं for तदीक्षणीयत्वं व्यनक्ति; CD omits it. 14. CB, CD insert तत्सखीभिः before निरन्तरं. CB, CD ०ईक्षण० for ०दृष्टि०. 15. CB, CD यतः हृदि for पुष्पाद्याहरणकाले नेत्रान्ते. CB, CD ०स्फूर्त्तये for स्फूर्त्यर्थं. CB, CD for सखीस्वभावाचरितमाह.

चरितमाह—अनङ्गस्य स्वसखीविषयकप्रेम्णो योऽविच्छिन्नतारसस्तेन भाविताभिः। सखीत्वं संपादयन्नाह—अभङ्गुराभिः। नायिकात्वे वक्रदृष्ट्यौचित्यात् ॥१०

सारङ्गरङ्गदा

पुनस्ताभिः सलालसमीक्ष्यमाणस्य स्फूर्त्या पूर्ववदाह—पूर्ववद्विभुमाश्रयामः। कीदृशम्—वल्लवसुन्दरीभिरनुक्षणं निरन्तरमपाङ्गरेखाभिरविच्छिन्ननेत्रान्तदृष्टिधाराभिरभ्यस्यमानं तृषितनेत्रान्तनलनालिकाभिर्गभीरामृताब्धिमिव कियद्दूरादास्वाद्यमानम्। किं वा, वियोगभीत्या दिवसेऽपि नेत्राग्रे तत्स्फूर्तयेऽभ्यस्यमानम्। अभङ्गुराभिरवक्राभिः। नेत्रभ्रुवोर्वक्रता, दृष्टिधारा तु ऋज्वीत्यर्थः। अप्रतिहताभिरिति वा। तथानङ्गरेखायास्तत्परंपराया यो रसस्तेन रञ्जिताभिर्भाविताभिः। कोटिकन्दर्परसोद्गारिकाभिरित्यर्थः। भङ्ग्या बाणश्रेणीभिर्लक्ष्यमिव कटाक्षधाराभिरभ्यस्यमानं कामरसहिङ्गुलादिरञ्जिताभिः। यद्वा, कीदृशीभिस्ताभिः—अपाङ्गान्तरेऽरुणा रेखा, बाह्ये त्वञ्जनरेखा, यासां ताभिः। अभङ्गुराभिः पराजयमप्राप्ताभिरित्यर्थः। कामश्रेणीरसभाविताभिश्च ॥—बाह्यार्थः स्पष्ट एव ॥१०

हृदये मम हृद्यविभ्रमाणां
हृदयं हर्षविशाललोलनेत्रम्।
तरुणं व्रजबालसुन्दरीणां
तरलं किंचन धाम संनिधत्ताम् ॥११

1. CB रञ्जिताभिः for भाविताभिः. 2. CB, CD अतएव for सखीत्वं संपादयन्नाह. CC अवक्राभिः for अभङ्गुराभिः. CB, CD omit नायिकात्वे वक्रदृष्ट्यौचित्यात्. 4. KP पूर्ववदेवाह. After आह KD inserts अपाङ्गेति. 6. KC, KP गम्भीरा० for गभीरा०. KP आसाद्यमानं. 7. KB omits अपि after दिवसे. 8. KC, KP read अवक्रता for वक्रता, and omit तु. KC दृष्टिधाराभिः for दृष्टिधारा तु ऋज्वी. 9. KB, KD omit भाविताभिः. 10. KB, KD लक्ष्यमिव. 11-12. KA अपाङ्गान्तररुणा, KC अपाङ्गेऽन्तररुणा. KC omits all words from बाह्ये to ताभिः. KC, KP insert यासां before बाह्ये.

कृष्णावल्लभा

अथ श्रीकृष्णभावेन भूषिताशयो विप्रलम्भरसमतिदुःसहं मन्यमानो हृदये तल्लीलास्फूर्तिमेवाशास्ते—हृदय इति। किंचन धाम कर्तृ कापि मूर्तिः। अतिरहस्यत्वात्सर्वोपनिषदादिनिगूढत्वाद्वा तन्नामाग्रहणम्। मम हृदये चेतसि संनिधत्तां संनिहितं भवतु। कीदृशम्—हृद्यविभ्रमाणां हृदयप्रिया ये विभ्रमा विलासादयो हावास्तेषां हृदयं मूलभूतम्। यावन्तो हि रसमयविलासास्तेषां बीजभूतमित्यर्थः। तेषां जीवनं वा। ते हि परमानन्दसान्द्रमूर्तिं प्राप्य जीवन्ति। यद्वा, हृद्या विभ्रमा भावहावालंकारा यासां तासां व्रजसुन्दरीणां हृदयं सर्वस्वम्। हृन्मन अयते प्रविशतीति वा। तत्रालंकारा उज्ज्वलनीलमणौ (अनुभावप्रकरण २-६२)—

यौवने सत्त्वजास्तासामलंकारास्तु विंशतिः।
उदयन्त्यद्भुताः कान्ते सर्वथाभिनिवेशतः॥
भावो हावश्च हेला च प्रोक्तास्तत्र त्रयोऽङ्गजाः।
शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता॥
औदार्यं धैर्यमित्येते सप्तैव स्युरयत्नजाः।
लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम्॥
मोट्टायितं कुट्टमितं विव्वोको ललितं तथा।
विहृतं चेति विज्ञेया दश तासां स्वभावजाः॥

तत्र भावः—

निर्विकारात्मके चित्ते भावः प्रथमविक्रिया।

अथ हावः—

ग्रीवारेचकसंयुक्तो भ्रूनेत्रादिविकाशकृत्।
भावादीषत्प्रकाशो यः स हाव इति कथ्यते॥

5. GB insert हृदयं before हृद्यविभ्रमाणां. 5-6. GB omits all words from हृदयप्रिया to हृदयं and reads instead हृदयप्रियविलासानां 7. GB परमानन्दमूर्तिं. GB inserts इति after जीवन्ति, and मनोहरा after हृद्या. 8. GB गोपीनां for व्रजसुन्दरीणां. 9. GB inserts उक्ताः after उज्ज्वलनीलमणौ. 10. The following passage, beginning with यौवने (l. 10) and ending with भयं महत् (p. 61, l. 9), is taken directly from Ujjvala-nīla-maṇi, which in its turn paraphrases most of the definitions from Rasārṇava-sudhākara, i, 192f.

रेचकं तिर्यक्करणम्।　अथ हेला—

हाव एव भवेद्धेला व्यक्तः शृङ्गारसूचकः।

एतेऽङ्गजाः।　अथायत्नजाः।　तत्र शोभा—

सा शोभा रूपभोगाद्यैर्यत्स्यादङ्गविभूषणम्॥

अथ कान्तिः—

शोभैव कान्तिराख्याता मन्मथाप्यायनोज्ज्वला।

अथ दीप्तिः—

कान्तिरेव वयोभोगदेशकालगुणादिभिः।
उद्दीपितातिविस्तारं प्राप्ता चेद्दीप्तिरुच्यते॥

अथ माधुर्यम्—

माधुर्यं नाम चेष्टानां सर्वावस्थासु चारुता।

अथ प्रगल्भता—

निःशङ्कत्वं प्रयोगेषु बुधैरुक्ता प्रगल्भता॥

अथौदार्यम्—

औदार्यं विनयं प्राहुः सर्वावस्थागतं बुधाः।

अथ धैर्यम्—

स्थिरा चित्तोन्नतिर्या तु तद्धैर्यमिति कीर्त्यते॥

अथ स्वभावजाः।　तत्र लीला—

प्रियानुकरणं लीला रम्यैर्वेशक्रियादिभिः।

यथा विष्णुपुराणे (५. १३. २७)—

दुष्ट कालिय तिष्ठाद्य कृष्णोऽहमिति चापरा।
बाहुमास्फोट्य कृष्णस्य लीलासर्वस्वमाददे॥

अथ विलासः—

गतिस्थानासनादीनां मुखनेत्रादिकर्मणाम्।
तात्कालिकं तु वैशिष्ट्यं विलासः प्रियसङ्गजम्॥

1. GC रेचकस्तिर्यक्करणविशेषः. 21-22. This quotation also occurs in the same place in the Ujjvala-nīla-maṇi.

अथ विच्छित्तिः—

आकल्पकल्पनाल्पापि विच्छित्तिः कान्तिपोषकृत्
सखीयत्नादिव धृतिर्मण्डनानां प्रियागसि ।
सेर्ष्यावज्ञा वरस्त्रीभिर्विच्छित्तिरिति केचन ॥

अथ विभ्रमः—

वल्लभप्राप्तिवेलायां मदनावेशसंभ्रमात् ।
विभ्रमो हारमाल्यादिभूषास्थानविपर्ययः ॥
अधीनस्यापि सेवायां कान्तस्यानभिनन्दनम् ।
विभ्रमो वामतोद्रेकात्स्यादित्याख्याति कश्चन ॥

अथ किलकिञ्चितम्—

गर्वाभिलाषरुदितस्मितासूयाभयक्रुधाम् ।
संकरीकरणं हर्षादुच्यते किलकिञ्चितम् ॥

अथ मोट्टायितम्—

कान्तस्मरणवार्तादौ हृदि तद्भावभावतः ।
प्राकट्यमभिलाषस्य मोट्टायितमुदीर्यते ॥

अथ कुट्टमितम्—

स्तनाधरादिग्रहणे हृत्प्रीतावपि संभ्रमात् ।
बहिः क्रोधो व्यथितवत्प्रोक्तं कुट्टमितं बुधैः ॥

अथ विव्वोकः—

इष्टेऽपि गर्वमानाभ्यां विव्वोकः स्यादनादरः ।

अथ ललितम्—

विन्यासभङ्गिरङ्गानां भ्रूविलासमनोहरा ।
सुकुमारा भवेद्यत्र ललितं तदुदीरितम् ॥

अथ विहृतम्

ह्रीमानेर्ष्यादिभिर्यत्र नोच्यते स्वविवक्षितम् ।
व्यज्यते चेष्टयैवेदं विहृतं तद्विदुर्बुधाः ॥
अलंकारा निगदिता विंशतिर्गात्रचित्तजाः ।
अमी यथोचितं ज्ञेया माधवेषु मनीषिभिः ॥

कैश्चिदन्येऽप्यलंकाराः प्रोक्ता नात्र मयोदिताः ।
मुनेरसंमतत्वेन किं तु द्वितयमुच्यते ।
मौग्ध्यं च चकितं चेति किंचिन्माधुर्यपोषणात् ॥

तत्र मौग्ध्यम्—

ज्ञातस्याप्यज्ञवत्पृच्छा प्रियाग्रे मौग्ध्यमीरितम् ।

तथा—

मुक्ताफलं तरोः कस्येत्याद्यार्जवप्रकाशनम् ॥

इति । चकितम्—

प्रियाग्रे चकितं भीतेरस्थानेऽपि भयं महत् ॥

इति । पुनः कीदृशम्—हर्षविशाललोलनेत्रम् । हर्षेण विशाले सहजविस्तारादधिकतरविस्तारे लोले प्रेयसीनां तत्तदङ्गविलोकनाय चञ्चले नेत्रे यस्य तत् । अत्र विभ्रान्ता दृष्टिः । यथा (संगीतरत्नाकर ७. ४२६)—

या तु क्वचिदविश्रान्तमविष्टब्धविलोकने ।
विस्तीर्णा चञ्चलोत्फुल्लतारा सा दृष्टिरुच्यते ।

अविष्टब्धमनवरतम् ।

विभ्रान्ता विभ्रमे वेगे संभ्रमे च भवेदसौ ॥

पुनः कीदृशम्—तरुणम् । रसविलासचमत्कारचेष्टारूपम् । किशोरत्वेऽपि शृङ्गाररसविलासातिप्रागल्भ्यात्तरुणमित्युक्तम् । पुनः कीदृशम्—व्रजबालसुन्दरीणां तरलम् । व्रजे या बाला मृद्वङ्ग्यः किशोर्यो वा ताश्चाकृत्या प्रकृत्या च सुन्दर्यः । तासां मध्ये तरलं वस्त्रहरणादिना चञ्चलस्वभावम् । यद्वा, तासां तरलम् ।

तरलो हारमध्यगः

(अमरकोश, २. ६. १०२) । तत्सदृशम् । सादृश्येऽर्शआदिरच् (पा० ५. २. १२७) ।

3. GB पोषकृत् for पोषणात्. 6-7. These lines do not occur in the Ujjvala-nīla-maṇi. 10. GB हर्षेति for the phrase हर्षविशाल etc. 13. GC अविष्टम्भावलोकने ; in Saṅgīta-r. अविस्रब्धं विलोकते. 15. GC अविष्टम्भम्. 17. GB omits कीदृशम्. 18. GB omits कीदृशं and reads व्रजेति for the pratīka व्रजबाल etc. 20-21. GB transposes तासां तरलं and तरलो हारमध्यगः. 22. GB मध्यमणिसदृशं for तत्सदृशं.

तरलं चञ्चले पिङ्गे स्वभावेऽपि त्रिलिङ्गकम् ।
हारमध्यमणौ पुंसि यवागूसुरयोः स्त्रियाम् ।।

(मेदिनी०, लान्त०, ६६)। औपच्छन्दसिकं छन्दः ।।११

सुबोधनी

अथात्मनस्तदनुगतत्वेन स्वहृदि तथैव स्फूर्तिं सदैन्यमाशास्ते—मम हृदये किंचन धाम पूर्वनिर्दिष्टानिर्वचनीयं माधुर्यं संनिधत्ताम्। संनिधावप्युदेत्विति दैन्यम्। कीदृशम्—तरुणम्। तारुण्यांशे स्थितम्। तद्वयञ्जयति—हृदयंगमानां विलासानां हृदयमाश्रयम्। तदेवाह—अपाङ्गरेखाभिरभ्यस्यमानत्वेन यो हर्षस्तेन विस्तीर्णे सतृष्णे नेत्रे यस्य। अतएव व्रजबालसुन्दरीणां तरलं हारमध्यनायकवदतीव स्फुरन्तम् ।।११

सारङ्गरङ्गदा

अथ रसिकशेखरत्वाद्वैदग्ध्यात्तासामुत्कण्ठां संवर्ध्य ता हित्वा तया सह रहोलीलोत्कण्ठया सर्वसमाधानार्थं

श्लिष्यति कामपि

(गीतगोविन्द १. ४६) इत्यादिवत्ताभिः सह विलसन्तं तमालोक्य तद्दिदृक्षया सौत्सुक्यमाह पूर्वरीत्या—इदं किंचन ज्योतिःपुञ्जमपि चक्षुमतीत्यनिर्वचनीयं धाम मम हृदये

मञ्चाः क्रोशन्ति

5. CB अत(CD अथ)स्तत्स्फूर्तिसंभावनया for अथ. CB, CD omit सदैन्यं and insert हृदय इति before मम. 6-8. CC drops all words from वचनीय (in अनिर्वचनीय) to विला (in विलासानां). 6-7. CB, CD omit इति दैन्यं. 7. CB omits तरुणं. 7-9. CB, CD omit all words from तद्व्यञ्जयति to नेत्रे यस्य (l. 9), and read instead : यतो हर्षेण विस्तीर्णे चञ्चले च नेत्रे यत्र। यतो हृदयंगमानां विलासानां हृदयमाश्रयम्. 9. CC लोचने for नेत्रे. 10. CB, CD ०मणिवत्सदाग्रे for ०नायकवदतीव. 15-16. KD inserts हृदयेति after सौत्सुक्यमाह. 17. This well known illustration of Lakṣaṇā in Sanskrit Poetics occurs in many works on Alaṃkāra.

(काव्यप्रकाश २. ७ वृत्ति) इति न्यायाद्धृत्स्थितलीलाविशेषे संनिधत्ताम्। तदर्थमेता हित्वा तया सह शीघ्रं तत्र गच्छत्वित्यर्थः। हृदये तत्तुल्यान्तरीणे श्रीराधायूथ एवेति वा। कीदृशम्—तरुणं नवकिशोरम्। तथा, व्रजबालसुन्दरीणां व्रजनवकिशोरीणां हृदयति जानाति हृदयम्। गत्यर्थानां ज्ञानार्थत्वात्। यद्वा, तासां हृदोऽयः शुभविधिः। सौभाग्यमित्यर्थः। कीदृशाम्—हृद्या विभ्रमा यासां तासाम्। तथा, तरलं नृत्यगत्या सर्वसमाधानार्थं चञ्चलम्। तासामेव तरलं हृन्नायकनीलमणिवत्। तन्निकटस्थितं वा। तथा, हर्षेण विशाले प्रोत्फुल्ले लोले च नेत्रे यस्य। तासां हृद्या हृदि भवा ये विभ्रमास्तेषां हृदयं तद्रहस्यज्ञमिति वा॥ बाह्ये तु—प्रकाशताम्। अन्यत्समम्॥११

निखिलभुवनलक्ष्मीनित्यलीलास्पदाभ्यां
कमलविपिनवीथीगर्वसर्वंकषाभ्याम्।
प्रणमदभयदानप्रौढिगाढादृताभ्यां
किमपि वहतु चेतः कृष्णपादाम्बुजाभ्याम्॥१२

कृष्णवल्लभा

कृतपुण्यपुञ्जास्ते ये तत्सांनिध्यमभिलषन्ति, मम पुनरिदं भूयादिति श्रीकृष्णमहिमानमत्याश्चर्यं मनसि निधायाभिमतमाशास्ते—निखिलेति। चेतः कर्तृ। कृष्णपादाम्बुजाभ्यां तत्सकाशात्। यद्वा, कृष्णपादाम्बुजं प्राप्य। ल्यब्लोपे पञ्चमी

1. KA हृत्स्थ० for हृत्स्थित०. KB inserts तत्संपादनाय after लीलाविशेषे. KB संविधत्ताम् for संनिधत्ताम्. 2. KP अनया for तया. KP गच्छतीत्यर्थः. KP ०अन्तरीये. 3. KP omits व्रज in व्रजनव०. 5. KC हृदयः यः for हृदोऽयः. KP शुभावहो विधिः. KP हृदि for हृद्या. KC, KP omit तासां. 6. KA हृन्नायकमणिवत्. 7. KC लोचने for लोले. KA, KC omit च, KP places it after नेत्रे. 8. KA inserts यद्वा before तासां. 12. PS ०प्रौढिगाढोद्धृताभ्यां (Kṛṣṇadāsa notices this reading as a v. l.). 15. GB ये तत्सांनिध्यमभिलषन्ति ते तु कृतपुण्यपुञ्जाः मम पुनरिदं. 16. GB अत्याश्चर्येण. 17. GB omits कृष्णपादाम्बुजं प्राप्य.

(वार्त्तिक १. ४. ३१)। तादर्थ्ये चतुर्थी (वार्त्तिक १. ४. ४४) इति वा। किमपि यन्मम हृदि प्रेमविशेषैर्माधुर्यं तद्वहतु धारयतु। कृष्णपादाम्बुजे तथा प्रसीदेतां यथा तस्मिन्ननुराग एव ममोदेति। कीदृशाभ्याम्—निखिलभुवनलक्ष्मीनित्यलीलास्पदाभ्याम्। निखिलभुवनस्य प्राकृताप्राकृतसमस्तलोकस्य या लक्ष्मीः शोभा संपत्तिर्वा तस्या नित्यं लीलास्पदाभ्यां केलिगृहाभ्याम्। यद्वा, निखिलभुवनस्य लक्ष्मीर्ययैवंभूता या नित्यलीला तस्या आस्पदाभ्याम्। पुनः कीदृशाभ्याम्—कमलविपिनवीथीगर्वसर्वंकषाभ्याम्। कमलवनश्रेणीनां गर्वस्य वयमतिसुरभयो लक्ष्मीनिवासभूता इत्यादेः सर्वंकषाभ्यां सर्वनिर्मूलनकराभ्याम्। सौगन्ध्यारुण्यमार्दवशैत्यादिगर्वाणां नाशकाभ्यामिति भावः। एवं विशेषणद्वयेन लीलाशोभासौरभ्यसौकुमार्यशैत्यमकरन्दादेरतिशयत्वमुक्त्वा प्रणामारम्भमात्रेण सर्वप्रदत्वमाह—प्रणमदभयदानप्रौढिगाढादृताभ्याम्। प्रणमतां नतिमात्रं कुर्वतामेवाभयदाने या प्रौढिस्तया गाढमत्यर्थमादृताभ्याम्। उद्यताभ्यामिति पाठे—प्रणमत्सु प्रणतिपरेष्वभयदाने प्रौढिर्यासां ता निजरसमयलीलामग्नश्रीकृष्णशक्तयो गाढं दृढमुद्यता ययोस्ताभ्याम्। तथा चोक्तम् (पद्यावली ५०)—

अतन्द्रितचमूपतिप्रहितहस्तमस्वीकृत-
प्रणीतमणिपादुकं किमिति विस्मितान्तःपुरम्।
अवाहनपरिष्क्रियं पतगराजमारोहतः
करिप्रवरबृंहिते भगवतस्त्वरायै नमः॥

मालिनी छन्दः—

ननमयययुतेयं मालिनी भोगिलोकैः। (छन्दोमञ्जरी २)॥१२

1-2. GB omits चतुर्थीति, and यन्मम हृदि. 3. GB omits एव after अनुरागः. GB कीदृग्भ्यां for कीदृशाभ्यां. Instead of the whole phrase निखिलभुवन etc. GB reads निखिलेति. 6. GB तथा for पुनः कीदृशाभ्यां, and कमलेति for the pratīka कमलविपिन etc. 7. GB omits अति (in अतिसुरभयः) and सर्व (in सर्वनिर्मूलन०). 9. GB अनेन for एवं. 10. GB प्रणमदिति for the pharse प्रणमदभय etc. 11. GB inserts एवाभयं after प्रौढिः. 12. GB omits प्रणतिपरेषु.

सुबोधनी

ततोऽत्युत्कण्ठया स्फुरितपादाब्जसुखाविष्टस्तदेव प्रार्थयते—मम चेतः कृष्णपादाम्बुजाभ्यां किमपि सुखं निरन्तरमाप्नोतु। कीदृग्भ्याम्—वैकुण्ठादिसर्वलोकेषु या शोभासंपत्तयस्तासां नित्यलीलागृहं ये ताभ्याम्। अतएव तत्रत्यकमलवनश्रेणीनां कौमल्यादिगुणैर्यो गर्वस्तस्य सर्वंकषे छेदके ये ताभ्याम्। एवं चेत्कथं ताभ्यां तदाप्तिः—प्रणमद्भ्यः कृतप्रणाममात्रेभ्यो यदभयदानं तत्र या प्रौढिरसाधारणगर्वाविष्करणं तयात्यादृते ये ताभ्याम् ॥१२

सारङ्गरङ्गदा

अथ

अन्या तदङ्घ्रिकमलं संतप्ता स्तनयोरधात्

(भा० १०. ३२. ४) इतिवत्कयापि हृदि न्यस्तं तत्पदकमलं दृष्ट्वा सहर्षलालसमाह—चेतः। श्रीराधाया इति शेषः।

मदीयहृदयेऽरुणपादसरोरुहाभ्यामाक्रीडताम्

(श्लो० १५) इत्यग्रेऽप्युक्तेः। कृष्णपादाम्बुजाभ्यां किमपि तत्स्पर्शसुखं वहतु। कीदृग्भ्याम्—कमलविपिनवीथीनां तच्छ्रेणीनां पञ्चेन्द्रियाह्लादकानां शैत्यसौगन्ध्यकौमल्यसौन्दर्यमकरन्दालिध्वनिमत्तादिगुणैर्यो गर्वस्तस्य सर्वंकषे छेदके ये ताभ्याम्। तथा, निखिले भुवने या लक्ष्म्यः शोभासंपत्तयस्तासां नित्यलीलास्पदे केलिगृहरूपे

2. CC omits अति. CB, CD दैन्योदयात्पादाब्ज(CD ०पादाम्बुज)स्फुरणमात्रं for स्फुरितपादाब्जसुखाविष्टस्तदेव. CB, CD insert निखिलेति before मम. 3. CB अनिर्वचनीय- for किमपि; CD inserts अनिर्वचनीयं after किमपि. 4. CA ०लीलागृहे. CB, CD omit तत्रत्य in तत्रत्यकमल०. 6. CB अत आह for तदाप्तिः; CD आह for कथं ताभ्यां तदाप्तिः. CB, CD omit all words from प्रणमद्भ्यः to ०मात्रेभ्यः and read instead: प्रणमत्सु. CB omits यत् and या. 9. KB तथा for अथ. 11. KA, KB सलालसमाह. KD inserts निखिलेति after आह. 14. KP अत्युक्तेः for अप्युक्तेः. KC उक्तिः for उक्तेः. KC, KP insert श्री before कृष्ण०. KC, KP तत्स्पर्शजं सुखं कुञ्जे वहतु. 15. KB ०ह्लादकारिशैत्य०. 17. KC, KP निखिलभुवने. KA नित्यं लीला०; KC नित्यं लीलास्पदं.

ये ताभ्याम् । तथा, प्रकर्षेण नमन्तीनां हृदि तदर्पणार्थमुपविशन्तीनां तासां कन्दर्पतापादिभ्यो यदभयदानं तत्र या प्रौढिस्तया गाढादृते ये ताभ्याम् । गाढोद्धृताभ्यामिति पाठे—तद्दाने गाढोद्धृते ये ताभ्याम् । किं वा, तया सह रहोलीलान्ते तत्संवाहनं कुर्वतो मम चेत इति ॥ बाह्ये तु—ताभ्यां किमपि तत्प्राप्तिसुखं वहतु । वैकुण्ठादीनां निखिलभुवनानां या लक्ष्म्यः संपत्तयस्तासां तादृग्भ्याम् । किं वा, नारायणादितदंशानां प्रेयस्यो या लक्ष्म्यस्तासां तत्प्राप्त्युत्कण्ठया मानसी या रासादिलीला तत्प्राप्तये ध्येयत्वेन मनस आश्रयाभ्याम् ।

यद्वाञ्छया श्रीर्ललनाचरत्तपः

(भा १०. १६. ३६) इत्युक्तेः । भक्तानामभयदाने

सकृदेव प्रपन्नो यस्तवास्मीति च याचते ।
अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम ॥

(रामायण ६. १८. ३३) इत्यादिरूपा या प्रौढिस्तत्राहृताभ्याम् । अन्यत्समम् ॥१२

प्रणयपरिणताभ्यां श्रीभरालम्बनाभ्यां
प्रतिपदललिताभ्यां प्रत्यहं नूतनाभ्याम् ।
प्रतिमुहुरधिकाभ्यां प्रस्फुरल्लोचनाभ्यां
प्रवहतु हृदये नः प्राणनाथः किशोरः ॥१३

3. KP तद्गाने for तद्दाने. 4. KD पादसंवाहनं for तत्संवाहनं. KD, KP कुर्वत्या for कुर्वतो. KP repeats ताभ्यां. 5. KC, KP अखिल० for निखिल०. 6. KB, KD तादृशाभ्यां for तादृग्भ्यां. KC, KP तत्प्रेयस्यो for प्रेयस्यो. 7. KC, KP omit all words from मानसी to तत्प्राप्तये ; KB omits मानसी या and reads रासादिलीलाप्राप्तये. 9-12. KC omits all words from भक्तानां to इत्यादिरूपा. 9. KP inserts या प्रौढिः after अभयदाने, and reads in line 12, इत्यादिकास्तत्रोद्धृताभ्याम् for इत्यादिरूपा या प्रौढिस्तत्राहृताभ्याम्. 10. The reference is to the Bombay ed. of the Rāmāyaṇa. The verse is also cited in Hari-bhakti-vilāsa 11. 397. 12. KA, KB omit तत्राहृताभ्याम्. 13. PS प्राभवा० for श्रीभरा०. 15. PS प्रस्नुवल्लोचनाभ्यां. 16. PS प्रभवतु for प्रवहतु.

कृष्णवल्लभा

इदानीं श्रीकृष्णस्य मधुरतरलीलाविलोलविलोचनमाधुरीमग्नचेतास्तस्य भावगर्भितविलोचनखेलनपरंपरां स्वस्मिन्प्रार्थयते—प्रणयेति। नोऽस्माकं स्वीयाभिप्रायेण स्वबहुमानाद्वा हृदये प्राणनाथत्वेन वर्तमानः किशोरः प्रस्फुरल्लोचनाभ्यां प्रकर्षेण स्फुरद्भ्यां लोचनाभ्यां सहातिसाकाङ्क्षत्वात्प्रवहतु प्रकर्षेण वर्तताम्। सम्यगपरोक्षस्फूर्तिधाराविषयोऽस्त्वित्यर्थः। यद्वा, किशोरः कीदृशः—एवंभूताभ्यां विशिष्टः। विशेषणे तृतीया (कातन्त्र २. ४. ३२)। प्रस्फुरल्लोचनाभ्यामित्यत्राद्भुता विभ्रान्ता वा दृष्टिः। यथा (संगीतरत्नाकर ७. ३६५)—

प्रसन्नशुद्धशुभ्रांशान्तर्बहिर्गामितारका।
ईषत्कुञ्चितपक्ष्माग्राद्भुतापाङ्गविकाशिनी ॥

प्रसन्नः शुद्धः शुभ्रोंऽशोऽपाङ्गो यस्याः, अन्तर्बहिश्च गामिनी तारका यस्याः सा। विभ्रान्तालक्षणं च पूर्वमेवोक्तम्। लोचने विशिनष्टि—प्रणयपरिणताभ्याम्। प्रणयः प्रेम तेन परिणताभ्यां परिणामविशेषं प्राप्ताभ्याम्। यद्वा, प्रणयो गोपीनां सहजसिद्धः परिणतः प्रवृद्धो याभ्याम्। प्रणयेन प्रेम्णा परितो नमनं याभ्यामिति वा। यत्र यत्र दृष्टिः पतति तत्र तत्र चैतन्यमात्रस्य प्रेमविह्वलतया कृष्णैकप्रह्वता भवतीत्यर्थः। अत्र स्निग्धा दृष्टिः, तल्लक्षणं चोक्तम्। पुनर्विशिनष्टि—श्रीभरालम्बनाभ्याम्। श्रीः शोभा तस्या भरोऽतिशयस्तदालम्बनाभ्यां परमविश्रामस्थलाभ्याम्। अत्र कान्ता दृष्टिः, तल्लक्षणं चोक्तमेव। पुनर्विशिनष्टि—प्रतिपदललिताभ्याम्। पदं व्यवसितिर्विविधकेलिरूपो व्यवसायस्तं प्रति, पदं पदं प्रति वा, ललिताभ्याम्। एतेन सदा सर्वविषयपूर्णसुखमद्भ्यामित्यर्थः।

3. GC ०गर्वित० for ०गर्भित०. 3-4. GB भक्ताभिप्रायेण for स्वीयाभिप्रायेण. 4. GB omits प्रस्फुरल्लोचनाभ्यां. 6-7. For all words from किशोरः to तृतीया GB reads : उपलक्षणे तृतीया (पा० २. ३. २१)। ताभ्यां विशिष्ट इत्यर्थः. 7. GB omits प्रस्फुरल्लोचनाभ्यामिति. 12. GB प्रागुक्तं for च पूर्वमेवोक्तं. GB प्रणयेति for प्रणयपरिणताभ्यां. 16. GB लक्षणं for तल्लक्षणं. GB पुनः for पुनर्विशिनष्टि, and श्रीरिति for श्रीभरालम्बनाभ्यां. 18. GB लक्षणं चोक्तं for तल्लक्षणं चोक्तमेव. 18-19. GB omits विशिनष्टि and reads प्रतीति for the phrase प्रतिपद etc.

पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु

इत्यमरः (३. ३. ९३)। अत्र ललिता दृष्टिः। यथा (संगीतरत्नाकर ७. ४२२)—

मधुरा कुञ्चितापाङ्गा सभ्रूक्षेपा स्मितान्विता।
मन्मथोन्मथिता दृष्टिर्ललिता ललिते मता॥

पुनः—प्रत्यहं नूतनाभ्याम्। प्रत्यहं प्रतिदिनम्। उपलक्षणं चैतत्क्षणलवादीनाम्। नूतनाभ्यां नवाभ्याम्। अहन्यहनि पूर्वानुभूतसौन्दर्यचमत्काराभ्यामित्यर्थः। प्रतिक्षणं नूतनत्वेऽपि प्रत्यहमित्युक्तं लीलाविशेषाभिप्रायेण। अत्र वीरा दृष्टिः। यथा (संगीतरत्नाकर ७. ३९१-९२)—

अचञ्चला विकशिता गम्भीरा समतारका।
दीप्ता संकुचितापाङ्गा वीरा धीरैरुदाहृता॥
औदार्यधैर्यमाधुर्यगाम्भीर्यललितान्यपि।
तेजः शोभाविशेषांश्च सत्त्वभेदान्विवृण्वती॥

पुनर्विशिनष्टि—प्रतिमुहुरधिकाभ्याम्। मुहुर्मुहुः प्रतिमुहुः प्रतिवारमधि कमधिकं सुखं याभ्यां ययोर्वा।

सुखशीर्षजलेषु कम्

इति मेदिनी (कान्त० १५)। अत्रापि कान्ता दृष्टिः॥ मालिनी छन्दः॥१३

सुबोधनी

ततस्तन्नेत्रस्फूर्त्यनुरञ्जितस्तत्रातृप्यन्सलालसं प्रार्थयते—प्राणेशः किशोरो नः सर्वेषामस्माकं हृदये प्रस्फुरन्नेत्राभ्यामविच्छिन्नं स्फुरतु। कीदृग्भ्याम्—

5. GB omits प्रत्यहं नूतनाभ्यां. 6. GB ०सौन्दर्यमाधुर्यादिचमत्कारा०. 7. GB omits अपि. GB उक्तिः for उक्तं 13. GB omits विशिनष्टि प्रतिमुहुरधिकाभ्यां. GB omits प्रतिमुहुः after मुहुर्मुहुः. 18. CC पुनः for ततः. CA, CC अतृप्यत्. CB, CD omit all words from ततः to अतृप्यन् and read instead : प्रणताभयदानानुलक्षितायोग्यतया (CD ०नुमितायोग्यतायां) पुनस्तस्यैव (CD omits पुनस्तस्यैव) स्फूर्तिं. After प्रार्थयते CD inserts प्रणयेति. 18-19. CB, CD read प्राणेशः किशोरः after हृदये. 19. CB, CD सचञ्चल० for प्रस्फुरन्०. CC प्रस्फुरल्लोचनाभ्यामुपलक्षितः प्रवहतु for प्रस्फुरन्नेत्राभ्यां.

श्रीराधाविषयकप्रेम्णैव परिणताभ्याम् । अतएव श्रियः सस्मितेक्षणादिशोभासंपत्तेर्भरस्यातिशयस्याश्रयाभ्याम् । कथं तत्प्रेम्णोऽवगतिः—प्रत्यहं दिने दिने नूतनाभ्याम् । पुनः साश्चर्यमाह—प्रतिपदं क्षणे क्षणे ललिताभ्याम् । तदपि कुतः—प्रतिमुहुर्वारंवारम्, निमिषे निमिष इत्यर्थः, अधिकाभ्याम् । अनुरागस्वाभाव्येन नवनवानुभवोऽयम् ॥१३

सारङ्गरङ्गदा

अथान्यालक्षिततद्दृगभङ्ग्या निकुञ्जाय तां प्रेरयन्तं तमालोक्य साश्चर्यहर्षोत्कण्ठमाह—अयं प्राणनाथः किशोरो नः सर्वासां सखीनां हृदये प्रस्फुरल्लोचनाभ्यां श्रीराधाविषयकप्रणयरसप्रवाहरूपेण प्रवहतु । सर्वा आप्लावयत्वित्यर्थः । हृदये तत्तुल्यायां श्रीराधायामिति वा । लोचनाभ्यां स्फुरन्निति वा, अत्र सानुस्वारोच्चारणम् । कीदृग्भ्याम्—श्रीराधाविषयकप्रणयैरेव परिणताभ्यां घटिताभ्याम् । श्रीः शोभा तद्भरस्यालम्बनाभ्यामाश्रयाभ्याम् । पुनः सविचारमाह—प्रत्यहं नूतनाभ्याम् । ह्यो ये दृष्टे ततोऽप्यतिसुन्दरे इत्यर्थः । पुनः सविमर्शमाह—प्रतिमुहुः क्षणे क्षणेऽधिकाभ्यां प्रणयशोभादिभिरुच्छलिताभ्याम् । अद्यैव तदानीं ये दृष्टे ततोऽप्यतिमधुरे इत्यर्थः । पुनः सशङ्कमाह—प्रतिपदं पदे पदे निमिषे निमिषे ललिताभ्याम् । इदानीं निमिषान्तरे ये दृष्टे ततोऽप्यतिमनोहरे इत्यर्थः । अनुरागस्वभावोऽयं यत्स्वविषयं नवं नवमिवानुभावयति । तथा हि

1. CB omits श्रीराधाविषयक. CD ०प्रणयैः for ०प्रेम्णा. CD inserts घटिताभ्यां after परिणताभ्यां and omits अतएव. CB omits शोभा. 2. CB, CD read ०संपत्तिभरस्य. CB, CD ततः for कथं तत्. 3. CB यतश्च, CD यतः for पुनः साश्चर्यमाह. CB, CD insert पदे पदे after प्रतिपदं. CC प्रतिक्षणं for क्षणे क्षणे, and एतदपि for तदपि. CB reads अतः for तदपि कुतः ; CD omits it. 4. CD omits निमिषे निमिषे. 5. CD ०नवानुभावादियं स्फूर्तिः. 8. KD inserts प्रणयेति after आह. KA, KB (before correction), KD सर्वेषां सखीजनानां. 9. KC, KP श्रीराधिका० for श्रीराधा०. 11. KB omits घटिताभ्यां. 13. KP ये for ह्यो. 15. KC, KP omit आह after सशङ्कं. 17. KP नवमित्यनुभावयति.

प्रतिसवाभिनवम्

(भा० १०. ४४. १४) इति। तथापि

तस्याङ्घ्रियुगं नवं नवम्

(भा० १. ११ ३३) इति वा ।। बाह्ये तु—श्रीः सर्वसंपत्तिः । तत्कटाक्षेणैव तत्प्राप्तेः । अन्यत्समम् ।।१३

माधुर्यवारिधिमदाम्बुतरङ्गभङ्गी-
शृङ्गारसंकुलितशीतकिशोरवेषम् ।
आमन्दहासललिताननचन्द्रबिम्ब-
मानन्दसंप्लवमनु प्लवतां मनो मे ।।१४

कृष्णवल्लभा

इदानीमतिप्रेमौत्कण्ठ्यादितरविषयमात्रासहिष्णुः श्रीकृष्णचन्द्रामृतवारिधौ मनोनिमग्नतां प्रार्थयते—माधुर्येति। मे मम मन आनन्दसंप्लवमनवच्छिन्नैकमहानन्दपूरमनु लक्षीकृत्य। अनुर्लक्षणे (पा० १. ४. ८४) इति द्वितीया। प्लवतां मज्जतु। अवगाहतामिति यावत्। आनन्दपूरस्यानन्तत्वात्कुत्रापि निमग्नं भवत्वित्यर्थः। अन्वनु वारंवारं प्लवतामिति वा। तर्हि किं ब्रह्मानन्दः, नेत्याह—माधुर्यवारिधिमदाम्बुतरङ्गभङ्गीशृङ्गारसंकुलितशीतमनोज्ञवेषम्। स्वाभावत एव चित्ताकर्षकता माधुर्यम्। तस्य वारिधिस्तद्रूपजलभृन्महासमुद्रस्तत्रैवान्तर्गतं यन्मदाम्बु मत्तता-

1. KC, KP अनुसवा० for प्रतिसवा० ; the reading in the Vulgate text of the Bhāgavata is अनुसवा०. 3. KP तस्याङ्घ्रियुगलं. 4. KA, KB omit वा after इति. 6. PS ०मदान्ध० for ०मदाम्बु०. 7. PS ०संकलित०. 13. GB reads प्लवतां मज्जतु before अनुर्लक्षणे and omits इति before द्वितीया. 14. GB omits अवगाहतामिति यावत्. GC तस्य for अनन्तत्वात्. 16. GC ब्रह्मानन्दे नेत्याह. Instead of the entire pratīka माधुर्यवारिधि etc, GB reads माधुर्येति. 17. GB omits the words तद्रूपजलभृन्महा.

रूपमम्बु। मादकं माधुर्यमित्यर्थः। येनाकृष्टं मनो मदविह्वलमितरविस्मृतियुक्तं सदितस्ततः स्रोतःशैलवत्संचरतीत्यर्थः। तस्य ये तरङ्गा उच्छलद्रूपास्तेषां भङ्ग्यः प्रकारविशेषाः। मादकविशेषाद्धि मदविकारविशेषा भवन्ति। तद्रूपो यः शृङ्गारः शृङ्गाररसमयविलासस्तेन संकुलितो व्याप्तः शीतश्च महादुरन्तकामोपतापनिर्वापकः। एवंभूतश्चासौ किशोरवेषश्च किशोरवयोविशिष्टाकारवांस्तम्। यद्वा, श्रीकृष्णस्य माधुर्यमेव वारिधिः, व्रजसुन्दरीणां मद एवाम्बु सौभाग्ययौवनाद्यवलेपरूपम्, तयोर्ये तरङ्गभङ्ग्यौ ताभ्यां यः शृङ्गारस्तेन संकुलितः संपूरितः। अन्यत्पूर्ववत्।

सर्वावस्थाविशेषेषु माधुर्यं रमणीयता ॥
मदो विकारः सौभाग्ययौवनाद्यवलेपजः ॥

(साहित्यदर्पण ३. ६७, १०५)। पुनः कीदृशम् – आमन्दहासललिताननचन्द्रबिम्बम्। आ ईषन्मन्देन हासेन। स्मितेनेत्यर्थः। ललितं मनोहरमाननं चन्द्रमण्डलं यस्य तम्। आ समन्तान्मन्दहासस्य ललितं विलासो यस्मात्तादृश आननचन्द्रो बिम्बभूतो यस्य तम्। लुलिताननचन्द्रबिम्बमिति पाठे लुलितो विमर्दितः, व्याप्त इति यावत्। पूर्ववदन्यत् ॥ वसन्ततिलकं छन्दः ॥१४

सुबोधनी

पुनस्तन्माधुर्यसमुद्रस्य पारावाररहितत्वमनुभवन्मनोऽवगाहनमात्रं प्रार्थयते —मे मम मन आनन्दसंप्लवं सर्वप्लावकानन्दपूरमनु निरन्तरं प्लवतां निमज्जनो-

2. GB शैलाच्छ्रोत इव for स्रोतःशैलवत्. 2-3. GB haplologically omits all words from ०स्तेषां भङ्ग्यः up to तद्रूपो. 3. GC omits शृङ्गारः. 4. GB ०दुरतिक्रमोत्तापनिवारकः for ०दुरन्तकामोपतापनिर्वापकः. 5. GB सः for एवंभूतः. 7. GB समानं for पूर्ववत्. 10. GB omits कीदृशं, and reads आमन्देति for the phrase आमन्दहास etc. 11. GB omits स्मितेनेत्यर्थः. GB आनने for आननं. 12-13. GB haplologically omits all words from आ समन्तात् to बिम्बभूतो यस्य तम्. 14. GB अन्यत्समानम् for पूर्ववदन्यत्. 16. CD omits पुनः. CB तन्माधुर्यस्य समुद्र० ; CD तन्माधुर्यस्य for तन्माधुर्यसमुद्रस्य. CD प्रार्थयन्नाह for प्रार्थयते. CB inserts माधुर्येति after प्रार्थयते. 16-17. CC omits all words from मात्रं to आनन्द (in आनन्दसंप्लवं).

न्मज्जनादिभिरत्रैव क्रीडताम् । तदुपपादयन्नाह—आ ईषन्मन्दहासेन ललितमाननचन्द्रबिम्बं यस्य । प्रियापाङ्गालोकोद्यन्मनोविकाशान्मन्दहसितमिदम् । अतएवास्यचन्द्रांशूच्छलितो यो माधुर्यवारिधिस्तत्रोद्गतो यो मदो जगन्मोहकता स एवाम्बु । मनोनयनार्द्रीकरणात् । तस्य ये तरङ्गा अधिकाधिकोच्छलनानि तैर्या भङ्गी परिपाटी तत्र तादृशेन शृङ्गारेण शृङ्गाररसेन संकुलितो व्याप्तोऽतएव शीतः सर्वतापशमकः किशोरोचितो वेषो यस्य ॥१४

सारङ्गरङ्गदा

तथा सस्मितमुखोद्गतभावादिना तां प्रेरयन्तं तदानन्दोच्छलितं तं वीक्ष्य सहर्षमाह—इदमानन्दसंप्लवं सर्वाप्लावकोच्छलितानन्दप्रवाहं मे मनोऽनु प्लवतामुन्मज्जननिमज्जनादिभिरत्रैवाक्रीडताम् । कीदृशम्—आमन्दोऽतिमन्दस्तयैव गम्यो यो हासस्तेन ललितमाननचन्द्रबिम्बं यस्य । तथा, तच्चन्द्रांशूच्छलितो यो माधुर्यवारिधिस्तत्रोद्गता ये कन्दर्पमदास्त एवाम्बुतरङ्गा यस्मिन् । तादृशश्च भङ्ग्या यः शृङ्गारो वेषरचनं तेन संकुलितो युक्तश्च शीतः सर्वतापहरश्च किशोरवेषस्तद्वपुर्यस्य ।

वेषो वपुषि च

इति कोशात् । तत्तरङ्गभङ्ग्यैव शृङ्गारो वा । तत्तरङ्गभङ्गीशृङ्गाराभ्यां संकुलित इति वा ॥ बाह्ये—सम एवार्थः ॥१४

1. CD तम् for तत्. CC समुद्गत्वमापादयन् for तदुपपादयन्. CB सहितं, CD अमृत- for ललितं. 2. CB, CD प्रियापाङ्गालोकोच्छलदुल्लासान्मन्द०. 3. CA omits आस्य in आस्यचन्द्रा०. CD हि चन्द्रांशुभिः for आस्यचन्द्रांशु-. CB omits यो before मदो. 4. CB, CD ०च्छलनं for ०च्छलनानि. 5. CA यत्र for तत्र. CB, CD तथा मिलितः for तत्र तादृशेन. CB, CD omit संकुलितो व्याप्तोऽतएव. 6. After वेषो यस्य CB, CD continue : यथेन्दुमण्डलांशुभिरेव सिन्धूच्छलनं तथा मुखशोभयैवान्यान्यङ्गानि शोभितानीत्यर्थः. 8. KP reads तं after प्रेरयन्तं and not before वीक्ष्य. 9. KD inserts माधुर्येति after सहर्षमाह. KC इमं for इदं. 10. KB, KC क्रीडतां for आक्रीडतां. KA तथैवागम्यो, KB तेनैव गम्यो for तयैव गम्यो. 11. KA, KB, KP omit तत् in तच्चन्द्रा०. 14. KD चेतसि for च. 16. KC, KD सः for समः.

अव्याजमञ्जुलमुखाम्बुजमुग्धभावै-
रास्वाद्यमाननिजवेणुविनोदनादम् ।
आक्रीडतामरुणपादसरोरुहाभ्या-
मार्द्रे मदीयहृदये भुवनार्द्रमोजः ॥१५

कृष्णवल्लभा

अथ श्रीकृष्णस्य वृन्दावनगिरिकन्दरकालिन्दीतटव्रजवीथ्यादिषु सप्रेमचरण-संचारेण विरचितविचित्रमधुरक्रीडस्य चरणस्फूर्तिं हृदि प्रार्थयते—अव्याजेति। ओजः किमपि तेजोरूपं वस्तु ।

बलावष्टम्भयोरोजः क्लीबं दीप्तिप्रकाशयोः

इति। मदीयहृदये अरुणपादसरोरुहाभ्याम् । अरुणे ये पादसरोरुहे ताभ्यां करणभूताभ्यामाक्रीडताम् । क्रीड विहारे (धा० १. ३७२)। नृत्यत्वित्यर्थः। क्रीड आङ्परिभ्याम् (पा० १. ३. २०-२१) इत्यात्मनेपदम् । ननु कथं कठिने हृदये ताभ्यां सुकुमाराभ्यां क्रीडनं तत्राह—आर्द्रे तत्प्रेमरसेन स्निग्धीभूते। किंभूतमोजः —भुवनार्द्रम् । भुवनमेवार्द्रं येन। तत्संपर्काद्भुवनमार्द्रीभवति, मद्धृदयस्य का गणना। यत्प्रेमार्द्रतालवेन भुवनेषु महाप्रेमार्द्रता तस्य साक्षात्प्रेमार्द्रता का वक्तव्या। यद्वा, भुवनं जलं तद्वदार्द्रमिति। जलयोगात्कठिनं लोष्टाद्यार्द्रीभवति। पुनः किंभूतम्—अव्याजमञ्जुलमुखाम्बुजमुग्धभावैरास्वाद्यमाननिजवेणुविनोदनादम्। अव्याजा निष्कपटाः सहजानुरागविलसिता मञ्जुले मनोहरे मुखाम्बुजे मुग्धाः सुन्दरा ये भावा हास्यकटाक्षभ्रूविभङ्गादयस्तैः। सहेति वा। आस्वाद्यमाना

10. GB omits अरुणपादसरोरुहाभ्यां. 11. GB transposes क्रीड विहारे and नृत्यत्वित्यर्थः. GB omits क्रीड before आङ्०. 13. GB पदाभ्यां for ताभ्यां. GB स्निग्धीकृते. 14. GB omits एव after भुवनं. 15. GB वार्ता for गणना. 16. GB अपि for लोष्टादि. 17. GB omits किंभूतं. GB अव्याजेति for the whole phrase अव्याजमञ्जुल etc. 18. GC ०विलासतः for ०विलसिता. 19. GB omits ये before भावाः. GB omits इति वा after सह.

मधुरान्मधुरतरोऽयमित्यनुभूयमाना निजवेणोः संकेतपरिहासनर्मादिशंसिनो ये विनोदाः स्वरग्राममूर्छनास्तानादिरूपा वा तद्युक्तो नादो येन तत् । अथवैवं योजना —अरुणपादसरोरुहाभ्यामुपलक्षितमोजो मदीयहृदये आक्रीडताम् । कथं कठिने हृदये तस्याक्रीडः, अत आह—तद्भावैरार्द्रे । किंभूतमोजः—आस्वाद्यमानोऽर्थाद्गोपीभिर्निजवेणोर्विनोदयुक्तो नादो यस्य । अन्यत्पूर्ववत् ।। वसन्ततिलकं छन्दः ।।१५

सुबोधनी

तदानन्दाप्लवं स्वयमनुभूय स्वसङ्गिहृद्यपि तथाशास्ते—ओजः पूर्वोक्तानन्द-संप्लवं मदीयानामपि हृदये, आ सम्यक् क्रीडताम् । तत्र तद्योग्यतामाह—अरुण-पादसरोरुहाभ्यामार्द्रे । आश्रयमात्रेण तद्योग्यकृते । हृदयस्य प्राकृतत्वमाशङ्क्य समादधाति—भुवनमप्यार्द्रयितुं समर्थम् । तत्र हेतुः—अव्याजमञ्जुलं सहज-सुन्दरं यन्मुखाम्बुजं तस्य ये मनोहरा भावा भावप्रकाशनरूपाः कटाक्षादयस्तैः

1. GB मधुरतरा for मधुरतरोऽयं. GC omits ये. 3-4. GB transposes कथं after हृदये. 4. GB क्रीडनं तत्र for तस्याक्रीड अतः. For तद्भावैः GC reads अव्याजमञ्जुलमुखाम्बुजमुग्धभावैः. 5. GC ०वेणुविनोद० for ०वेणोर्विनोद०. GB समानं for पूर्ववत्. GB omits वसन्ततिलकं छन्दः. 8. CA तदा संप्लवं, CB, CD तदनुभवानन्दं. CB, CD तदनुभवं for तथा. CB, CD insert अव्याजेति after आशास्ते. CB मनोऽनुभूता० for पूर्वोक्ता०. 9. CD आक्रीडतां for आ सम्यक् क्रीडतां. CB, CD insert उदेतु (CD उदेति) after क्रीडतां. CB, CD omit तत्र. 10. CD स्निग्धे for आर्द्रे ; CB inserts ताभ्यां स्निग्धे after आर्द्रे. 10-11. CB, CD omit all words from आश्रयमात्रेण to समादधाति and read instead : ननु (CB omits) अश्मसारस्य हृदयस्य तत्संबन्ध-मात्रेण कथमार्द्रीकरणमत (CD omits अतः) आह. 11. CD omits अपि. 11-12. CB, CD omit all words for तत्र हेतुः to मुखाम्बुजं तस्य and read instead : यतो व्याजं विना मञ्जुलस्य सहजसुन्दरस्य मुखाम्बुजस्य. 12. CC inserts विमुग्धा after ये. CB, CD अनुभाव० for भाव०. CC कटाक्षाः for कटाक्षादयः.

सह तयास्वाद्यमानो निजोऽसाधारणो यो वेणोर्विनोदनादो निगूढप्रेरणरूपो नादो यस्य तत् ॥१५

सारङ्गरङ्गदा

अथ तयैव गम्यैः संकेतवेणुनादाद्यैर्नीरजराजितयमुनानीरनिकटतीरवानीरकुञ्जाय तां प्रेरयन्तं तं विलोक्य सश्लाघमाह—पूर्वरीत्येदमोजो मदीयानां सखीजनानां हृदये तत्तुल्यायां राधायां तद्गुण एव वारुणपादसरोरुहाभ्याम् आ सम्यक् क्रीडताम्। कीदृशे—आर्द्रे तत्प्रेमस्निग्धे। ताभ्यामार्द्रे वा। विच्छेदे प्रतप्तहृदस्तत्स्पर्शेनैव स्निग्धतोत्पत्तेः। तदुक्तम् (भा० १०. ३१. ७)—

ते पदाम्बुजं
कृणु कुचेषु नः कृन्धि हृच्छयम् ॥

इति। तत्र हेतुः—भुवनेति। भुवनमेवार्द्रं यस्मात्। वेणुनादाद्यैस्तदार्द्रयतीति वा। तथा, अव्याजमञ्जुलं यत्कृष्णमुखाम्बुजं तस्य संकेतरूपभ्रूनेत्रान्तचालननिरक्षरकथनादिरूपमुग्धभावैः सह श्रीराधयैवास्वाद्यमानो निजः स्वप्रेरणनिमित्तको वेणोर्विणोदनादः,

काञ्चनवल्लिसङ्गिनि त्वरयाब्जवनीं विहाय ता भ्रमरीः।
मधुपि मधुसूदनस्त्वां रमयितुमेष्यत्यसौ निभृतम् ॥

1. CC प्रियया for तया. CB, CD omit all words from सह to वेणोः and read instead : आस्वाद्यमानो रोचमानो रुच्युत्पादको निजासाधारणी या शिक्षा तयाविष्कृतो. CB, CD गूढ० for निगूढ०. CA निगूढप्रबलरूपो. 2. CB, CD यत्र for यस्य. CC omits तत्. 4. KP तैरगम्यैः for तयैव गम्यैः. 5. KB, KD insert अव्याजेति after आह. 6. KA omits सखीजनानां. KA, KB, KP तत्तुल्ये, KD तत्तुल्य-. KB श्रीराधायां. 7-8. KC, KP विच्छेदप्रतप्त०. 9. KC omits ते पदाम्बुजं. 11. KA, KD अत्र for तत्र. 12. KC मुखाम्बुजं for कृष्णमुखाम्बुजं. 13. KP ०कथनादिरूपैः. 15-16. These Āryā lines, apparently mistaken for prose in the Mss and printed text, are given in a corrupt form. Mss ०वल्ली०. KA, KB, KC ०सङ्गिनि(KC ०सङ्गिनी)त्वमयाब्जवनीं, KD सङ्गिनीस्तरयारजनीं (corrupt), KP सङ्गिनीत्वमब्जवनीं. KC, KD मधुपीमधु०, KP मधुपीः मधु०.

इत्यादिगूढप्रेरणरूपो नादो यस्य। किं वा, तस्यास्तत्प्रेरणज्ञानज्ञापकताद्दश-मुखाम्बुजभावैः सहास्वाद्यमानो निजवेणोस्ताद्दशनादो येन ॥ बाह्ये—मम हृदये प्रकाशताम्। हृदयस्य प्राकृतत्वमाशङ्क्य समादधाति—तत्पादाब्जाभ्यामार्द्रे तत्प्रकाशयोग्यतां नीते। अन्यत्समानम् ॥१५

मणिनूपुरवाचालं वन्दे तच्चरणं विभोः।
ललितानि यदीयानि लक्ष्माणि व्रजवीथिषु ॥१६

कृष्णवल्लभा

पादसरोरुहाभ्यामाक्रीडतामित्युक्तम्। संप्रति श्रीकृष्णचन्द्रस्य परमसुन्दर-त्वात्तच्चरणं स्तुवन्स्वान्तर्भावविलसितमाविष्करोति—मणीति। विभोः श्रीकृष्णस्य तच्चरणमनिरूप्यमाधुर्याद्येकदेशच्छटाकोट्यां सौभाग्यस्यापि महता यत्नेनापि हृद्यस्फुरणाद्वन्दे स्तौमि नमामि च। कीदृशं तच्चरणम्—मणिनूपुरवाचालम्। मणिमयौ नूपुरौ वाचालौ बहुभाषिणौ यत्र तत्। आलजाटचौ बहुभाषिणि (पा० ५. २. १२५) इति सूत्रम्। तत्र कुत्सायां वाच्यम् (वार्त्तिक)। सा त्वन्यत्र भगवद्व्यतिरिक्ते वस्तुनि संगच्छते। तौ हि चरणाम्बुजरसमत्तौ मधुरमधुरं नदत इति भावः। यद्वा, मणिमयनूपुरवाचामलं भूषणम्। तास्तत्राधिकं शोभन्त इत्यर्थः। मणिनूपुरौ वेन प्रेमामृतेनाचलौ निःस्पन्दौ यत्र वा। एतेन वंशीवादनसमयो व्यज्यते। तेन श्रीकृष्णस्य वस्त्रभूषणमालादीनि सचेतनानि श्रीकृष्णरसमनुभवन्तीत्युक्तम्। अनुभूतं तच्चरणमभिनयवद्दर्शयति—यदीयानि

1. KP ०निगूढ० for ०गूढ०. KA तस्यास्तत्र प्रेरणा०. KP ०प्रेरणा०. KD omits तत्प्रेरणाज्ञानज्ञापक. 2. KB ०मुखाब्ज० for ०मुखाम्बुज०. KP inserts तु after बाह्ये. 8. GB ताभ्यां for पादसरोरुहाभ्यां. 9. GC omits मणीति. 11. GB omits तच्चरणं मणिनूपुरवाचालम्. 12. GB मणिमयनूपुरौ. 12-13. GB omits all words from आलजाटचौ to सा त्वन्यत्र, and reads instead : कुत्सितभाषित्वं. 15. GB वदतः for नदतः. 18. GB अभिनयेन for अभिनयवत्. GB omits यदीयानि.

यस्य चरणस्येमानि लक्ष्माणि चिह्नानि ध्वजवज्राङ्कुशाम्भोजरूपाणि व्रजस्य वीथिषु वर्त्मसु लक्षितानि मनोहराणि। दृश्यन्त इति शेषः। यदीयानि लक्ष्माण्येवातिसुन्दराणि तस्य चरणस्य सौन्दर्यं कथं वर्णनीयं मयेति भावः। अनुष्टुप् छन्दः ॥१६

सुबोधनी

अथ चरणवर्णनोद्यल्लीलाविशेषस्फूर्त्या तद्वर्णनायादौ तदभिसारोत्तरलं चरणं प्रणमति—भोः सर्वसमाधानपूर्वकाभिसरणसमर्थस्य तच्चरणमत्यौत्सुक्येन शीघ्रगमनायोत्तरलं वन्दे। तद्व्यनक्ति—मणिनूपुराभ्यां वाचालं द्रुतगत्या मुखरम्। अतएव तदीयानि चिह्नानि व्रजवीथिष्वभिसरणमार्गेषु विराजन्ते। यैरध्वभिरागतस्तानपि वन्द इत्यर्थः ॥१६

सारङ्गरङ्गदा

अथ तज्ज्ञात्वा कुञ्जगतां तामन्यालक्षितमनुगच्छन्तं तं पश्चाद्दूरतोऽनुगच्छत इव स्वस्य तन्नूपुरध्वनिश्रवणस्फूर्त्या सहर्षमाह—विभोस्तादृगलक्षितगतिसमर्थस्य तत्तादृशं तामनुगच्छच्चरणं वन्दे। कीदृशम्—मणिनूपुराभ्यां वाचालम्। मार्गे तच्चिह्नानि दृष्ट्वाह—यदीयानि लक्ष्माणि न केवलमत्रैव सर्वासु व्रजवीथिष्वपि। विराजन्त इति शेषः। कीदृशानि—ध्वजवज्रादिभिर्ललितानि ॥—बाह्यार्थः स्पष्ट एव ॥१६

6. CB ०वर्णनोद्भूत०, CD ०वर्णनेनोद्भूत० for ०वर्णनोद्यत्०. CA विनोद for ०विशेष०. 6-7. CD drops चरणं, and reads नमति for प्रणमति. 7. CB, CD insert मणीति after प्रणमति. CB, CD अत्यावेगेन for अत्यौत्सुक्येन. 8. CB ०गमनोद्भवमलं, CD ०गमनोत्तरलं for ०गमनायोत्तरलं. CC inserts एव before व्यनक्ति. For तद्व्यनक्ति CB, CD read : तल्लीलासहायकतया (CD ०तयेयं) चरणस्य नतिः। तदुपपादयन्नाह. 9. CC inserts संकीर्ण after अभिसरण. 9-10. CB, CD transpose अध्वभिः and आगतः. CA येष्वध्वसु for यैरध्वभिः. 13. KP तादृश० for तादृग०. 15. KP इति यानि for यदीयानि.

मम चेतसि स्फुरतु वल्लवीविभो-
र्मणिनूपुरप्रणयि मञ्जु शिञ्जितम् ।
कमलावनेचरकलिन्दकन्यका-
कलहंसकण्ठकलकूजितादृतम् ॥१७

कृष्णवल्लभा

ततश्चातिमनोहरत्वेन तच्चरणनूपुरशिञ्जितं वर्णयेयमिति मन्वानस्तत्स्फूर्तिमाशास्ते— मम चेतसीति। वल्लवीविभोर्वल्लवीनां गोपस्त्रीणां विभोः। तदनुरागतारतम्येन विविधो भवतीति विभुस्तस्य। वल्लवीसहितस्य विभोर्वा। मञ्जु मनोहरं कर्णरम्यं शिञ्जितं भूषणध्वनिः।

भूषणानां तु शिञ्जितम्

इत्यमरः (१. ५. २४)। मम चेतसि स्फुरतु। तच्छिञ्जितश्रवणानन्दानुभवः स्फुरत्विति प्रार्थनायां लोट्। कीदृशं शिञ्जितम्— मणिनूपुरप्रणयि। मणिर्हीरकस्तन्मययोर्नूपुरयोः प्रणयि प्रेमपात्रम्। ताभ्यां प्रणयि स्निग्धं वा। पुनः कीदृशम्—कमलावनेचरकलिन्दकन्यकाकलहंसकण्ठकलकूजितादृतम्। कमला लक्ष्मीस्तन्निवासभूतं वनं कमलावनं पद्मवनं तत्र चरन्तीति। चरेष्टः (पा० ३.२.१६) इति टः। तत्पुरुषे कृति बहुलम् (पा० ६. ३. १४.) इति सप्तम्या अलुक्। कमलावनेचराः। ते च ते कलिन्दकन्यका यमुना तत्संबन्धिनस्तत्र स्थिता वा ये कलहंसाः। कलहंस्यश्च कलहंसाश्चेत्येकशेषः। हंसविशेषाः।

6. GB श्राकर्णेयं for वर्णयेयं. 7. GB ममेति for मन चेतसीति. GB गोपवल्लवीनां for वल्लवीविभोर्वल्लवीनां गोपस्त्रीणां. 8. GB तत्सहितस्य for वल्लवीसहितस्य. 12. GB मणीति for मणिनूपुरप्रणयि. 13. GB तत्प्रचुरयोः for तन्मययोः. 14. GB omits कीदृशं and reads कमलेति for the whole phrase कमलावनेचर etc. 15. GB omits कमलावनं. 16-17. For all words beginning with तत्पुरुषे to कमलावनेचराः GB reads : तत्पुरुषमित्यलुक्. 18. GB omits कलहंस्यश्च कलहंसाश्च and reads अत्र for these words.

काद‌म्बः कलहंसः स्यात्

इत्यमरः (२. ५. २४)। तेषां यत्कण्ठस्थितमतएव कलमव्यक्तमधुरं यत्कूजितं ध्वनिस्तेनादृतं कृतादरम्। अत्युत्कृष्टतया कृतगौरवमित्यर्थः। पद्मवनचारित्वेन मृणालादिभक्षणेन मत्तता ध्वनिरम्यता च सूचिता। कालिन्दीसंबन्धोक्त्या ते हंसा नान्यत्र गच्छन्त्युत्कृष्टजलाशयत्वाभावादिति सूचितम्। चरणतलयोः पद्मौपम्यम्, कलिन्दकन्यकेति चरणोपरिभागयोर्हंसतुल्यतेति यथायथमूह्यम्। अनेन चरणारविन्दसौभाग्यातिशयनूपुरशोभातिशयध्वनिमनोहरत्वादिकमिति ध्वनितम्। तथा श्रीवृन्दावनकुञ्जमञ्जुतरवीथिसंकेतेन प्रतिचलतो नूपुरध्वनिः स्फुरत्विति निर्गलितार्थः ॥१७

सुबोधिनी

तल्लीलाया रहस्यत्वाव्द्यङ्ग्येनैव तामाह—वल्लव्याः श्रीराधाया विभोर्युगपदनेकक्रियाप्रवीणरमणस्य मनोहरभूषणानां ध्वनिर्मम चेतसि स्फुरतु। तल्लीलाव्यञ्जकमाह—मणिनूपुरयोः प्रणयोऽस्ति यत्र तत्। वल्लव्या नूपुरध्वनिमिश्रितमित्यर्थः। अनेन लीलाविशेषः सूचितः। किं च, कमलायाः श्रीराधाया वने चरन्तो ये तत्पालिताः कालिन्दीकलहंसास्तेषां तदीयत्वेनानन्दाविष्टतया कण्ठस्थितमधुरास्फुटध्वनिभिरादृतम्। तच्छिञ्जितानुगत्या स्थितमित्यर्थः ॥१७

2. GC ०मधुरास्फुटं for ०मधुरं. 3. GB ध्वनितं for ध्वनिः. 4. GB रम्यध्वनिता for ध्वनिरम्यता. 5. GB inserts इति after गच्छन्ति, and अन्यत्र after ०भावात्. 6. GC इत्यादिना for अनेन. 7. GB omits इति before ध्वनितं, for which it reads सूचितं. GB omits तथा. 8. GB ०वीथि प्रति संकेतेन. GB चरतः श्रीकृष्णस्य for प्रतिचलतः. 8-9. GB inserts मम before स्फुरतु and reads भावः for निर्गलितार्थः. The metre is मञ्जुभाषिणी. 11. CC लीलाविशेषस्य for लीलायाः, and तं for तां. CB, CD रहस्यतया. CB, CD insert ममेति after आह. 13. CB, CD ०लीलाव्यञ्जनं, CC ०लीलाविशेषसूचकं. CB omits वल्लव्याः. 14. CB, CD omit all words from अनेन to सूचितः. CB, CD तथा for किं च. 15. CB, CD तदीयत्वेनाविष्टतया. 16. After इत्यर्थः CB, CD insert अनेन लीलाविशेषः सूचितः.

सारङ्गरङ्गदा

अथ पद्मषण्डमण्डितयमुनासन्नवानीरकुञ्जे तया सह रममाणस्य तस्य नूपुरयोर्ध्वनिं सखीभिः सहागत्य बहिः स्थित्वा श्रृण्वन्निष सलालसमाह—वल्लवी तच्छ्रेष्ठा श्रीराधा तस्य विभो रमणस्य शिञ्जितं भूषणध्वनिर्मम चेतसि स्फुरतु। कस्य भूषणस्येत्याह—मणिनूपुरप्रणयि। केलिविशेषेणोर्ध्वस्थितश्रीचरणयोर्नूपुरोद्भव-मित्यर्थः। अतो मञ्जु मनोज्ञम्। किं वा, तस्याः प्रणयः सूच्यत्वेन विद्यते यस्य तत्प्रणयि। तच्च मञ्जु मनोज्ञं च। तत्तादृशं मणिनूपुरयोर्यच्छिञ्जितं तत्। तथा, कमला लक्ष्मीस्तस्या वनेचराः पद्मवनेचरा ये कलिन्दकन्यकायाः कलहंसास्तैः कलकण्ठकूजितैरादृतं तत्साम्यशिक्षार्थमादरेणाभ्यसितम्। तेषां कलकूजितैः श्लाघितं वा॥ बाह्ये—तत्स्फूर्त्योक्तिः। अर्थः स एव॥१७

तरुणारुणकरुणामयविपुलायतनयनं
कमलाकुचकलशीभरविपुलीकृतपुलकम्।
मुरलीरवतरलीकृतमुनिमानसनलिनं
मम खेलतु मद्चेतसि मधुराधरममृतम्॥१८

कृष्णवल्लभा

अथात्यद्भुतपरममहानुभावभक्तिभाविते मनसि सम्यगाविर्भावं प्रार्थयते—तरुणेति। किमप्यमृतं नित्यपरिपूर्णपरानन्दैकरससारसर्वस्वं वस्तु मम मद्चेतसि प्रेमरसमाध्वीकमत्तचित्ते खेलतु। धारावाहिकतया पुङ्खानुपुङ्खन्यायेन क्रीडत्वित्यर्थः। तस्य दिव्यावयवत्वाच्च हृद्यममृतमित्याह—मधुराधरम्। मधुरोऽधरो यत्र।

2. KC ०यमुनातीरमनु वानीर०; KP ०यमुनानीरतीरवानीर०. 3. KP नूपुरध्वनिं. 4. KC, KP राधा for श्रीराधा. 6. KC, KP मनोहरं for मनोज्ञं. 7. KP यस्याः for यस्य. 8. KP transposes पद्मवनेचराः and ये. 10. KC, KP कलकण्ठकूजितैः for कलकूजितैः. KA तत्स्फूर्त्युक्तिः. 12. PS notes v. l. ०पुलकीकृतपुलकं. 14. PS खेलति for खेलतु. 17. GB ०परमानन्दैक०. 19. GB विस्मयेन for च हृद्यममृतमिति. GB omits मधुराधरं.

यद्यप्यमृतत्वात्सर्वमेव मधुरं तथापि माधुर्यविशेषत्वादेवमुक्तिः। यद्वा, मधुरवस्तूनि यावन्ति प्रसिद्धान्यधरयति निकृष्टानि करोतीति। तथा, मधुरं रसं कमप्यनिरूप्यम् आ समन्तात्सर्वावयवेषु स्वस्यान्यस्य च धारयतीति वा। यदेवाङ्गं दृश्यते श्रूयते वा तदेव महामादकं परमरसदमित्यर्थः। तथा चोक्तम्—

श्यामश्रीर्मधु यस्य यस्य मधु तत्कैशोरमत्यद्भुतं
क्रीडा यस्य मधूनि यस्य च मधून्येकादशाक्षक्रियाः।
माध्वी यस्य विलोकनाङ्गवचसां भङ्गी यदीयं वपू
रूपं मध्वथ भूषणादि च मधु व्यामोहयेत्कं न सः॥

पुनः कीदृशं तदमृतं तदाह—तरुणारुणकरुणामयविपुलायतनयनम्। तरुणे स्फीते। स्वभक्तोत्कर्षश्रवणेन सदा प्रफुल्लत्वात्। अरुणे स्वभावतो लोहिते नेत्रान्ते। यद्वा, तरुणारुणेऽत्यरुणे करुणामये प्रियजनस्य दुःखासहिष्णुनी विपुले विशाले। पुल महत्त्वे (धा० १. ८९४) धातुः। विशेषेण पुलतो महती भवत इति। आयतेऽतिदीर्घे नयने यत्र। सर्वाङ्गगतमाधुरीमाह—कमलाकुचकलशीभरविपुलीकृतपुलकम्। कमला वरस्त्री राधिका।

कमला श्रीवरस्त्रियोः

इति विश्वः (लान्त० ५२)। यद्वा, कं कृष्णप्रेमसुखं तेनालमतिपर्याप्ता पूर्णा भवतीति कमला। तस्याः कुचावेव कलश्यावल्पकलशौ। कैशोरव्यञ्जकत्वात्। तयोर्भरणं धरणं स्पर्शनमिति यावत्। तस्माद्विपुलीकृताः पुलका यस्य। कुचकलशीभरेण वा विपुलीकृताः पुलका येन। पुनः कीदृशम्—मुरलीरवतरलीकृतमुनिमानसनलिनम्। मुरलीरवेण तरलीकृतं ब्रह्मसमाधेश्चञ्चलीकृतं मुनीनां

1-2. GB प्रसिद्धानि मधुरवस्तूनि for मधुरवस्तूनि यावन्ति प्रसिद्धानि. 2. GC तथा for इति, and अथवा for तथा. 3. GB च for वा. 5. GC does not quote the entire verse but cites only श्यामश्रीर्मधु यस्येति. 9. GB omits all words from कीदृशं to ०नयनं and reads instead तरुणेति. 10. GC transposes स्वभावतः and लोहिते, and reads : नेत्रयोः प्रान्तनायां अरुणिमा (?) for नेत्रान्ते. 11. GB भक्त० for प्रिय०. 13. GB reads कमलेति for the phrase कमलाकुच etc. 19. GB omits कीदृशं, and reads मुरलीति for the phrase मुरलीरव etc.

मननशीलानामपि मानसरूपं नलिनं येन। वायुना हि कमलं चञ्चलं भवति, मुरलीरवोऽपि फूत्कारात्मकवायुरूप एव। मुनिमानसस्य नलिनता मुरलीनादश्रवणमात्रसंजातकृष्णप्रेमरसभरत्वात्। कृष्णभृङ्गकान्तत्वाच्च तन्मानसं ब्रह्माद्यनुसंधानमात्रत्यक्तमभवदिति। यद्वा, मुरलीरवेण तरलीकृता ये मुनयस्ते मानसनलिने यस्य। तादृशमुनिषु मानसनलिनं यस्येति वा॥ ललितगतिश्छन्दः—

सनजनभसा ललितगतिः ॥१८

सुबोधनी

अथ तत्केलिकलावसानस्फूर्त्या प्रियाश्रमावलोकनव्यग्रतायामपि तत्कालीनतदङ्गशोभाविशेषालोकोत्सुकतया तस्या लज्जाशैथिल्याय वंशीवाद्यमुरीकृतस्याविर्भावमाशास्ते—इदममृतं मम हर्षयुक्ते चेतसीदृगेव विलसतु। स्वाश्रयराधानन्दस्फूर्त्या चेतसो हर्षः। कुतोऽमृतत्वम्—तच्चुम्बनाक्ततया मधुरोऽधरो यत्र। किं च, तरुणे रत्यन्तेऽप्याविष्कृतकटाक्षादिके जागरादरुणे प्रियाश्रमेक्षया करुणाप्रचुरे प्रत्यङ्गाद्भुतशोभालोकविस्मयाद्विपुले तद्वीक्षणायायते नयने यस्य। अन्यदपि—कमलायाः श्रीराधायाः कुचकलशयोर्भरेण शोभातिशयेन विस्तारितः पुलको यस्य।

3. GB omits च. GB ०मानसस्य for मानसं. 4. GB ०संधानाभावो ध्वनितः for ०संधानमात्रत्यक्तमभवदिति. 8. CB तन्निरसनस्फूर्त्या, CC तत्केल्यवस्थास्फूर्त्या. CB ०श्रमापनोदन०, CD श्रमोपनोदन०, CC श्रमावलोक०. 9. CB, CD ०तच्छोभा विशेषालोकनो० for ०तदङ्गशोभाविशेषालोको०. CC तल्लज्जा० for तस्या लज्जा०. CD मुखरीकृतस्य for उरीकृतस्य. CB, CD insert आननस्य (CB omits) सुधात्वेन before आविर्भावं. 10-11. CB, CD omit all words from इदममृतं to अधरो यत्र and read instead : तरुणेति। मदयुक्ते मम चेतस्यमृतं खेलतु। निजेष्टश्रीराधिकानन्दकतया सुधात्वम्। तत्सुखेनात्मसुखितया चेतसो मदतेति गम्यम्। कीदृशम्—तद्दशनाङ्किततया मधुराधरौ (CD मधुरोऽधरो) यत्र. 11. CC तच्चुम्बनाञ्जना० for तच्चुम्बना०. CB, CD अतएव for किं च. 12. CB केलिकलावसानेऽपि प्रथममिलनवत् for रत्यन्तेऽपि. CD रति० for प्रिया०. 13. CB, CD omit प्रत्यङ्ग. CB, CD शोभावलोक०. CD उद्वीक्ष० for तद्वीक्ष०. CC नेत्रे for नयने. CB अतः, CD यतः for अन्यदपि. 14. CD श्रीराधिकायाः. CB कुचकलस्याः. CD विपुलीकृतः for विस्तारितः.

अतस्तद्वीक्षणार्थं मुरलीरवेण लज्जातः शिथिलीकृतं मुनेर्लज्जामौनायास्तस्या मानसनलिनं येन ॥१८

सारङ्गरङ्गदा

अथ सुरतान्तं ज्ञात्वा सखीभिः सह कुञ्जरन्ध्रे मुखं दत्त्वा तं पुष्पतल्पोपर्युपविश्य तस्याः श्रमापनोदनं पुनर्मदनोद्दीपनं च कुर्वन्तं पश्यन्निवानन्दोन्मत्तस्तममृतं मत्वाह—इदममृतं मम स्वसखीसौभाग्यानन्दमदयुक्ते चेतसि खेलत्वीदृगेव विलसतु। अमृतसारादपि मधुरः सरसः स्वादुः प्रियो मनोहरश्चाधरो यस्य।

मधुरं रसवत्स्वादुप्रियेष्वपि मनोहरे

इति विश्वात् (रान्तः १३२)। तथा, तरुणे मदनमदोद्गारिणी स्वतो मधुपानेन चारुणे च वीजनादिना तच्छ्रमापनोदनार्थं हृद्युद्गता या करुणा तन्मये तदुद्गारिणी स्वतस्तत्प्राप्त्यानन्देन च विपुले प्रोत्फुल्ले च स्वतस्तन्माधुरीदर्शनादायतेऽतिविस्तीर्णे च नयने यस्य। अङ्कनिषण्णायाः कमलायाः पूर्वरीत्या श्रीराधायाः कुचकलशयोर्भरेण स्पर्शातिशयेन विपुलीकृतः पुलको यस्य। तथा, तच्छ्रमापनोदं कृत्वा पुनः केलिलालसोत्पादनाय मुरलीं मृदु वादयन्तं तं वीक्ष्य कैमुत्येनाह—मुरलीरवेण तरलीकृतानि मुनीनां पादपतितेऽपि तस्मिन्मौनशीलानां ग्रहिलमानिनीजनानां मानसनलिनानि येन। किमुत तादृश्यास्तस्या इत्यर्थः॥ बाह्ये तु—मुनीनां ज्ञानिनां मेरुवत्स्थिरकठिनान्यपि मानसानि नलिनवत्कोमलानि चञ्चलानि कृतानि येनेत्यर्थः। अन्यत्समम्॥१८

1. CB, CD ०दर्शनार्थं, CC ०वीक्षणाय for वीक्षणार्थं. CC inserts तरलीकृतं before लज्जातः. CB शिथिलीकृतायाः साध्वसमौनायाः. CD रसावेशमौनायाः for मुनेर्लज्जामौनायाः. 2. After येन CB, CD continue: नलिनतयोक्तिरत्युत्फुल्लताबोधिकैव (CD बोधिकात्र ज्ञेया). 7. KP अमृतस्वादा० for अमृतसारा०. KC, KP मधुरसरसः. KC omits प्रियः. 8. KA, KB प्रियेष्वति-. 11. KC, KP omit all words from स्वतस्तत्प्राप्त्यानन्देन to अतिविस्तीर्णे, and read instead: च स्वतो विपुले आयते. 12. KA omits कमलायाः. 13. KA (after correction), KP तच्छ्रमापनोदनं. 14. KA omits तं. 16. KC omits तस्याः. 18. KC inserts च after चञ्चलानि, and omits येन.

आमुग्धमर्धनयनाम्बुजचुम्ब्यमान-
हर्षाकुलव्रजवधूमधुराननेन्दोः ।
आरब्धवेणुरवमात्तकिशोरमूर्ते-
राविर्भवन्तु मम चेतसि केऽपि भावाः ॥१६

कृष्णवल्लभा

अथ श्रीराधारमणकिशोरमूर्तेः केषांचिन्मधुरातिमधुरविलासानां स्वरूपाविर्भावमाशास्ते—आमुग्धेति। आत्तकिशोरमूर्तेरारब्धवेणुरवं भावाः केऽपि मम चेतस्याविर्भवन्त्वित्यन्वयः। आशंसायां लोट्। आत्ता प्रकटिता किशोरी मूर्तिर्येन तस्य। आरब्धो वेणुरवो यस्मिन्कर्मणि तद्यथा स्यात्तथा। यद्वा, किशोर्यश्च ता मूर्तयश्चेति। आत्ता वशीकृताः किशोरमूर्तयो राधाद्या येन। तस्य भावा इत्यर्थः। स्तम्भस्वेदाश्रुकम्पपुलकादयः सात्त्विका भावाः। ते च पूर्णपरमानन्दरूपस्यापि श्रीराधाद्यनुरागविशेषविलसितत्वात्केऽप्याश्चर्यरूपा इति। हर्षादयो व्यभिचारिणो वा भावाः। रत्याख्यस्थायिभावा वा। यद्वा, भावहावहेलाख्ययोऽङ्गजाः,

शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता।
औदार्यं धैर्यमित्येते सप्तैव स्युरयत्नजाः॥

इति (उज्ज्वल०, अनुभावप्रकरण ३; साहित्यदर्पण ३.९०)। दश पुंसां च भवन्ति। उक्तं च—

दश पुंसां भवन्त्यपि

(साहित्यदर्पण ३.९३)। तथा च बहुविधा एव भावाः श्रीकिशोरमूर्तेस्तत्र च मम चेतसि केऽपि कियन्तोऽपि प्रकाशन्तामिति। कीदृशस्य—आमुग्धम् आ समन्तान्मुग्धं सुन्दरं यथा तथा, अर्धनयनाम्बुजचुम्ब्यमानहर्षाकुलव्रजवधूमधुराननेन्दोः।

3. PS आदिकिशोरमूर्तेः. 4. PS आविर्भवन्ति. 6. GB हृदि for स्वरूप. 7-8. GB omits all words from आत्तकिशोरमूर्तेः to आशंसायां लोट्. 9. GB omits तद्यथा स्यात्तथा and यद्वा. 10. For इति GB reads राधाद्यास्ताः. 10-11. GB omits किशोरमूर्तयो राधाद्याः, and इत्यर्थः. 20-21. GB अति- for आ समन्तान्मुग्धं.

अर्धनयनमम्बुजवद्यत्र मुखेन्दुचुम्बने। तथाभूतं यथा स्यात्तथा चुम्ब्यमानो हर्षेणाकुलानां व्रजवधूनां मधुराननेन्दुर्येन। व्रजवधूनां मध्ये मधुराया राधाया आननेन्दुर्येनेति वा। तस्य परमानन्दप्लावितचुम्बनेन नयनार्धस्य मुकुलीभावत्वादम्बुजतुल्यत्वम्। मुखचन्द्रदर्शनानन्देन विकशितत्वं चेति। यद्वा, आरब्धवेणुरवं यथा स्यात्, आमुग्धं पूर्ववत्, नयनाम्बुजयोरर्धेऽर्धनयनाम्बुजे, ताभ्यां चुम्ब्यमानो हर्षाकुलव्रजवधूमधुराननेन्दुर्येन तस्य। वेणुवादनारम्भपूर्वकसातिलालसापेपीयमानपरमप्रेयसीवदनचन्द्रस्येत्यर्थः। अथवा, आरब्धवेणुरवं यथा स्यात् आमुग्धम् आ समन्तान्मुग्धा महारसोदयान्मोहं प्राप्ता यस्मिन्कर्मणि तद्यथा स्यात्तथा, अर्धनयनाम्बुजैश्चुम्ब्यमान अतएव हर्षाकुल आनन्दव्याप्तो व्रजवधूभिर्मधुराननेन्दुर्यस्य। चुम्बनं वक्त्रसंयोगे (धा० १.४५६)। नयनतादात्म्यमेव तदा मुखमपि प्राप्तमेवेति कृत्वैवमुक्तमेव। तथा च (पद्यावली २३४)—

न जाने संमुखायाते प्रियाणि वदति प्रिये।
सर्वाण्यङ्गानि मे यान्ति श्रोत्रतां किमु नेत्रताम्॥

इति। एवं वंशीगीतेन मुग्धीकृतसर्वसुन्दरीकदम्बास्ते भावा मयि स्फुरन्तु। मनसि प्रतिभानमेव नास्ति, आशंसे परं कथं वर्णयामीति निर्गलितार्थः॥ वसन्ततिलकं छन्दः ॥१६

सुबोधनी

तद्दर्शनैकनिदानमुरलीरवमेव विवृणोति—आ सम्यगारब्धवेणुरवं यथा

1. GB omits तथाभूतं and स्यात्. 2. GC inserts व्याकुलानां after आकुलानां. 5. GB तथा for स्यात्. 10. GC ०संयोगः for ०संयोगे. GB repeats तदा. 11. GB तदुक्तं for तथा च. 12-13. GC does not quote the entire verse but cites न जाने only. 14. GC omits all words from एवं to मयि. 15. GB transposes आशंसे and परं. GB अभिप्रायः for निर्गलितार्थः. 18. CB omits तद्दर्शनैकनिदान. CC विवृण्वन् तदाविर्भावमाशास्ते for विवृणोति. CB inserts आमुग्धेति after विवृणोति, and omits all words from आ to स्यात्तथा. CD omits all words from तद्दर्शनैक० to तथात्ता and reads आमुग्धेति। अथ for them.

स्यात्तथात्ता प्रकटीकृता किशोरी मूर्तिस्तदुचितचेष्टा येन तस्य केऽपि भावा हर्ष-गर्वादयो मम चेतस्याविर्भवन्तु। तच्चेष्टां व्यनक्ति—आ सम्यङ्मनोहरं यथा स्यात्तथार्धनयनाम्बुजेन चुम्ब्यमानो हर्षाविष्टाया व्रजवध्वास्तस्या मधुराननेन्दुर्येन। तां वेणुनादाविष्टां विधाय तत्प्रत्यङ्गमैक्षतेत्यर्थः ॥१६

सारङ्गरङ्गदा

अथ पुनर्जातकेलिलालसां तामुत्थाप्य वामपार्श्वे निषण्णां तदर्धनेत्रान्तेन पश्यन्तं तं वीक्ष्याह—अस्य केऽप्यनिर्वाच्या इमे भावा मम चेतस्याविर्भवन्तु। कीदृशः—पूर्वतोऽतिमधुरत्वेनारब्धवेणुरवं यथा स्यात्तथात्ता कोटिमन्मथमन्मथत्वेन प्रकाशिता किशोरमूर्तिर्येन। तथा, आ सम्यङ्मुग्धं यथा स्यात्तथार्धनयनाम्बुजेन चुम्ब्यमानो हर्षाकुलाया व्रजवध्वास्तच्छ्रेष्ठायास्तस्या मधुराननेन्दुर्येन॥ बाह्ये—स्पष्ट एवार्थः ॥१६

कलक्वणितकङ्कणं करनिरुद्धपीताम्बरं
क्रमप्रसृतकुन्तलं गलितबर्हभूषं विभोः।
पुनः प्रकृतिचापलं प्रणयिनीभुजायन्त्रितं
मम स्फुरतु मानसे मदनकेलिशय्योत्थितम् ॥२०

1. CD inserts अनिर्वचनीया before भावाः. 1-3. CB omits all words from येन तस्य to हर्षाविष्टायाः. 2. For तच्चेष्टां व्यनक्ति CD reads : कीदृशम्—आमुग्धेति। पूर्वतोऽप्यतिमधुरत्वेनारब्धो वेणुरवो यथा स्यात्. CC inserts एवं before and आमुग्धं after व्यनक्ति. 3. CB, CD हर्षाविष्टा या व्रजवधूः for हर्षाविष्टाया व्रजवध्वाः. CB व्रजवधूः for व्रजवध्वाः. 4. CD शोभाविशेष-मालोकितवान् for तत्प्रत्यङ्गमैक्षत. CB तत्कालीनशोभाविशेषः for तत्प्रत्यङ्गमैक्षतेत्यर्थः. 6. KC, KP तदर्धकनेत्रान्तेन. 7. KA omits तं. KB अनिर्वचनीया for अनिर्वाच्या. 8. KB inserts अपि after पूर्वतः. KP inserts गृहीत्वा after आत्ता. KC, KP कोटिमन्मथत्वेन. 13. PS क्रम० for क्रम०. 14. PS प्रसृति० for प्रकृति०. 15. Kṛṣṇadāsa (v. l.) महः स्फुरतु.

कृष्णावल्लभा

अथ नवगोपकिशोरीसङ्गसंजातसंभोगरूपां लीलां वर्णयति—कलेति। विभोः श्रीकृष्णस्य मदनकेलिशय्यात उत्थितमुत्थानं मम मानसे चेतसि स्फुरतु प्रकाशताम्। प्रार्थनायां लोट्। उत्थितमिति भावे क्तः। कीदृशमुत्थितम्—कलं मधुरास्फुटध्वनि क्वणितं कङ्कणं यत्र तद्यथा स्यात्तथा। प्रणयिणीभुजायन्त्रितं प्रणयिनीभुजाभ्याम् आ ईषद्यन्त्रितं बद्धम्। कम्पोपलक्षितसात्त्विकभावात्। प्रणयिन्या भुजौ यन्त्रितौ येनेति वा।

ध्वनौ तु मधुरास्फुटे।

कलम्

इत्यमरः (१. ६. २)। पुनः कीदृशम्—करनिरुद्धपीताम्बरम्। करेण निरुद्धं स्खलितं पीताम्बरं यत्र। यद्वा, करेण निरुद्धं पीताया गौर्या राधाया अम्बरं येन।

पीतो गौरेऽरुणे सिते

इति वैजयन्ती। पुनः कीदृशम्—क्रमप्रसृतकुन्तलम्। क्रमेनातिरतिश्रमजाताङ्गग्लान्या प्रसृता इतस्ततश्चलिताः कुन्तलाः केशा यत्र। रतिरसाविष्टस्य मनसोऽनवस्थानात्सम्यक्पीताम्बरपरिधानकेशबन्धनाशक्तेः। अतएव गलिता बर्हरूपा भूषालंकृतिर्यत्र। यद्वा, गलिता बर्हभूषा भूषणानि मालाहारादयो यत्र। पुनः कीदृशम्—पुनः प्रकृतिचापलम्। पुनः कृत्वापि बहुलकेलिकौतुकं प्रकृत्या रसाविष्टैकस्वभावत्वेन चापलं चपलता रतिसंभ्रमेणास्तव्यस्तता यत्र।

प्रकृतिर्गुणसाम्येऽपि स्वभावामात्ययोरपि।

स्त्रीषु पौरेषु

इत्यादि मेदिनी (तान्त० ३१)। प्रकृष्टतया कृतौ केलिकरणे वा चापलं यस्य तत्।

1. GC ०किशोरीसंगमजात०. 2. GB omits उत्थितं. 3-4. GB अव्यक्तमधुरं for मधुरास्फुटध्वनि. 5. GB यथा तथा for यत्र तद्यथा स्यात्तथा. GB omits प्रणयिनीभुजायन्त्रितं. 10. GB omits कीदृशं, and reads करेति for the phrase करनिरुद्ध etc. 12. This quotation is not found in the printed text of the Vaijayantī of Yādava-prakāśa (ed. G. Oppert, Madras 1893). 13. GB omits कीदृशं and reads क्रमेति for the phrase क्रमप्रसृत etc. 16. GB omits कीदृशं. 17. GB इति for प्रकृतिचापलं. GB बहु० for बहुल०. 21. GB इति for इत्यादि.

एवं प्रभातसमय उपसन्ने व्रजेन्द्रद्वारि गोपकुमाराणां तुमुलवेणुनादकोलाहले गृहे गृहे च दधिमन्थनध्वनिकोलाहले प्रगल्भसखीनां रात्रिर्गता लोका संचरन्ति कथमद्यापि न जागरितमित्यादिसपरिहासवचनैः ससंभ्रमेण मदनकेलिशयनाच्छ्री-कृष्णस्योत्थानमिति निर्गलितार्थः ॥ पृथ्वी छन्दः—

पृथ्वी जसौ जसयला गुरुः (छन्दोमञ्जरी २) ॥२०

सुबोधनी

अथ तत्केलिशय्योत्थानस्फूर्तिमाशास्ते—विभोरखण्डलीलस्य मदनकेलिशय्यात उत्थितमुत्थानं मम मानसे स्फुरतु। भावे क्तः। कीदृशम्—वलयादिसंभालनात्कलक्कणितानि कङ्कणानि यत्र। अनेन प्रणयिन्या उत्थानं द्योतितम्। करेण निरुद्धं पीताम्बरं यत्र। अनेन श्रीकृष्णस्य। एवमग्रेऽपि। तथा, क्रमेण रतिश्रान्त्या प्रसृता विगलिताः केशा यत्र। गलिता बर्हभूषा यत्र। किं च, पुनः केल्यवसानेऽपि प्रकृत्या नायकस्वभावेन चापलं कपोलस्पर्शादिकं यत्र। अतएव प्रणयिन्याः कराभ्यां निरोधो यत्र ॥२०

सारङ्गरङ्गदा

अथ तस्याः केलिलालसां वीक्ष्य रसिकशेखरत्वात्पुनस्तामत्युद्दीपयितुं तदुत्कण्ठाचेष्टितं द्रष्टुं च रासस्थानगमनच्छद्मना तदुत्थानं तया तन्निरोधनं च दृष्ट्वाह—विभोस्तत्तत्कलिसमर्थस्य मदनकेलिशय्यात उत्थितमुत्थानं मम मानसे

3. GB inserts भगवता after जागरितं. 4. GB भावार्थः for निर्गलितार्थः. 7. CB, CD omit all words from अथ to आशास्ते and read instead : पुनस्तत्पूर्व(CB omits पूर्व)कालीनावस्थितिस्फूर्त्या तयोस्तच्छोभाविशेषस्फूर्तिमाशास्ते—कलेति।. CD inserts मदनकेलिशय्योत्थितं after अखण्डलीलस्य. 8. CD ०शय्यायाः for शय्यातः. 9. CA ०संचालनात् for संभालनात्. 10. CB, CD कराभ्यां for करेण. 12. CD केलिकला० for केलि०. CB, CD insert चापल्यं after चापलं. CA कपोलस्य स्पर्शा०. 13. CD inserts पुनः after अतएव. CB, CD भुजाभ्यां for कराभ्यां. CB निरुद्धं for निरोधो यत्र. 16. KD तदुत्कण्ठया चेष्टितं. KP inserts तं before द्रष्टुं. 17 KA विभोस्तत्केलि०. KC, KP ०शय्योत्थितं for ०शय्यात उत्थितं.

स्फुरतु। भावे क्तः। कीदृशम्—पूर्वकृतलीलाविशेषे वेषपरिवर्तनेन तया परिहितपीताम्बरस्य तेनाकर्षणात्तया रोधनाच्च द्वयोः करैर्निरुद्धं पीताम्बरं यस्मिन्। अतः फलकणितानि द्वयोः कङ्कणानि यस्मिन्। पूर्वं स्नृता अपि क्रमेण प्रकर्षेण स्नृता विलुलितास्तस्याश्चूडात्वेन तस्य वेणीत्वेन बद्धाः कुन्तला यस्मिन्। अतो गलिते स्रंसिते तयोर्बर्हभूषे यत्र तत्र। तस्याश्चूडायां बर्हं तस्य वेणीमूलेऽवतंसरत्नं ज्ञेयम्। तथा, प्रकृत्या स्वभावेन द्वयोश्चापलं यस्मिन्। अतः पुनः प्रणयिनीभुजाभ्यां कान्तकण्ठस्य यन्त्रितं यन्त्रणं यस्मिन्। तया वस्त्रं त्यक्त्वा भुजाभ्यां कण्ठे गृहीत्वा तल्प उपवेशितः स इत्यर्थः। यद्वा, प्रकृष्टा कृतिः प्रकृतिः स्तनाधरादिग्रहणं तत्र चापलं कृष्णस्य यत्र। अतः प्रोद्यत्कुट्टमिताख्यानुभावेन प्रणयिनीभुजाभ्यामविरोधितवाञ्छं यथा तथा कृष्णकरयोर्यन्त्रितं यन्त्रणं यत्र। तल्लक्षणम् (उज्ज्वल०, अनुभावप्रकरण ४४)—

स्तनाधरादिग्रहणे हृत्प्रीतावपि संभ्रमात्।
बहिः क्रोधो व्यथितवत्प्रोक्तं कुट्टमितं बुधैः॥

इति। महः स्फुरत्विति पाठे—केलिशय्योत्थितं महः स्फुरत्विति॥ बाह्ये—तथा स्फूर्त्योक्तम्। निशान्ते कृष्णस्य केलिशय्योत्थानमिति केचित्॥२०

स्तोकस्तोकनिरुध्यमानमृदुलप्रस्यन्दिमन्दस्मितं
प्रेमोद्भेदनिरर्गलप्रसृमरप्रव्यक्तरोमोद्गमम्।
श्रोतुं श्रोत्रमनोहरं व्रजवधूलीलामिथोजल्पितं
मिथ्यास्वापमुपास्महे भगवतः क्रीडानिमीलद्दृशः॥२१

1. KP ०लीलाविशेषपरिवर्तनेन. 3. KP सृतापि for सृता अपि. 5. KP omits यत्र. KP चूडायाः. KP अवतंसं रत्नसकलं for अवतंसरत्नं. 6. KA omits पुनः. 8. KP omits भुजाभ्यां before कण्ठे. KB धृत्वा for गृहीत्वा. KP omits प्रकृतिः. 9. KD अथ for अतः. KB ०भावेन for ०अनुभावेन. 10. KP अविरोधितवाञ्छं. KP omits यन्त्रणं. 13. KP क्रोधव्यथितवत्. 14. KA omits the first इति. 14-15. KC, KP बाह्ये तु स्फूर्त्या यथो(KP तथैवो)क्तम्. 15. KC, KP शय्यो० for केलिशय्यो०. 18. PS श्रोतृश्रोत्रमनोहरव्रजवधू०. 19. PS (v. l. as in text) ०दृशोः for दृशः.

कृष्णवल्लभा

पूर्वं तावन्महाभावाविष्टेन कविना श्रीवृन्दावननवनिकुञ्जभवनोदरे विहरतोः श्रीराधाकृष्णयोः स्फूर्तिः प्राथिता। संप्रति व्रजसुन्दरीजल्पितमाधुरीं श्रोतुकामस्य श्रीकृष्णस्य कपटनिद्रारूपं केलिं प्रार्थयते—स्तोकेति। भगवतः सुरतसंभोगशालिनः श्रीकृष्णस्य मिथ्यास्वापं क्रीडापूर्वककपटनिद्रां वयमुपास्महे सेवेम। बहुत्वं सजातीयसङ्गापेक्षया। अथ च मिथ्यास्वापविशिष्टं भगवन्तमुपास्महे इति नोक्तं स्वापलीलाया एव प्राधान्यसूचनाय। सर्वत्र भक्तानां स्वरूपापेक्षया लीलायामेवात्यासक्तिः, तयैव हि स्वरूपमत्यन्तं चमत्करोतीति। यद्वा, मिथ्यास्वापं निद्राव्याजं स्वापानुकारलीलामुपनीय भावनया साक्षादिवोपनीतं कृत्वोपास्महे रसावेशेन निश्चला वर्तामहे। तस्य कथं स्वापवदाचरणं किमर्थं वा तदाह—व्रजवधूलीलामिथोजल्पितं श्रोतुं क्रीडानिमीलितदृशः। व्रजे या वध्वः, बध्यन्ते श्रीकृष्णप्रेमरसनया, बध्नन्ति वा कृष्णं स्वप्रेमरसनयेति, तासां व्रजवधूनां लीला प्रियानुकरणं वंशीचौर्यादिरूपा।

अङ्गैर्वेषैरलंकारैः प्रेमभिर्वचनैरपि।
प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः॥

इति (साहित्यदर्पण ३. ८८)। तत्पूर्वकं मिथो रहस्यन्योन्यं च जल्पितम्। तच्छ्रोतुं क्रीडया कौतुकेन, न तु निद्रावशात्, निमीलन्त्यौ दृशौ यस्य तस्य। प्रियानुकरणं यथा छन्दोमञ्जर्याम् (स्तवक २)—

मृगमदकृतचर्चा पीतकौशेयवासा
रुचिरशिखिशिखण्डाबद्धधम्मिल्लपाशा।
अनृजु निहितमंसे वंशमुत्क्वाणयन्ती
कृतमधुरिपुवेषा मालिनी पातु राधा॥

कौतुकनिमीलनं यथा पद्यावल्याम् (श्लो० २५३)—

4. GB ०निद्रारूपां लीलां प्राथयते. 10. GB कथं तस्य by transposition. 11. GB व्रजेति for all words from व्रजवधू etc. to क्रीडानिमीलितदृशः. 16. GB omits च.

नीचैर्न्यासादथ चरणोर्नूपुरे मूकयन्ती
धृत्वा धृत्वा कनकवलयान्युत्क्षिपन्ती भुजान्ते ।
मुद्रामक्ष्णोश्चकितचकितं शश्वदालोकयन्ती
स्मित्वा स्मित्वा हरति मुरलीमङ्कतो माधवस्य ॥

इति । तत्र च निद्राव्याजेन केलिकौतुकं बहुतरं प्रवर्तितम् । तामेव च स्वापानुकारलीलामधुनानुभूय कविरनुवदति—उपास्महे इति । कीदृशं जल्पितम्—श्रोत्रमनोहरम् । श्रोत्रं मनश्च हरतीति । तादृग्वाग्विलासस्य मधुरकोमलसुश्राव्यत्वाच्छ्रोत्रहरम् । अर्थगरीयस्त्वाच्च मनोहरम् । मनस आकर्षणात्सर्वेन्द्रियवृत्तिरप्यर्थान्निरुद्धा । कीदृशं स्वापम्—स्तोकस्तोकनिरुध्यमानमृदुलप्रस्यन्दिमन्दस्मितम् । स्तोकादपि स्तोकं यथा स्यात्तथा निरुध्यमानम् । अत्यन्तनिरुद्धस्याशक्यत्वात् । मृदुलं कोमलम् । मृदूर्म्रद्वीर्गोपसुन्दरीर्लाति स्वायत्तीकरोतीति वा । प्रकर्षेण स्यन्दितुं शीलमस्येति प्रस्यन्दि । अत्यानन्दभरेण निर्गलत्प्रसृमरम् । मन्दयतीति मन्दम् । तेन हि गोपीनां लज्जाभयादिकं सर्वं मन्दीक्रियत इति तथाभूतं स्मितं यत्र । स्यन्दोक्त्या स्मितस्यामृतरूपता व्यज्यते । पुनः कीदृशम्—प्रेमोद्भेदनिरर्गलप्रसृमरप्रव्यक्तरोमोद्गमम् । प्रेम्णः प्रणयस्य सर्वातिशयिनोऽनुरागस्योद्भेदोऽतिवृद्धिस्तेन निरर्गलो निरङ्कुशः प्रसृमरः प्रसरणशील अतएव प्रव्यक्तः स्पष्टो गोपयितुमशक्यो रोमोद्गमस्तृतीयः सात्त्विकभावो यत्र । मन्दस्मितस्य संवरणं कथमपि जातम्, गोपसुन्दरीसंलापश्रवणजायमानस्य प्रेम्णो निर्भरवृद्धया पुलकोद्गमस्त्वशक्यसंवरण इत्यर्थः ॥ शार्दूलविक्रीडितं छन्दः ॥२१

सुबोधनी

ततस्तत्पूर्वकालीनकृष्णाचरितस्मृत्या स्वोपास्यतया तदाह—भगवतो व्रज-

2. GB वलयान् for वलयानि. 7. GB omits श्रोत्रमनोहरं. 9. GB स्तोकेति for the phrase स्तोकस्तोक etc. 10. GB omits स्यात्. 13. GB omits इति मन्दं तेन हि. 14-15. GB omits कीदृशं and reads प्रेमेति for the phrases प्रेमोद्भेद etc. 18. GB जायते for जातं. GB अति० for निर्भर०. 21. CA अतः for ततः. CC transposes स्वोपास्यतया and तत्. CB, CD omit all words from ततः to तदाह and read instead : ततोऽपि पूर्वावस्थितेराविर्भवनमाशास्ते—स्तोकेति.

वधूनां लीलया परिहासचातुर्येण राधया सह जल्पितं तत्प्रागल्भ्यादिकथनं श्रोतुं मिथ्यास्वापमुपास्महे। कथं तदनुमितम्—क्रीडाकौतुकेन निमीलिते दृशौ येन। तेनापि कथं तज्ज्ञानम्—स्तोकस्तोकमत्यल्पमपि निःशेषेण रुध्यमानमपि मृदुलमपि प्रकर्षेण स्यन्दितुं शीलं यस्य तादृशं मन्दस्मितं यत्र। तत्सखीवचनश्रवणाय हास्यरोधनम्। तत्प्रागल्भ्यश्रवणजमनोविकाशात्स्यन्दनम्। अतएव तत्कालीन-सुखस्फूर्त्या यः प्रेम्ण उद्भेद उद्गमस्तेन यत्नैरपि निरोद्धुमशक्याः प्रसरणशीलास्तत एव प्रव्यक्ता रोमोद्गमा यत्र। कथं तच्छ्रवणेच्छा—वर्णसौष्टवाच्छ्रोत्रं शिष्टार्थतया मनश्च हरतीति तत्। श्रोत्रस्यापि मनो हरतीति वा ॥२१

सारङ्गरङ्गदा

पुनर्विलासारम्भं दृष्ट्वा सखीभिः सह दूरं गत्वा लीलावसानं ज्ञात्वा पुनः कुञ्जमागत्य बहिः सखीनां नूपुरादिध्वनिं श्रुत्वा ताभिः सह तस्या नर्मशुश्रूषया कपटसुप्तं कृष्णमालोक्य सवितर्कमाह—भगवतः सर्वसौन्दर्यादिश्रीयुक्तस्यास्य व्रज-वधूनां लीलया यन्मिथोजल्पितं तच्छ्रोतुं मिथ्यास्वापं कपटशयनमुपास्महे पश्यामः। कीदृशं जल्पितम्—तस्य श्रोत्रं मनश्च हरति तत्। अयि किमस्मान् हित्वा पुन्नागसुमनोहरणायैकिका वने प्रविष्टासि, दिष्ट्या वनावकान्ते पराभवो न जातः, अयि श्रुतं सुद्युम्नशिखण्डिभ्यामत्रागतम्, तयोर्विद्या च भवद्भ्यां शिक्षितेति किं

1. CB, CD तत्सखीनां लीलायां for लीलया परिहासचातुर्येण. CB, CD श्रीराधया for राधया. CC मिथोजल्पितं for जल्पितं. 2-3. CB, CD omit all words from कथं तदनुमितं to तज्ज्ञानं and read instead: भगवतो मिथ्यास्वापमिति भगवत्तात्रैव व्यक्तेत्यर्थः। कीदृशं (CD is corrupt in places). 3. CC विशेषेण for निःशेषेण. 4. CC प्रहर्षेन for प्रकर्षेण. CA तन्मन्द० for मन्द०. CB inserts तस्य भगवतः before तत्सखीवचन०, for which it reads सखीपरिहास०. 5. CB, CD तत्प्रागल्भ्यादि० for तत्प्रागल्भ्य०. 6. CB, CD उद्गमनं for उद्गमः. 7. CB, CD यतः for कथं तच्छ्रवणेच्छा. CB, CD वर्णविन्याससौष्ठवात् and श्रोत्रश्लिष्टार्थतया. 8. CB, CD omit श्रोत्रस्यापि to वा and read instead : कीदृशः—क्रीडया (CD क्रीडा-) कौतुकेन निमीलिते दृशौ येन. CC अचिन्त्यमनो for अपि मनो. 13. KP कपटशयानं. 15. KP एकाकिनी for एकिका. KC, KP वने वकान्तेन for वनावकान्ते. 16. KD भवत्या for भवद्भ्यां.

सत्यमित्यादि सखीनां नर्म श्रुत्वा स्तोकस्तोकमल्पाल्पं तेन निरुध्यमानं मृदुलं प्रस्यन्दि प्रकर्षेण विकशच्च मन्दस्मितं यस्मिन्। आ भोः शिखण्डिशिक्षितविद्याचार्याः, आत्मवत्कलङ्किनीं कर्तुं दृग्भङ्गेनास्य हस्ते मां विक्रीय प्रच्छन्नासु युष्मासु मद्धर्मरक्षिण्या प्रियसख्या निद्रयालिङ्गितेऽस्मिन्युष्मन्नागरे एकाकिना शिखण्डिनागत्योक्तम्—ह्यः सकृष्णयुष्मत्सखीगणाधिष्ठितकुञ्जे सख्या सुद्युम्नेन सहाहमगमम्, ततस्ताभिः प्रार्थ्य मत्तो मद्विद्या शिक्षिता, तेन च मत्सख्युः संप्रति तद्विद्यानैपुण्यपरीक्षार्थमागतोऽहम्, ताभिस्त्वद्दीक्षार्थं प्रार्थ्य प्रेषितोऽस्मि, तत्तथा कुर्विति श्रुत्वा युष्मासु सरुषा मया भर्त्सितोऽसौ वो गुरुर्गतः, तन्मदनप्रेक्षिकाभिर्दुर्मुखीभिर्युष्माभिः सह संलापोऽपि मया न कार्य इति तन्नर्म श्रुत्वा प्रेमोद्भेदेन निरर्गला यत्नैरपि निरोद्धुमशक्याः प्रसृमराश्च तस्य रोमोद्गमा यस्मिन्॥ बाह्ये तु—तस्य श्रोत्रस्य मनो हरति। तथा हि—

अङ्गानि यस्य सकलेन्द्रियवृत्तिमन्ति

इत्यादि ब्रह्मसंहितायाम् (५. ३२)। सममन्यत्॥२१

विचित्रपत्राङ्कुरशालि बाला-
स्तनान्तरं याम वनान्तरं वा।
अपास्य वृन्दावनपादलास्य-
मुपास्यमन्यं न विलोकयाम॥२२

1. KA, KD अल्पमल्पं. KP रुध्यमानं for निरुध्यमानं. 3. KC, KP insert सत्यं before आत्मवत्. KP दृग्भङ्गिना for दृग्भङ्गेन. KP हस्तेन for हस्ते. KC, KP भवतीषु for युष्मासु. 5. KB, KD read गतेऽह्नि for ह्यः; KA inserts these words after ह्यः. KP स कृष्णः for सकृष्ण-. KC, KP ०त्वत्सखी० for ०युष्मत्सखी०. KP ०गणाधिष्ठितं. 6. KC, KP गृहीता for शिक्षिता. KP repeats तेन. KC, KP मत्सख्यः. 7. KD परीक्षणार्थं. KP तद्दीक्षार्थं. KC, KP omit तत् before तथा. 8. KP omits वः. KC तन्मदनापेक्षिकाभिः, KP तन्मदनपेक्षकाभिः. KA omits युष्माभिः. 10. KP omits च, KC omits तस्य. 13. KC, KP अन्यत्समम्. 14. PS ०शालिबाला (also v. l. शालि इति व्यस्तं वा). 15. PS मौनिमनोन्तरं for याम वनान्तरं. 16. PS ०पादपास्य० for ०पादलास्य०. 17. PS and Gopālabhaṭṭa अन्यत् for अन्यं. PS विलोकयामः.

कृष्णावल्लभा

अथ श्रीवृन्दावनमञ्जुकुञ्जविहारिश्रीकृष्णमधुरोपासनोद्भूततत्तद्भावाविष्टः स्वस्य तदुपासनैकदार्ढ्यमाह—विचित्रेति। श्रीकृष्णेच्छया यदि बालास्तनान्तरम्। बालाया नायिकायाः।

बालेति गीयते नारी यावद्वर्षाणि षोडश

इति कोके (नागरसर्वस्व १०. २)। तस्याः स्तनयोरन्तरं मध्यं याम गच्छाम। प्रवृत्तिमार्गनिष्णाततत्तन्मीमांसकादिदुरूढसंगताः परमविषयान्भोजयामः।

अग्निष्टोमेन स्वर्गकामो यजेत

इत्यादिश्रुतेः। यद्वा,

तद्यथेह कर्मजितो लोकः क्षीयते, एवमेवामुत्र पुण्यजितो लोकः क्षीयते

इति श्रुत्या (छान्दोग्योपनिषद् ८. १. ६) इह परमसुखं प्राप्ताः सन्तो वनान्तरं वनस्यान्तरं मध्यं वा प्रविशाम। बालायाः स्तनान्तरं वनान्तरं वा कीदृशम्—विचित्रपत्राङ्कुरशालि। उभयोर्विशेषणम्। विविधानि विचित्राणि कस्तूरी-कुङ्कुमादिभिः कृतानि येषु तैरेवंभूतैः पत्राङ्कुरैः पत्रावलीभिः शाला श्लाघास्यास्तीति। वनान्तरमपि विचित्रैः पत्रैरङ्कुरैरभिनवोद्भेदैः शालितुं शीलं यस्येति।

अङ्कुरोऽभिनवोद्भिदि

इत्यमरः (२. ४. ४)। तथा—वृन्दावनपादलास्यम्। वृन्दावने पादयोर्लास्यं

2. GC ०तद्भावाविष्टः for तत्तद्भावाविष्टः. 3. GB omits यदि बालास्तनान्तरं. 5. This quotation occurs, with v. l., in the Nāgara-sarvasva of Padmaśrī (ed. Bombay, 1925); it is also so cited in Śārṅgadhara-paddhati, no 3135. 7. GB ०निष्ठान् for ०निष्णात०. GB भुञ्जामः for भोजयामः. 8. GC transposes अग्निष्टोमेन and स्वर्गकामः. GC यजते. Cf. Tāṇḍya Br. 16. 3. 3, 16. 12. 6, 16. 15. 5, 18. 2. 3, etc; Maitrī Up. 6. 36. 9. GC omits यद्वा. 12. GB इहोपरमसुखं. 13. GB inserts निवृत्तिमार्गं सेवेम after प्रविशाम, and omits all words from बालायाः स्तनान्तर to विचित्रपत्राङ्कुरशालि. 14. GC omits उभयोर्विशेषणं. 16. GB अन्यत्र for वनान्तरमपि. 18. GB omits वृन्दावनपादलास्यं.

लसनं शोभाविशेषो यस्य तम्। यद्वा, लास्यं रासविलासिनानागतिविन्यासरूपं नृत्यं यस्य तम्। श्रीकृष्णमपास्य त्यक्त्वान्यत्किमप्युपास्यमुपासनार्हमाराध्यं वस्तु। यद्वा, उपास्यमास्यसमीपस्थमपि न विलोकयाम न पश्याम। सर्वत्रैव हि तं विलोकयाम इति भावः। तत्र लास्यम्—

ताण्डवं च तथा लास्यं द्विविधं नृत्यमुच्यते।

उक्तं च संगीतरत्नाकरे (७. ३१-३२)—

तण्डूक्तमुद्धतप्रायप्रयोगं ताण्डवं मतम्।
लास्यं तु सुकुमाराङ्गं मकरध्वजवर्धनम्॥

नृत्यं यथा—

देशरुच्या प्रतीतो यस्तालमानरसाश्रयः।
सविलासोऽङ्गविक्षेपो नृत्यमित्युच्यते बुधैः॥

इति॥ उपेन्द्रवज्रा छन्दः॥२२

सुबोधनी

अथैतत्स्मरणोद्भूतानन्दगर्वावेशात्स्वसङ्गिनः प्रति तदुपास्यमेव सनिश्चयमाह—बालानामत्यन्तक्रीडाविशिष्टानां युवतीनां स्तनान्तरं यामोऽरण्यमध्ये वा यामः। महाविषयमग्ना महाविरक्ता वा भवाम इत्यर्थः। वृन्दावने पादलास्यं यस्य तमुपास्यं हित्वान्यमुपास्यं कंचिदपि न विलोकयामः। उपासनायाः का

1. वृन्दावनपादलास्यं for लास्यं. 5. Cited in Śabda-kalpadruma from Saṃgīta-Dāmodara. 6. GB तदुक्तं for उक्तं च. 7. GB तदुक्तं, GC तद्व्यक्तं for तण्डूक्तं, which last is the reading in Saṃgīta-ratnākara. 10-11. The Śabda-kalpadruma cites the verse from the Saṃgīta-Dāmodara. 14. CB अद्भुतानन्दस्वरूपं; CD ०नन्दाविष्टतया for उद्भूतानन्दगर्वावेशात्. CB, CD omit तदुपास्यमेव. CD inserts विचित्रेति after आह. 15. CB omits all words from बालानां to अरण्यमध्ये and reads instead: विचित्रेति। बालास्तनान्तरं वनान्तरं. CD स्तनमध्ये वनमध्ये वा for स्तनान्तरं यामोऽरण्यमध्ये. CC स्तनान्तरे. 16. CB, CD ०विषयाविष्टा for ०विषयमग्ना. CD भवामेत्यर्थः. CB inserts नृत्यं before यस्य. 17. CC विलोकयाम and उपासनायां.

वार्तेत्यर्थः। उभयं विशिनष्टि—विचित्रपत्राङ्कुरैः पत्रभङ्गलेखाभिः शोभितम्। पक्षे, पत्रैरङ्कुरैश्च ॥२२

सारङ्गरङ्गदा

अथ रासे त्यक्तगोपीनां तत्रागमनशङ्कया ताः कुत्रेति ज्ञात्वा तत्रैव चम्पकादिपुष्पाण्यादाय शीघ्रमागम्यतामिति सखीनां प्रेरणया द्वित्रिसखीभिः सह बहिरागत्य स्वाभीष्टतत्कालीनस्वसखीसेवानवाप्त्या स्वस्य सखीस्नेहाधिकसखीत्वात्सविचारमाह—तेनैव कुञ्जे भूषितत्वाद्विचित्रपत्राङ्कुरशालिनौ यौ बालायाः किशोर्याः श्रीराधायाः स्तनावेवान्तरे हृदि यस्य तम्। तया सह रममाणं कृष्णं वा। याम तन्निकटे तिष्ठाम। पुष्पाद्यर्थं वनान्तरं वा याम। वृन्दावनपं कृष्णमादत्ते वशीकरोति तद्वृन्दावनपादम्। दायादवत्। तादृशं लास्यं यस्य तं वृन्दावनेश्वरीरूपं स्वस्योपास्यमपास्यान्यमुपास्यं न विलोकयाम। किमुतोपास्महे इत्यर्थः। यद्वा, प्रथमागतत्वात्तन्निष्ठाज्ञानाय हे सखि दुःखिता एता गोपीः कृष्णेन सह संगमय्य सुखयाम इत्यन्यसखीनां वचः श्रुत्वा समस्नेहसखीगुणमाश्रित्य स्वनिश्चयमाह—कृष्णेन सहाप्राप्तरहःकेलित्वाद्विचित्रपत्राङ्कुरशालिन्यो या एता व्रजबाला आसां वियोगनीरसपाण्डुच्छवीनां स्तननमेव स्तनः शरदभ्रस्तनितमिव विलपनध्वनिस्तं वा याम तन्मध्ये पताम। किं वा, पुष्पाण्याहर्तुं वनान्तरं वा याम।

1. CB, CD शोभनं for शोभितं. 2. CC वनपक्षे for पक्षे. CB inserts विचित्रैः before पत्रैः. CD विचित्रं पत्रैः for पत्रैरङ्कुरैश्च. CC पत्राङ्कुरैश्च. 5. KD विचित्र० for द्वित्रि०. 6. KB ०तत्काल० for ०तत्कालीन०. KB, KD omit स्वसखी before ०सेवा०. KC सखीप्रेमा० for सखीस्नेहा०. 8. KA omits श्रीराधायाः. KC ग्रस्य for यस्य. KB श्रीकृष्णं for कृष्णं. 9. KA, KC, KD यामः and तिष्ठामः. KA, KC, KD यामः (second time). KP वृन्दावनरूपं. 10. KP तद्वृन्दावनं पादं. KP श्रीवृन्दावनेश्वरी०. 11. KA, KC, KD विलोकयामः. 12. KP प्रथममागतत्वात्. 13. KA, KD समस्नेहा सखी०. 14. KC, KP स्वनिश्चयं. KP ०विचित्राङ्कुरशालिन्यो. 15. KA तासां for आसां. KP स्तनमेव for स्तननमेव. 16. KB तदनन्तरं for तं. KA, KC, KD यामः. KC, KP insert वा after तन्मध्ये. KA, KC, KD पतामः.

तं नवीनयुवद्वन्द्वमिति वक्तुमुद्यतः पथि तयोः पादचिह्नान्यालोक्याह—वृन्दावने पादलास्यं ययोस्तं युवद्वन्द्वरत्नमपास्य तत्त्वान्यमुपास्यं सेव्यं न विलोकयाम। किमुतोपास्महे। तयोर्लक्षणम्—कृष्णादप्यधिको यासां स्नेहस्ताः सखीस्नेहाधिका इति, कृष्णे सख्यां च समस्नेहात्समस्नेहा इति॥ बाह्ये तु—मूर्छितं पथि पतितं तं दृष्ट्वा, अये स ते दयितः श्रीकृष्णः सर्वान्तर्यामितया सर्वत्रास्ते, तथा विठ्ठलश्रीरङ्गादिरूपश्च त्वया दृष्ट एव, तमेव स्मर पश्य वेत्याश्वासनपरान्स्वान्प्रति स्वनिश्चयमाह—तादृशबालास्तनमध्यं वा याम। महाविषयमग्ना भवाम इत्यर्थः। वनान्तरं वृन्दावनमध्यम्। किं वा, स्वस्य वृन्दावनायोग्यत्वाद्वनान्तरं वा याम। तादृशं तमपास्येति पूर्ववत्। अत्र विचित्रपत्राङ्कुरशालीति स्तनवनयोर्विशेषणम्। वृन्दावनेति विशेषण एव तात्पर्याद्विशेष्यानुक्तिः॥ २२

साधं समृद्धै रमृतायमानै-
रातायमानैर्मुरलीनिनादैः।
मूर्धाभिषिक्तं मधुराकृतीनां
बालं कदा नाम विलोकयिष्ये॥२३

कृष्णावल्लभा

संप्रति तद्दर्शनानन्दमहोत्सवाशां प्रार्थयते—सार्धमिति। मधुरा यासामा-

1. KP तन्नवीन० 2. KP omits अपास्य. KA, KC, KD विलोकयामः. 3. KP कृष्णादल्पमाधिक्यं, KC कृष्णादल्पाधिको. After यासां KC inserts सख्यां, KP inserts तासां सखीनां. For definitions of स्नेहाधिका and समस्नेहा सखी see Ujjvala-nīla-maṇi, Sakhī-prakaraṇa, 118, 127. 5. KC omits पतितं; KB, KP omit तं after पतितं. 6. KA विट्ठलश्रीरङ्गरूपश्च, KB विठलश्रीरङ्गादि०. 7. KA निश्चयं for स्वनिश्चयं. KC तद्बालास्तनमध्यं All Mss (except KB) and KP यामः. KA, KB insert वा before भवामः. KB भवामेत्यर्थः. 8. KB, KD omit किं वा. KA, KC, KD यामः. 10. KA विशेषणेन, KB विशेषणं, KP विशेषः for विशेषणे. KC, KP तात्पर्याद् (KP तात्पर्यादि-) विशेषोक्तिः. 11. PS (v. l. as in text) समृद्धैः for समृद्धैः. 12. PS आध्मायमानैः for आतायमानैः.

कृतयस्तासां मधुराकृतीनां मूर्धाभिषिक्तं वयोरूपलावण्यादिभिः सर्वश्रेष्ठं राजानं वा। बालमंलकारविशेषम्।

पर' पदं भूषणभूषणाङ्गम्

(भा० ३. २. १२) इत्युक्तेः। यद्वा, बाला मधुररसात्मिका वाण्यस्यास्तीति तं बालम्। अर्श आदिभ्योऽच् (पा० ५. २. १२७)।

बालो ना कुन्तलेऽश्वस्य करिणश्चापि बालधौ।
वाच्यलिङ्गोऽर्भके मूर्खे ह्रीवेरे पुंनपुंसकम्।
अलंकारान्तरे मेरौ वाणी बाला त्रुटिः स्त्रियाम्॥

इति मेदिनी (लान्त ३९-४०)। मुरल्या निनादैः ध्वनिभिः सार्धं सह। नाम संभावनायां प्रकाशे वा। कदा कस्मिन्काले विलोकयिष्ये। मुरलीरवस्यावलोकनीयत्वाभावेऽपि दृशोर्ज्ञानवचनत्वमिति समाधानम्। कीदृशैर्मुरलीनिनादैः—समृद्धैः स्फीतैः। माधुर्याकर्षकत्वादिगुणसंपन्नैरित्यर्थः। पुनः कीदृशैः—अमृतायमानैरमृतमिवाचरद्भिः। अचेतनानपि जीवयद्भिरित्यर्थः। पुनः कीदृशैः—आतायमानैर् आ समन्तात्स्वरग्राममूर्छनालापतानादिभिर्विस्तारं प्राप्नुवद्भिः। तनु विस्तारे (धा० ८. १)। यद्वा, सर्वेषां किं किमिदमित्याश्चर्येण पूजितैः। तायु पूजानिशामन इति धातोः। अथवा, मधुराकृतीनां मधुरा मधुररसमया आकृतयो यासां तासां गोपसुन्दरीणां मुरलीनिनादैः करणभूतैर्मूर्धाभिषिक्तं मन्त्रिणम्। मुरलीनिनादैरेवं करणीयमेवं न करणीयमस्मिन्निकुञ्जादिस्थल एवमभिसर्तव्यमेवं नाभिसर्तव्यमित्यादिमन्त्रणपरम्।

मूर्धाभिषिक्तो भूपाले मन्त्रिणि क्षत्रियेऽपि च

1. GB omits all words from मधुरा (p. 97, l. 16) to मधुराकृतीनां and reads instead : मधुराणामाकृतीनां. GB omits वा after राजानं. 4. GB बालं for बाला. GC omit तं. 9. GB मुरलीनिनादैः, omitting ध्वनिभिः and सह. 11. GB नादैः for मुरलीनिनादैः. 12. GB तथा for पुनः कीदृशैः. 13. GB omits कीदृशैः. 16. The Dhātupāṭha has चायृ पूजानिशामने (१.६२९) and तायृ संतानपालनयोः (१.५१८). 18-19. GC एवमभिमन्तव्यं for एवमभिसर्तव्यं, omitting all words from एवं नाभिसर्तव्यं to तत्सहितं (p. 99, l. 1)

इति मेदिनी (तान्त ३२)। ऋद्धेरिदं वृन्दं वा आर्द्धं तत्सहितं सार्द्धम्। गोगोप-गोपीकदम्बमध्यस्थमित्यर्थः। अर्धं द्रुतार्धं तेन सहितं यथा स्यात्तथा समृद्धै-र्निनादैश्चेति। लघुर्गुरुरतःपरं प्लुतद्रुतद्रुतार्धद्रुतविभागद्रुतचतुर्थांशाश्च स्वरमात्रा-स्तालाङ्गानि। यथा,

अर्धद्रुतो द्रुतश्चेति लघुर्गुरुरतःपरम्।
प्लुतश्चेति क्रमादित्थं मधुराणि च पञ्चधा॥

इति। अन्यत्समानम्॥ इन्द्रवज्रा छन्दः—

स्यादिन्द्रवज्रा यदि तौ जगौ गः (छन्दोमञ्जरी २) ॥२३

सुबोधनी

पुनर्दैन्योदयादुच्छलितोत्कण्ठया दर्शनमाशास्ते—मुरलीनिनादैः साहतं बालं कदा। नामेति संभावनायाम्। विलोकयिष्ये। कीदृशैः—समृद्धैः रागतालादिभिः पुष्टैः। अतएवामृतवदाचरद्भिः। कथममृतवदाचरणम्—आतायमानैः प्रियावशी-करणाय विस्तार्यमाणैः। किमिति बालं दिदृक्षसे—मधुराकृतीनां मूर्धाभिषिक्तम्। मूर्धन्यमित्यर्थः ॥२३

सारङ्गरङ्गदा

अथ पुष्पाण्यादाय ताभिः सह पुनस्तत्कुञ्जमागच्छन्तमात्मानं भावयन्पश्य-त्यन्तस्वाधीनभर्तृकतया सौभाग्यगर्वमानाभ्यां रसास्वादकोत्कण्ठारहितां रसपोषका-न्योन्यदौर्लभ्यराहित्येन पर्युषितरसामिव तां स्वं च दृष्ट्वा, किंचिद्व्यवधानेन तद्वर्धनाय तदुत्कण्ठाप्रलापशुश्रूषया च कुञ्जात्तिरोहिते रसिकशेखरे तमन्वेष्टुं बहिर्निर्गतया ससखीवृन्दया विकलया श्रीराधया मिलित्वा, तमन्विष्य भ्रमन्तीनां

10. CB, CD तत्स्फूर्त्यपगमे पुनः for पुनर्दैन्योदयात्, and आह for दर्शनमाशास्ते. CB, CD insert सार्धमिति after आशास्ते, and सार्धं before सहितं. CD सह for सहितं. CB omits बालं; CD reads तं for बालं. 11. CA omits कदा. CC inserts कदा again before विलोकयिष्ये. 12. CB, CD ततश्च for कथममृतवदा-चरणं. 12-13. CB, CD माधुर्यादिभिः for प्रियावशीकरणाय. 13. CA विस्तीर्य-माणैः. CB, CD read कीदृशं for किमिति and omit दिदृक्षसे. 14. CB, CD श्रेष्ठं for मूर्धन्यं. 16. KC, KP जानन् for भावयन्. 18. KC ०रसान्वितां for ०रसामिव तां. 20. KP श्रीराधाया.

सर्वासां तासां तद्दर्शनोत्कण्ठाप्रलपितश्रवणोद्गतया स्वस्य बाह्यान्तर्दशाद्वयेऽपि तद्दर्शनोत्कण्ठया तासां प्रलापमेवानुवदन्नाह त्रयस्त्रिंशता श्लोकैः। अतोऽत्रार्थत्रयमनुसंधेयम्। उक्तं च

संभोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः।

तत्र च

न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते।
कषायिते हि वस्त्रादौ भूयान्रागो विवर्धते॥

इति। विप्रलम्भोऽपि चतुर्धा—पूर्वरागो मानः प्रेमवैचित्त्यं प्रवासश्चेति। प्रवासश्च बुद्धिपूर्वाबुद्धिपूर्वभेदेन द्विधा। बुद्धिपूर्वोऽपि किंचिद्दूरसुदूरगमनाद्द्विधा। तत्र किंचिद्दूरप्रवासाख्यविप्रलम्भेऽस्मिंस्तासां विरहोत्पन्ना दश दशाः स्युः (उज्ज्वल०, शृङ्गारभेदप्रकरण १५३)—

चिन्तात्र जागरोद्वेगौ तानवं मलिनाङ्गता।
प्रलापो व्याधिरुन्मादो मोहो मृत्युर्दशा दश॥

इति। एतास्तत्तच्छ्लोकेषु व्याख्यास्यन्ते। तत्र—सार्धम् (श्लो० २३) इत्यादिभिश्चिन्ता। अधीरम् (श्लो० २७) इत्यादिभिः प्रलापः। तच्छैशवम् (श्लो० ३२) इत्यादिभिरुद्वेगः। यावन्न मे (श्लो० ३७) इत्यत्र मोहो व्याधिश्च। यावन्न मे (श्लो० ३८) इत्यत्र मृतिः। हे देव (श्लो० ४०) इत्यादिभिश्चोन्मादः। आम्याम् (श्लो० ४३) इत्यादिभिर्ग्लानिलक्षणं तानवम्। तत्र प्रथमं निजाश्वासनपरसखीः प्रति तासां तद्दर्शनचिन्तोत्कण्ठाप्रलपितमनुवदन्नाह—मुरलीनिनादैः सार्धं तं बालं कदा नाम विलोकयिष्ये। तन्नादमुद्गिरन्तं तमित्यर्थः। कीदृशैः—समृद्धैः स्तानमूर्छनादिमाधुर्यैः पुष्टैः। अमृतवदाचरतीति तथा तैः। आतायमानैः स्वमाधुर्येण ब्रह्माण्डं निर्भिद्य वैकुण्ठपर्यन्तप्रसरणशीलैः। लक्ष्म्या अप्याकर्षणात्। तदुक्तम् (विदग्धमाधव १. २७)—

1. KC, KP omit सर्वासां. KP ०श्रवणोद्गतायाः. 2. KP अत्रार्थोऽयमनुसंधेयः. 6-7. This verse is also quoted in Ujjvala-nīla-maṇi, Śṛṅgāra-bheda-prakaraṇa, śl. 3. 8. KC, KP omit the first इति. 10. KB ०प्रवासाख्ये विप्रलम्भे. 19. KP ०चिन्तोत्कण्ठया प्रलपितं. KB inserts साधमिति after आह. KP inserts तन्नाद- before मुरलीनिनादैः, and इति before सार्धं. 21. KB आचरन्ति. KB, KD निर्भेद्य.

रुन्धन्नम्बुभृतः

इत्यादौ

भिन्दन्नण्डकटाहभित्तिमभितो बभ्राम वंशीध्वनिः

इति (तत्रैव)। कीदृशं तम्—मधुराकृतीनां मूर्धाभिषिक्तम्। श्रेष्ठमित्यर्थः ॥ स्वान्तर्दशायाम्—तत्प्रेरकसंकेतमुरलीनादमुद्गिरन्तं तमिति। अन्यत्समम् ॥ बाह्ये तु—स्वाश्वासनपरान्स्वान्प्रत्युक्तिः। अर्थः स एव ॥२३

शिशिरीकुरुते कदा नु नः
शिखिपिच्छाभरणः शिशुर्दृशोः।
युगलं विगलन्मधुद्रव-
स्मितमुद्रामृदुना मुखेन्दुना ॥२४

कृष्णवल्लभा

संप्रति दूरत एव श्रीकृष्णदर्शनानन्दानुभवभावितान्तःकरणः कदा निजकरुणया मद्दृशौ शीतयिष्यतीति प्रार्थयते—शिशिरीकुरुत इति। शिखिपिच्छाभरणः शिखा चूडा विद्यते येषां ते शिखिनो मयूरास्तत्पिच्छानामाभरणो यस्य स श्रीकृष्णो मुखेन्दुना मुखचन्द्रेण। स्वप्रकाशेनामृतस्रावित्वेन चन्द्रसाम्यम्। न्विति वितर्के। नोऽस्माकं दृशोर्युगलं कदा शिशिरीकुरुते तथा करिष्यति। शीतयिष्यतीत्यर्थः। कदाकर्ह्योर्विभाषा (पा० ३. ३. ५) इति भविष्यति लट् वा। शिशुः सुकुमारोऽकठिन इति यावत्। तस्मात्कदाचित्तस्य शीतलीकरणं संभवति।

शिशुः स्याद् बालके पुंसि सुकुमारेऽभिधेयवत्

इति धरणिः। यद्वा, शिशुरिति निजप्रियवयस्यबालकसङ्गेन क्षणं शैशवक्रीडासक्तत्वात्। कीदृशेन मुखेन्दुना—विगलन्मधुद्रवस्मितमुद्रामृदुना। पुष्पतोऽत्युद्रिक्त-

1. KA, KB, KD omit अम्बुभृतः. 4. KA omits तं. 5. KP ०निनाद० for ०नाद०. 6. KP आश्वासन० (omitting स्व). KP omits अर्थः. 8. PS शिखिपिञ्छा०. 13. GB शिशिरेति for शिशिरीकुरुत इति। 13-14. GB omits all words from शिखा चूडा to यस्य सः and reads instead मयूरचन्द्रकाभरणः. 17. GB omits भविष्यति. GC inserts शिखिपिच्छाभरणः before शिशुः. 18. GC inserts कर्तुं before संभवति. 21. GB reads विगलदिति for the whole phrase विगलन्मधु etc.

तया विगलद्यन्मधु मकरन्दस्तद्वन्माधुर्यचमत्कारवान्यो द्रवः परिहासस्तद्युक्ता या स्मितमुद्रा ईषद्विकशितकपोलसौष्ठवान्वितकटाक्षालक्षितदन्तपङ्क्तिरूपा परिपाटी, तया मृदुना सरसेन प्रतिपदमिति। स्निग्धमाधुर्येणेत्यर्थः।

द्रवकेलिपरीहासाः

इत्यमरः (१.६.३३)। यद्वा, विगलन्मध्विव मादको यो द्रवो रसस्तद्वद्यत्स्मितं तदेवाधरामृतस्य मुद्रा बहिर्मुद्रणं तया मृदुना। मनोहरेणेत्यर्थः॥ वैतालीयं छन्दः। तल्लक्षणमुक्तम्॥२४

सुबोधनी

अथ स्वीयानप्युरीकृत्य तथैवाह—स शिशुर्नोऽस्माकं दृशोर्युगलं मुखेन्दुना। नु वितर्के। कदा शीतलीकरिष्यति। तददर्शनतप्तं नेत्रं स्वं प्रदर्श्य शीतलीकरिष्यतीत्यर्थः। तं विशिनष्टि—शिखिपिञ्छान्याभरणानि यस्य। मुखस्येन्दुतामाह—विगलन्मधुद्रववत्स्मितं तस्य मुद्रया भङ्ग्या मृदुना। विगलन्मृदुपदे च पूर्णताव्यञ्जके। पूर्णस्यैव गलनं मृदुता च॥२४

सारङ्गरङ्गदा

अथ पुनर्मुह्यन्तीनां करुणार्द्रोऽसावधुनैव दर्शनं दास्यति, मा खेदं गच्छतेति सखीभिराश्वासितानां तद्दर्शनवह्निज्वालावलीढनेत्राणां तां प्रति तथोक्तिमनुवदन्नाह—नु भोः सख्यः स शिशुः किशोरः श्रीकृष्णो नोऽस्माकं दृशोर्युगलं मुखेन्दुना कदा शिशिरीकुरुते तथा करिष्यति। कीदृक्—शिखिपिञ्छैराभरणं मौलिर्यस्य। कीदृशेन तेन—विगलन्तो मधुद्रवा यस्मिंस्तादृशस्मितस्य मुद्रया भङ्ग्या मृदुना॥

3. GB स्निग्धमाधुर्यधुर्येणेत्यर्थः. 6. GB omits इत्यर्थः. 7. GB लक्षणं तु for तल्लक्षणं. 9. CB, CD पुनः for अथ. CB, CD insert पुनः before and शिशिरीति after तथैवाह. CC omits अस्माकं. 10. CB, CD place कदा before नु. CB, CD ०संतन्तं for ०तप्तं, and अस्मन्नयनयुगलं कदा स्वास्येन्दुं for नेत्रं स्वं. CB शीतलं for शीतली-. 11. CB, CD कीदृशः for तं विशिनष्टि. CB, CD ०पिञ्छैः for ०पिञ्छानि. CC, CD मुखेन्दुतां. CB, CD insert आपादयन् before आह. 12. CB, CD परिपाट्या for भङ्ग्या. CB, CD मधुद्रवमुद्राशब्दौ सुधालाञ्छनसूचकौ for विगलन्मृदुपदे च पूर्णताव्यञ्जके. 13. CB, CD insert तेन before मृदुता. CB, CD चेति for च. 17. KB. omits सः. 18. KD inserts किं after तथा. 19. KC omits तेन. KC, KP तादृशं यत्स्मितं तस्य for तादृशस्मितस्य.

स्वान्तर्दशायाम्—प्रेयसीप्रेरणहर्षजतादृशस्मितस्यान्यतो यन्मुद्रणं गोपनं तेन मृदुना। अन्यत्समम् ॥ बाह्ये तु पूर्ववत् ॥२४

कारुण्यकर्बुरकटाक्षनिरीक्षणेन
तारुण्यसंवलितशैशववैभवेन।
आपुष्णता भुवनमद्भुतविभ्रमेण
श्रीकृष्णचन्द्र शिशिरीकुरु लोचनं मे ॥२५

कृष्णवल्लभा

पुनरप्यत्युत्सुकतया शिशिरीकरणमाशास्ते—कारुण्येति। भो अद्भुत श्रीकृष्णचन्द्र श्रीयुक्तकृष्णवर्णचन्द्र। एतेनाद्भुतत्वमन्यचन्द्राद्वैलक्षण्यं चोक्तम्। श्रीयुक्तत्वेनासंख्यसंपूर्णकलावत्त्वान्निष्कलङ्कपूर्णामृतचन्द्रिकावत्त्वादि चोक्तम्। कृष्णत्वेनाद्भुतत्वं नित्यानन्दरसमयत्वान्मधुररसमयत्वं चोक्तम्। मे मम लोचनम्। जात्या चैकवचनम्। विभ्रमेण विलासेन शिशिरीकुरु शीतलीकुरु। अत्युत्कण्ठाबाहुल्येन प्रार्थनायां लोट्। त्वं तु चन्द्र इव चन्द्रः, मल्लोचनं चेन्दीवरम्, चन्द्रस्येन्दीवरशीतलीकारः प्रसिद्ध एव, तत्कथं न करोषीति काकुः। कीदृशेन विभ्रमेण—कारुण्यकर्बुरकटाक्षनिरीक्षणेन। कारुण्यं करुणा तेन कर्बुरं विचित्रम्। मिश्रितमिति यावत्। तत्कटाक्षपूर्वकं निरीक्षणं यत्र तेन।

चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे

इत्यमरः (१.४.१७)। पुनः कीदृशेन—तारुण्यसंवलितशैशववैभवेन। तारुण्यं तरुणिमा तेन संवलितं यच्छैशवं शिशोर्भावश्चपलता तस्य वैभवं प्रभुत्वं यत्र तेन। पुनः कीदृशेन—भुवनं जगदापुष्णता। सर्वतो मधुरमाधुरीचमत्कार-

1. KB स्वान्तः० for स्वान्तः०. KA omits गोपनं. 5. Gopāla Bhaṭṭa अद्भुत विभ्रमेण. 8. GA resumes from पुनरप्य०. GB हे for भोः. 9. GB हे for श्रीकृष्णचन्द्र. 10. GB ०कलावत्त्वं for ०कलावत्त्वात्. 10-11. GC कृष्णत्वेनाद्भुत्वाचिन्त्यानन्द०. 15. GB कारुण्येति for the phrase कारुण्यकर्बुर etc. GB चित्रं for विचित्रं. 16. GB मिश्रं for मिश्रितं. 18. GB omits कीदृशेन and reads तारुण्येति for the phrase तारुण्यसंवलित etc. 20. GB omits कीदृशेन.

पोषकेनेत्यर्थः। त्रिभुवनमेव त्वदीयविलासेन जीवतीति स्वानुभवानन्दसंदोहतः समत्वम्। अथवा, हे श्रीकृष्णचन्द्र, श्रयते सर्वातिशायिनी रूपनवयौवन-वयोमाधुर्यलावण्यलीलाविलासवैदग्ध्यादिसंपत्तिर्या सा श्रीः राधा, तद्युक्तकृष्णचन्द्र। कारुण्यं विद्यते यस्य तत्संबोधनं कारुण्य करुणानिधे। कर्बु रयोः परस्पराव-लोकनानुरागचित्रयोः कटाक्षयोस्तत्पूर्वकयोर्यन्निरीक्षणं तेन। तारुण्यं तरुणिमा तेन संवलितं शैशवस्य सौकुमार्यवैभवं तेन च। अथवा, अद्भुतविभ्रमेणाश्चर्यविलासेन मल्लोचनं शिशिरीकुर्विति कारुण्यादिपृथक्पृथग्विशेष्यपदैर्व्याख्येयम्। तन्मध्ये भुवनमापुष्णतेति पदत्रयेऽपि विशेषणं कर्तव्यम्॥ वसन्ततिलकं छन्दः॥ २५

सुबोधनी

अथात्युत्कण्ठया सदैन्यं स्वयमेव प्रार्थयते—हे श्रीकृष्णचन्द्र कारुण्येन कर्बु रः शबलो यः कटाक्षस्तेन यन्निरीक्षणं तेन करुणापूर्णावलोकनेन मम लोचनं शीतली-कुरु। लोचनान्तेक्षणेनाप्येकमपि लोचनमिति सदैन्यलालसोक्तिः। तल्लालसा-मेव व्यनक्ति—तारुण्येन मिश्रितं यच्छैशवं कैशोरं तस्य वैभवं स्मितादिसंपद्यत्र। अतएवाद्भुतविलासेन भुवनमप्यापुष्णता पोषयता। तापहरत्वेनेन्दोः साम्यम्। इन्दुर्यथार्कतप्तं जगत्स्वांशुभिः शीतलयति तथा त्वमपि स्ववीक्षणेन मन्नेत्रमिति भावः॥ २५॥

3. GB ०श्रीकृष्ण०. 4. GB omits कारुण्य. 6. GB omits अथवा. 7. GB ०विशेषण० for ०विशेष्य०. 8. GB योज्यं for विशेषणं कर्तव्यं. 10. CB, CD insert कारुण्येति after प्रार्थयते. 11. CC ०पूर्णावलोकेन. 12. CB लोचनमपि दैन्योक्तिः. CD विलोचनं for लोचनं. 12-13. CB, CD कीदृशे for तल्लालसामेव व्यनक्ति. CA लालसां for तल्लालसामेव. 13. CB omits कैशोरं. CB, CC वैभवः. CB omits संपद् and inserts तेन after यत्र. CD ०वैभवेन संपद्रूपेन for वैभवं स्मितादिसंपद्यत्र. 14. CD तथा तव for अतएव. CD पुष्णता for आपुष्णता. CC सम्यक् स्थूलीकुर्वता for पोषयता. CB अत्र श्रीकृष्णस्य for तापहरत्वेन; CD inserts these words after तापहरत्वेन. CA साम्यता, CC साम्यतया for साम्यं. 15-16. For all words from इन्दुर्यथार्कतप्तं to इति भावः, CB, CD read : यथार्कसंतप्तं भुवनं स्वांशुसमूहेनेन्दुः शीतलीकरोति तथायमपि (CD omits अयमपि) स्ववीक्षणेन मल्लोचनमिति भावः (CB omits भावः).

सारङ्गरङ्गदा

अथात्युत्कण्ठया श्रीकृष्णमेव पृथक् पृथक् प्रार्थयमानानां वचोऽनुवदन्नाह—हे कृष्णचन्द्र कारुण्येन कर्बुरं चित्रं यत्कटाक्षनिरीक्षणं तेन मे लोचनं शिशिरीकुरु। करुणरसस्य चित्रवर्णत्वात्कर्बुरत्वम्। कीदृशेन—तारुण्यसंवलितं शैशवं कैशोरं तस्य वैभवेन संपद्रूपेण। तथा, भुवनमप्यापुष्णता सम्यक् स्थूलीकुर्वता। तथा, अद्भुतो विभ्रमो विलासो यस्य तेन। कृष्णस्य चन्द्ररूपकत्वेन स्वलोचनयोर्विरहार्कप्रतप्तकुमुदत्वं ध्वनितम्। यद्वा, निरीक्षणेन वैभवेन विभ्रमेण च मे लोचनं तथा कुरु। आपुष्णतेति त्रयाणां विशेषणम्। चन्द्रोऽपि तथा करोतीति रूपकम्॥ स्वान्तर्दशायां तु—प्रेयसीप्रेरणरूपं तन्निरीक्षणम्। अन्यत्समम्॥ बाह्ये स्पष्टम्॥२५

कदा वा कालिन्दीकुवलयदलश्यामतरलाः
कटाक्षा लक्ष्यन्ते किमपि करुणावीचिनिचिताः।
कदा वा कन्दर्पप्रतिभटजटाचन्द्रशिशिराः
कमप्यन्तस्तोषं दधति मुरलीकेलिनिनदाः॥२६

कृष्णवल्लभा

अथ श्रीकृष्णचरणसरोजमकरन्दानन्दानन्दितान्तःकरणस्तद्विच्छेदं प्राणविच्छेदमिव मन्वानो महातीव्रभावभावनागृहीतचेतास्तत्केलिविशेषदर्शनजसंतोषविशेषाभिलाषमभिलषति—कदा वेति। पुरोवर्तिनस्तस्य कटाक्षाः। कटन्ति विविधरसान्वर्षन्त्यक्षीनि दृष्टयो येषु ते। कटे वर्षावरणयोः (धा० १. ३१५) इति धातुः।

2. KC, KD तथा for अथ. KA does not repeat पृथक्. 3. KB inserts श्री- before कृष्णचन्द्र. KB inserts मम after मे. 4. KB, KD तारुण्येन संवलितं. KP शैशवकैशोरं. 6. KP अद्भुतविभ्रमो. KP श्रीकृष्णस्य for कृष्णस्य. 9. KC ०प्रेरणारूपतन्निरीक्षणेन. 10. KP inserts तु after बाह्ये. 11. PS and Kṛṣṇadāsa (v.l. as in text) श्यामलतराः. 14. PS ददति for दधति. 16. GC ०मकरन्दानन्दितान्तः०. 18. GC ०विशेषं for ०विशेषाभिलाषं. GB कदेति for कदा वेति.

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् (पा० ५. ४. ११३) इति सूत्रेण षच्। कदा वा लक्ष्यन्ते। लक्षिष्यन्त इत्यर्थः। कीदृशाः कटाक्षाः—कालिन्दीकुवलयदलश्यामतरलाः। कालिन्दीस्थकुवलयदलानीव श्यामाश्च ते तरलाश्च। श्रीविग्रहस्य कृष्णिम्ना कालिन्दीकुवलयेति कालिन्दीशब्दोपादानम्। तस्याः स्रोतोजलत्वेन कुवलयचापल्यं च। तेन श्रीविग्रहस्य कालिन्दीरूपता तत्स्थकुवलयस्य कटाक्षरूपतेति ध्वनितम्। पुनः कीदृशाः—किमपि करुणावीचिनिचिताः। किमप्यनिर्वचनीयं यथा स्यात्तथा करुणावीचिरधिकाधिकता तया निचिता व्याप्ताः। कुवलयदलान्यपि वीचिभिस्तरलानि भवन्ति। दर्शनानन्तरं मुरल्या नामग्राहमाहूय परिहासं करोतीति तदनुभवेन तथैव चाभिलषति। तदाह—कदा वेति। शब्दद्वयं द्वयोः प्राधान्यार्थम्। कदा वा मुरलीकेलिनिनदा मुरलीसंबन्धिनः केलिनिनदाः क्रीडार्थं ध्वनयः कमप्यनिरूप्यमन्तस्तोषमन्तःकरणसंतोषम्। अन्तरन्तरात्मनि यस्तोषस्तं वा। अस्मादन्यः सर्वोऽपि संतोषो बाह्य इति। दधति धास्यन्ति। अविच्छिन्नसंतोषधारां कुर्युरित्यर्थः। कीदृशा निनदाः—कन्दर्पप्रतिभटजटाचन्द्रशिशिराः। कन्दर्पप्रतिभटः श्रीरुद्रस्तस्य जटावर्ती यश्चन्द्रः स हि तुहिनगिरिनिस्यन्दि मन्दाकिनीनिर्झराप्लुतोऽतिशीतलः। ततोऽपि शिशिराः। महादुरन्तसंतापनिर्वापका इत्यर्थः। हरशिरश्चन्द्रस्य गङ्गासङ्गादतिशीतलत्वं कलामात्रप्रसिद्धत्वान्निनादस्य सूक्ष्मत्वं चोक्तम्। नादः पञ्चधा—

अतिसूक्ष्मश्च सूक्ष्मश्च पुष्टोऽपुष्टोऽथ कृत्रिमः

(संगीतरत्नाकर १.३.५) इति। तेन कन्दर्पदमनत्वशीतलत्वसूक्ष्मत्वानि व्यङ्ग्यानि ॥

1. GB omits all words from बहुव्रीहौ to षच्. 2-3. GB कालिन्दीति for the phrase कालिन्दीकुवलय etc. 3-5. GC omits all words from दलानीव (in कुवलयदलानीव) to चापल्यं. 5. GB तत्स्थकुवलयानां. 6. GB omits कीदृशाः; and reads किमिति for किमपि करुणावीचिनिचिताः. 7. GB omits स्यात्. 8. GB वीचितरलानि. 9. GB अभिलषन्नाह for चाभिलषति तदाह. 10. GB omits मुरलीकेलिनिनदाः. 11. GB अनिरूप्या०. 12. GB अस्मदादेव (?), GC अस्मादेव. GB inserts अभ्यन्तरः after बाह्यः. 13. GB किंभूताः for कीदृशाः. GB कन्दर्पेति for the phrase कन्दर्पप्रतिभट etc. 14. GB शिवः for श्रीरुद्रः. GB तु हिम० for तुहिन०. 15. GB ०ताप० for ०संताप०. 17. GA omits नादः पञ्चधा. 19. GB व्यञ्जितानि for व्यङ्ग्यानि.

शिखरिणी छन्दः—

रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी (छन्दोमञ्जरी २) ॥२६

सुबोधनी

एवं वर्णयन्मुरलीनादकटाक्षयोरतिशैत्यस्फूर्त्या पुनरुत्कण्ठया तथैव प्रार्थयते—ते कटाक्षाः कदा वा लक्षिष्यन्ते। कीदृशाः—कालिन्दीकुवलयदलतोऽपि श्यामाश्च चञ्चलाश्च। कालिन्दीकुवलयेत्यनेनातीव नीलत्वं स्निग्धत्वं तापहारित्वं च व्यञ्जितम्। तदुपपादयन्नाह—किमप्यसाधारणी या करुणा तस्या वीचिभिः खचिताः। तादृग्भाग्यं चेन्नास्ति तदा दूरतोऽपि मुरल्याः केलौ ये निनदाः प्रागुक्तास्ते कदा वा कमप्यन्तस्तोषं दधति धास्यन्ति। तेषां तापशमकत्वं व्यनक्ति—कन्दर्पस्य प्रतियोद्धुः शिवस्य जटास्थितचन्द्रतोऽप्यतिशीतलाः। जटास्थितगङ्गासंबन्धेन सहजशीतलस्येन्दोरतिशैत्यम् ॥२६

सारङ्गरङ्गदा

पुनर्मुह्यन्तीनां मा खेदं गच्छताधुनैव मुरलीं वादयन्कृष्णः कटाक्षावलोकेन वः प्रीणयिष्यतीत्याश्वासयन्तीः सखीः प्रति सोत्कण्ठप्रभप्रलापाननुवदन्नाह—ते कटाक्षाः कदा वा लक्ष्यन्ते लक्षिष्यन्ते। तत्कथयेति शेषः। इत्युत्कण्ठोक्तिः। किं वा (विदग्धमाधव ३. १३)—

नालीकिनीं निशि घनोत्कलिकामशङ्कं
क्षिप्त्वा वृतीरतनुवन्यगजः क्षुणत्ति।

4. CA उत्कलया, CB, CD अत्युत्कण्ठया for उत्कण्ठया. 5. CB, CD omit ते कटाक्षाः कदा वा and read instead : कदा वेति। कदा वा कटाक्षा लक्ष्यन्ते. CC omits वा. CD omits, CB reads कीदृशः for कीदृशाः. 6. CB, CD तरलाः for चञ्चलाः. 7. CB, CD insert एव after तत CB, CD अनिर्वचनीया for असाधारणी. CD omits या. CB, CD सैव वीचिस्तया for तस्या वीचिभिः. 9. CA omits वा. 9-10. CB, CD तापशमनपूर्वकतोषजनकशैत्यमाह for तापशमकत्वं व्यनक्ति. 11. CB, CD इन्दोः शैत्यम् for सहजशीतलस्येन्दोरतिशैत्यम्, after which CB, CD continue : अतिशैत्यम् (CD omits this) कन्दर्पप्रतिभटेत्यनेन कामोपशमकत्वं च सूचितम्. 13. KP श्रीकृष्णः for कृष्णः. KC, KP ०वलोकनेन.

अत्रानुरागिणि चिरादुदितेऽपि भानौ
हा हन्त किं सखि सुखं भविता वराक्याः ॥

इतिवत्। इदानीं म्रियामहे, कदा वा ते कटाक्षा लक्षिष्यन्ते, ते वा कदा तोषं धास्यन्तीति नैराश्योक्तिः। कीदृशः—कालिन्दीकुवलयानां दलतोऽपि श्यामलतरा अतिश्यामाः। श्यामतरला इति पाठे—ततोऽपि श्यामास्तरलाश्च। अत्र कुवलय-शब्देन श्यामल-शब्द-साहचर्यान्नीलोत्पलमेवोच्यते। किमप्यनिर्वचनीया याः करुणावीचयस्ताभिर्निचिताः खचिताः। तथा भाग्यं नास्ति चेत्तदा दूरतोऽपि ते मुरल्याः केलिनिनदाः कमप्यन्तस्तोषं कदा वा दधति धास्यन्ति। तेषां वियोगज-कामाग्निदाहनाशकातिशैत्यमाह—कन्दर्पप्रतिभटस्य रुद्रस्य जटास्थितचन्द्रतोऽप्यतिशिशिराः। जटारण्यच्छायाशीतलगङ्गाजलप्लावितत्वाच्चन्द्रस्यातिशैत्यमुक्तम्। तथा कन्दर्पप्रतिभट-शब्देन कामापयानं च सूचितम्॥ स्वान्तर्दशायाम्—प्रेयसी-प्रेरणकटाक्षवेणुनादा ज्ञेयाः॥ बाह्यार्थः स्पष्टः॥ २६

अधीरमालोकितमार्द्रजल्पितं
गतं च गम्भीरविलासमन्थरम्।
अमन्दमालिङ्गितमाकुलोन्मद-
स्मितं च ते नाथ विदन्ति गोपिकाः॥२७

कृष्णावल्लभा

अथ श्रीकृष्णदर्शनानुभवविशेषं सर्वातिशायिनं जानन्नात्मनः परममहालालसां सूचयति—अधीरमिति। हे नाथ प्रभो। गोप्य एव गोपिकाः। अनुकम्पायां

1. KB, KP तत्र for अत्र. 3. KB omits ते after the first वा. KC, KP omit कटाक्षाः. KD तेन for the second ते. KC omits कदा before तोषं. 4. KP कीदृशाः for कीदृशः. 5. KP अतिश्यामलाः for अतिश्यामाः. 10. KA, KP ०शीत० for शीतल०. 11. KP inserts जटा after प्रतिभट. KD omits च. 11. KC inserts रूप after प्रेरण. KA वेणुवादाः. 16. Kṛṣṇadāsa (v. l. as in text) and KP वदन्ति for विदन्ति. PS notes: अयं श्लोकः प्रक्षिप्त इव भाति. 19. GB omits अनुकम्पायां कन्.

कन्। ता एव विदन्त्यनुभवन्ति। आस्वादयन्तीति यावत्। तत्किम्—ते तवाधीरं चञ्चलं प्रतिक्षणमन्यतरदालोकितमालोकनम्।

सहसा दर्शनं यत्तदालोकितमुदीरितम्

इति संगीतरत्नाकरे (७.४६१)। यद्वा, न धीराः स्थिरा येन तत्। धियोऽभावोऽधीर्मोहस्तं राति ददातीत्यधीरमिति वा। आर्द्रं सरसं जल्पितं यत्र तत्। न केवलमालोकितमेवाधीरम्, गतं च क्षणमितः क्षणमन्यतः क्षणमितस्ततश्चेत्येवंरूपम्। गम्भीरैर्गूढाभिप्रायैर्विलासैर्मन्थरं मथ्नाति सर्वेषां मनांसीति। यद्वा, गम्भीरवद्गम्भीरवेदिवन्मत्तगजेन्द्रवद्यो विलासस्तेन मन्थरम्। मन्दं मन्दमित्यर्थः। तथा चोक्तम्—

त्वङ्मांसरुधिरस्रावान्मांसस्य गलनादपि।
संज्ञां न लभते यस्तु विद्याद्गम्भीरवेदिनम्॥

न केवलं गतमधीरम्—अमन्दं गाढमालिङ्गनं च। कीदृशम्—आकुलोन्मदस्मितम्। आकुलयतीत्याकुलमुन्मदयत्युच्चैर्मदयति हर्षयतीत्येवंभूतमुन्मदं स्मितमीषद्धास्यं यस्मिंस्तत्॥ वंशस्थविलं छन्दः—

वदन्ति वंशस्थविलं जतौ जरौ (छन्दोमञ्जरी २)॥२७

सुबोधनी

स्वप्रार्थितमेतत्सर्वं तत्प्रियसखीजनानुगत्यधीनमिति विचिन्त्य तदेकवेद्यतयानुवर्णयन्नाह—हे नाथ ते धैर्यरहितमालोकितं गोपिका राधिकासख्य एव जानन्ति, न त्वन्याः। स्वसखीविषयकभावाभिव्यञ्जकतया तदेकगम्यमित्यर्थः। किं च,

1. GB तत् for ता एव. GB inserts तदाह after तत्कि. 4. GB omits यद्वा. 5. GB inserts इति after राति. 10. This verse is quoted anonymously in Hemacandra's Abhidhāna-cintāmaṇi 4. 288 (ed. Bhavnagar, Vīra Era 2441-46). 12. GB reads कीदृक् for कीदृशं and omits आकुलोन्मदस्मितं. 13. GB omits एवंभूतं. 17. CB omits all words from स्वप्रार्थितं to ०गत्यधीन but leaves blank space for them. 18. CB, CD insert अधीरमिति after आह. CB, CD transpose ते and धैर्यरहितं. CB, CD अवलोकनं for आलोकितं. CB, CD श्रीराधा० for राधिका०. 19. CB, CD ०गम्यत्वात् for ०गम्यं. CB, CD तथा for किं च.

तदर्थमार्द्रेण स्निग्धेन सह तव जल्पितमन्यापदेशेन कथनम्। अन्यदपि—गम्भीरोऽवगाहितुमशक्यो यो विलासोऽत्यावेशवैवश्यं तेन मन्थरं गमनं च। तथा, प्रियनर्मसखीषु गाढालिङ्गनम्। आकुलमुन्मदं यत्स्मितं तच्च। अत्यावेशेन चेतसो विकाशात्स्मितस्य व्याकुलतोन्मदत्वेनोक्तिः। एतज्जन्यसुखानां तदेकवेद्यत्वात्तत्प्रसादलभ्यमेवैतदिति तात्पर्यम् ॥२७

सारङ्गरङ्गदा

इतः परं श्रीराधाया उन्मादावस्थोत्थप्रलापानुवदनं यावत्कृष्णदर्शनम्। तत्र प्रथमं तस्याश्चित्रजल्पाख्यप्रलपितमनुवदन्नाह पञ्चभिः श्लोकैः। अथान्या व्रजदेव्यो

जयति तेऽधिकं जन्मना

(भा० १०. ३१. १) इत्यादिवत्तद्गुणगानालम्बना बभूवुः। श्रीराधा तु मूर्च्छन्ती सखीभिः श्रीकृष्णकण्ठमालां नासायां न्यस्य प्रबोधिता। तथा, अयि सरले शठस्यातिदुःखदां चिन्तां विहाय क्षणं सुखिनी भवेति सखीवचनात्तथा प्रयत्नं कुर्वती, ताभिर्वर्णिततद्गुणश्रवणविकला, एता वारयतेति सखीः प्रति कथयन्त्येव दिव्योन्मादोन्मत्ता पुरः स्थितं स्वकुचघुसृणाञ्चितमप्यन्यासंभुक्तं प्रिये तव मद्गुणगानश्रवणादागतोऽस्मि प्रसीदेत्यनुनयन्तमिव तं मत्वा सेर्ष्यौदासीन्यं स्वाभिज्ञत्वप्रकाशं यत्प्रललाप तदनुवदन्नाह—हे नाथेत्यौदासीन्येन। गोपिका एव। निन्दार्थे

1. CB तद्वत् for तदर्थं. CB, CD insert एव before आर्द्रेण. CB, CD omit तव, and अन्यापदेशेन कथनं. CC inserts तदपि after कथनं. CB, CD तथैव, CC अन्यच्च for अन्यदपि. 2. CD transposes मन्थरं and गमनं. 3. CA तथापि for तथा. CB, CD व्याकुलमुन्मत्तं for आकुलमुन्मदं. 4. CB, CD insert अति before विकाशात्. CB, CD स्मितस्यैवाकुलत्वोन्मद०. CB, CD एतान्येतज्जन्यसुखानि ता एव विदन्तीत्यतः for एतज्जन्यसुखानां. CB, CD ०वेद्यतया for ०वेद्यत्वात्. 5. CB, CD तात्पर्यार्थः for तात्पर्यम्. 7. KP श्रीकृष्ण० for कृष्ण०. 9. KC omits जन्मना. 10. KB तद्गुणालम्बना, KP तद्गुणगानावलम्बना. KC मूर्छिता for मूर्छन्ती. 11. KP inserts सह after सखीभिः. 12. KC, KP insert तस्य after शठस्य. 12-13. KC प्रयतन्ती for प्रयत्नं कुर्वती. 14. KC पुरः स्फुरन्तं for पुरः स्थितं. 14-15. KA अद्भुतगुणगान०, KD अद्भुतमद्गुणगान०, KP सद्गुणगान० for मद्गुणगान०.

क-प्रत्ययः। एता अविदग्धा एव। तेऽधीरं सर्वत्यागेनाश्रितायामपि कस्यांचित्स्थैर्यरहितम् आ ईषल्लोकितम। अधीरं मदिरनर्तनमिव मनोज्ञम्।

शरदुदाशये

(भा० १०. ३१. २) इत्यादिना वदन्ति गायन्ति। विदन्तीति पाठे—जानन्ति। तथा, धूर्तस्य ते जल्पितम् आ ईषदार्द्रम्। व्याधानामिव मुख एवार्द्रं यज्जल्पितं गम्भीरविलासेन पूतनावधवासनैधितस्त्रीवधेच्छास्वरूपेण मन्थरं स्थगितमपि स्निग्धगम्भीरनर्मसूचकशब्दार्थध्वनिरूपविलासेन मन्थरं वदन्ति

मधुरया गिरा

(भा० १०. ३१. ८) इत्यादिना गायन्ति। उक्तं च—

मुखं पद्मदलाकारं वाचः पीयूषशीतलाः।
हृदयं कर्तरीतुल्यं त्रिविधं धूर्तलक्षणम् ॥

इति। तथा, गतं गमनं रासात्कुञ्जतश्चालक्षितान्तर्धानाज्ज्ञातुमशक्या यो विलासस्तेन मन्थरमपि मत्तगजस्येव गम्भीरविलासमन्थरं

वर्ष्मधुर्यगतिः

(भा० १०.३५. १६) इत्यादिना गायन्ति। तथा, आलिङ्गितममन्दम्। न विद्यते मन्दं परदाहकं यस्मात्तादृशमप्यमन्दं गाढं पीनस्तनीगणसुखदं वदन्ति

आलिङ्गनस्थगितम्

(भा० १०. २१. १५) इत्यादिना गायन्ति। तथा, प्रेक्षकानाकुलयतीत्याकुलं तच्च तानेवोन्मदयति ग्लेपयतीत्युन्मदं च तादृशं यत्स्मितम्। कीदृशम्—अमन्दम्। न विद्यते मन्दं परदाहकं यस्मात्तादृशमप्यमन्दं सर्वसुखदं

निजजनस्मयध्वंसनस्मित

(भा० १०. ३१. ६) इत्यादिना गायन्ति। मदीधातोर्ग्लेपनार्थे (धा० १. ८४३) घटादित्वाद्वृद्ध्यभावः (पा० ६. ४. ९२)। किं वा सोल्लुण्ठमाह—एता एव तवा-

2. KP मदीय० for मदिर० 4. KP वदन्ती गायन्ती. KC omits गायन्ति. 5. KC मुखे: for मुख एव. KB omits यत्. 6. KB ०रूपेण for ०स्वरूपेण. 7. KC स्निग्धं गम्भीर०. 17. KA, KB, KD ०स्थगित. 19. KB उन्मादयति. All Mss (except KC) ग्लपयति. 22. KB ग्लपनार्थे. 23. KB सोल्लुण्ठनं. KC inserts गोप्यः after एताः.

लोकितादिकमधीरमधैर्यं वदन्ति। अहं तु मनोज्ञं वदामीति विपर्ययेण व्याख्येयम्। तत्र दिव्योन्मादलक्षणं यथोज्ज्वलनीलमणौ (स्थायिभावप्रकरण १४२-१६४)। पूर्वोक्तो यः प्रेम्णः परावस्थारूपो भावः स द्विविधो रूढोऽधिरूढश्च। अधिरूढोऽपि द्विधा मोदनो मादनश्च। मोदन एव विश्लेषदशायां मोहनो भवति।

एतस्य मोहनाख्यस्य गतिं कामप्युपेयुषः।
भ्रमाभा कापि वैचित्री दिव्योन्माद इतीर्यते ॥
उद्घूर्णा चित्रजल्पाद्यास्तद्भेदा बहवो मताः ॥

इति (तत्रैव १७४-७५)। तत्र चित्रजल्पः (तत्रैव १७८)—

प्रेष्ठस्य सुहृदालोके गूढरोषाभिजृम्भितः।
भूरिभावमयो जल्पश्चित्रजल्पः स उच्यते ॥

सुहृदालोक इति तस्य तदीयानां चोपलक्षणम्। स च दशाङ्गः। प्रजल्पपरिजल्पविजल्पोज्जल्पसंजल्पावजल्पाभिजल्पाजल्पप्रतिजल्पसुजल्पाः। एष श्रीदशमे भ्रमरगीतायां (भा० १०.४७.१२-२१) व्यक्त एव। तत्र श्लोक एवायं प्रजल्पः। तल्लक्षणम् (उज्ज्वल०, तत्रैव, १८२)—

असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया।
प्रियस्याकौशलोद्गारः स प्रजल्प इतीर्यते ॥

यथा (भा० १०.४७.१२; उज्ज्वल०, तत्रैव १८३)

मधुप

इत्यादि गोपिका एव वदन्ति। तथार्द्रजल्पितमित्याजल्पोऽपि। तल्लक्षणम्—

1. KA omits अधीरं. KC omits तु. 2. KA अत्र for तत्र. KB inserts श्रीमत् before उज्ज्वल०. 4. KD मादनः for मोदनः (before एव). 7. KC, KD, KP प्रकीर्तितः for इतीर्यते. 10. KA ०रोषो विजृम्भितः, KB रोषाविजृम्भितः. 11. KA ०मयोपेतः for ०मयो जल्पः. KA कथ्यते for उच्यते. KB इतीरितः, KD प्रकीर्तितः, KP उदाहृतः for स उच्यते. After उच्यते, KA inserts इति, KB inserts यस्तीव्रोत्कण्ठितान्तिमः (which appears to be a v. l. for चित्रजल्पः स उच्यते, see Ujjvala°). 13. KP omits अवजल्प. 14. KB अत्र for तत्र. 17. KC प्रजल्पः स तु कीर्तितः. KD omits, KB reads उदाहृतः for इतीर्यते. 20. KA विदन्ति for वदन्ति. KP इत्यादि जल्पो for इत्याजल्पो.

भङ्गयान्यसुखदप्रियजैह्म्योद्गार आजल्पः। यथा (भा० १०. ४७. १९; उज्ज्वल०, तत्रैव १९६-९७)—

वयममृतमिव

इत्यादि। एता एव नाहमिति स्ववैचक्षण्यव्यक्त्यागतं चेति परिजल्पश्च। तल्लक्षणम्—तन्निर्दयताशाठ्याद्युक्त्या स्वविचक्षणताव्यक्तिः परिजल्पः। यथा (भा० १०. ४७. १३; उज्ज्वल०, तत्रैव १८४-८५)—

सुमनसः

इत्यादि। अधीरमिति संजल्पः। तल्लक्षणम्—सोल्लुण्ठयाक्षेपमुद्रया तदकृतज्ञतोद्गारः संजल्पः। यथा (भा० १०. ४७. १६; उज्ज्वल०, तत्रैव १९०-१९१)—

स्वकृत इह विसृष्टा

इत्यादि। अमन्दमालिङ्गितमित्यवजल्पः। तल्लक्षणम्—सभयेर्ष्यया तत्काठिन्यकामितोद्गारोऽवजल्पः। यथा (भा० १०. ४७. १७; उज्ज्वल०, तत्रैव १९२-९३)—

स्रियमकृत विरूपाम्

इत्यादि। आकुलोन्मदस्मितमित्युज्जल्पः। तल्लक्षणम्—सगर्वेर्ष्यया तत्कुहकताख्यानेन तदाक्षेप उज्जल्पः। यथा (भा० १०. ४७. १५; उज्ज्वल०, तत्रैव १८८-८९)—

कपटरुचिरहास

इत्यादि॥ स्वान्तर्दशायाम्—श्रीराधात्यागजरोषात्तथोक्तिः॥ बाह्ये—गोपिका एव मधुरत्वेन वर्णयितुं जानन्ति॥२७

1. KB, KC (in margin) ०सुखदत्वं च स आजल्प उदाहृतः (KC उदीरितः). KP भङ्गयान्यसुखदं प्रोक्तं जैम्भोक्तिराजल्पः for सुखदप्रियजैह्म्योद्गार आजल्पः. KD ०सुखदत्व० for ०सुखद०. KC ०हृद्यो० for ०जैह्म्यो०. KC also quotes in the margin (from उज्ज्वल०) anonymously: जैह्म्यं तस्यार्तिदत्वं च निर्वेदाद्यत्र कीर्तितम्. 3. KC omits इव. 4. KC इत्यादिना for इत्यादि. KA inserts अति before स्ववैचक्षण्य०. KB, KC, KP insert च before परिजल्पः. KP omits च after परिजल्पः. KA omits तत् before लक्षणं. 7. KP inserts इव after सुमनसः. 8. KA, KD, KP omit तत् before लक्षणं here, and also in lines 11, 14. 14. KA omits तत् before कुहकता.

अस्तोकस्मितभरमायतायताक्षं
निःशेषस्तनमृदितं व्रजाङ्गनाभिः ।
निःसीमस्तवकितनीलकान्तिधारं
दृश्यासं त्रिभुवनसुन्दरं महस्ते ॥ २८

कृष्णावल्लभा

संप्रति रासक्रीडायां रासरसोन्मत्ततया विचित्राभिर्व्रजसुन्दरीभिः प्रत्येकमुपकृष्णं मन्यमानाभिः प्रगाढतरमालिङ्ग्यमानं श्रीकृष्णं द्रष्टुमाशास्ते—अस्तोकेति । हे कृष्ण ते तव महः परमाश्चर्यज्योतिर्मयं परममहोत्सवमयं वा वपुरहं दृश्यासं द्रष्टुमाशासे । दृश्यासमित्याशिषि लिङि रूपम् । कीदृशं महः—अस्तोकस्मितभरम् । अस्तोकमनल्पं यत्स्मितं तस्य भरोऽतिशयो यत्र तत् । ईषदर्थे वा नञ् । अस्तोकमीषत्स्तोकमत्यल्पत्वेऽप्यतिशयो लक्ष्यते यत्र । अस्तोकस्मितेन बिभर्ति पुष्णातीति वा । पुनः कीदृशम्—आयतायताक्षम् । आयतायते आयतादप्यायते प्रीत्या विस्फारितेऽक्षिणी यत्र तत् । पुनः कीदृशम्—व्रजाङ्गनाभिर्निःशेषस्तनमृदितम् । व्रजसंबन्धिनीभिरङ्गनाभिः । प्रशस्तान्यङ्गान्यासां सन्तीति प्रशंसायां न-प्रत्ययः । निःशेषं यथा भवति तथा स्तनाभ्यां मृदितम् । पुनः कीदृशम्—निःसीमस्तवकितनीलकान्तिधारम् । निःसीमं यथा स्यात्तथा स्तवकिता । यथा यथा व्रजाङ्गनाभिः स्तनमृदितं भवति, तथा तथा स्तवकितनीलविस्तारं प्राप्ता नील-

6-7. GB omits विचित्राभिर्व्रजसुन्दरीभिः, and inserts गोपसुन्दरीभिः after मन्यमानाभिः. 7. GB गाढतरं. 8. GB omits अहं after वपुः. 9. GB omits दृश्यासमिति. 9-10. GB omits अस्तोकस्मितभरं. 11. GC omits ईषत्स्तोकं, and reads लक्षितो for लक्ष्यते. 12. GB omits कीदृशं, आयतायताक्षं and आयतायते. 13. GB omits कीदृशं and the phrase व्रजाङ्गना etc. 14. GB omits अङ्गनाभिः. GB inserts ताभिः after सन्तीति. 15-16. GB omits कीदृशं and the phrase निःसीमस्तवकित etc. 16. GB omits स्यात्. 17. GB ताभिः for व्रजाङ्गनाभिः. GB स्तवकिनी विस्तारं for स्तवकितनीलविस्तारं.

कान्तिर्नीलमणेः कान्तिर्वा तां धारयतीति तत्। अयं भावः—नीलिमकृष्णवपुषि शृङ्गाररसमयत्वादसाधारणचमत्कार एव कैशोरे। तत्रापि स्वानुरक्तव्रजविलासिनी-सहितरासक्रीडायां शृङ्गाररसस्यातिपरमोद्रेकान्नीलकान्तीनां परममहाचमत्कारोऽभवदिति। पुनः कीदृशम्—त्रिभुवनसुन्दरम्। त्रिभुवनेष्विदमेव रासरसाविष्टं श्रीकृष्णस्वरूपं सुन्दरम्। न हि त्रैलोक्यवर्तिना केनापि व्रजवासिपर्यन्तेनेदृश-सौन्दर्यवान् कृष्णो दृष्ट इत्यर्थः। त्रिभुवनं सुन्दरं येन वा॥ प्रहर्षिणी छन्दः—

त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम् (छन्दोमञ्जरी २)॥२८

सुबोधनी

पुनः शय्योत्थितश्रीकृष्णस्फूर्त्या तद्दर्शनमाशास्ते—ते महस्तव कान्तिपूरं दृश्यासम्। कीदृशम्—अनल्पस्मितस्यातिशयो यत्र। तत्र हेतुः—आयते सहज-दीर्घे प्रियास्मेरास्येक्षणायात्यायते नेत्रे यत्र। तत्स्मितमपि कथम्—व्रजाङ्गनाभि-स्तत्सखीभिः संपूर्णस्तनैर्मृदितं गाढालिङ्गितम्। स्वप्रेरितप्रियसुखशंसि तदाश्लेषा-लोकोल्लासात्स्मितमिदम्। अतएव निःसीममवधिशून्यं यथा स्यात्तथा तत्स्तनचिह्न-स्तवकैर्व्याप्ता नीलकान्तिधारा यत्र। पुनः—तत्स्मरणादिना त्रिभुवनं सुन्दरं यस्मात्॥ २८

1. GB श्री- for नीलिम-. 2. GB ०व्रजाङ्गना० for ०व्रजविलासिनी०. 4. GB भवति for अभवदिति. GB omits कीदृशं and त्रिभुवनसुन्दरं. 5. GB ईदृक० for ईदृश०. 6. GB omits कृष्णः. 7. रगाः प्रहर्षिणीयं lost in GA. 9. CB, CD अथ (CD omits) प्राग्वर्णित- for पुनः. CB, CD प्रार्थयते for आशास्ते, after which it inserts अस्तोकेति. 10. CB, CD स्मितातिशयो for स्मितस्यातिशयो. CD inserts तत् after यत्र (also in l. 11). CD अत्र for तत्र. 11. CB, CD omit all words from प्रिया० to नेत्रे and read instead: प्रियालोकनाया-त्यायतेऽक्षिणी. CB पुनः कीदृशं, CD अतएव for तत्स्मितमपि कथं. 12. CB, CD omit तत्सखीभिः. CB, CD निःशेषेण for संपूर्ण-. CB, CD गाढं for गाढा-. 12-13. CB, CD omit all words from स्वप्रेरित० to स्मितमिदं and read instead: बहुवचनं तत्सख्याभिप्रायेण. 13. CD reads निःसीम and omits अवधिशून्यं. 13-14. CB, CD स्तवकैः स्तनकुङ्कुमादिमुद्राभिः for तत्स्तनचिह्नस्तवकैः. 14. CC तेन for पुनः. 14-15. CB, CD omit all words from पुनः to यस्मात् and read instead: अतः (CD तेन) त्रिभुवनसुन्दरं त्रैलोक्यसौन्दर्यास्पदम्.

सारङ्गरङ्गदा

अथ क्षणात्तं तत्रापश्यन्त्यवधीरणया गतमिव मत्वा जातपश्चात्तापा सोत्कण्ठं चतुःश्लोकीमाह। सैव सुजल्पः। तल्लक्षणम् (उज्ज्वल०, स्थायिभावप्रकरण २००)—

यत्रार्जवात्सगाम्भीर्यं सदैन्यं सहचापलम्।
सोत्कण्ठं च हरिः पृष्टः स सुजल्प इति स्मृतः॥

यथा (भा० १०. ४७. २१; उज्ज्वल०, तत्रैव २०१)—

अपि बत

इत्यादि। तत्र यथा चतुर्षु पादेषु गाम्भीर्याद्याश्चत्वारो भावा व्यक्तास्तथात्र चतुर्षु श्लोकेषु। तत्र प्रथमं दर्शनोत्कण्ठया

अपि बत

इति प्रथमपादवत्सगाम्भीर्यं तत्प्रलपनमनुवदन्नाह—ते तव महः सौन्दर्यपूरमप्यहं दृश्यासम्। यथा तत्र मथुरास्थित्या कदाचिदागमनमपि संभवेत्तथात्रापि तत्कान्तिदर्शने जाते तद्दर्शनमपि संभवेदिति गाम्भीर्यम्। कीदृशम्—निःसीमं सौन्दर्यादिनावधिशून्यम्। मां त्यक्त्वान्यत्र गमनान्निर्मर्यादमपि। अतोऽन्यासङ्गलग्नचन्दनकुङ्कुमयावकादिना स्तवकिता नीलकान्तिधारैव लता यस्मिन्। अन्यासङ्गगोपनेन मत्प्रतारणायास्तोकोऽनल्पः स्मितभरो यस्मिन्। तथा, तेनैव हेतुनायतायतेऽत्यायतेऽक्षिणी यत्र। नन्वन्याङ्गनासंभुक्तं मामवधीर्य पुनः किमिति दिदृक्षस इति मनस्युट्टङ्क्य सदैन्यमाह—निःशेषैः स्तनैः सर्वाभिर्व्रजाङ्गनाभिरपि, किमुतैकया, मृदितमपि। मम सुखदमित्यर्थः। सर्वत्र हेतुः—त्रिभ्विति। त्रिभुवनमेव सुन्दरं यस्मात्॥ स्वान्तर्दशायाम्—प्रेयसीप्रेरणाय स्मितायताक्षादिविशिष्टं तदित्यर्थः॥ बाह्यार्थः स्पष्ट एव॥ २८

2. KP सोत्कण्ठः. 4. KP तत्र for यत्र. 5. KB reads निगद्यते for इति स्मृतः and inserts इति after it. 9. KC, KP तद्दर्शनो० for दर्शन०. 11. KC, KP कान्ति० for सौन्दर्य०. 13. KP निःसीम. 15. KA (before correction), KB ०संलग्न० for सङ्गलग्न०. 16. KC, KP मत्प्रतारणया. KP अल्पः for अनल्पः. 19. KC, KP insert सत् before the second अपि. KB त्रिभुवनं, KP त्रिषु for त्रिभ्व.

मयि प्रसादं मधुरैः कटाक्षै-
र्वंशीनिनादानुचरैर्विधेहि ।
त्वयि प्रसन्ने किमिहापरैर्न-
स्त्वय्यप्रसन्ने किमिहापरैर्नः ॥२६

कृष्णवल्लभा

इदानीं स्वाभीष्टपदवीलाभाय श्रीकृष्णं प्रार्थयते—मयीति। हे व्रजनाथ मधुरैर्मधुररसमयैः। यद्वा, मधूनि मादकानीतररसविस्मारकानि प्रेमरसरूपाणि रान्ति ददतीति तादृशैः कटाक्षैस्तारकागतागतविश्रान्तिसहितविचित्रवर्तनापूर्वक-नयनभङ्गीभिः प्रसादं प्रसन्नतां विधेहि कुरु। कीदृशैः कटाक्षैः—वंशीनिनादानु-चरैः। वंशीनिनादा अनुचरन्ति येषु तैः। वंशीनिनादाननुचरन्तीति वा। अत्र किं ब्रूमः—त्वयि प्रसन्ने एवं प्रसादं कृतवति सतीहेदृशेऽतिदुर्लभेऽप्युद्देश्य-वस्तुनि तत्प्राप्तावपरैः साधनैः किम्। त्वत्प्रसादमात्रेण स्यादित्यर्थः। त्वय्य-प्रसन्ने एतादृशप्रसादमकुर्वति। त्वं चेन्न प्रसीदसीत्यर्थः। अपरैः साधनैः किम्। फलानिष्पत्तेः। विघ्नसहस्रसंभवादिति भावः। अस्मज्जीवनसर्वस्वभूतत्वन्नाम-श्रवणमात्रमेव परम्, यदि पुनस्त्वं वंशीनादानुचरकटाक्षामृतेनास्मान्सिञ्चसि तदा किं वक्तव्यमिति महानुत्कर्षचमत्कारः॥ उपेन्द्रवज्रा छन्दः॥ २६

सुबोधनी

ततस्तत्स्फूर्त्यानन्दावेशेन सगर्वमाह—हे नाथ मधुरैः कटाक्षैर्मयि प्रसादं

9-10. GB वंशीति for the phrase वंशीनिनादा etc. 10. GB तान् for वंशीनिनादान्. 11. GB प्रसादं कुर्वति for एवं प्रसादं कृतवति. GB omits ईदृशे. 13. GB अप्रसादं कुर्वति सति for एतादृशप्रसादमकुर्वति. GB omits त्वं चेन्न प्रसीदसीत्यर्थः. 14. GB inserts च after ०संभवात्. 16. GA उपेन्द्र for उपेन्द्रवज्रा. The metre is उपजाति and not उपेन्द्रवज्रा. 18. CB, CD ०स्फुरणोद्भूता० for स्फूर्त्या. CB, CD insert मयीति after आह.

कुरु। तन्माधुर्यमेव व्यनक्ति—वंशीनिनादं पुनः केलौ प्रियाप्रेरणरूपमनुचरन्ति ये तैः। तेन किं स्यात्—त्वयि प्रसन्नेऽपरैरप्रसन्नैरस्माकं किं स्यात्। न किमपि। तय्यप्रसन्नेऽपरैः प्रसन्नैर्वा किम् ॥२९

सारङ्गरङ्गदा

अथ पूर्वकृतकुञ्जप्रेरणस्मृत्या जातातिलालसत्वात्क्रममप्युल्लङ्घ्य

भुजमगुरुसुगन्धम्

(भा० १०.४७.२१) इतिवत्सोत्कण्ठं प्रलपन्त्या वचोऽनुवदन्नाह—हे प्राणनाथ कुञ्जप्रेरणरूपैः कटाक्षैर्मयि प्रसादं विधेहि। आगत्य तथा तैः पुनः प्रेरयेत्यर्थः। कीदृशैः—संकेतरूपं वंशीनिनादमनुचरन्तीति तथा तैः। तथा, मधुरैराह्लादकैः। ननु पुनः सर्वासां मध्ये तथा कृते,

तस्या अमूनि नः क्षोभम्

(भा० १०.३०.३०) इत्यादिवत्,

कामिन्याः कामिना

(भा० १०.३०.३३) इत्यादिवच्च तास्त्वां मां च प्रति क्रुध्येयुः, तत्सखीभिरेवात्मानं सुखय, अलमनया प्रार्थनयेत्याशङ्क्य सगर्वदैन्यमाह—त्वयीति। त्वयि प्रसन्ने तथा कृते, निकटागते वा, इह देशे काले वापरैरन्यैर्गोपीसहस्रैरपि किमस्माकम्। न किमपीत्यर्थः। तथा, तय्यप्रसन्ने इहैतद्दशायां दर्शनमप्यदत्तवति, अपरै-

1-2. CB, CD omit all words from तन्माधुर्यमेव to ये तैः and read instead : मधुरतामेवाह—वंशीनिनादमनुचरन्ति तेन सह हृदयं विशन्तीति तैः (CB omits तैः). CA omits एव, and reads व्यञ्जयति for व्यनक्ति. CC drops all words after वंशी (in वंशीनिनादं) up to किमपि. 2. CB, CD insert अत आह after the first स्यात्. CB, CD insert सतीह त्रिलोक्यां after प्रसन्ने, and नो before अस्माकं. CB, CD वा भवेत् for स्यात्. 3. CB, CD insert इत्यर्थः after किमपि. CB, CD insert इह before अपरैः. CB, CD insert इति तां (CD omits) तथा after किम्. 5. KB पूर्ववत् for पूर्व-. KC, KP जाताभि० for जातालि०. KA ०अभिलाषत्वात् for ०अतिलालसत्वात्. 8. KB inserts सह after तैः. 14. KB omits प्रति.

निर्जैरपि सखीकुलैः किम् । ता अप्यतिदुःखदा इत्यर्थः । तदुक्तं श्रीजयदेवैः (गीतगोविन्द ७. ४०)—

रिपुरिव सखीसंवासोऽयम्

इति,

प्रियसखीमालापि ज्वालायते

(४. १०) इति च ॥ स्वान्तर्दशायाम्—आगत्य पुनस्तत्प्रेरणमेव मे प्रसादः । नन्वन्यास्त्वय्येतत्प्रार्थनया क्रुध्येयुः, तत्राह—त्वयि प्रसन्नेऽन्यैः किम् । त्वय्यप्रसन्ने एतन्निकटमप्यनागते निजैरपि प्रियसखीप्रभृतिभिः किम् । ता अपि दुःखदा एव । समस्नेहसखीनां स्वभावोऽयं यत्कृष्णरहितसखीदर्शने दुःखं स्यात् । यथोज्ज्वलनीलमणौ (सखीप्रकरण १२८)—

विना कृष्णं राधा व्यथयति समन्तान्मम मनो
विना राधां कृष्णोऽप्यहह सखी मां विक्लवयति ।
जनिः सा मे मा भूत्क्षणमपि न यत्र क्षणदुहौ
युगेनाक्ष्णोर्लिह्यां युगपदनयोर्वक्त्रशशिनौ ॥

इति ॥ बाह्ये—स्पष्ट एवार्थः ॥ २९

निबद्धमूर्धाञ्जलिरेष याचे
नीरन्ध्रदैन्योन्नतिमुक्तकण्ठम् ।
दयाम्बुधे देव भवत्कटाक्ष-
दाक्षिण्यलेशेन सकृन्निषिञ्च ॥३०

कृष्णवल्लभा

परमदुर्लभरससारश्रृङ्गाररससर्वस्वाविष्टचेतास्तत्प्रसादमेव प्रार्थयते—निबद्धेति ।

1. KP निजजनैः for निजैः. KD एताः for ताः. KP omits श्री- before जयदेवैः. 6. KA omits च and मे. 7. KP omits त्वय्येतत्. KA, KB तैः for अन्यैः. 8. KA तन्निकट० for एतन्निकट०. 8. KC, KP तेऽपि for ता अपि. KD अति- for अपि. 15. KB बाह्यार्थः स्पष्ट एव. KP inserts तु before स्पष्टः. 16. PS मुग्धाञ्जलि०. 17 PS ०दैन्योन्नतमुग्धकण्ठं. 18. Kṛṣṇadāsa दयानिधे.

हे दयाम्बुधे दयानामम्बुधयो यस्मात् कृपापारावार। यद्वा, दया दानं तस्या अम्बुधे समुद्र। समस्तपुरुषार्थप्रदेत्यर्थः। उक्तं हि द्वितीयस्कन्धे (२. ३. १०)—

अकामः सर्वकामो वा मोक्षकाम उदारधीः।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम्॥

इति। हे देव निरन्तरक्रीडारसमग्न, एषोऽहं दुरन्तप्रत्याशाविवशः। निबद्धमूर्धाञ्जलिर्निबद्धो मूर्धन्यञ्जलिर्येन तथाविधः सन्। यद्वा, निबद्धो मूर्धनि समस्तपुरुषार्थेभ्यः साधनानुष्ठानेभ्यश्चाञ्जलिर्येन तादृशः सन्। मूर्धनिबद्ध इति वक्तव्ये मूर्धातिनम्रत्वख्यापनायान्यथाकथनम्। नीरन्ध्रं निरन्तरं यद्दैन्यं तस्य योन्नतिस्तया मुक्तकण्ठं यथा भवति तथा। यद्वा, नीरन्ध्र-शब्देन लक्षणया कीचकवेणुरुच्यते। स यथानिलसंयोगात्कदाचिद्दैन्योन्नतिस्वरयुक्तो भवति, तद्वन्मुक्तः कण्ठो यस्मिन्कर्मणि तद्यथा स्यात्तथा। याचे प्रार्थयामि। किं तदाह—भवत्कटाक्षदाक्षिण्यलेशेन। भवन्स्वभावत एवाविर्भवन्कृपाकटाक्षो यस्त्वदीयस्तस्य यद्दाक्षिण्यमौदार्यं तस्य लेशेन सकृदेकवारं निषिञ्च। भवत्कटाक्षेत्यस्य तव कटाक्षेति वा। परमोत्कृष्टं प्रेम स्वविषयं देहीत्यर्थः॥ उपेन्द्रवज्रा छन्दः॥ ३०

सुबोधनी

पुनरतिदैन्यादार्तः प्रार्थयते—हे देव, एषोऽहं निबद्धो मूर्ध्न्यञ्जलिर्येन तादृशः सन्निरन्तरं यद्दैन्यं तस्य योन्नतिस्तया मुक्तकण्ठं यथा स्यात्तथा याचे। किं याचसे—हे दयासमुद्र तव कटाक्षस्य यद्दाक्षिण्यं प्रियानुनयप्रवृत्तिस्तस्य लेशेनापि सकृदपि नितरां सिञ्च। स्वायोग्यतामननाद्दैन्योक्तिरियम्॥ ३०

1. GB omits हे दयाम्बुधे. 2. GB तदुक्तं द्वितीये for उक्तं हि द्वितीयस्कन्धे. 5-6. GB omits निबद्धमूर्धाञ्जलिः. 6. GB सः for तथाविधः सन्. GB omits all words from मूर्धनिबद्धः to ०कथनम्. 9. GB omits भवति. 10-11. GB omits all words from मुक्तः कण्ठः to कर्मणि तत् and reads instead : मुक्तकण्ठं. 11. GB omits स्यात्. 13. GB भवतः कटाक्षः for भवत्कटाक्षेत्यस्य तव कटाक्ष. 16. CB, CD omit all words from अतिदैन्यात् to प्रार्थयते and read instead : स्फूर्त्यपगमेनार्तः सदैन्यमाह—निबद्धेति. 17. CB, CD निश्छिद्रं for निरन्तरं. 17-18. CD omits किं याचसे. 18. CB, CD भवत्- for तव. CB, CD औदार्यं for प्रियानुनयप्रवृत्तिः. 19. CB omits अपि after सकृत्. CC reads निरन्तरं for नितरां, and inserts किं च before स्वायोग्यता०. CB, CD दैन्येन for स्व-. CB, CD पुनरियं प्रार्थनेति ज्ञेयम् (CD प्रार्थयते) for दैन्योक्तिरियम्. CC omits इयम्.

सारङ्गरङ्गदा

अथ प्रगाढलालसयातिदैन्योदयात्

स्मरति स पितृगेहान्

(भा० १०. ४७. २१) इत्यादिवत्,

दास्यास्ते कृपणाया मे

(भा० १०. ३०. ३९) इत्यादिवच्च सदैन्यं प्रलपन्त्या वचोऽनुवदन्नाह—हे बह्वीभिः क्रीडारसिक, एषोऽहं निबद्धो मूर्धाञ्जलिर्येन तादृशस्तव दासीजनो नीरन्ध्रं निश्छिद्रं यद्दैन्यं तस्य योन्नतिस्तया मुक्तकण्ठं यथा स्यात्तथा याचे। किं याचसे—यदि ते रासक्रीडाविघ्नः स्यात्तर्हि तादृशकटाक्षप्रेरणादिकं दूरेऽस्तु, भवत्कटाक्षस्य यद्दाक्षिण्यमौदार्यं तस्य लेशेनापि सकृदपि निषिञ्च। तल्लेशेनापि दुःखाग्निनिर्वापको नितरां सेकः स्यादित्यर्थः। आगत्य सर्वाभिः सह रासं कुर्विति भावः। यद्यप्ययं जनोऽपराधी तथापि तवैतद्योग्यमित्याह—हे दयानिधे इति॥ स्वान्तर्दशायाम्— इमां मत्सखीं निषिञ्च। अन्यत्समम्॥ बाह्यार्थः स्पष्टः॥३०

पिच्छावतंसरचनोचितकेशपाशे
पीनस्तनीनयनपङ्कजपूजनीये।
चन्द्रारविन्दविजयोद्यतवक्त्रबिम्बे
चापल्यमेति नयनं तव शैशवे नः॥३१

कृष्णावल्लभा

अथाविर्भूतपरमरसमयदिव्यकिशोरमधुरिममहाचमत्कारधारानिधिश्रीकृष्ण-चापल्यमनुभूतमपि पुनरप्यनुभवितुमिच्छामीति प्रार्थयते—पिच्छेति। तव शैशवे तारुण्यमिश्रिते। तारुण्यस्य किंचिन्मात्राङ्कुरिततया शैशवबाहुल्या-

2. KB omits अथ and अति. KC गाढ० for प्रगाढ०. 6. KC inserts वा before इत्यादिवच्च. 7. KA तादृग्दासीजनो. 8. KC, KP insert तत् after किं. 11. KP वासं for रासं. 12. KC, KP तवैव तद्योग्य० for तवैतद्योग्य०. 14. PS पिञ्छा० for पिच्छा०.

त्तदेवोक्तम् । सौन्दर्यसौकुमार्यातिशयचापल्यरूपे नोऽस्माकं नयनम् । नीयन्ते विषया अनेनात्मानं प्रतीत्यन्तःकरणम् । नयनं वा। चापल्यं चपलतामेति गच्छति। पुनः पुनर्द्रष्टुमुत्कण्ठतरलं भवतीत्यर्थः। तदेव शैशवं सूचयितुं विशिनष्टि—पिच्छेति। पिच्छानामवतंसः शिरोभूषणं यत्र तादृशं यद्रचनं नानापुष्पादिभिश्चूडारूपेण विरचनं विविधप्रकारकल्पनारूपबन्धनविशेषस्तदुचितः केशपाशः केशकलापो यत्र। एतत्तारुण्य एव।

पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे

इत्यमरः (२.६.९८)। पुनर्विशिनष्टि—पीनस्तनीनयनपङ्कजपूजनीये। पीनस्तन्यो गोपकिशोर्यस्तासां नयनपङ्कजैः पूजनीये। समन्ततः स्थितानां व्रजसुन्दरीणां नेत्रपङ्कजप्रतिबिम्बिताङ्गचमकारत्वात्। पुनर्विशिनष्टि—चन्द्रारविन्दविजयोद्यतवक्त्रबिम्बे। अमृतचन्द्रिकाह्लादनरूपश्चन्द्रः। शीधुशैत्यसौरभसौकुमार्यरूपमरविन्दम्। तयोर्विजयायोद्यतं कृतोद्यमं वक्त्रबिम्बं मुखमण्डलं यस्य तस्मिन्। गोपीदृक्चकोरयूथैरतिपिपासितैः पेपीयमानाननचन्द्रिकामृतत्वात्क्रीडारसोल्लासस्मच्छलदृशदिग्व्यापिविमलगौरचन्द्रिकामहार्णवत्वाच्चन्द्रविजयः। सरसमधुरदृष्टिमाध्वीकमधुरच्छटाभिरुन्मादितसकलगोपीसमाजत्वात्प्रफुल्लारविन्दविजय इति॥ वसन्ततिलकं छन्दः॥३१

सुबोधनी

एतत्प्रार्थने त्वत्कैशोरचापल्यमेवास्मान्नियोजयतीति सपरिहासमाह—तव कैशोरे यच्चापल्यं तदुचितचेष्टितं तन्नो नयनमेति प्रविशति। कथं तच्चापल्यज्ञानम्—पिञ्छमयशिरोभूषणस्य रचनाया योग्यो रत्यावेशगलितः केशपाशो

3. GB उत्कण्ठतरं. GB omits सूचयितुं. 4. GC omits पिच्छेति. 8. GB omits विशिनष्टि and reads पीनेति for the phrase पीनस्तनी etc. 10-11. GB omits विशिनष्टि and reads चन्द्रेति for the phrase चन्द्रारविन्द etc. 11. GB omits शीधु. 18. CC ०प्रार्थनेन. CB, CD omit all words from एतत्प्रार्थने to आह and read instead : अथ श्रीराधिकासखीभिर्दृश्यमानस्य श्रीकृष्णस्य तदानीन्तनचापल्यस्फूर्त्याह—पिञ्छेति. CB, CD insert शैशवे after तव. 19. CD प्राप्नोति for प्रविशति. 19-20. CB, CD कीदृशे for कथं तच्चापाल्यज्ञानं. 20. CB, CD पिञ्छमयस्य for पिञ्छमय- and रचनाय for रचनायाः. CB अत्या० for रत्या०.

यत्र। अतएव पीनस्तनीभिः स्वसखीसंगमसूचकरत्यङ्कदर्शनानन्दिततया पूजनीये सानन्ददर्शनयोग्ये। तदङ्कमेव लक्षयति—लग्नकज्जलत्वेन कलङ्कितस्य चन्द्रस्य सभ्रमरस्यारविन्दस्य च विजये उद्यतम्, न तु विजयि तदनपगमात्, वक्त्रबिम्बं यत्र ॥३१

सारङ्गरङ्गदा

ननु धीराणां मानिनीनां मूर्धन्यासि, इदानीं मामवधीर्य किमिति दैन्यं कुरुषे, अन्यास्त्वामुपहसिष्यन्तीति तन्नर्म मनस्युट्टङ्क्य

कच्चिदपि स कथां नः

(भा० १०. ४७. २१) इतिवत्स्वचापलं नेत्रे संक्रमय्य प्रलपन्त्या वचोऽनुवदन्नाह—नोऽस्माकं सर्वासामेव नयनं तव शैशवे कैशोरे तत्संवन्धिवेशलीलादौ चापल्यमेति।

चर्मणि द्वीपिनं हन्ति

(काशिकावृत्ति १. ३. ३६) इतिवत्। तद्दृष्टुमित्यर्थः। अस्माभिः किं कर्तव्यमिति भावः। अथवा, वराकानां नेत्राणां को वा दोषो यदेतादृशमेतत्। कीदृशे—पिञ्छावतंसेन तन्मुकुटेन या रचना तस्यामुचितः केशपाशो यस्मिन्। तथा, चन्द्रारविन्दयोर्विजयेनोद्यतमुद्वृत्तं वक्त्रबिम्बं यस्मिन्। अतः पीनस्तनीनां युवतीनां ताभिर्वा नयनपङ्कजैः पूजनीये तद्योग्ये। अन्योऽपि विजयी बद्धमुकुटः

1. CB, CD ताभिः (CB omits) एव नयनपङ्कजैः for the phrase स्वसखीसंगम etc. 2-3. CB, CD omit all words from तदङ्कमेव to सभ्रमरस्य and read instead : स्वसखीसंगमसूचकचिह्नवेशोन्मुक्तकेशा(CD ०चिह्न-विशेषा)दिदर्शनं तासा(CD यासा)मानन्दजनकमेव। यतो जागरादीषन्मालिन्येन चन्द्रस्यार्धमुद्रितनेत्रतया. CC कज्जलाक्ततया for लग्नकज्जलत्वेन. CC कलङ्किचन्द्रस्य. 3. CB, CD omit न तु विजयि तदनपगमात्. 9. KC, KP insert सचापलं before प्रलपन्त्याः. 10. KC नयनपङ्कजं for नयनं. KA तत्तत्संबन्धि०. 14. KA omits वा, KB places वा after दोषः. KA, KB यतः, KD यतः for यत्. KP कीदृशोऽपि for कीदृशे. 16. KA (before correction), KD दृप्तं for उद्वृत्तं ; KD (after correction) उद्गतं.

क्षन्राण् नागरयुवतिभिर्नेत्राब्जैः पुष्पवृष्ट्या च पूज्यो भवति। अतो दर्शनं देहीति भावः ॥ स्वान्तर्दशायाम्—शैशवे श्रीराधया सह विलासोच्छलित-कैशोरे। पीनस्तनी राधा तन्नेत्रपङ्कजाभ्यां पूजार्हे ॥ बाह्यार्थः स्पष्टः ॥३१

त्वच्छैशवं त्रिभुवनाद्भुतमित्यवेहि
मच्चापलं च मम वा तव वाधिगम्यम्।
तत्किं करोमि विरलं मुरलीविलासि
मुग्धं मुखाम्बुजमुदीक्षितुमीक्षणाभ्याम् ॥ ३२

कृष्णावल्लभा

इदानीं श्रीगोविन्दमुखारविन्दविलोकनानन्दमनुभवितुमध्यवसायं कुर्वंस्तदेवाभिलषति—त्वच्छैशवमिति। त्वच्छैशवं तव चापल्यं त्रिभुवनाद्भुतं त्रिभुवनेष्वद्भुतम्। त्रिभुवनप्रकटस्वरूपेषु तादृशकैशोरमाधुरीचमत्काराभावात्। शास्त्रयुक्तिमहत्तमानुभवैर्मया निर्धारितत्वाच्च। यद्वा, कीदृशं शैशवम्—त्रिभु त्रिषु श्रीमथुरा-गोकुलवृन्दावनेषु भूः सत्ता यस्य तत्। अतएव वनानि वृन्दावनादीन्यद्भुतानि येन तत्। तत्तद्वनविहरणकौतुकात्। इत्यवेहि जानीहि। तत्किम्—मच्चापलं मच्चित्तस्य त्वद्दर्शनौत्कण्ठ्येनोत्तरलता। तन्मम वाधिगम्यं तव वा। न तृतीयस्य। श्रीकृष्णरसास्वादलोभान्ममैव तावती व्यग्रता, सा च त्वया सर्वज्ञेन मया च त्वदनुभवसंमिश्रणाज्ज्ञायत इत्यर्थः। तत्तस्मात्तव मुग्धं सुन्दरं मुखाम्बुजं मुरलीविलासि मुरल्या विलसितुं शीलं यस्य तत्। ईक्षणाभ्यां नेत्राभ्याम्। न तु मनसा. मनसा तु सर्वदैव वीक्ष्यते। उदीक्षितुमुदुच्चैरीक्षितुं द्रष्टुं विरलं

1. KC, KP नगर० for नागर०. 3. KB श्रीराधा for राधा. KB, KP insert एव after स्पष्टः. 4. PS अवैमि for अवेहि. 5. PS यच्चापलं च मम वागविवादगम्यं for the second Pāda. 6. PS विरागान् for विरलं and ०विलास- for ०विलासि. 10. GB त्वदिति for त्वच्छैशवमिति. 12. GB omits त्रिभु; GC reads त्रिभुवनेषु for it. 14. GB किं च for तत्किं. 15. GB transposes तव वा and अधिगम्यं. 19. GB omits उत् before उच्चैः.

विलम्बम्, किं करोमि। इदानीमेव महातीव्रतमस्वाभीष्टभावभावनावेशप्रवृत्तप्रगाढसमाधिना शरीरमेतद्विस्मृत्य प्रणयभरविस्फारिताभ्यां नेत्राभ्यां वीक्ष्य परममहानन्दसमुद्रे निमङ्क्ष्यामीति भावः। ईक्षणाभ्यामित्युक्तेस्त एवेक्षण इतरथा थिम्नायित इति। उक्तं च श्रीभागवतद्वितीयस्कन्धे (२. ३. २२)—

बर्हायिते ते नयने नराणां
लिङ्गानि विष्णोर्न निरीक्षतो ये।

इत्यादि ॥ वसन्ततिलकं छन्दः ॥३२

सुबोधनी

तत्कैशोरकृतप्रवेशस्यात्मचक्षुषस्तद्दर्शनौत्सुक्यं निवेदयंस्तत्स्फूर्त्युपायं प्रार्थयते—त्वच्छैशवं त्रिभुवनस्य विस्मापकमिति त्वमेव जानीहि। मच्चापलं च त्वद्दर्शनाभिलाषस्त्वद्विषयतया त्वच्छैशवकृततया तव, मत्कृततया कचिद्विवेकसमये मम वा, ज्ञातुं योग्यम्। अतो मुखाम्बुजमीक्षणाभ्यामुद्वीक्षितुं किं कमुपायं करोमि। यत्कृते तद्दृश्यं स्यात्तत्त्वमेवोपदिशेत्यर्थः। तत्र हेतुः—विरलमनन्यगोचरम्। कुतोऽनन्यगोचरम्—मुरलीविलासि। अतएव मुग्धं मनोहरम् ॥३२

3. GC निमग्न ईक्षामि for निमङ्क्ष्यामि. 4. GB तदुक्तं द्वितीये for all words from उक्तं to ०स्कन्धे. 7. GB इति for इत्यादि. 9. CB, CD omit all words from तत्कैशोर० to प्रार्थयते and read instead : अथ (CD omits अथ and reads आत्म for it ; blank space left in CB) नस्तद्दर्शनासंभवमननात्सदैन्यमाह—त्वदिति. CA ०पूर्ति- for ०स्फूर्ति. 10. CC त्रिभुवनविस्मापकं. CB, CD insert दुर्लभं च before विस्मापकं. CC omits च. CA तद्दर्शना०. 11. CD drops all words from लाष० to ०समये and reads (corrupt) नव्यतिरेक instead. CB त्वद्विषयकतया. CA तच्छैशव०. CB inserts वा after, CC च before तव. 13. CB तद्दृष्टं for तद्दृश्यं. CA, CC omit तत् after स्यात्. 13-14. CD omits all words from यत्कृते to मनोहरं. CB omits all words from विरलं to मनोहरं and reads instead : यतो मुरलीविलासि, अतो मुग्धं मनोहरम्, अतो विरलं दुलभं. CA reads the following gloss on the margin : विरलं क्वचित्क्वचिदेव भाग्यवद्भिरेवोपलभ्यमिति गोस्वामी.

सारङ्गरङ्गदा

अथ तस्या उद्घूर्णा दशा यावच्छ्रीकृष्णदर्शनम्। तत्रैवोद्वेगदशा चतुर्भिः। तत्र प्रथमम्। ननु भवतु नाम नेत्रचापल्यम्, काप्यन्यैतादृक् विकला न दृश्यते, त्वं साध्वीप्रवरासि तद्गम्भीरा भव, सख्योऽप्येवं त्वां बोधयन्तीति तस्य नर्मोपालम्भं मनस्युट्टङ्क्य तं प्रति सोद्वेगं प्रलपन्त्या वचोऽनुवदन्नाह—त्वच्छैशवं तव कैशोरं माधुर्यादिभिर्मादकत्वाकर्षकत्वादिभिश्च त्रिभुवनेऽद्भुतमवैहि जानीहि। स्मरेत्यर्थः। मच्चापलं च त्रिभुवनाद्भुतमवैहि। एतद्द्वयं तव वाधिगम्यं मम वा। यद्वा, मच्चापलं च त्वदुत्पादितत्वात्तव वा स्वीयत्वान्मम वाधिगम्यम्।

अन्यो वेद न चान्यदुःखमखिलम्

(जगन्नाथवल्लभ ३. ९) इत्यादिन्यायात्। सख्योऽपि सम्यङ् न जानन्ति यत एवं वदन्तीति भावः। पुनः प्रोच्छोलितोद्वेगा सदैन्यमाह—तदिति। तत्तस्मात्त्वन्मुखाम्बुजमीक्षणाभ्यामुच्चैरीक्षितुं किं करोमि। यत्कृते तद्दृष्टं स्यात्तत्त्वमेवोपदिशेत्यर्थः। ननु न दृष्टं तत्तेन किं तत्राह—मुग्धं मनोहरम्। तददर्शनात्तद्विफलत्वापत्तेः।

अक्षण्वतां फलमिदम्

(भा० १०.२१.७) इत्यादेः। तथा दानकेलिकौमुद्याम् (पः ३२)—

भवतु माधवजल्पमशृण्वतोः श्रवणयोरलमश्रवणिर्मम।
तमविलोकयतोरविलोकनिः सखि विलोचनयोश्च किलानयोः॥

इत्यादेश्च। ननु नेदानीं दृष्टं तेन किं स्थिरवा द्रक्ष्यसि तत्राह—विरलं कुलवधूनां

2. KP omits तस्या. KB उद्घूर्णादिदशा. KC omits एव after तत्र. 3. KC कदाप्यन्यैतादृक्; KP कार्पण्यैतादृक्. KP विकलान् for विकला न. 4. KP गम्भीराभावे for गम्भीरा भव. 7. KP मच्चापल्यं. KC, KP insert ह्येवं before मम. 8. KC स्वायत्तत्वात् for स्वीयत्वात्. 10. KA इति० for इत्यादि०. KP omits न after सम्यक्. KB अतः for यतः. 11. KD ०वेगात् for ०वेगा. KA, KD omit त्वत् (KP reads तत्) before मुखाम्बुजं. 12. KD वीक्षितुं for ईक्षितुं. 13. KD, KP तद्ध्यानात्. 15. KA omits इदं, KC, KP omit फलमिदं. 16. KP इत्यादि. 18. KC, KP तु for च. 19. KP omits च after इत्यादेः. KA इदानीं नो for नेदानीं.

नस्तत्रापि तव गोचारणादिना दुर्लभदर्शनम्। अतोऽधुना लब्धेऽवसरेऽपि यन्न दर्शयसि तत्तव निष्ठुरतेत्यर्थः। किं वा, ननु तत्समं किमपि पश्य तत्राह— विरलं साम्यरहितम्। तत्र हेतुः—मुरलीविलासि॥ स्वान्तर्दशायाम्— पूर्ववत्तत्सङ्गोच्छलितं कैशोरं ज्ञेयम्। तद् द्रष्टुं मत्पापलं च। अन्यत्समम्॥ बाह्यार्थः स्पष्टः ॥३२

पर्याचितामृतरसानि पदार्थभङ्गी-
वल्गूनि वल्गितविशालविलोचनानि।
बाल्याधिकानि मदवल्लवभाविनीभि-
र्भावे लुठन्ति सुकृतां तव जल्पितानि ॥३३

कृष्णवल्लभा

अपि च—पर्याचितेति। हे नाथ मदवल्लवभाविनीभिः।

मदो विकारः सौभाग्ययौवनाद्यवलेपजः

(साहित्यदर्पण ३. १०५) तद्युक्ता या वल्लवानां भाविन्यः प्रशस्तभाववत्यो गोप्यस्ताभिः सह तव सकलसौन्दर्यनिधेर्जल्पितानि। परस्परव्यक्तवचनानीत्यर्थः। सुष्ठु कृत् कृतं येषां तेषां पुण्यवतां भावे सत्तालीलाभिप्राययुक्ते चेतसि लुठन्ति संचरन्ति। निरन्तरं मनोलग्नानि तिष्ठन्तीत्यर्थः। मनसः प्रेमोद्रेकेण धारणक्षमत्वाभावाल्लुठन्तीत्युक्तम्।

भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु।
क्रियालीलापदार्थेषु विभूतिबुधजन्तुषु॥

इति मेदिनी (वान्त० २०)। कीदृशानि जल्पितानि—पर्याचितामृतरसानि।

1. KC, KP तस्य for तव. 2. KP omits ननु. 4. KC, KP तद् दृष्टं for तद् द्रष्टुं. 7. PS फल्गूनि. 8. PS मदवल्लभभाषितानि. 9. PS सुदृशां for सुकृतां. 14. GB omits इत्यर्थः 15. GA, GC insert सुकृती before सुष्ठु. GC सुकृत् for सुष्ठु कृत्. 20. GB omits पर्याचितामृतरसानि, and reads for it परीति.

परि परित आचिताः प्लाविता अमृतरूपा रसा येष तानि। पुनः कीदृशानि—पदार्थभङ्गीवल्गूनि। पदानामर्थानां च या भङ्गी। रचनापरिपाटीति यावत्। तया वल्गूनि मनोहराणि। पुनः कीदृशानि—वलिगतविशालविलोचनानि। वलिगते तत्तदङ्गेषु लीलाविलासवैदग्ध्यावलोकनार्थं चञ्चले विशाले हर्षोद्रेकाद्विशिष्टे लोचने यत्र। पुनः कीदृशानि—बाल्याधिकानि। बाल्यं चापल्यं वक्षोजग्रहास्यचुम्बनादिरूपं तेनाधिकानि। अध्यधिकं कं सुखं यत्र तान्यधिकानीति यथाश्रुतव्याख्याने

मितं च सारं च वचो हि वाग्मिता

इत्यादि (नैषधीयचरिते ६.८) मितसारत्वयोर्गुणभङ्गात्॥ वसन्ततिलकं छन्दः ॥३३

सुबोधनी

अथ तन्मिथोनर्मोक्तिस्फूर्त्युद्यल्लालसेन सदैन्यमाह—मदेन सखीभोगाङ्कालोकजहर्षेण युक्ताभिर्वल्लवभाविनीभिः सह तव जल्पितानि नर्मोक्तयः सुकृतां शोभनत्वल्लीलानुस्मरणं कुर्वन्ति ये तेषां भावे

स्वानां भावसरोरुहम्

(भा० २.८.५) इतिवद् भावयुक्ते मनसि लुठन्ति परिवर्तन्ते। सदा स्फुरन्तीत्यर्थः। तत्र हेतुः—परि सर्वतोभावेन आ सम्यक् चितोऽमृतरसो मिथो हास्यरसो

1-3. GA omits haplolgically all words from पुनः कीदृशानि to मनोहराणि. 1-2. GB omits कीदृशानि and पदार्थभङ्गीवल्गूनि. 3. GB omits कीदृशानि and the phrase वलिगतविशाल etc. 5. GB omits कीदृशानि and बाल्याधिकानि. 6. GB omits अधिकानि after तेन. GB omits अधिकानीति. 8. GB वाङ्मता for वाग्मिता. The verse is cited anonymously in Kṛṣṇadāsa's Caitanya-caritāmṛta Ādi 1.106. 11-12. CB, CD omit all words from अथ to हर्षेण and read instead : एवं मुखाम्बुजवर्णनोद्भूततन्मिथोवचन(CD omits all words from एवं and reads स्वचर, corrupt)स्फूर्त्या सनिर्वेदमाह—पर्याचितेति। स्वसखीविषयकतच्चापल्यदर्शनानन्दजेन मदेन. 12. CD drops all words from वल्लव to जल्पितानि. 12-13. CB, CD omit all words from नर्मोक्तयः to कुर्वन्ति ये and read instead : परिहासवाक्यानि सुष्ठु कृतं येषां. 13. CA omits भावे. 15. CB, CD omit भावयुक्ते. CB, CD insert सदा after लुठन्ति, omitting सदा before स्फुरन्ति. 16. CB कीदृशानि for तत्र हेतुः. CD omits परि सर्वतो. CA omits अमृतरसः. CD omits मिथो हास्यरसो.

येषु। कथं तद्रसाभिव्यक्तिः—पदानां भङ्गया वाच्यसौष्ठवेनार्थानां श्लिष्टार्थतया व्यङ्गयाद्यनेकप्रसूत्या मनोहराणि। ततो वल्गिते नर्तितेऽतएव कटाक्षादिना विस्तीर्णे विलोचने येषु। सर्वत्र हेतुः—बाल्येन कैशोरचाञ्चल्येनाधिकानि मिथो जिगीषयानवच्छिन्नानि। मम सुकृताभावात्तान्यपि न स्फुरन्तीति दैन्योक्तिः ॥३३

सारङ्गरङ्गदा

अथ मनसि तस्य तत्तत्प्रतिवंचनोट्टङ्कनात्पुष्पाद्याहरणे दानवर्त्मन्यादौ च स्वेन स्वसखीभिश्च सह कृष्णस्य नर्मकलहस्फूर्त्यात्युद्वेगेन तत्स्मरणेऽप्यसमर्थायाः

तत्र कथामृतम्

(भा० १०. ३१. १०) इत्यादिवत्सविषादं प्रलपन्त्या वचोऽनुवदन्नाह—मदवल्लव-भाविनीभिः सह तव जल्पितानि मिथो वाकोवाग्रूपाणि सुकृतां भावे भावाक्रान्त-चित्ते लुठन्ति स्फुरन्ति। मम पुनरुद्विग्ने चेतसि तदपि दुर्लभमिति भावः।

कुन्ताः प्रविशन्ति

इति न्यायात्। तथा

प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम्

(भा० २. ८. ५) इत्यत्र भावसरोरुहं हृदयकमलमितिवत्। मदेति भामिनीभि-

1. CB पुनः कीदृशानि, CD कीदृशानि for कथं तद्रसाभिव्यक्तिः. CB, CD omit all words from वाच्य० to श्लिष्टाथया and read instead : अक्षरविन्यासानुप्रासादिपरिपाठ्यार्थानां श्लिष्टतया. 2. CD व्यंग्यप्रसूत्या. CB, CD वल्गूनि मनोज्ञानि for मनोहराणि, and तथा for ततः. CB, CD चाञ्चल्येन कथितमनोगते for नर्तिते. 3. CB मतो, CD यतो वान्येन for सवत्र हेतुः. CB, CD ०वैदग्ध्य० for ०चाञ्चल्येन. 4. CB, CD omit मिथो जिगीषयानवच्छिन्नानि. CB, CD insert विषयासक्ते मनसि after सुकृताभावात्. 5. CC सदैन्योक्तिः. 7. KB ०वचन० for ०प्रतिवचन०. 8. KC, KP सुखेन for स्वेन. KB सखीभिः for स्वसखीभिः. 10-11. KC ०वल्लवभामिनीभिः. 11. KC, KP वाकोवाकरूपाणि. 13. This example of Lakṣaṇā is cited in many a work on Alāṃkara, e.g. Kāvya-prakāśa ii. 10 ; Sāhitya-darpaṇa ii. 6 etc. 14. KD यथा for तथा. 15-16. KD omits भावसरोरुहमित्यत्र.

श्चेत्यनेन वयं परकीया रमण्यः स्वच्छन्दं वने विहरामः, कथमयमस्माभिरुणद्धीति गर्वोद्रिक्तप्रणयरोषयुक्ता यास्ताभिरिति तासां किलकिञ्चितभावोद्गमः कथितः। तत्तु (उज्ज्वल०, अनुभावप्रकरण ३९)—

गर्वाभिलाषरुदितस्मितासूयाभयक्रुधाम् ।
संकरीकरणं हर्षादुच्यते किलकिञ्चितम् ॥

कीदृशानि—पदानामर्थानां च भङ्गीभिर्वल्गूनि मनोज्ञानि। तत्र पदानां यथा विलासमञ्जर्याम् (स्तवमाला, स्वयमुत्प्रेक्षितलीला विलासमञ्जरी, श्लो० १६, १२)—

परिज्ञातमद्य प्रसूनालिमेतां
लुनीषे त्वमेव प्रवालैः समेताम् ।
धृतासौ मया काञ्चनश्रेणिगौरि
प्रविष्टासि गेहं कथं पुष्पचौरि ॥
सदात्र चिनुमः प्रसूनमजने
वयं हि निरताः सुराभिभजने ।
न कोऽपि कुरुते निषेधवचनं
किमद्य तनुषे प्रगल्भरचनम् ॥

अर्थानां यथा दानकेलिकौमुद्याम् (पः २०३. ७९)—

कृष्णकुण्डलिनश्चण्डि कृतं घट्टनयानया ।
फूत्कृतिक्रीडया यस्य भवितासि विमोहिता ॥
धर्षणेन कुलस्त्रीणां भुजङ्गेशः क्षमः कथम् ।
यदेता दशनैरेव दशन्नाप्नोति शोभनम् ॥

इति। अतः, परि सर्वत आचितान्यमृतानि रसा शृङ्गारादयश्च यैः। तथा, वल्गितानि तस्य तासां च विशालविलोचनानि यैर्येषु वा। तथा, बाल्येन

2. KP गर्वोक्तप्रणय०. KD ०युक्ताभिस्ताभिः. KC, KP तल्लक्षणं for तत्तु. 6. Some Mss भङ्गिभिः. KC, KP omit तत्र. KA omits यथा. 8. KP विज्ञातं for परिज्ञातं. 13-15. KD omits all words from सुराभि-भजने to प्रगल्भरचनं. 15. KB अत्र for अद्य. KC कुरुषे (in margin as in text) for तनुषे. 19. KC दशनेन for धर्षणेन. 21. KA, KD परितः for सर्वतः.

किशोरस्वभावचाञ्चल्येनाधिकानि मिथो जिगीषयानवच्छिन्नानि ॥ स्वान्तदशायाम्—कर्णद्वारा तादृशचित्ते प्रविश्य तदानन्दयतीत्यर्थः। अन्यत्समम् ॥ बाह्यार्थः स्पष्टः ॥३३

पुनः प्रसन्नेन्दुमुखेन तेजसा
पुरोऽवतीर्णस्य कृपामहाम्बुधेः।
तदेव लीलामुरलीरवामृतं
समाधिविघ्नाय कदा नु मे भवेत् ॥३४

कृष्णवल्लभा

व्रजसुन्दरीभिः सह जल्पितानीति यदुक्तानि तानि तु तथाविधान्येव। किं तु तानि यदि मुरलीनादार्पितानि भवन्ति तदतीव मनोहरं स्यादिति पूर्वानुभवपरमानन्दसाम्राज्यभरस्तादृशसमाधिनैवायुष्कालो मे यायात्। यदि च ततो व्युत्थानं भवेत्तर्ह्येवं भूयादित्याशास्ते—पुनरिति। कृपामहाम्बुधेस्तव करुणासमुद्रस्य तदेव तात्कालीनमेव पूर्वानुभूतं वा पुनः पुनरपि। न्विति वितर्के। समाधेरन्तःकरणलयस्य विघ्नाय कदा भवेद्भविष्यति। तत्किम्, आह—लीलामुरलीरवामृतम्। लीलाप्रधानं यन्मुरलीरव एवामृतम्। सर्वाह्लादकत्वात्। तव कीदृशस्य—प्रसन्नेन्दुमुखेन तेजसा पुरोऽवतीर्णस्य। प्रसन्नं निष्कलङ्कमिन्दुवन्मुखं यत्र तादृशेन तेजसा। परमामृतमयतेजोवितानपूर्णदिशा वपुषेत्यर्थः। पुरोऽग्रतोऽवतीर्णस्य साक्षात्प्रकटपरमानन्दरूपेण स्थितस्य। एतेनातिसदयत्वं सर्वतापनिवारकत्वं च ध्वनितम् ॥ वंशस्थविलं छन्दः ॥३४

1. KC, KP कैशोर० for किशोर०. KA ०भावस्वभावेन for स्वभावचाञ्चल्येन. 3. KB inserts एव after स्पष्टः. 4. PS पुनः प्रसन्नेन मुखेन्दुतेजसा. 9. GB गोपीभिः for व्रजसुन्दरीभिः. GB omits इति यदुक्तानि तानि तु. 12. GB inserts न after व्युत्थानं. 13-15. GC drops all words from न्विति to मुरलीरव (before एवामृतं). 16. GB किंभूतस्य तव for कीदृशस्य. GB प्रसन्नेति for all words from प्रसन्नेन्दुमुखेन to ऽवतीर्णस्य.

सुबोधनी

अतएवोत्कण्ठयार्तस्तत्स्फूर्तिं प्रार्थयते—प्रसन्नेन्दुमुखेन हेतुना यत्तेज उच्छलनं तेन। पुनः—पुरोऽवतीर्णस्य कृपामहाम्बुधेस्तदेव प्राक्प्रार्थितं लीलायां यन्मुरलीरवामृतं तन्मम सम्यगाधेस्तदप्राप्तिजमनोव्यथाया अन्ताय। नु वितर्के। कदा भवेत् ॥३४

सारङ्गरङ्गदा

अथ तद्दर्शनोद्भूतमनःपीडोद्विग्नाया मूर्छन्त्या आश्वासनपरसखीः प्रति सलालसं पृच्छन्त्या वचोऽनुवदन्नाह—पुनः पुरोऽवतीर्णस्य तस्य येन मां कुञ्जे प्रेपितवांस्तदेव लीलासूचकमुरलीरवामृतं प्रसन्नेन्दुमुखेन तद्रूपेण तेजसा कान्तिपूरेण सह मम समाधेः सम्यङ्मनःपीडाया विघ्नाय नाशाय कदा भवेत्। अहो दुर्घटमेतदिति क्षणं विचिन्त्य, अथवा संभाव्येतेत्याह—कृपेति॥ स्वान्तर्दशायाम्—तदेव तत्प्रेरणरूपं मुरलीरवामृतम्। अन्यत्समम्॥ बाह्ये—समाधेर्ध्यानस्य। अन्यत्स्पष्टम्॥३४

बालेन मुग्धचपलेन विलोकितेन
मन्मानसे किमपि चापलमुद्वहन्तम्।
लोलेन लोचनरसायनमीक्षणेन
लीलाकिशोरमुपगूहितुमुत्सुकाः स्मः ॥३५

कृष्णवल्लभा

अथ मुरलीरवामृतं प्रति जातोत्कण्ठस्तद्वादकं द्रष्टुमत्युत्कण्ठामाविष्करोति—बालेनेति। वयं लीलाकिशोरं लीलामयकिशोरमीक्षणेनोपगूहितुं द्रष्टुमुत्सुकाः स्मः

2. CC तत एव for अतएव. CB, CD insert पुनरिति after प्रार्थयते. 3. CB कृपायाः for कृपा-. 4. CB inserts विघ्नाय before अन्ताय. 7. KP ०पराः सखीः for ०परसखीः. 8. KA प्रेरित० for प्रेषित०. KP तथा for तदेव. 11. KC संभवेत्, KD संभाव्यते for संभाव्येत. 12. KP ०रसामृतं for ०रवामृतं KP inserts इव after ध्यानस्य. 14. PS भावेन for बालेन.

सस्पृहा भवामः। वर्तमानेनौत्सुक्यस्य निरङ्कुशभविष्णुतोक्ता। ईक्षणाभ्यामित्यनुक्ति-द्वाभ्यामेव दर्शने तृप्त्यभावात्। अतः सामान्यत उक्तम्। उपगूहनोत्तयाति-संनिहितत्वेन दर्शनमित्युक्तम्। कीदृशेनेक्षणेन—लोलेन सतृष्णेन।

लोलश्चलसतृष्णयोः

इत्यमरः (३.३.२०६)। कीदृशं किशोरम्—लोचनरसायनम्। लोचनास्वाद्य-रसानामयनं स्थानम्। लोचनयो रसायनमाह्लादकं वा। रसायनसेवया हि लोचनयोः पुष्टिर्भवतीति प्रसिद्धम्। मल्लोचनपुष्टिविशेषनिदानं तदेव। यद्दर्शना-त्परमासाध्यव्याधेर्मल्लोचनस्य तदेव रसायनमित्येतत्सेवने दृष्टिमान्द्यं न स्यात्। अन्यथा त्वान्ध्यमेवेति। पुनः कीदृशम्—बालेन कोमलेन मुग्धेन प्रतिपदमाधुरी-विशेषचमत्कारवता परमसुन्दरेण स्वभावादेव चपलेन चाञ्चल्यगुणयुक्तेनैतादृश-विलोकितेन मन्मानसे मम चेतसि चापलं दर्शनोत्कण्ठातरलतामुद्वहन्तमुत्कर्षेण प्रापयन्तम्॥ वसन्ततिलकं छन्दः॥३५

सुबोधनी

अथोच्छलत्स्वान्तर्लालसाविशेषं स्वान्प्रत्युद्गिरति—लीलैकपरं किशोरमीक्षणेना-प्यालिङ्गितुमुत्सुकाः स्मः। कथं तेनालिङ्गितुमिच्छथ—लोचनयो रसायनं स्व-माधुर्यग्रहणविरोधिदोषापनयनेन रुच्युत्पादकम्। तेनापि कथं तदिच्छा—तद्द्वारा धैर्यादि विधूय मन्मानसे विशिष्टलोचनेन किमपि चापलमुच्चैः प्रापयन्तम्। तद्धेतुगर्भविशेषणान्याह—बालेन क्रीडैकाविष्टेन। अतएव मनोहरचपलेन सतृष्णेन च॥३५

1. GB निरङ्कुशत्वाद्भविष्यतोक्ता. 7. GB omits विशेष in विशेषनिदानं. 8. GC सेवनेन. 9. GB मान्द्यं for त्वान्ध्यं. GB omits कीदृशं. 10-11. GB omits एतादृश in एतादृशविलोकितेन. 14. CB, CD omit all words from अथोच्छलत्० to उद्गिरति and read instead : अथाभिलाषविशेषं सावहित्थमाह—बालेनेति. 15. CB, CD omit अपि. CB, CD कीदृशं for कथं तेनालिङ्गितु-मिच्छथ. 16. CD ०माधुर्यादि० for ०माधुर्य०. CB, CD अतएव for तेनापि कथं तदिच्छा. 17. CB, CD omit विशिष्टलोचनेन, and insert अनिर्वाच्यं after किमपि. 18. CB, CD तद्धेतुक० for तद्धेतुगर्भ०. CB, CD insert कीदृशेन before बालेन. CC मनोहरेण चपलेन. CB, CD insert लोलेन before सतृष्णेन.

सारङ्गरङ्गदा

अयि सखि स चेत्कृपालुस्तदा स्वयमायास्यति किमिति चपलासीति वदन्तीः सखीः प्रति तस्यैवायं दोष इति वदन्त्या वचोऽनुवदन्नाह—लीला मत्प्रेरणलीला तद्युक्तं किशोरं तं साक्षात्तद्भाग्यराहित्यादीक्षणेनाप्युपगूहितुमुत्सुकाः स्मः। न केवलमेकैवाहं भवत्योऽपीति बहुत्वम्। कीदृशेन—लोलेन तं द्रष्टुमतिचञ्चलेन लुब्धेन वा। तत्र हेतुः, कीदृशं तम्—लोचनरसायनम्। तत्संतर्पकम्। ननु साध्वनुष्ठितं नो वचो यद् द्विगुणीकृतं चापलमित्यत्र स्वनिर्दोषतामाह—मदिति। मन्मानसे विलोकितेन कुञ्जप्रेरणरूपालोकेन किमप्यनिर्वचनीयं चापलमुद्वहन्तमुत्पादयन्तम्। साक्षाद्दर्शनमदत्त्वा मनस्याविर्भूय तथा कुर्वन्तमिति तस्यैवायं दोष इति भावः। कीदृशेन—बालेन कोमलेन। किं वा, अन्याभ्यः संकोचेन दरावलोकनात्सूक्ष्मेण। मयैव ज्ञेयेनेत्यर्थः। तथा, मुग्धं च तच्चपलं च तेन॥ स्वान्तर्दशायां तु—तत्प्रेरणविलोकितेन हृदि स्फुरितेन मां चञ्चलयन्तं तं साक्षाद् द्रष्टुमुत्सुकाः स्मः। अन्यत्समम्॥ बाह्यार्थः स्पष्टः ॥३५

अधीरबिम्बाधरविभ्रमेण
हर्षार्द्रवेणुस्वरसंपदा च।
अनेन केनापि मनोहरेण
हा हन्त हा हन्त मनो दुनोषि ॥३६

कृष्णावल्लभा

अथ कदाचिल्लीलाकिशोरदर्शनसुखेन सम्यक् तत्प्राप्त्यभावदुःखेन च द्विधाभूता-

2. KP अये. 3. KC, KP तद्दोषमेव for तस्यैवायं दोष इति. 4. KB inserts आलिङ्गितुं before उत्सुकाः. 5. KB बहुवचनं for बहुत्वं. KP लोचनेन for लोलेन. 6. KC, KP च for वा. KC, KP omit तं. KP रोचनं for लोचन-. 7. KP omits यत्. 7-8. KC, KP haplologically omit all words from इत्यत्र (l. 7) to चापलं (l. 8). 8. KB omits उद्वहन्त्. 9. KP omits तथा. 10. KB संकोचनेन. KP दरालोकना०. 11-12. KP drops all words from स्वान्तदशायां to विलोकितेन. 11. KB omits तु. 12. KB तत् for तं. 17. PS धुनोति for दुनोषि.

न्तःकरणः सुखाकारमनोंऽशपक्षगतो दुःखाकारमनोंऽशं प्रति वदंस्तत्कृपादृष्ट्याशयैव स्थातव्यमित्याशयेनाह—अधीरेति । हे मनस्त्वं दुनोष्युत्तपसे । हा हन्त हा हन्तेति वीप्सायां खेदातिशयो ध्वन्यते । अनेन केनापि निमित्तेन । अनेनेति भावनापरोक्षीकृतपरमाश्चर्यसाम्राज्येनेत्यर्थः । केनापि कोट्यंशेनापि तत्साम्यस्य काप्यदृष्टेः । दृष्टान्तद्वारा वक्तुमशक्यत्वात् । कीदृशेन—अधीरबिम्बाधरविभ्रमेण । अधीरश्चञ्चलोऽन्तःप्रेमभराद्वेणुवादनक्रमाद्वा यो बिम्बतुल्योऽधरस्तस्य विभ्रमो विलासो यस्मिंस्तेन । पुनः कीदृशेन—हर्षेण आ ईषदार्द्रः सरसो यो वेणुस्तस्य ये स्वराः षड्जादयस्तेषां या संपद् द्वाविंशतिश्रुतिसंवलितत्वम् । श्रुतिसंवलिताः स्वराः, स्वराः श्रुतिभ्यः प्रभवन्तीति च । तत्र श्रुतयः—

ऊर्ध्वस्थितायां हृदि नाडिकायां नाड्यस्तिरश्च्यः पवनाहतास्ताः ।
द्वाविंशतिस्तीक्ष्णतराः क्रमेण नादं तु तावच्छ्रुतितां नयन्ति ॥

इति । तथा च, मनोहरेण मनोहारिणा ॥ उपेन्द्रवज्रा छन्दः ॥३६

सुबोधनी

मया लोचनेन ते मनश्चञ्चलं कृतमित्याशङ्क्याह—हे अधीर, अनेन बिम्बाधरस्य विभ्रमेण स्मितादिना । हा खेदे, हन्ताश्चर्ये, तयोराधिक्ये वीप्सा । मनो दुनोषि तत्र लोभमुत्पाद्याकुलीकरोषि । कथं तत्र तत्करणम्—केनापि मनोहरेण । तद्वक्तुं न शक्नुम इत्यर्थः । हर्षेण स्निग्धा या वेणोः स्वरसंपत्तया च ॥३६

3. GB omits अनेन before इति. 5. GB अधीरेति for the whole phrase अधीरबिम्बाधर etc. 7. GB यत्र for यस्मिन्. GB omits कीदृशेन. GB, GC omit आ ईषत्. GA omits आर्द्रः. GC omits यो. 8. GB omits या. 9. GC अतिरिच्यते for प्रभवन्तीति च. 9-12. GC omits all words from तत्र श्रुतयः to मनोहारिणा. 12. The metre here is उपजाति. 14. CA विकृतं for कृतं. CB, CD omit all words from मया to आह and read instead : अत(CD तत)स्तत्स्फूर्त्यार्तः पुनस्तथैवाह—अधीरेति. 16. CB, CD omit all words तत्र to उत्पाद्य and read instead : तत्पानाय. CB, CD insert इत्यर्थः after ०करोषि. CC केन for कथं. CB, CD omit all words from कथं to केनापि and read instead : अनेनायोग्यतायामपि तदभिलाषे हेतुः सूचितः । कीदृशेन. After मनोहरेण CB, CD insert अतएव निर्वक्तुमशक्येन । किं च. CA, CB, CD omit तद्वक्तुं न शक्नुम इत्यर्थः.

सारङ्गरङ्गदा

अथ पूर्वस्वप्रेरणस्मृत्योन्माददशारूढायाः कथं मया ते मनश्चपलं कृतमिति वदतस्तस्य पूर्ववद्दर्शनादर्शनोत्थवैक्लव्योद्विग्नायास्तमुपालभमानायाः प्रलापमनुवदन्नाह—निरक्षरसंकेतकथनेनाधीरो यो बिम्बाधरस्तस्य विभ्रमेण मनो दुनोषि दुःखयसि। हे धूर्तेति शेषः। हा खेदे, हन्त विषादे, तयोरतिशये वीप्सा। ननु भ्रान्तासि तत्राह—अनेन साक्षाद् दृश्यमानेन। नन्वेवं चेत्तदा कुञ्जं गच्छ तत्राह—केनापि प्रतीयमानस्याप्यसत्यत्वान्निर्वक्तुमशक्येन। अतो मनोहरेण मनोमात्रं हरति, कार्यं न सिद्ध्यतीन्द्रजालवद्यत्तेन। तथा हर्षैरार्द्रयतीति हर्षार्द्रस्तादृशो यः संकेतवेणुस्वरस्तत्संपदा च तादृश्या तथा करोषि। अतः कुलस्त्रीवधरङ्गिनस्तव तत्र का भीतिरिति भावः ॥ स्वान्तर्दशायाम्—अनुभवेऽपि मिथ्यात्वान्मनो दुनोषि मात्रम्। अन्यत्समम् ॥ बाह्ये—स्फूर्त्या तथोक्तिः। अर्थः स्पष्टः ॥३६

यावन्न मे निखिलमर्मदृढाभिघातं
निःसंधिबन्धनमुपैति न कोऽपि तापः।
तावद्विभो भवतु तावकवक्त्रचन्द्र-
चन्द्रातपद्विगुणिता मम चित्तधारा ॥३७

2 KP ०प्रेरणा० for ०प्रेरण०. 3. KB पुरावत्, KC, KP पुरो for पूर्ववत्. After आह KC, KP insert : तल्लक्षणम्—अतस्मिंस्तदिति भ्रान्तिरुन्माद इति कथ्यते। इति (KC om. इति). 6. KP omits साक्षात्. 8. KC तादृशो हर्षं आर्द्रयति, KP तादृश्या हर्षार्द्रयति for हर्षैरार्द्रयति. 9. KC, KP omit तादृश्या. KC, KP स्त्री० for कुलस्त्री०. 11. KP मिथ्या त्वन्मनो. KP बाह्यस्फूर्त्या. KA inserts इति after तथोक्तिः. KB तथोक्तिकथनं स्पष्टं for तथोक्तिः, अर्थः स्पष्टः. 12. KC, KP insert एव after स्पष्टः. 14. PS उदेति for उपैति. PS नवोपतापः for न कोऽपि तापः.

कृष्णवल्लभा

संप्रति स्वाभीष्टपदाप्राप्तिदुःखेन दैन्यौत्सुक्यमाविष्कुर्वन्नाह—यावदिति। हे विभो दुःखातिशयनिवारणदक्ष श्रीकृष्ण यावन्मे मम कोऽपि तापो दुःखविशेषः। निखिलमर्मदृढाभिघातं निखिलानां मर्मणां दृढोऽतिशयोऽभिघातो यत्र तादृशम्। निःसंधिबन्धनं निर्गतं संधीनां करचरणादिग्रन्थीनां बन्धनं श्लेषो यथा भवति तथा। नोपैति नायाति। तावन्मम चित्तधारा चित्तसंततिः। चित्तं धारयत्यात्मन्यवस्थापयतीति धृङोर्ण्यन्ताद् घञ्। चित्तमेव धारा जलधारा द्रुततया प्रवाहरूपेण प्रवाहकत्वादिति वा।

धारा सैन्याग्रिमस्कन्धे तुरंगगतिपञ्चके।
खड्गादिनिशिताग्रे च जलादीनामपि स्रुतौ॥

इति धरणिः। तावकवक्त्रचन्द्रचन्द्रातपद्विगुणिता भवतु। तावकं त्वदीयं वक्त्रमेव चन्द्रस्तस्य ये चन्द्रातपाश्चन्द्रिकास्ताभिर्द्विगुणिता परममहानन्दप्रफुल्लसर्वाङ्गत्वादतिशयस्फीता भवतु। त्वन्मुखचन्द्रसविधे हि द्विगुणसौन्दर्यमाधुर्यादिमत्वात्तथा मम स्फुरत्वित्यर्थः। चन्द्रातपद्विगुणितेति चित्तस्य समुद्रत्वं व्यङ्ग्यम्।

चन्द्रातपश्चन्द्रिकायां विताने स्वर्णतेजसि

इति व्याडिः। यद्वा, तावकवक्त्रचन्द्र एव चन्द्रः कर्पूरम्। सुगन्धशीतलाह्लादकत्वात्। तस्य य आतपः प्रकाशस्तेन द्विगुणिता।

प्रकाशो द्योत आतपः॥

अथ कर्पूरमस्त्रियाम्।
घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका॥

इत्यमरः (१. ३. ३५; २. ६. १३०)। प्रकाशो धवल एवेति कविसंप्रदायः॥ अथवा,

2. GB inserts द्वाभ्यां after यावदिति. 3. GB omits मे. 4. GB omits निखिलमर्मदृढाभिघातं. 5. GB omits भवति. 9-10. Cf. Viśva (rānta°) 88-89; Medinī (rānta°) 50-51. 11. GB omits all words from तावक° to भवतु. 12. GC द्विगुणीकृता for द्विगुणिता. 16. GA कर्पूरः; GC omits the word.

हे विभो कोऽपि तापो यावन्निखिलमर्मदृढाभिघातं यथा भवति तथा बन्धनं परिपाकं नोपैति। कीदृशम्—निःसंधि दृढग्रन्थि। संधेरशैथिल्यान्मोचयितुमशक्यम्। अन्यत्समम्॥ वसन्ततिलकं छन्दः ॥३७

सुबोधनी

अथ स्फूर्त्यपगमेऽत्यार्तो विलम्बमसहमान आह—हे विभो यावत्स प्रसिद्धः कोऽपि तापस्त्वत्प्राप्त्यसंभावनरूपो मम सर्वमर्मस्थानेषु दृढाभिघातं यथा स्यात्तथा निर्गतः संधिः संयोगस्तत्र बन्धनम्। आशेति यावत्। तन्नोपैति न प्राप्नोति। त्वत्प्राप्त्याशां न शोषयेदित्यर्थः। तावन्मम चित्तधारा तावकवक्त्रचन्द्रचन्द्रातपाच्छादिता भवतु। स्निग्धस्वाभाव्येनात्र धारात्वम्। आशाबन्धनाशे देहः पतेत्, अतो मुखेन्दुं प्रदर्श्य तत्तापं वारयेत्यर्थः ॥३७

सारङ्गरङ्गदा

अथ तद्विच्छेदार्कतापावलीढाया मोहं गच्छन्त्याः प्रगाढमोहोत्पत्तेः पूर्वमेव प्रलपन्त्या वचोऽनुवदन्नाह। तल्लक्षणम् (उज्ज्वल०, शृङ्गारभेदप्रकरण, ४०)—

मोहो विचित्तता प्रोक्तः

इति। हे विभो सर्वतापहरणसमर्थ यावत्कोऽप्यनिर्वचनीयस्तापः।

आयुर्घृतम्

इतिवन्मोहहेतुत्वात्ताप एव मोहः। मे निखिलमर्मणां चित्तेन्द्रियाणां दृढाभिघातं

1. GB omits भवति. 5. With regard to all words from अथ to आह, CB omits some letters and words, leaving blank space for them, and reads :......मेऽत्यार्ति......यावदिति द्वाभ्यां ; CD reads स्फूर्त्यपगमेऽत्यार्तिव्याकुलः प्रार्थयते यावदिति द्वाभ्यां. CA अत्यार्त्या for अत्यार्तो. CB omits सः. 6. CA ०भावना० for ०भावन०. 7. CA सङ्गः for संयोग-. CB, CD नाप्नोति for न प्राप्नोति. 8. CB स्व-, CD तत्- for त्वत्०. 9. CB, CD तदाशाबन्धशोषे for आशाबन्धनाशे. 10. CB, CD omit तत् before तापं. 12. KB ०मोहोत्पत्तिपूर्वं. 13. KA omits तल्लक्षणं. 14. KC विचित्रता. 16. For this quotation see above, Sāraṅgaraṅgdā on verse 8. 17. KC, KP मम for मे. KC omits चित्तेन्द्रियाणां.

यथा स्यात्तथा निःसंधिबन्धनं च। अतिगाढतामित्यर्थः। नोपैति। तावन्मम चित्तधारा तावकवक्त्रचन्द्र एव चन्द्रातपो वितानं तेन द्विगुणिताच्छादिता भवतु। मुखचन्द्रं दर्शयित्वा तापं वारयेत्यर्थः। चित्तस्य वृत्तिबाहुल्याद्धारात्वम्। तथानेन व्याधिरप्युक्तः ॥ स्वान्तर्दशायाम्—तत्प्रेरणभावमधुरवक्त्रचन्द्र इत्यर्थः। अन्यत्समम् ॥ बाह्ये—पथि भूमौ पतितः प्राह। अर्थः स्पष्ट एव ॥३७

यावन्न मे नरदशा दशमी कुतोऽपि
रन्ध्रादुपैति तिमिरीकृतसर्वभावा।
लावण्यकेलिसदनं तव तावदेव
लक्ष्यासमुत्क्वणितवेणु मुखेन्दुबिम्बम् ॥३८

कृष्णावल्लभा

कोऽपि तापः प्राणान्नाशयतु नाम, किं त्विदमेव मे हृच्छल्यं यत्ते मुखचन्द्रचन्द्रिकाचमत्कारो नास्वादित इति ग्लानिदैन्यौत्सुक्यान्याविष्कुर्वन्निजजीवितश्रीमुखेन्दुदर्शनमाशास्ते—यावदिति। हे नव स्तवनीय मे मम दशमी दशा कण्ठगतश्वासान्तिमा कुतोऽपि रन्ध्रादवसरात्। दूषणादिति वा। निमित्तादित्यर्थः। इष्टाप्राप्तिदुःखातिशयादन्यतो ज्वरादेरिति। यावन्नोदेति नायाति।

रन्ध्रं छिद्रेऽप्यवसरे

इति विश्वः।

1. KA (after correction as in text), KB, KD नोपैति न करोतीत्यर्थः for यथा स्यात्. KC इति for च; KP omits the word. 2. KC, KP omit एव. 3. KC, KP omit तथा. 5. KB omits पथि. KC, KP transpose पतितः and प्राह. 6. Gopāla Bhaṭṭa (v. l. as in text) नन्न दशा. PS दशोऽपि for कुतोऽपि. 7. PS and Gopāla Bhaṭṭa उदेति for उपैति. 8. PS एतु for एव. 9. PS लक्ष्म्या समु०. 11. GB inserts अथ before कोऽपि. 12. GB omits ग्लानि. 14. GB दूषणादिनिमित्ता०. 15. GA ज्वरः for ज्वरादेरिति. 16. The quotation is not found in the printed text of the Viśvakośa.

रन्ध्रं तु दूषणे छिद्रे

इति मेदिनी (रान्त ७८)। कीदृशी—तिमिरीकृतसर्वभावा। तिमिरीकृता निरस्तीकृताः सर्वे भावाः पदार्था यस्यां सा। एतेन शब्दस्पर्शादिनापि दर्शनं निरस्तम्। दशमी दशा तु मरणम्। तथा चोक्तम्—

अभिलाषश्चिन्तनं च स्मृतिश्च गुणकीर्तनम्।
उद्वेगश्च प्रलापश्च उन्मादो व्याधिरेव च।
जडता मरणं चेति दश कामदशाः स्मृताः॥

इति। नरदशेति पाठेऽपि स एवार्थः। तावदेव तव मुखेन्दुबिम्बं लक्ष्यासम्। द्रष्टुमाशंस इत्यर्थः। लक्ष्यासमिति लक्ष दर्शनाङ्कनयोः (धा० १०. ५) इत्यस्माद्धातोर्णिचि आशीर्लिङ्। लिङाशिषि (पा० ३. ४. ११६) इति। तस्यार्धधातुकत्वात् णिचो लोपः। कीदृशं मुखेन्दुबिम्बम्—लावण्यकेलिसदनम्। लावण्यं माधुर्यपरंपरा तस्याः क्रीडागृहम्। यद्वा, लावण्यानां केलीनां च सदनम्। कृष्णमुखलावण्यमेव भक्तैर्लावण्यमित्युच्यते, तदनुभवेनान्यलावण्ये लावण्यबुध्द्यभावात्। पुनः कीदृशम्—उत्कणितवेणु। उदुत्कृष्टं कणितं यस्य तादृशो वेणुर्यत्र तत्। यद्यपि कृष्णवेणोः सर्वमपि कणितमुत्कृष्टं तथापि परमोत्कृष्टप्राप्त्यर्थमुदित्युक्तिः॥ वसन्ततिलकं छन्दः॥३८

सुबोधनी

ततोऽप्यार्तः श्लिष्टार्थं स्पष्टयन्नाह—यावन्मे दशमी नरदशा मृतिः किंचिदपि पूर्वोक्तं छिद्रमालम्ब्य नोपैति निकटं नायाति तावदेव तावकवक्त्रचन्द्रबिम्बं लक्ष्यासं

2. GB omits तिमिरीकृतसर्वभावा. 4-7. GC haplologically omits from तथा चोक्तं to मरणं. 5-7. Cf Sāhitya-d. iii, 190; Ujjvala-n., Śṛṅgāra-pra., 153. 9. GB आशासे for आशंसे. GC अस्य for अस्मात्. 11. GB omits लावण्यकेलिसदनं. 12. GA inserts सदनं after लावण्यानां. GB omits च. 14. GB omits कीदृशं, उत्कणितवेणु and उत् (before उत्कृष्टं). 15. GB इदमुक्तं for उदित्युक्तिः. 18. CB, CD पुनर्दर्शनोत्कण्ठितः for ततोऽप्यार्तः. CB inserts यावदिति, CD यावन्न मे इति after आह. CB नोपैति for मृतिः. 19. CB omits पूर्वोक्तं ; CD reads for it कंचिदपि. CB, CD omit निकटं नायाति. CA inserts पूर्वोक्त- before तावक०. CB, CD omit लक्ष्यासं.

दृश्यासम् । तां विशिनष्टि—आवृताः सर्वभावास्त्वत्प्राप्तिसंभावनहेतवो यया। कीदृशम्—लावण्यानां केलेरुल्लासस्य सदनं निवासम्। यतः—उच्चैः क्वणितो वेणुविनोदनादो येन। मृतिश्चेन्मुखदर्शनानन्तरमस्त्वित्यर्थः ॥३८

सारङ्गरङ्गदा

अथ मोहेनावृतचित्तेन्द्रियाया उपस्थितां मृतिमाशङ्क्य सदैन्यं तमुद्दिश्य प्रलपन्त्या वचोऽनुवदन्नाह। मृतेरमाङ्गल्याज्जातप्रायां तां वर्णयन्ति तज्ज्ञाः। अत्र स्वीयतद्वर्णनेन सुतरां पूर्वदशैव योग्या। यावन्न मे दशमी नरदशा मृतिः कुतोऽपि रन्ध्राच्छिद्रान्नोपैति तावदेव तव मुखेन्दुबिम्बं लक्ष्यासं दृश्यासमित्यात्मानमाशास्ते। ननु किमित्युत्कण्ठसे, स्थित्वा द्रक्ष्यसि, तत्राह—तिमिरीकृतसर्वभावा देहेन्द्रियादिनाशिनी। ननु मृतिश्चेत्तन्न दृष्टं तेन किम्, तत्र सोत्कण्ठमाह। कीदृशं तत्—लावण्यानां केलिसदनम्। तथा, उत्क्वणितो वेणुर्यस्मिन्। तन्मधुरमुखदर्शनाभावान्मरणमप्यधन्यमिति भावः। तादृशप्रेमाक्रान्तचेतसां स्वभावोऽयं यदत्यन्तविच्छेदभिया मरणमपि नेच्छन्ति। तथा हि

न शक्नुमस्त्वच्चरणं संत्यक्तुमकुतोभयम्

(भा० १०. १७. २४) इत्यादि ॥ स्वान्तर्दशायाम्—तत्प्रेरणभावमधुरमुखेन्दुबिम्बम्। अन्यत्समम् ॥ बाह्यार्थः स्पष्टः ॥३८

1. CC तामेव for तां. CB, CD तत्र विलम्बमसहंस्ता(CD विलम्बासहनता) माह—तिमिरीकृताः (CD omits) for तां विशिनष्टि. CB, CD सर्वे भावाः. CA ०संभावना० for ०संभावन०. 2. CB केलिसदनं केवलं for केलेः. CB, CD omi सदनं. CD यत्र for यतः. 3. CB, CD वेणुः for वेणुविनोदनादः. CB त्वन्मुखेन्दु० for मुख०. CD omits all words from मृतिः to ०दर्शनानन्तरं and reads (corrupt) मुखेन मननं. CB, CD insert एव before अस्तु. 5. KP मोहिना for मोहेन. 6. KP अमङ्गल्यात्. 7. KC, KP ०वर्णने for वर्णनेन. 8. KP उदेति for उपैति, and भवेत् for तावत्. KP लक्ष्म्या संदृश्या समेत्यात्मानं for लक्ष्यासं दृश्यासमित्यात्मानं. 9. KC, KP omit ननु before किमिति. 10. KC, KP insert सत् before तेन. 14. KP तच्चरणं.

आलोललोचनविलोकितकेलिधारा-
नीराजिताग्रचरणैः करुणाम्बुराशेः ।
आर्द्राणि वेणुनिनदैः प्रतिनादपूरै-
राकर्णयामि मणिनूपुरशिञ्जितानि ॥३९

कृष्णावल्लभा

संप्रति तद्दैन्यौत्सुक्यमालक्ष्याविर्भूतपरमकारुणिकश्रीकृष्णभूषणध्वनिमाकर्णय-न्नाह – आलोलेति । करुणाम्बुराशेः कृपासमुद्रस्य । अस्मद्दुःखासहिष्णुत्वादेता-दृशीमवस्थां दृष्ट्वा तत्क्षणमेवागतत्वात्करुणाम्बुराशित्वम् । तस्य श्रीकृष्णस्य मणिनूपुरशिञ्जितानि मणिमयौ नूपुरौ मञ्जीरौ तयोः शिञ्जितानि ध्वनिविशेषा-नाकर्णयानि शृणवानीत्याशंसायां लोट् । कीदृशानि—वेणुनिनदैरार्द्राणि । अन्योन्यमिलनात् । चरणचालनं तु नृत्यवत्तालभङ्गीयुक्तम् । नूपुरध्वनेश्च प्रतिनियतकालता । वंशीनिनादस्य तु गानात्मकत्वात्प्रकृतमेव तालादिमत्त्वम् । तेनान्योन्यमिलनेन तौर्यत्रिकं जातम्—चरणयोर्नृत्यम्, नूपुरस्य वाद्यम्, मुरल्या गानमिति ।

गीतं वाद्यं तथा नृत्यं त्रयं संगीतमुच्यते

इति संगीतरत्नाकरे (१. १. २१)। कीदृशैर्निनदैः—प्रतिनादपूरैः। प्रतिनादः प्रतिध्वनिस्तं पूरयन्तीति तैः । प्रतिनादैरितस्ततः प्रदेशं पूरयन्तीति वा । प्रतिनाद एव पूरः पूरणं ध्वनिविशेषो येषु तैरिति वा । पुनः कीदृशैः—आलोललोचन-विलोकितकेलिधारानीराजिताग्रचरणैः । आ समन्ताल्लोलयोश्चञ्चलयोर्लोचनयो-र्यद्विलोकनमितस्ततोऽपाङ्गरूपावलोकनं तस्य या केलिधारा क्रीडाया आवृत्तिस्तया

2. PS नीराजिताग्रसरणैः. 4. Gopāla Bhaṭṭa and v. l. in Kṛṣṇadāsa आकर्णयानि. 9. GB omits मणिनूपुरशिञ्जितानि. 11-13. GB omits haplologically from अन्योन्यमिलनात् (l. 11) to तेन (l. 13.). 16. GB omits प्रतिनादपूरैः. 16-17. GB प्रतिनादं प्रतिध्वनिं, omitting तं (l. 17). 17. GB omits तैः. 18. GA omits इति before वा. GB omits कीदृशैः and reads आलोलेत्यादि for the phrase आलोललोचन etc. 20. GB क्रीडावृत्तिः for क्रीडाया आवृत्तिः.

नीराजितौ। नीराजनमारात्रिकं तद्वत्पूजितौ। निःशेषेण राजितौ दीपितौ वा। अग्रचरणौ चरणाग्रौ येषु तैः। एतेन वंशीवादनसमये पदाग्रे दृष्टिर्भवेदेवेति तत्समयो ध्वन्यते। यथा यथा मुरली गायति तथा तथा चरणयोरपि चालनम्, तथा नूपुरस्यापि ध्वनिः, तेन जातकौतुकतया वंशीनादसमय एव चरणाग्रं प्रति प्रतिनियतां दृष्टिं करोति, तेन स्वच्छयोः श्रीलोचनयोर्नानावर्णतेजश्छटाया एव केलिधारात्वेन निरूपणमिति भावः। अत्र कान्ता दृष्टिर्ज्ञातव्या, तल्लक्षणं चोक्तम्। वसन्ततिलकं छन्दः ॥३६

सुबोधनी

एवमार्तस्तदागमनस्फूर्त्याह—करुणासमुद्रस्य मणिनूपुरयोः शब्दाञ्शृणोमि। तस्यैवेति कथं ज्ञातम्—वेणुनिनदैरार्द्राणि। तत्र हेतुः—तत्प्रतिध्वनिभिः पूर्णैः। तत्प्रकारमाह—आलोलविलोचनयोर्विलोकितस्य या केलिधारा कटाक्षाद्यनवच्छिन्नता तया नीराजितौ चरणाग्रौ यैः। वेणुवादनानतशिरस्कतया नखमण्डलेषु प्रतिबिम्बितकटाक्षदीपावलिभिर्नीराजनमुत्प्रेक्षितम् ॥३६

सारङ्गरङ्गदा

इति वदन्त्येव मूर्छितासीत्, ततः सखीभिः कृष्णताम्बूलोद्गारं तन्मुखे न्यस्या-

1. GB आरात्रिकवत् for नीराजनमारात्रिकं तद्वत्. 2. GA चरणाग्रं. GC भवति for भवेदेवेति. 6. GB omits ज्ञातव्या तत्. 7. GB तु for च. 9 CB, CD वदन्नेव for आर्तः. CA तद्गमन० for तदागमन०. CB, CD insert आलोलेति after आह. 10. CB, CD कीदृशानि for तस्यैवेति कथं ज्ञातं. CD omits all words from वेणुनिनदैः to पूर्णैः and reads instead (corrupt) वेणवदिति प्रवातापन्नैः. CA omits तत्र हेतुः; CB reads कीदृशैः for it. CB omits तत्. CC तत्प्रतिनाद- for तत्प्रतिध्वनिभिः. CB प्रवाहापन्नैः for पूर्णैः. 11. CB, CD पुनः कीदृशैः for तत्प्रकारमाह. 11-12. CB drops all words from कटाक्षाद्यानवच्छिन्नता up to वेणुवादनानत. 12. CC inserts अग्रचरणौ before चरणाग्रौ. CD omits all words from चरणाग्रौ to नखमण्डलेषु and reads instead (corrupt) : अग्रप्रवाहापन्नैः. CC ०नादा० for ०वादना०. CB inserts हि before नख०. 13. CB, CD कटाक्षादिभिः for कटाक्ष-. CA नीराजितं, CD निवारितत्वं (corrupt, नीराजितत्वं ?) for नीराजनं.

गतोऽयं ते प्रिय पश्येति प्रबोधिताया ग्लानिभावान्नेत्रे निमील्यैव सत्यं कथयेति प्रलपन्त्या वचोऽनुवदन्नाह—नृत्यन्निवागच्छतस्तस्य मणिनूपुरशिञ्जितान्याकर्णयामि, तत्सत्यमागतोऽयम् । आकर्णयानीति पाठे—आगतश्चेत्तदाकर्णयानि, तदैव मे प्रतीतिरित्यर्थः । आगमने हेतुमाह—करुणाम्बुराशेः । कीदृशानि—वेणुनिनदैराद्राणि । कीदृशैस्तैः—पादतालवलयकिङ्किणीनां प्रतिनादपूरो येषु तैः । तैर्मिश्रितैरित्यर्थः । तथा, आलोललोचनयोर्विलोकितकेलिधाराभिर्नीराजितौ तस्यैवाग्रचरणौ यैः । सवंशीवादननृत्ये तालोन्नयनाय चरणाग्रदर्शनात् । किं वा, व्रजदेवीनां नेत्राणि ज्ञेयानि ॥ स्वान्तर्दशायाम्—शृणोमि किमित्यर्थः ॥ बाह्ये—कदा किं वेत्यध्याहार्यम् ॥३९

हे देव हे दयित हे भुवनैकबन्धो
हे कृष्ण हे चपल हे करुणैकसिन्धो ।
हे नाथ हे रमण हे नयनाभिराम
हा हा कदा नु भवितासि पदं दृशोर्मे ॥४०

कृष्णवल्लभा

हे कृपासमुद्र यद्यागतोऽसि तदा कथं मन्नेत्रयोः पात्रतां नायासीति दर्शनोत्कण्ठामाह—हे देवेति । हे देव दीव्यति क्रीडति मोदते विजिगीषति द्योत्यत इति । निरन्तरक्रीडापरेत्यर्थः । मे मम । न्विति वितर्के । दृशोर्नेत्रयोः पदं स्थानं कदा भवितासि भविष्यसि । हा हेत्यतिप्रीत्या खेदे । यद्वा, कदा मे दृशोः पदं चिह्नमनु भवितासि । स्वकेलिधारामधुररसाञ्जनं करिष्यसीत्यर्थः । अतिप्रीत्याविष्कारमाह—हे दयित अतिप्रिय । संजातदयेति वा । दया-शब्दादितच् ।

1. KA, KB ०भारात् (or भावात्), KD ०भरात् for भावात्. KC, KP अनुन्मील्य for निमील्य. 4. KP आगमनहेतुं. 5. KC, KP पादतल० for पादताल०. KC, KP ते for तैः (after येषु); KB omits it. 6-7. KB omits एव after तस्य. 10. PS जगदेक० for भुवनैक०. 15. GA पात्र for पात्रतां. GB ०नेत्रपात्रतां for नेत्रयोः पात्रतां.

दया तावन्मम क दृष्टेत्यत आह—हे भुवनैकबन्धो। भुवनेष्वेकोऽनन्यो बन्धुर्हितकारी। सर्वबन्धुकृत्यं तय्येवास्तीति भावः। परस्परविसदृशानां भुवनजनानामतिदुर्घटमिदमत आह—हे कृष्ण। कर्षत्याकर्षति सर्वानिति कृषेर्न औणादिकः। यद्वा, कृष्ण सच्चिदानन्द।

कृषिर्भूवाचकः शब्दो नश्च निर्वृतिसंज्ञकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते॥

इति। हे चपल निरन्तरभक्तानुग्रहसाधनपर। तथा चोक्तं भारते (५. ५८. २१)—

ऋणमेतत्प्रवृद्धं मे हृदयान्नापसर्पति।
यद्गोविन्देति चुक्रोश कृष्णा मां दूरवासिनम्॥

इत्यादि। समस्तदुःखपरिजिहीर्षकत्वमाह—करुणैकसिन्धो। अस्मद्दुःखप्रहाणकरीणां करुणानां त्वमेकः सिन्धुः। समर्थत्वात्। अन्येषां करुणस्वभावानां दुःखितत्वेन दुःखखण्डनेच्छारूपकरुणासत्त्वेऽपि निष्प्रयोजनत्वान्न सा करुणोच्यते। यतः

दयालोरसमर्थस्य दुःखायैव दयालुता।
त्रैलोक्याभयदक्षस्य सा तवैकस्य शोभते॥

इति। प्रार्थककामपूरकत्वमाह—हे नाथ याच्ञापूरकसकलैश्वर्यविराजमान। नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु (धा० १. ६-७) इति धातोः। हे रमण रमयति क्रीडयति चित्तमिति रमण। अतस्तद्दर्शनाकाङ्क्षामाह—हे नयनाभिराम। नयनयोरभिराम। अतिरमणीयत्वेन नेत्रापकहारकत्वात्। नयनयोर्गोचरत्वे सत्यमस्माकं जीवनमित्यभिप्रायः॥ वसन्ततिलकं छन्दः॥४०

सुबोधनी

पुनः स्फूर्त्यपगमे भावशाबल्योदयात्सदैन्यमाह। तत्र क्रीडानन्दाविष्टतया

4. GB omits सच्चिदानन्द after Kṛṣṇa, but inserts it before हे चपल (l.7). 5. GB णश्च for नश्च, and ॰वाचकः for ॰संज्ञकः. This line occurs in Mahābhārata 5. 68. 6. 7. GB omits इति. 8-9. Cited from the same in Bhakti-rasāmṛta 2. 1. 48. 10. GB इति for इत्यादि. 11-12. All words from ॰करीणां to निष्प्रयोजनत्वात् missing in GC. 16. GB धातुः for धातोः. 18. GB नयनगोचरे for नयनयोर्गोचरत्वे. 23. CB हे देवेति। प्रथमं for तत्र. CD drops all words from उदयात् (in भावशाबल्योदयात्) to मद्दुःखं न (p. 146, l.1).

मद्दुःखं न जानासीत्याह—हे देव क्रीडाविष्ट। हा हेत्यतिखेदे। कस्मिन्काले त्वं मे दृशोर्विषयं भविष्यसि। तत्र हेतुः—हे दयित। दयिततया तदनुभवो युक्तः। दयितत्वमपि कथम्—भुवनानामेकः केवलो निरुपाधिको यो बन्धुः, हे तथाविध। जगद्बन्धुतया ममापि बन्धुस्त्वमेवेत्यर्थः। तदपि कुतः—हे कृष्ण सर्वाकर्षक। स्वनामरूपगुणादिभिर्जगदाकृष्यात्मपरकरणाज्जगद्बन्धुत्वम्। तर्हि कुतो दुर्लभता—हे चपल स्वच्छन्दाचरित। तर्हि कुतः प्राप्त्याशा—करुणैका मुख्या यत्र हे तादृशसिन्धो। तत्रात्मनो वैशिष्ट्यमाह—हे नाथ, अस्मत्पालक। इदं तु कथम्—हे रमण मदभीष्टराधापते। अतएवास्मन्नयनयोरभिराम रतिजनक ॥४०

सारङ्गरङ्गदा

अथोत्थाय दिशोऽवलोक्य, अयि सख्यो नूपुरशब्दः श्रूयते, स न दृश्यते, तदत्र कुञ्जे कयापि रममाणः शठोऽयं तिष्ठतीति वदन्त्याः पुनरुन्मादावेशादन्यसंभोगचिह्नाङ्कं समागतं पुरः पश्यन्त्यास्तं प्रत्यमर्षोदयः। पुनर्गतमिव मत्वा जातपश्चात्तापादौत्सुक्योदयः। अतस्तयोः संधि। तल्लक्षणानि (भक्तिरसामृत० २. ४. १०२)—

1. CD नास्मीति (?) for जानासीति. CB, CD insert सदैन्यं before आह. CB, CD हेति for हेत्यति-. 2. CB पदवीं त्वदप्राप्तिरूपपीडानुभवविषयं (CD corrupt) for विषयं. 2-3. CB, CD omit all words from तदनुभवो to कथं and read instead: तदनुभवे कृपालुस्त्वं दृग्गोचरो भविष्यतीत्यभिप्रायः। तदुपपादयन्नाह. 3. CD omits केवलो निरुपाधिको यो. 5. CB, CD ०कर्षकानन्द for ०कर्षक. CB, CD omit रूप after नाम. CB ०गुणादिना, CD गुणादि (corrupt) for ०गुणादिभिः. CD drops कृष्या to जगद्. CC omits पर after आत्म. 6. CB, CD insert तत्राह after दुर्लभता. CC, CD करुणैवैका for करुणैका. 7. CC inserts अपि after तत्र. 8. CB, CD तदपि कुतः for इदं तु कथं. CD महाभीष्ट० for मदभीष्ट०. CB, CD omit राधा before पते. CD omits, CB हे for अस्मत्. CD अभिलाष for अभिराम. 13. KP ०चिह्नाङ्कितमागतं. KB inserts इव after आगतं. 14. KC यतः, KP ततः for अतः.

स्वरूपयोर्भिन्नयोर्वा संधिः स्याद्भावयोर्युतिः ।

इति ।

अधिक्षेपापमानादेः स्यादमर्षोऽसहिष्णुता ।

कालाक्षमत्वमौत्सुक्यमिष्टेक्षाप्तिस्पृहादिभिः ।

(तत्र २. ४. ६३; २. ४. ६१) । तथा तावेव भावावाश्रित्य भावशाबल्यं च । तल्लक्षणम् (तत्र २. ४. १०४)—

शबलत्वं तु भावानां संमर्दः स्यात्परस्परम् ।

तत्रामर्षानुगा असूयौग्र्यावहित्थाः । औत्सुक्यानुगानि मतिदैन्यचापलानि । अत उन्मादोद्गताभ्यां भावसंधिभावशाबल्याभ्यां प्रलपन्त्या वचोऽनुवदन्नाह । अन्याङ्गनासंभुक्तं तं मत्वामर्षोदयात्सहजनिजधीराधीरमध्यात्वगुणमाश्रित्य सबाष्पं वक्रोक्त्या संबोधयति—हे देव । अन्याभिः सह दीव्यसीति देवस्त्वम् । अतस्तत्रैव गच्छेत्यर्थः । तल्लक्षणम् (उज्ज्वल०, नायिकाभेदप्रकरण ३७)—

धीराधीरा तु वक्रोक्त्या सबाष्पं वदति प्रियम् ।

इति । तदेवावधीरणाद्गतमिव तं मत्वा जातपश्चात्तापात्तद्दर्शनौत्सुक्येनाह—हे दयित । त्वं तु मे प्राणदयितोऽसि, कथं त्यक्ष्यसे, तत्पुनर्दर्शनं देहीत्यर्थः । पुनरागत्यानुनयन्तमिव तं मत्वामर्षानुगासूयोदयाद्धीरमध्यात्वमाश्रित्य वक्रोक्त्या सोल्लुण्ठमाह—हे भुवनैकबन्धो । तवात्र को दोषस्त्वं न केवलं ममैव सर्वगोपीनामपि । किमुत तासामेव, वेणुनादाकृष्टानां भुवनानां तदन्तर्गतस्त्रीणामपि बन्धुरसि । तत्सर्वसमाधानार्थं गच्छेत्यर्थः । तल्लक्षणम् (उज्ज्वल०, तत्रैव ३४)—

धीरा तु वक्ति वक्रोक्त्या सोल्लुण्ठं सागसं प्रियम् ।

इति । पुनर्गतमिव मत्वौत्सुक्यानुगमत्याख्यभावोदयादाह—हे कृष्ण हे श्यामसुन्दर

2. KC, KP omits इति. 4. KC इष्टे प्राप्ति० for इष्टेक्षाप्ति०. 5. KP omits तथा. 7. KB हि for तु. 8. KD अत्र for तत्र. 9. KA ०उद्गूताभ्यां, KP ०अनुगताभ्यां. KC inserts ताभ्यां before भावसंधि०. 10. KC, KP ०मध्यात्वं for ०मध्यात्वगुणं. 11. KA, KB insert इति after देव. 14. KA omits इति. 16. KP धीराधीर० for धीर०. KA ०मध्यात्वगुणं for ०मध्यात्वं. 18. KC, KP तद्गत० for तदन्तर्गत०. 19. KA, KD omit सर्व in तत्सर्व०. 20. KB सोत्प्रासं for सोल्लुण्ठं.

चित्ताकर्षक। चित्तं त्वया हृतम्, किं मे मानेन, तत्सकृदपि दर्शनं देहीति भावः। पुनरागत्य प्रिये मया बहिरेव स्थितम्, न कुत्रापि गतम्, प्रसीदेत्यनुनयन्तमिव मत्वौग्र्योदयादधीरमध्यात्वगुणमाश्रित्य सरोषमाह—हे चपल वल्लवीवृन्दभुजङ्ग। परस्त्रीचौर गच्छ गच्छेत्यर्थः। तल्लक्षणम् (तत्र ३७)—

अधीरा परुषैर्वाक्यैर्निरस्येद्वल्लभं रुषा।

इति। पुनर्गतमिव मत्वा हन्तावधीरणाद्गतोऽयं पुनर्नैष्यतीति दैन्योदयात्सकाकु प्राह—हे करुणैकसिन्धो। यद्यप्यहमपराधिनी तथापि त्वं करुणाकोमलत्वाद्दर्शनं देहीत्यर्थः। पुनरागत्य प्रिये किमिति मुधा मानेन मां कदर्थयसि प्रसीदेत्यनुनयन्तमिव मत्वामर्षानुगावहित्थोदयाद्धीरप्रगल्भागुणमाश्रित्य सौदासीन्यमाह—हे नाथ। त्वं तु व्रजवासिनां नो रक्षितासि, का नाम हतधीस्त्वां न संभाषते, किं तु ब्राह्मणीभिर्व्रतार्थं मौनं ग्राहितास्मि, तत्क्षन्तव्योऽयं ममापराध इति भावः। तल्लक्षणम् (तत्र ५०)—

उदास्ते सुरते धीरा सावहित्था च सादरा।

इति। पुनर्गतमिव मत्वा मुहुर्निरस्तोऽसौ नायास्यत्येवेति चापल्योदयाद्यदि कृपया पुनर्दर्शनं ददाति तदा स्वयमेव तं कण्ठे ग्रहिष्यामीति सदैन्यमाह—हे रमण। सदा मां रमयतीति रमणस्त्वम्। इदानीमप्यागत्य तथा कुर्वित्यर्थः। पुनरागतं मत्वा तिरस्कृतागन्तुकामर्षभावेन प्रबलसहजौत्सुक्येनाक्रान्तमनस्तया तदाश्लेषाय प्रसारितबाहुयुगला तमलब्ध्वा जातबाह्यस्फूर्तिः सविक्लवमाह—हे नयनाभिराम नयनानन्द कदा नु मे दृशोः पदं गोचरो भवितासि। हा हेत्यतिखेदे॥ स्वान्तर्दशायां तु—श्रीराधासंगमार्थमनुनयन्तमिव तं मत्वा तं प्रत्य-

1. KA अतः for तत्. 2. KC, KP अर्थः for भावः. 3. KC, KP ०मध्या० for ०मध्यात्व०. 6. KP omits इति after नैष्यति. 7. KA, KD insert स्वस्य, KB स्वयं after त्वं. 8. KP omits अर्थः. KP inserts तत् before पुनः. 9. KD ०प्रगल्भात्व० for प्रगल्भा०. 10. KB omits तु. KD व्रजवासिनीनां. KD inserts भीत्वा after हतधीस्त्वां. 11. KP omits मौनं. KA, KB omit इति भावः. 14. KC, KP ०चापलो० for चापल्यो०. 15. KA ग्राहयिष्यामि. 17. KP पुरागतमिव for पुनरागतं. 18. KC आलब्धा for अलब्ध्वा. 19. KA, KD नयनानन्दन. 19-20. KA खेदे for अतिखेदे. KC, KP insert आत्मानं before अनुनयन्तं. KC, KP omit तं मत्वा.

मर्षोदयः। गतमिव मत्वा तया संगमनायौत्सुक्यम्। अन्यद्यथायोग्यं ज्ञेयम्। आरूढानुरागदशायां भक्तस्य साधकशरीरेऽपि तत्तद्भावोदयात्॥ बाह्ये—यथायथं संबोधनेषु दैन्यौत्सुक्यादिभावो ज्ञेयः॥४०

अमून्यधन्यानि दिनान्तराणि
हरे त्वदालोकनमन्तरेण।
अनाथबन्धो करुणैकसिन्धो
हा हन्त हा हन्त कथं नयामि॥४१

कृष्णवल्लभा

प्रारब्धक्षयविलम्बमप्यसहमानः श्रीकृष्णदर्शनोत्कण्ठार्तिभरेण कातरस्तं प्रत्याह—अमूनीति। हे हरे दुःखहरणशील। त्वमेवास्मद्दुःखहर्तेति भावः। त्वदालोकनं त्वद्दर्शनमन्तरेण विनामून्यागामीनि दिनान्तराणि दिनमध्यानि कथं केनावलम्बनेन। हा हन्त हा हन्तेति खेदे वीप्सा। नयामि गमयामि। यतोऽधन्यान्यभद्राणि। अतिदुःखप्रदत्वात्। पूर्वाणि तु कथंचिद्ध्यानरसेन गमितानि। प्रतिपदमुत्कण्ठाया अतिवर्धमानत्वात्

त्रुटिर्युगायते

(भा० १०. ३१. १५) इत्यादिवत्क्षणमपि दिनान्तरवत्प्रतिभाति। आयास्यन्त्यन्यान्येव महाघोराणि दिनानि तु कथं गमयितुं शक्ष्यन्त इति भावः। अतिदुःखितवदाह—हे अनाथबन्धो। मद्विधानन्यनाथस्य त्वमेव बन्धुः, मद्विधेऽनन्यनिवर्तनीयदुःखे त्वमेव पूर्णकर्ता नान्य इत्यर्थः। हे करुणैकसिन्धो कृपासमुद्र। अतः प्रारब्धक्षय-विलम्बं परिहृत्य दर्शनं देहीति भावः। अथवैवं योजना—हे अनाथबन्धो। त्वदित्यव्ययम्। त्वद्गतेनान्तरेणान्तरात्मना। आलोकनम् आ समन्तात्वदन्य-दृष्टिमात्रदर्शनं हे हरे दूरीकरोमि। किं तु, हे करुणैकसिन्धो अमून्यधन्यानि दिनान्तराणि कथं नयामि नेष्ये। वर्तमानसामीप्ये वर्तमानवद्वा (पा० ३. ३. १३१) इति लट्॥ उपेन्द्रवज्रा छन्दः॥४१

3. KD ०भावा ज्ञेयाः. 9. GB inserts संप्रति before प्रारब्ध०. 15. GB तृसिः for त्रुटिः. 21. GA संमतं for आ समन्तात्. 22. GB omits हे हरे. 24. The metre is Upajāti.

सुबोधनी

अथोत्कण्ठयात्यार्तः कालनिर्यापनासामर्थ्यं निवेदयन्नाह—हे हरे त्वदालोकनं विनामून्यधन्यानि दिवसानामन्तराणि मध्यानि। रात्रीरित्यर्थः। तदभिसरणस्मारकरात्रीः केनोपायेनातिवाहयामीति त्वमेवोपदिशेत्यर्थः। कस्त्वं मे यत्तदुपदिशामि—येऽनाथा हे तेषां वन्धो। तदपि कुतः—हे करुणैकसिन्धो ॥४१

सारङ्गरङ्गदा

अथ पुनर्विरहवह्निज्वालोच्छलितोद्वेगायाः क्षणमप्यहर्गणान्मत्वा सवैक्लव्यं प्रलपन्त्या वचोऽनुवदन्नाह—हे हरे अमूनि दिनस्याहोरात्रस्यान्तराणि मध्यगतानि। क्षणवृन्दानीति शेषः। अमूनि कोटिकल्पतुल्यत्वेनातिवाहितुमशक्यानीति वा। हा खेदे। हन्त विषादे। तयोरतिशये वीप्सा। त्वदालोकनं विना कथं नयाम्यतिवाहयामि। तत्त्वमेवोपदिशेत्यर्थः। तद्धेतोरेवाधन्यानि। ननु यद्यनङ्गतप्तासि तदा

पतयश्च वः।

विचिन्वन्ति

इतिदिशा (भा० १०. २९. २०) तमेव गच्छेत्युट्टङ्क्य

पतिसुतादिभिरार्तिदैः किम्

(भा० १०. २९. ३३) इति वदन्नाह—हे अनाथबन्धो। अनाथानां त्यक्तपतीनां वल्लवीनां नस्त्वमेव बन्धुरसि। ते तु दुःखदास्त्यक्ता एवेत्यर्थः। ननु भर्तुः शुश्रूषणं वो धर्मः (भा० १०. २९. २४) इदमयोग्यमित्यत्र

2. CC पुनः for अथ. CB omits all words from उत्कण्ठयात्यार्तः to यापना (in ०निर्यापनासामर्थ्यं) but leaves blank space for them ; CD reads अत्युद्रिक्तोत्कण्ठयार्तः कालनिर्यापन०. CB, CD read आवेदयन् for निवेदयन्, and insert अमूनीति after आह. 3-4. CB, CD omit तदभिसरणस्मारकरात्रीः. 4. CB कथमहमेव, CD कथमेव, CC किमित्यहं for कस्त्वं मे यत्. 5. CB, CD insert इत्यत आह after उपदिशामि. CB omits हे, CD reads ते for it. CB, CD यतः for तदपि कुतः. After करुणैकसिन्धो CB, CD continue : कारुण्येनैव त्वदभिसारस्मारककालयापनोपायमुपदिशेत्यर्थः. 7. KA, KD अमत्वा for मत्वा. 9. KC क्षणजातानि for क्षणवृन्दानि. 10. KP अतिशयेन. 14. KC, KP omit इतिदिशा. 17. KC omits तु,

चित्तं सुखेन भवताऽपहृतम्

(भा० १०. २६. ३४) इतिवदाह—हे हरे चित्तेन्द्रियादिहारिन्। सोऽयं तवैव दोष इत्यर्थः। ननु कामिन्यो यूयं चपला एव, मया कथं धर्मस्त्याज्यः, तत्र

तन्नः प्रसीद

(भा० १०. २६. ३८) इतिवत्सदैन्यमाह—हे करुणैकसिन्धो। कृपासिन्धुत्वाद्धर्ममप्युल्लङ्घ्य दीनान्नोऽनुगृहाणेत्यर्थः॥ स्वान्तर्दशायाम्—अनया तथा क्रीडतस्तव दर्शनं विना। अन्यत्समम्॥ बाह्यार्थः स्पष्टः॥४१

किमिह कृणुमः कस्य ब्रूमः कृतं कृतमाशया
कथयत कथामन्यां धन्यामहो हृदयेशयः।
मधुरमधुरस्मेराकारे मनोनयनोत्सवे
कृपणकृपणा कृष्णे तृष्णा चिरं बत लम्बते॥४२

कृष्णवल्लभा

संप्रति श्रीकृष्णदर्शनादितृष्णामतिदुर्निवारामाह—किमिहेति। इह प्रबलतरायां तृष्णायां सत्यां किं कृणुमः किं हन्तुमिच्छामः। कृणुम इति कृ विजिघांसायाम् (धा० ५. ७) इति धातोः। यद्वा, किं कृणुमः किं कुर्मः। धातूनामनेकार्थत्वात्। यथा

कृणु कुचेषु [नः] कृन्धि हृच्छयम्

इति श्रीदशमे (भा० १०. ३१. ७)। अलभ्यपदार्थानुसंधानरहितत्वात्। कस्य ब्रूमः। कस्यापि कृतिनस्तत्र न प्रभुत्वम्। कस्येति कर्मणि शेषविवक्षायां षष्ठी

1. KB inserts गृहेषु after अपहृतं. 2. KD इति वदन् for इतिवत्. KC, KP omit आदि after ०इन्द्रिय. 7. KP inserts न after विना. 8. PS श्रृणुमः for कृणुमः and कथं कृतं for कृतं कृतं 9. Gopāla Bhaṭṭa and v. l. in Kṛṣṇadāsa कथयतु; PS adds पाठान्तरमसमीचीनम्. PS कथं धन्या मन्यामहे for कथामन्यां धन्यामहो. PS हृदयेशयम्. 11. PS transposes कृष्णे तृष्णा. 13. GB ०दुर्वारां for दुर्निवारां, and किमिति for किमिहेति. 14. GB omits कृ. The Dhātupāṭha reads कृञ् हिंसायाम्. 15. GB omits किं कृणुमः. 17. GB दशमे.

(पा० २. ३. ५०)। ममात्र दुरन्ततृष्णा जाता कथं तत्प्राप्तिरिति परमहास्यास्पदत्वात्। अहो इति सचमत्कृते खेदे। एतादृश्याशया कृतं कृतं व्यर्थमेव। केनापि मा क्रियतामिति। कस्याग्रे कृतं ब्रूम इति वा। तुष्णींभावः श्रेयानिति, यतः सर्व एवेदानीं मे प्रतिकूलाः। तद्वैमुख्ये सर्वस्यैव वैमुख्यात्। उक्तं च माघे (९. ६)—

प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥

इति। हृदये शेत इति हृदयेशयः। शयवासवासिष्वकालात् (पा० ६. ३. १८) इति सप्तम्यलुक्। हृदयेशं याति प्राप्नोतीति वा हृदयेशयो मनोरागः। अन्यां कामपि तत्संबन्धिनीं धन्यां प्राणधनकरीं कथां कथयत्वित्याशिषि लोट् (पा० ३. ३. १७३)। यया सुखं तिष्ठामीति शेषः। तदपि न संगच्छत इत्याह —तृष्णा चित्तगतवाञ्छा कृष्णे सर्वाकर्षके चिरं प्रतिक्षणं लम्बते स्रंसते। सर्वतश्च्युतापि तस्मिन्नेव स्रस्ता भवतीत्यर्थः। वृक्षाद्गलितं पत्रादि पुनरपि तत्र पूर्ववल्लगति तद्वत्। तृष्णा कीदृशी—कृपणकृपणातिदरिद्रा। यथा यथा पूर्तिर्भवति तथा तथा वर्धत इत्यर्थः। कृष्णं विशिनष्टि—मधुरमधुरस्मेराकारे। मधुरादपि मधुरः स्मेर ईषद्धास्ययुक्त अतिरसावेशादुल्लासविशेषप्राप्त इति वाकार आकृतिर्यस्य तस्मिन्। यद्वा, मधुरमधुरोऽतिशयमधुरो यः स्मेरः स एवा समन्तात्कारा बन्धनगृहं यस्मिन्। पुनर्विशिनष्टि—मनोनयनोत्सवे। मनोनयनयोर्मूर्तिमानुत्सवो यस्तस्मिन्॥ हरिणी छन्दः—

नसमरसला गः षड्वेदैर्हयैर्हरिणी मता (छन्दोमञ्जरी २) ॥४२

1. GB transposes कथं and तत्प्राप्तिः. 2. GC हास्यास्पदत्वम्. 8-9. GB omits from शयवास० to अलुक. 12. GB सर्वोत्कर्षके. 13. GB लग्ना for स्रस्ता. GB पुष्पपत्रादि for पत्रादि. 15. GB omits मधुरमधुरस्मेराकारे. 16. GB omits from अतिरसा० to इति वा. 18. GA कारं धनं गृहं for कारा बन्धनगृहं. GB यत्र for यस्मिन्. GB omits विशिनष्टि. 19. GC यस्मिन् for यस्तस्मिन्. 20. GA omits the definition of the metre. GB inserts इति after मता.

सुबोधनी

अथातिव्याकुलः सनिर्वेदमाह—कृष्णे तृष्णा कृपणादप्यतिकृपणा सती, बत खेदे, चिरकालं व्याप्य लम्बते प्रतिक्षणं वर्धते। इह तन्निमित्तं कमुपायं कुर्मः। त्वमुपायमुपदिशेति। कस्य वा ब्रूमो वक्तुमपि न शक्नुमः। अत आशया यत्कृतं तत्कृतं विफलमेव। अथ स्वान्प्रति सविमर्शमाह—तत्कथा त्यक्त्वान्यां कामपि धन्यां सफलां वार्तां कथयत। तदैव हृदि स्फूर्त्या साश्चर्यमाह—अहो यत्कथां त्यक्तुमिच्छामः स एव हृदि वर्तते। अतः कथं तत्त्याग इत्यर्थः। तृष्णावृद्धौ हेतुः—मधुरादपि मधुरस्तथा स्मेरः स्वाभाविकस्मितयुक्त आकारो यस्य तस्मिन्। अतो मनोनयनयोरुत्सवो यस्मात् ॥४२

सारङ्गरङ्गदा

अथोद्वेगेन पुनर्भावशाबल्योदयात्प्रलपन्त्या वचोऽनुवदन्नाह। प्रथममावेगोदयादाह—हे सख्यः, इह वैशसे तत्किं कृणुमो येन तद्दर्शनं स्यात्। ततस्ता अपि व्यग्रा दृष्ट्वा चिन्तोदयादाह—कस्य ब्रूमः। यूयमपि तुल्यावस्था एव, तदन्यं कं येन भद्रं स्यात्तत्पृच्छाम इत्यर्थः। तदैव तामाच्छाद्य मत्याख्यभावोदयाद्

2. CB, CD पुनस्तथैव for अथातिव्याकुलः. CB, CD insert किमिहेति after आह and omit कृष्णे. 3. CB, CD insert कृष्णे before चिरकालं and read वृद्धिमयते for वर्धते. CC एतत् for तत् (after इह). CB स्वमन्वेषितुं for तन्निमित्तं. CD inserts किं after तन्निमित्तं. CB, CD insert बहुवचना(CD बहुवचनं सङ्गिनो)भिप्रायेण after कुर्मः. 4. CB, CD तं for त्वं. 5. CB ततः, CD अतः for अथ स्वान्प्रति सविमर्शमाह. 6. CC कथां for वार्तां. CB, CD श्रीकृष्णस्फूर्त्या for स्फूर्त्या. 7. CB तत् for अतः. CD drops अतः कथं तत्त्यागः. CB, CD insert स्यात् before इत्यर्थः. 8. CD omits मधुरादपि मधुरस्तथा स्मेरः. CA तथाभूतः for तथा. 9. CC omits तस्मिन्. CD आकर्षणं for उत्सवः. CB, CD insert तस्मिन् after यस्मात्. 11. KB प्रथम- for प्रथमं. 12. KC वैषम्ये for वैशसे. KA omits तत् before किं. KP भवद्दर्शनं for तद्दर्शनं. 13. KC insert मत्- before तुल्यावस्थाः. KP तदन्यः कः. 13-14. KB तदन्यं कं पृच्छामो येन भद्रं स्यात्. 14. KP भावं for भद्रं. KP तदेव for तदैव.

आशा हि परमं दुःखम्

(भा० ११. ८. ४४) इत्यादिवदाह—आशया तदाशया यत्कृतं तत्कृतमेव। अन्यन्न कर्तव्यम्। किं वा, तया यत्कृतं तत्कृतं व्यर्थम्। तत्तां त्यजतेत्यर्थः। तदैवामर्षोदयादाह—अतस्तस्याकृतज्ञस्य वार्तां त्यक्त्वान्यां कामपि धन्यां पुण्यां कथां कथयत। कथयत्विति पाठे—एका सखीं प्रत्युक्तिः। भवतीत्यर्थात्। तदैव हृदि स्फुरन्तं कृष्णं शरैर्विध्यन्तं कामं मत्वा तमाच्छाद्य त्रासोदयात्सवैक्लव्यमाह—अहो कष्टम्, हृदयेशयः कामः शत्रुरयं मारयति, किं कुर्म इत्यर्थः। किं वा, हृदि कृष्णस्फूर्त्या साश्चर्यविषादमाह—अहो यत्कथामपि त्यक्तुमिच्छामः स एव हृदि वर्तते। तत्कथं तत्त्यागः स्यादित्यर्थः। ततस्तामाच्छाद्य सहजौत्सुक्योदयात्

तज्जानतीनां नः कृष्णे

(भा० १०. ४७. ४७) इतिवत्सविषादमाह—मधुरेति। बतेति खेदे। अस्तु तावत्त्यागः प्रत्युत कृष्णे चिरं तृष्णा लम्बते प्रतिक्षणं वर्धते। कीदृशी—कृपणादपि कृपणा। उत्कण्ठयातिदीनेत्यर्थः। कीदृशे—मधुरादपि मधुरः स्मेरो मदनमर्दादिभिरुत्फुल्लश्चाकार आकृतिर्यस्य तस्मिन्। अतो मनोनयनयोरुत्सवो यस्मात्तस्मिन्॥ स्वान्तर्दशायां तु पूर्ववदर्थः॥ बाह्यार्थः स्पष्टः॥४२

आभ्यां विलोचनाभ्यामम्बुरुहविलोचनं बालम्।
द्वाभ्यामपि परिरब्धुं दूरे मम हन्त दैवसामग्री॥४३

1. KB inserts नैराश्यं परमं सुखं after दुःखं. 2. KB इतिवत्, KD इत्यादि वदन् for इत्यादिवत्. 3. KA omits तत्कृतं before व्यर्थं. KB त्यज, KD त्यजामि for त्यजत. 4. KB omits पुण्यां. KP omits कथां. 5. KD omits उक्तिः. KB अर्थः for अर्थात्. KB तमेव, KP तदेव for तदैव. 6. KB, KD विध्यत्कामं, KC विध्य कामं for विध्यन्तं कामं. 7. KB inserts तत् before किं. 7-9. All words from किं वा to स्या[illegible]र्थः missing KP. 8. KC साश्चर्यं for साश्चर्यविषादं. 9. KC तं for तां. KP आसाद्य for आच्छाद्य. 11. KC, KP इत्यादिवत् for इतिवत्. 13. KA, KB insert च after स्मेरः. 14. KB omits च after उत्फुल्लः. 15. KB, KD अन्तः for स्वान्तः. After पूर्ववदर्थः, KC inserts : आरूढानुरागदशायां भक्तस्य साधकशरीरे तत्तद्भावोदयात (Cf. end of comment on verse 40). 16. PS अम्बुजदलललितलोचनं.

कृष्णवल्लभा

पूर्वं मधुरमधुरस्मेराकारश्चक्षुर्भ्यामालिङ्गितः। संप्रति तद्भाग्यं नास्तीत्याह—आभ्यामिति। द्वाभ्यां विलोचनाभ्याममम्बुरुहविलोचनम्। अम्बुरुहं कमलं तद्वद्विशिष्टे ईषदरुणकोमलगुणयुक्ते लोचने यस्य तम्। बालं सुकुमारं परिरब्धुमालिङ्गितुं दर्शनानन्दातिलालसया तत्रैव मग्नमिव कर्तुम्। हन्त खेदे। मम दैवसामग्री भाग्यरूपा सामग्री दूरे। समीपे न दृश्यत इत्यर्थः। तादृशभाग्यस्यासंभवात्। खेदबाहुल्येन क्रियापदस्य वक्तुमशक्यत्वात्। आभ्यां द्वाभ्यामपीति, इदं-द्वि-शब्दयोरयं भावः—नयनयोरेकस्मिन्रुध्यमानेऽन्यत्रानन्दाश्रुसंवलितत्वेन तथैव स्थित इति द्वाभ्यामपीत्यधिक्षेपोक्तिः॥ आर्या छन्दः॥४३

सुबोधनी

पुनरपि तथैवाह—आभ्यां द्वाभ्यामपि विलोचनाभ्याममम्बुरुहलोचनं बालं परिरब्धुं द्रष्टुं मम दैवसामग्री तादृशभाग्यरूपदर्शनसाधनं हन्त दूरे। नास्त्येवेत्यर्थः। भावगर्भितैकनेत्रापाङ्गदर्शनं तावदास्ताम्, सामान्यतो द्वाभ्यामपि द्रष्टुं भाग्यं नास्तीत्यर्थः॥४३

सारङ्गरङ्गदा

अथात्याधिभारोत्पन्नतानवातिशयाद् ग्लानिरुत्पन्ना। तच्चेष्टा त्रिभिः श्लोकैः। तत्र प्रथमं भूमौ निपत्य नेत्रे निमील्य तददर्शनोत्पन्नविषाददैन्याभ्याम् अधुनैवागतं तं परिरप्स्यसे धैर्यं कुर्वित्याश्वासयन्तीः सखीः प्रति सनैराश्यं प्रलपन्त्या वचोऽनु-

3. GB omits अम्बुरुहविलोचनं 5. GB ०नन्दातिशयलालसतया. GC inserts इति after हन्त. 6. GB तादृक्० for तादृश०. 7. GB न क्रियापदमिति for क्रियापदस्य वक्तुमशक्यत्वात्. GB omits अपि. GC इदंशब्द- for इदं-. GA drops द्वि before शब्दयोः. 9. GB omits द्वाभ्यामपि. 11. CB, CD insert आभ्यामिति after आह. CD लोचनाभ्यां. CB ०विलोचनं for ०लोचनं. 12. CB, CD omit द्रष्टुं. 13. CC ०गर्वित० for ०गर्भित०. CB, CD ०नेत्र० for ०नेत्रापाङ्ग०. CB, CD transpose अपि and द्रष्टुं. 14. CB, CD अपेरथः for अर्थः. 16. KD अत्यधिक० for अत्याधि०. KP ०भर० for ०भार०. 17. KD, KP तद्दर्शन० for तददर्शन०. 18. KA omits तं. KP आश्वासयन्तीं सखीं. KP नैराश्यं for सनैराश्यं.

वदन्नाह—आगतेऽप्यस्मिन्नशक्त्या भुजचालनाद्यसामर्थ्यात्साक्षादालिङ्गनं दूरे तावदास्ताम्, विलोचनाभ्यामपि तं बालं किशोरशेखरं परिरब्धुं मम दैवसामग्री भाग्यरूपदर्शनसाधनं दूरे। नास्त्येवेत्यर्थः। हन्त विषादे। विषादे हेतुः—अम्बिवति। तत्रापि भावोद्गारिवामनेत्रप्रान्तेन दर्शनमास्ताम्, द्वाभ्यामपीतरजनवद्दर्शनभाग्यं नास्तीत्याह—द्वाभ्यामपि। नन्वधुनैव द्रक्ष्यसि, किमिति खिद्यस इत्यत्र नेत्रोन्मीलने प्रयतमाना तदशक्त्याह—आभ्याम्। स चेदागच्छेदागच्छतु नाम, मम पुनराभ्यां तद्दर्शनं नास्त्येवेति भावः॥ स्वान्तर्दशायाम्—तया सह विलसन्तं तम्। अन्यत्समम्॥ बाह्यार्थः स्पष्टः॥४३

अश्रान्तस्मितमरुणारुणाधरोष्ठं
हर्षार्द्रं द्विगुणमनोज्ञवेणुगीतम्।
विभ्राम्यद्विपुलविलोचनार्धमुग्धं
वीक्षिष्ये तव वदनाम्बुजं कदा नु॥४४

कृष्णावल्लभा

अथात्यपूर्वमाधुरीचमत्कारभरं विभ्रच्छ्रीकृष्णमुखाम्बुजं द्रष्टुमाशास्ते—अश्रान्तेति। न्विति पृच्छायाम्। भो नाथ कदा तव वदनाम्बुजं वदनकमलं वदनचन्द्रं वा।

अब्जो जैवातृकः सोमः

इत्यमरः (१.२.१५)। वीक्षिष्ये विशेषेण द्रक्ष्यामि। कीदृशम्—अश्रान्तस्मितम्। अश्रान्तमनवरतं स्मितं यत्र तत्। अतिशयानन्दोदयात्। पुनः कीदृशम्—

1. KP तत्- for साक्षात्. 2. KP omits परिरब्धुं. KB inserts दूरे after परिरब्धुं, and हन्त after मम. 3. KP ०सादनं for ०दर्शनसाधनं. KC, KP insert सा before नास्ति. 4. KP तव for इतर-. 6. KC, KP प्रयतन्ती for प्रयतमाना. 7. KA स्वन्तः० for स्वान्तः०. 11. v.l. in Gopāla Bhaṭṭa ०विलोचनार्द्रं०. 14. GC ०चमत्कारं for चमत्कारभरं. 15-16. GA कमलं चन्द्रं for वदनकमलं वदनचन्द्रं GB चन्द्रं for वदनचन्द्रं. 18. GB omits अश्रान्तस्मित. 19. GB omits कीदृशं.

अरुणारुणाधरोष्ठम् । अरुणादप्यरुणम् । अत्यरुणमिति वीप्सायां द्विर्भावः । ओष्ठाधरमधरोष्ठं यस्य तत् । अरुणवदरुणं वा ।

अरुणोऽव्यक्तरागेऽर्के संध्यारागेऽर्कसारथौ ।

इति मेदिनी (णान्त० ३३) । पुनः कीदृशम्—हर्षार्द्रद्विगुणमनोज्ञवेणुगीतम् । हर्षणार्द्रं स्निग्धमतएव द्विगुणं मनोज्ञं मनोहरं वेणुगीतं वंशीरवविरचितविविधगानविशेषो यत्र तत् । यद्वा, हर्षणार्द्रः स्वेदसात्त्विकभावात्तश्च द्विगुणमनोज्ञो यो वेणुस्तस्य गीतं यस्मिंस्तत् । पुनः कीदृशम्—विभ्राम्यद्विपुलविलोचनार्धमुग्धम् । विभ्रमतोर्वैदग्ध्यीपूर्वं भ्रमतोर्विपुलयोर्विशालयोर्विशिष्टलोचनयोर्यदर्धं तेन मुग्धं मनोहरम् । विलोचनार्द्रमिति पाठे - विभ्राम्यद्भ्यां विपुलाभ्यां विलोचनाभ्यामार्द्रं च तन्मुग्धं चेति । आर्द्रार्द्रेति पौनरुक्त्यं न दोषः, औत्सुक्यात् ।। प्रहर्षिणी छन्दः ।।४४

सुबोधनी

पुनरुद्यदुत्कण्ठागुण्ठितः प्रार्थयते—नु भो श्रीकृष्ण तव वदनाम्बुजं कदा वीक्षिष्ये । अम्बुजतामापादयन्नाह—अश्रान्तं सततं स्मितं प्रकाशो यस्मिन् । तथाप्रकाशे हेतुः—अरुणादप्यरुणावधरोष्ठौ यत्र । स्मितमपि कथम्—हर्षणार्द्रमतएव द्विगुणमनोज्ञं वेणुगीतं यत्र । तत्प्रकारमाह—विशेषेण भ्रामतोर्भ्रमरवच्चञ्चलयोः प्रियेक्षणोत्फुल्लविलोचनयोरर्धेनापाङ्गेन वीक्षणेन मनोहरम् ।।४४

1. GB omits the phrase अरुणारुणाधरोष्ठं· 4. GB omits कीदृशं and the phrase हर्षार्द्रद्विगुण etc. 6. GB सात्त्विक० for स्वेदसात्त्विक०. 6-7. GA यस्तस्य वेणुगीतं for यो वेणुस्तस्य गीतं 7. GB omits कीदृशं and the phrase विभ्राम्यद्विपुल etc. 8. GB वैदग्ध्य०. GB लोचनयोः for विशिष्टलोचनयोः. 9-10. GB drops all words from विलोचनार्द्रं to चेति. 13. CB, CD केवलोत्कण्ठायाव० for उद्यदुत्कण्ठा०. CB, CD insert अश्रान्तेति after प्रार्थयते. 14. CD अम्बुजभावमापादयन्नपि· CB, CD insert वैशिष्ट्यं before आह. CB, CD निरन्तरं for सततं, and यत्र for यस्मिन्. 15. CB, CD omit प्रकाशे and हेतुः. CB omits स्मितमपि कथं· 15-17. CD omits all words from स्मितमपि to मनोहरं· 15. CB omits एव. 16. CB तथा for तत्प्रकारमाह· 17. CB विपुल० for प्रियेक्षणोत्फुल्ल०. CB तत्प्रान्त- for अपाङ्गेन,

सारङ्गरङ्गदा

पुनः स्वप्रेरकतच्छ्रीमुखस्फूर्त्या विषादौत्सुक्याभ्याम्

जह्यामसून् व्रतकृशा शतजन्मभिः स्यात्

(भा० १०. ५२. ४३) इतिवत्,

ध्यानेन याम पदयोः पदवीं सखे ते

(भा० १०. २९. ३५) इतिवच्च तं प्रति प्रलपन्त्या वचोऽनुवदन्नाह—नु भो श्रीकृष्ण तव वदनाम्बुजमत्र जन्मनि न दृष्टमेव, कदापि जन्मान्तरेऽपि वीक्षिष्ये। कीदृशम्—अश्रान्तं सततं स्मितं यस्मिन्। ईषत्स्मितं वा। अरुणारुणावरुणादप्यरुणौ ग्लानितमोन्नावधरोष्ठौ यस्मिन्। मत्प्रेरणदर्पणार्द्रमतो द्विगुणमनोज्ञं वेणुगीतं यस्मिन्। मत्प्रेरणार्थं विभ्राम्यद्विपुलविलोचनयोर्यद्‌धं तेन मुग्धं च यत्॥ स्वान्तर्दशायाम्—पूर्ववत्॥ बाह्यार्थः स्पष्टः॥४४

लीलायताभ्यां रसशीतलाभ्यां
नीलारुणाभ्यां नयनाम्बुजाभ्याम्।
आलोकयेदद्भुतविभ्रमाभ्यां
काले कदा कारुणिकः किशोरः॥४५

कृष्णावल्लभा

संप्रति श्रीकृष्णस्यावलोकनविशेषमाशास्ते—लीलायिताभ्यामिति। किशोरो रसमयकिशोरावस्थो नयनाम्बुजाभ्यां कदा कस्मिन् काले समये आलोकयेदालोकयिष्यति। कारुणिको मद्दुःखासहिष्णुः। कारुणिकत्वाद्दर्शनं संभवतीत्यौत्सुक्यम्। कीदृशाभ्याम्—लीलायिताभ्याम्। लीला शृङ्गारभावजा क्रिया

2. KD स्वप्रेरकतया श्रीमुख०. 5. KA, KD omit सखे ते. 6. KB कृष्ण for श्रीकृष्ण. 7. KB मम for अत्र. 8. KA omits अरुणारुणौ. KD, KP insert अत्य.रुणौ before अरुणात्. KD omits अरुणादप्यरुणौ. 9. KP ०तमोन्नाधरोष्ठौ. KP ०प्रेरणा० for ०प्रेरण०. 10. KD ०लोचनयोः for ०विलोचनयोः. 11. KC, KP बाह्ये स्पष्टोऽर्थः. 12. Gopāla Bhaṭṭa लीलायिताभ्यां. 17. GB लीलेति for लीलायिताभ्यामिति. 20. GB omits लीलायिताभ्यां.

तयाऽयितं गतं ययोस्ताभ्याम् । अत्याश्चर्यलावण्यगतियुक्ताभ्यामित्यर्थः ।

हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः ।

इत्यमरः (१. ६. ३२)। रसशीतलाभ्याम्—रसेन शृङ्गारादिना शीतलाभ्यां स्निग्धाभ्याम्। मध्यतो नीलं प्रान्ततोऽरुणं च ययोस्ताभ्याम्। तारकानीलिमसहजारुणिममिश्रितमदोद्भूतारुणगुणयुक्ताभ्यामित्यर्थः। अद्भुतविभ्रमाभ्याम्—अद्भुतो विभ्रमो विलासो भ्रमणं वा ययोस्ताभ्याम् ।

विभ्रमो भ्रान्तिहावयोः

इति मेदिनी (मान्त ५२)। अद्भुतो विभ्रमो भूषास्थानविपर्ययो याभ्याम्। यल्लावण्यनिरीक्षणेन सर्वेषां सर्वमपि विस्मृतं भवतीति ।

अस्थाने भूषणादीनां विन्यासो विभ्रमो मतः ।

इति मेदिनी । एतेन नयनयोः सुकोमलत्वमतिदीर्घत्वं लीलारसमयत्वं च सूचितम् ।। इन्द्रवज्रा छन्दः ।।४५

सुबोधनी

अथ दैन्यात्स्वायोग्यतां मत्वा तदालोकनमाशास्ते—स किशोरो नयनाम्बुजाभ्यां कदा काले तादृशभाग्योदयसमये। मामित्यध्याहारः। आलोकयेत्। तत्संभावयन्नाह—कारुणिकः। कारुण्यान्मां पश्येदित्यर्थः। कीदृग्भ्याम्—लीलाप्राचुर्याल्लीलेवाचरतो ये ताभ्याम्। तत्कथम्—शृङ्गाररसेन शीतलाभ्याम्।

1. GA omits गति. 2. GC omits haplologically all words from शृङ्गारभावजा (p. 158, l. 20) to क्रियाः (l. 2). 3. GB पुनः for रसशीतलाभ्यां. 4. GB inserts तथा before मध्यतः. 5. GB तथा for अद्भुतविभ्रमाभ्यां. 7. Cf. Viśva, mānta 39. 10. This quotation does not occur in the Medinī, but in Sāhitya-darpaṇa iii, 104. 14. CB, CD omit all words from अथ to आशास्ते and read instead : पुनर्दैन्येन स्वायोग्यतामननात्तद्दर्शनं प्रार्थयते—लीलायिताभ्यामिति. CB, CD कारुणिकः for सः. 15. CC transposes मामित्यध्याहारः and आलोकयेत्. 15-16. CB, CD omit all words from तादृशभाग्योदयसमये to कारुण्यात् and read instead : आलोकयेत्। करुणादृष्ट्या (CD omits करुणा) कदा. 17. After ताभ्यां CB, CD insert लीलयैवालोकयेदित्यर्थः. CC inserts अपि after तत्. CB, CD omit तत्कथं. CB, CD रसेन शृङ्गारेण for शृङ्गाररसेन.

तल्लक्षणमाह—तत्स्वाभाव्येन नीले जागरादरुणे ये, अतएवाद्भुतो विलासो ययोः। तद्दर्शनभाग्यं मम चेन्नास्ति तर्हि लीलयान्यतोऽवलोकयता तेनाहमेव दृश्यः स्यामित्यभिप्रायः ॥४५

सारङ्गरङ्गदा

अथ सीदन्त्याः, अयि स एवागत्य त्वां द्रक्ष्यति, तवापि शक्तिर्भविष्यतीति सखीवाक्यात्ताः सोत्कण्ठं पृच्छन्त्या वचोऽनुवदन्नाह—स किशोरो नयनाम्बुजाभ्यां कदा काले आलोकयेत्। मामिति शेषः। इच्छाप्रकाशने लिङ्। किं वा, इदानीं प्रिये कदा वालोकयेदिति नैराश्योक्तिः। सकरुणप्रेमरसश्रृङ्गाररसयोः प्रवाहेन शीतलाभ्याम्। तथा, तारयोर्नीलिम्ना प्रान्तयोररुणिम्ना च युक्ताभ्याम्। मदिरयोरिवाद्भुतो विभ्रमो ययोस्ताभ्याम्। अतो लीलाप्राचुर्याल्लीलेवाचरति लीलायते, ताभ्याम्। अपराधिनीं मां पश्यति चेत्तदा हित्वा कथं गत इति विमृश्य सदैन्यमाह—कारुणिकः। कृपया संभवेदपीति भावः॥ स्वान्तर्दशायाम्—एतां कदालोकयेदिति॥ बाह्ये—कदा कृपावलोकनं करिष्यतीति ॥४५

बहलचिकुरभारं बद्धपिच्छावतंसं
चपलचपलनेत्रं चारुबिम्बाधरोष्ठम्।
मधुरमृदुलहासं मन्दरोदारलीलं
मृगयति नयनं मे मुग्धवेषं मुरारेः ॥४६

1. CD omits all words from भ्यां (in शीतलाभ्यां, p. 159, l. 17) to तत्स्वाभाव्येन. CB अतएव for तल्लक्षणमाह. CB नवानुरागात्, CD अनुरागात् for जागरात्. CB, CD insert ताभ्यां after ये and read ततः for अतएव. 2. CB, CD ममेदृग्भाग्यं for तद्दर्शनभाग्यं मम. 2-3. CD omits all words from तेनाहं to अभिप्रायः and reads (corrupt) तेषां only. CB अप्यहं for अहमेव, and दृश्येयं for दृश्यः स्यां. 5. KP अतः for अथ. 6. KC, KP ०वाक्यान्तः for ०वाक्यात्ताः. 8. KC, KP प्रेमरस० for सकरुणप्रेमरस०. 10. KP लीलेवं चरतः. KC आचरतः. 11. KA, KP insert ये after लीलायते. 12. KP omits भावः. 13. KC, KP एनां for एतां. 14. PS बहुल० and पिञ्छ०

कृष्णवल्लभा

अथ श्रीकृष्णविग्रहावलोकनं विचारयंस्तदभिलषति—बहलेति। मे मम नयनं मुरारेः। मुर वेष्टने (धा० ६. ५३) धातुः। मुरति वेष्टयति दर्शनप्रतिबन्धकरूपलज्जाभयादिरेव मुरस्तस्यारिः। न हि श्रीकृष्णस्य रूपे मुरलीनादे वा सकृदनुभूते लज्जाद्यर्गला तिष्ठति। तस्य मुग्धवेषम्। मुग्धं सुन्दरं स्वत एव वेषं भूषणरूपम्।

भूषणभूषणाङ्गम्

(भा० ३. २. १२) इत्युक्तेः। मृगयत्यन्वेषति। कथं दर्शनं स्यादिति विचारयतीत्यर्थः। मृग अन्वेषणे (धा० १०. ३५३) इति धातुः। मृग्यत इति मृगः, मृगं करोतीति मृगयति। वेषं विशिनष्टि—बहलचिकुरभारम्। बहलो वेषकौशलेन चिकुराणां केशानां भारो यस्मिंस्तम्। पुष्पमालाद्यलंकृतत्वाद्भारनिरूपणम्। बद्धपिच्छावतंसम्—बद्धो रचनासौन्दर्यविशेषेण संदर्भितः पिच्छानामवतंसः शिरोभूषणं यस्मिंस्तम्। चपलचपलनेत्रम्—यद्यपि स्वभावत एव चपलनेत्रता तत्रापि वेषावलोकनेन सर्वतश्चकितदृष्टिसंचारेण च चपलादपि चपले नेत्रे यस्मिंस्तम्। प्रतिपदचापल्यवृद्धेः। चारुबिम्बाधरोष्ठम्—स्वभावत एव चारु मनोहरं बिम्बप्रायमधरोष्ठं यस्य तम्। मधुरमृदुलहासम्—मधुरो माधुर्यरसप्रदो मृदुं लात्यादत्त इत्येतादृशो हासो हास्यं यस्य तम्। एतेन स्मितहासो ध्वनितः। तल्लक्षणं चोक्तं पूर्वमेव। मन्दरोदारलीलम्—मन्दरः कल्पतरुस्तत्प्राया। मन्दरा बहला वा। नानाविधोदारा बहुरसप्रदा लीला यस्य तम्। मन्दरा मन्दरपर्वतप्रायोदारा महती लीला यस्येति वा। यथामृतोत्पादनाय सर्वैर्मिलित्वा मन्दरानयनप्रयत्नः कृतस्तथा श्रीविग्रहदर्शनानन्दामृतप्राप्त्यर्थं मन्दररूपलीलानिरूपणमित्यर्थः।

3. GB श्रीकृष्णस्वरूपे for श्रीकृष्णस्य रूपे. 5. GB omits मुग्धं सुन्दरं. 6. GB सुन्दरवेषं for वेषं. 10. GB बहलेति for the phrase बहलचिकुर etc. GB घनः पुष्पमालादिरचनया विचित्रितः for वेषकौशलेन. 12. GB omits बद्धपिच्छावतंसं. 13. GB यत्र for यस्मिंस्तं. GB चपलेति for चपलचपलनेत्रं. 14. GC चेष्टा० for वेषा०. 15. GB चार्विति for चारुबिम्बाधरोष्ठं. 18. GB प्राक् for पूर्वमेव. GB तथा for मन्दरोदारलीलं.

मन्दरस्तु पुमान्मन्थशैले मन्दरपादपे
वाच्यवद् बहले मन्दे

इति विश्वः ।। मालिनी छन्दः ।।४६

सुबोधनी

पुनरुत्कण्ठया स्वनेत्रमुपालम्भयन्नाह—मुरारेर्मनोहरवेषं मे नयनं मृगयति। अहं किं करोमि। अथवास्य को दोषः—बहलो निविडश्चिकुरभारो यत्र। तत्र बद्धः पिञ्छावतंसो यस्मिन्। अनेन मुग्धतामुक्त्वा तदुद्दीपनानाह—अतिचपले नेत्रे यत्र। चारुबिम्बफलवदधरोष्ठौ यत्र। मधुरो मृदुलश्च हासो यत्र। नेत्रक्षोभकत्वमाह—मन्दराद्रेरिवोदारा लीला यत्र। यथा तेन दुग्धाब्धिं संक्षोभ्य तस्यामृतादिकं हृतं तथैव तद्वेषेण नेत्रधैर्यादिकमिति भावः ।।४६

सारङ्गरङ्गदा

अथ पुनर्मुर्छन्त्याः, सखि, उत्तिष्ठ पश्यायमागतः श्रीकृष्ण इति सखीनामाश्वासनैः ससंभ्रमं नेत्रे उन्मील्योत्थाय दिशोऽवलोकयन्त्यास्तमप्रेक्ष्य ताः प्रति प्रलपन्त्या

1. This quotation does not occur in Viśva, but occurs in Medinī, rānta°, 196. 2. Mss मन्दुरे for मन्दे. 5. CB leaves blank space after पुनः and begins : न्वेषणं वदन्नाह—बहलेति, omitting all words from उत्कण्ठया to आह ; CD reads पुनस्तथैतद्दुःखा(न्म)नोनयनकर्तृकतद्वेषान्वेषणं वदन्नाह—बहलेति. CD मम for °मे. CB, CD insert एव after नयनं. CC मनोहरं वेषं. 6. CA अथ for अथवा. CB, CD omit all words from अहं to दोषः and read instead : कोदृशं. 6-7. CD drops all words from बहलो to पिञ्छावतंसो and reads instead विलासो. 7. CA यत्र for यस्मिन्. CB, CD omit all words from अनेन to आह. 8. CB, CD insert अरुणौ after फलवत्. 8-9. CB omits all words from मधुरो to आह. 9-10. CD omits all words from नेत्रक्षोभ° to भावः. 9. CB inserts सर्वाभीष्टदात्री before लीला. CB omits all words from यथा to भावः and reads instead : अनेन वेषस्यासमानोर्ध्वता सूचिता. 10. CA तस्याममृतादिकं. CC अर्थः for भावः. 12. KC, KP कृष्णः for श्रीकृष्णः. 13. KP तमप्येताः for तमप्रेक्ष्य ताः.

वचोऽनुवदन्नाह—हे सख्यः, मुरा कुत्सा तदरेः। परमसुन्दरस्येत्यर्थः। मुग्धं वेषं मे नयनं मृगयति। शीघ्रं दर्शयतेति भावः। कीदृशम्—बहलः स्निग्ध-निविडश्चिकुरभारो यस्मिन्। तत्रैव बद्धः पिञ्छावतंसो यस्य। चपलान्मीनादपि चपले नेत्रे यस्मिन्।

चपलः पारदे मीने

इति विश्वात् (लान्त० ५४)। चारुबिम्बाधरोष्ठौ यत्र। मधुरो मृदुलश्च हासो यत्र। वेषस्य गाम्भीर्यं क्षोभकत्वं चाह—मन्दराद्रेरिवोदारा महती लीला यस्य। तेन यथा दुग्धाब्धिं संक्षोभ्य रत्नादिकं हृतं तथा तेनास्माकं हृदयं संक्षोभ्य धैर्यादिकम्। अतो महाक्षोभकमिति भावः॥ स्वान्तर्दशायाम्—तत्संगममधुरवेषम्॥ बाह्यार्थः स्पष्टः॥४६

बहलजलदच्छायाचौरं विलासभरालसं
मदशिखिशिखालीलोत्तंसं मनोज्ञमुखाम्बुजम्।
कमपि कमलापाङ्गोदग्रप्रसङ्गजडं जग-
न्मधुरिमपरीपाकोद्रेकं वयं मृगयामहे॥४७

कृष्णवल्लभा

नयनं तावत्पुरोवर्तिनमेव मृगयितुं शक्नोति, हा हन्त किं कुर्म इत्याह—बहलेति। वयं कमप्यद्भुतं जगन्मधुरिमपरीपाकोद्रेकम्। जगत्सु यो मधुरिमा तस्य परिपाको वृद्धिस्तस्य उद्रेकः। परमपूर्णतममाधुर्यमित्यर्थः। मृगयामहे

1-2. KA, KB मुग्धवेषं. 2. KC, KP दर्शय for दर्शयत. KP बहलस्निग्धः. 3. KA omits एव after तत्र. 6. KA चारुबिम्बवत् for चारुबिम्ब-. 8. KP inserts च after रत्नादिकं and reads आहृतं for हृतं. KP नेत्र for तेन. KC, KP omit हृदयं संक्षोभ्य. 9. KB तत्सङ्गाय मधुरवेषं. 11. Gopāla Bhaṭṭa transposes 47 and 48 (Cf. v. l. 48). PS बहुल० and ०चोरं. 13. PS ०प्रसन्नजगज्जडं. 16. GB द्रष्टुं for मृगयितुं. 17. GC omits बहलेति; GB reads बहुलमिति for it. GB inserts सौन्दर्यं after मधुरिमा.

केनोपायेन पश्याम इति विचारयामहे। तद्विदस्तु केवलं भावाभ्यासमेवोपायमुपदिशन्ति, स त्वत्यन्तदुर्घट इति भावः। कीदृशम्—बहलजलदच्छायाचौरम्। बहलजलदः सान्द्रमेघश्छायाचौरश्छाया कान्तिस्तस्याश्चौरो यस्य तम्। तद्वपुःप्रतिबिम्बकान्तिं चौरयित्वा मुधा गर्जतीत्यर्थः। यद्वा, छायायां प्रतिबिम्बे यद्दृश्यते श्यामिकाभासादि तत्र किञ्चिद्वृतं चौरवद्भवति। न तु तत्रापि किमपि प्राप्नोति, प्रत्युत धिक्करणीय एव। विलासभरालसम्—विलासभरेणालसम्। मदशिखिशिखालीलोत्तंसम्—मदानां मत्तानां शिखिनां या शिखा चूडा तस्या या लीला तद्वदुत्तंसो नानापुष्पगुम्फितशिरोभूषणं यस्य तम्। मनोज्ञमुखाम्बुजम्—मनोज्ञं परमाश्चर्यमनोहरं मुखाम्बुजं यत्र तम्। कमलापाङ्गोदग्रप्रसङ्गजडम्—कं कृष्णप्रेमसुखं तेनालति प्राप्नोति। भूषाद्यर्थो वा बोध्यः। कमला श्रीराधा तस्या अपाङ्गो नेत्रान्तस्तस्योदग्रमुत्कृष्टाग्रभागस्तस्य प्रकृष्टसङ्गेन जडम्। सलज्जस्मितमुखभङ्गिविशेषपूर्वकावलोकनस्तम्भसात्त्विकभावलक्षितमित्यर्थः॥ हरिणी छन्दः॥४७

सुबोधनी

अथोद्यदात्मभावस्वाभाव्येन सनर्माललाप—वयं कमपि मृगयामहे। किमर्थम्—निविडाम्बुदानां कान्तिचौरम्। स कथं परिचेष्यते—मदशिखिशिखाभिर्लीलायुक्त

1. GB शाखा० for भावा०. 2. GB omits कीदृशं बहलजलदच्छायाचौरं. 3. GB बहुलजलदः. GB omits छाया कान्तिस्तस्याश्चौरो, and inserts वा after तं. GA यद्वपुः० for तद्वपुः०. 3-6. GB omits all words from तद्वपुः० to धिक्करणीय एव. 6. GB पुनः, GC एवं for विलासभरालसं. 7. GB पुनः—मदेति for the phrase मदशिखि etc. 8. GB पुनः for मनोज्ञमुखाम्बुजं. 9. GB तथा—कमिति for the phrase कमलापाङ्ग etc. 15. CB, CD omit all words from अथ to आललाप and read instead अथ स्वयोग्यतासंभावनया स (CD omits अथ to सः) प्रियं तमन्विष्यन्सपरिहासमाह—बहलजलदेति. CC आह for आललाप. After किमर्थं, CB, CD insert मृगयथ. 16. CC निविडाम्बुदच्छायाचौरं. CC परिचेष्येत्. For स कथं परिचेष्यते, CD reads तर्हि कथं, CB reads : तर्हि कथं प्राप्स्यथ—विलासभरेणालसम्। कथं वा परिचेष्यथ. CA लीलोचितः for लीलायुक्तः.

उत्तंसो यस्य। तथा, मनोज्ञं मनसि स्फुरन्मुखाम्बुजं यस्य। तर्हि कथं प्राप्स्यथ—विलासभरेणालसोऽनुद्यमो यत्र। अनुद्यमोऽपि कुतः—कमलायाः श्रीराधाया अपाङ्गस्य य उच्चैः प्रसङ्गस्तेन जडम्। तत्र हेतुः—जगति मधुरिम्णां यः परीपाकः परिणतिस्तस्योद्रेक आधिक्यं यत्र। अनेन गमनाशक्त्या तत्प्राप्तिः सुलभेति भावः ॥४७

सारङ्गरङ्गदा

नन्वागतोऽयं त्वां परिहसन्क्वापि कुञ्जे निलीनस्तिष्ठति, तदागच्छ तमन्विष्य पश्याम इति सखीनां गिरा ताभिस्तमन्विष्य भ्रमन्त्याः

कच्चित्तुलसि (भा० १०. ३०. ७)

अप्येणपत्नी (भा० १०. ३०. ११)

इत्यादिवत्स्थिरचरान्पृच्छन्त्यास्तेषां प्रश्नमुट्टङ्क्य तान्प्रति प्रत्युत्तरन्त्या वचोऽनुवदन्नाह—ननु किमर्थमुन्मत्ता इव रात्रौ भ्रमथ। तत्र सावहित्थमाह—यस्य नामापि चौरत्वादग्राह्यं तं कमपि वयं मृगयामहे। स ज्ञायत एव, दृष्टश्चेत्कथ्यताम्। आं शठोऽयं क्वापि कयापि गोप्या रममाणस्तिष्ठति, तदन्वेषणं तु लाघवायैव, तन्निवर्तध्वम्। तत्र सगर्वसावहेलमाह—कमलेति। लक्ष्म्या अपाङ्गस्य य उदग्रः प्रसङ्गस्तेन जडं तद्वशमपि। किमुतास्मद्गोप्या रममाणम्। ततोऽस्मन्मनो-

1. CB, CD omit मनसि स्फुरत्. 1-2. CB, CD omit all words from तर्हि to कुतः and read instead : तन्मुखाब्जस्फूर्तिरस्म(,CD तन्मुखाम्बुजस्फूर्तिव)न्मनस्यास्त एव, न विस्मृतेत्यर्थः। CB continues तत्प्राप्तौ सुकरत्वमाह. 3. CB, CD प्रकृष्टः सङ्गः for उच्चैः प्रसङ्गः. CB, CD तथा for तत्र हेतुः. CB omits जगति. 4. CB, CD omit उद्रेकः. After यत्र CD inserts अतएव विलासभरेणालसोऽनुद्यमो यत्र. 4-5. CB, CD शीघ्रप्राप्तिः for तत्प्राप्तिः and सूचिता for सुलभेति भावः. CC inserts एव after सुलभा. 7. KC, आगच्छत, KP गच्छत for आगच्छ. 9. KA inserts इति after तुलसि. 10. KB omits पत्नी. 11. KA (before correction), KC, KP प्रत्युत्तरयन्त्याः ; after correction KA प्रत्युत्तरं कुर्वन्त्याः. 12. KC तत्तत् for तत्र. KP अवहित्थं for सावहित्थं. 13. KP मृषयामहे. KD विज्ञायते for ज्ञायते. 15. KP लक्ष्म्यापाङ्गस्य. KA, KB insert अपि before अपाङ्गस्य. 16. KP इति for अपि. KA, KB यतः, KD अतः for ततः.

रत्नं हृत्वा गतोऽयम्, तदेव प्राथ्यं किं नस्तेनेति भावः। ननु सद्धर्मशीले कथं चौरापवादं ददथ, तत्र सहासशिरोधूननमाह—वहलेति। वज्रेन्द्रधनुरादियुक्त-निविडजलदानामपि कान्तिचौरम्, किमुताबलानां नो मनोरत्नमिति भावः। तथा—मध्विति। मधुरिम्णां परीपाको येषु ते मधुरिमपरीपाकाः स्मरेन्दुपद्महंसमृग-मीनपङ्कजाद्यास्तेषामुद्गतो रेकः शङ्का यस्मात्तम्। तेषामपि माधुर्याणां चौरमित्यर्थः।

मधुरं रसवत्स्वादुप्रियेषु

इति विश्वः (रान्त० १३२)।

रेको विवेके शङ्कायां रेकः स्यादधमेऽपि च

इति विश्वः (कान्त० ३१)। नन्वेवं चेद्दूरे स्थास्यति कथं द्रक्ष्यथ, तत्राह—मदेति। पिञ्छमुकुटाद्दूरतोऽपि दृश्यो भवेदिति भावः। ननु ततोऽपि धावित्वापसरिष्यति, तत्राह—विलासेति। तदतिशयजालसेन शीघ्रं गन्तुमप्यशक्तमिति भावः। ननु घनतमसि कुञ्जे निलीय स्थास्यति, तत्राह—मनोज्ञेति। कोटिचन्द्रवन्मनोज्ञं मुखाम्बुजं यस्य। तत्कान्तिपूरेणैव दृश्यो भवेदित्यर्थः। यद्वा, ननु प्रातर्व्रज एव तं लप्स्यध्वे, तदैवात्मधनं ग्राह्यम्, सबलोऽसौ रात्रौ कदाचिद्देहमपि वञ्चोरयेत्, तन्निवर्तध्वम्, तत्रात्मानमनुक्त्वा भङ्ग्याह—कमलानां वरस्त्रीणामासामपाङ्गस्योद्गमो यः प्रसङ्गस्तेन जडम्। किमपि कर्तुमसमर्थमित्यर्थः।

कमला श्रीवरस्त्रियोः

इति विश्वः (लान्त० ५२)॥ स्वान्तर्दशायां—स्वसमानसखीः प्रत्युक्तिः। हे सख्यः, आगच्छत, येनोन्मादितेयं तमन्वेषयामः। ननु कथं रात्रौ लप्स्यामहे, तत्राह पञ्चभिर्विशेषणैः। ननु प्राप्तेऽपि कथमायास्यति, तत्राह—कमला श्रीराधा,

1. KA पुनः for नः. KP धर्म० for सद्धर्म. 2. KA, KD चौर्यापवादं. KA, KB सहासं शिरो०. KC उग्र० for वज्र०. KP ०युक्तानां for ०युक्त-. 3. KP छाया कान्तिस्तच्चौरं for कान्तिचौरं. 4. KB जगन्मधुरिम्णां for मधुरिम्णां. 5. KP उद्रेकः for उद्गतो रेकः, and शङ्कयास्मात् for शङ्का यस्मात्. 8. KP वा for च. 10. KP omits अपि before दृश्यः. KP अपसरेति for अपसरिष्यति. 11. KC, KP अर्थः for भावः. 13. KA, KB omit एव after व्रजे. 14. KP आत्मानं for आत्मधनं. KP चारयन्तः for चोरयेत्, omitting तत् (l. 15). 16. KB असमर्थः, KC, KP अशक्तं for असमर्थं. KB omits इत्यर्थः. 19. KP आगच्छ for आगच्छत. 20. KP omits अपि after प्राप्ते.

अस्या अपाङ्गप्रसङ्गेन तत्प्रस्तावेन जडं तद्वशचित्तम्। श्रुत्वैवैष्यतीत्यर्थः॥ बाह्यार्थः स्पष्टः॥४७

परामृश्यं दूरे पथि पथि मुनीनां व्रजवधू-
दृशा दृश्यं शश्वत् त्रिभुवनमनोहारिवदनम्।
अनामृश्यं वाचामनिशमुदयानामपि कदा
दरीदृश्ये देवं दरदलितनीलोत्पलरुचिम्॥४८

कृष्णावल्लभा

अहो श्रीकृष्णदर्शनमतिदुर्लभं यतो दृष्टेऽपि दृष्टवत्प्रतीत्यभावात्। कदा द्रक्ष्यामीत्यौत्सुक्येनाह—परामृश्यमिति। दीव्यति द्योत्यत इति देवस्तमसाधारण-दीप्तिक्रीडायुक्तं कदा कस्मिन्समये दरीदृश्ये। पुनः पुनर्द्रक्ष्यामीत्यर्थः। कीदृशं देवम्—मुनीनां मननशीलानां यो यः पन्थास्तत्र तत्र दूरे दूरतः परामृश्यं विचारणीयम्। दुर्वितर्क्यमित्यर्थः। अयं भावः—तत्र तत्र मुनयो विचारयन्ति, न तु याथार्थ्येन निश्चिन्वन्ति। शुद्धप्रेमरसवर्त्मनि कस्याप्यप्रवेशात्। पुनः कीदृशम्—त्रिभुवनमनोहारिवदनम्। त्रिभुवनविषये यन्मनस्तदपि हर्तुं शीलमस्य तादृग्वदनं यस्य तम्। अतः शश्वन्नित्यं दृश्यं द्रष्टुं योग्यम्। सर्वातिशायि-

1. KC यस्यापाङ्गेन, KP अस्यापाङ्गे for अस्या अपाङ्गप्रसङ्गेन. KP तद्गतस० for तद्वश० and न for श्रुत्वा. 3. Gopāla Bhaṭṭa transposes verses 47 and 48. 3. PS परामृग्यं. PS परिषदि for पथि पथि 4. PS ०वपुषं for ०वदनं. 5. PS अनामृग्यं for अनामृश्यं and for अनिदं for अनिशं. Kṛṣṇadāsa (v. l. as in text, in one Ms only) and Caitanyadāsa read वाचा मुनिसमुदायानां. 6. Gopāla Bhaṭṭa ०नीलोत्पलनिभं (v. l. ०त्पलदशं), Kṛṣṇadāsa ०त्पलरुचं. 9. GB परेति for परामृश्यमिति. 12. GB omits अयं भावः. GB reads स्वबुद्ध्या for तत्र तत्र, and inserts शास्त्रैः before विचारयन्ति. 13. GB परं for न. GB तद्यथातथ्यं न कोऽपि जानाति for याथार्थ्येन निश्चिन्वन्ति. 14. GB omits कीदृशं and the phrase त्रिभुवनमनोहारिवदनं.

सौन्दर्यचमत्कारवत्त्वात् । यद्वा, शश्वन्नित्यं त्रिभुवनस्य मनो यत्र हरति सर्वान्यदृष्टिम्, तादृग्वदनं यस्य। पुनः कीदृशम्—दरदलितनीलोत्पलनिभम् । दरमीषद्दलितं विकस्वरं यन्नीलोत्पलं तस्मादपि नितरां भवतीति ।

दरो भये दरो गर्ते किंचिदर्थे दरोऽव्ययम्

इति विश्वः (रान्त० ११)। नीलं च तदुत्पलं चेति। नीलसुगन्धिसुकुमारगुणयुक्तं वा। शृङ्गाररसमाधुर्यस्य परमोत्कर्षचमत्कारात्। नीलोत्पलदृशमिति पाठे—दशेत्र दशा नीलसुगन्धिसुकुमारदशा, इति। सामान्यत एव निर्दिष्टं विशिष्य निर्दिश्यतामिति चेत्तत्राह—अनिशं निरन्तरमुदयः प्रकाशो यासां तासां नित्यानामपि वाचां श्रुतीनामनामृश्यमस्पृश्यम्। एतादृशमतिदुर्ज्ञेयमपि देवं कदा तत्कृपया परोक्षतो ज्ञात्वा दरीदृश्ये। केवलयापि तत्कृपया न दृश्यत इत्याह—व्रजवधूनां श्रीराधादिव्रजसुन्दरीणां दृशा चक्षुषा हेतुभूतेन दृश्यम्। तासां कृपया तथा विहरमाणं सर्वे पश्यन्तीति भावः। अथवैवं योजना—त्रिभुवनहारिणः कृष्णस्य वदनं देवं दीप्तिमत्कदा दरीदृश्ये। अन्यत्समानम् ।। शिखरिणी छन्दः ।।४८

सुबोधनी

पुनर्दैन्योदयात्तद्दौर्लभ्यस्फूर्त्याह—देवं दुर्लभं कदातिशयेन पश्यामि। तत्र हेतुः—त्रिभुवनानां मनोहारि वदनं यस्य। तथा, ईषद्विकशितनीलोत्पलवद्रुचिर्यस्य। तर्हि मुन्युपदिष्टैरुपायैः प्रत्यक्षीकृत्य पश्य—मुनीनां पथि पथि

1. GB ०चमत्कारात्. GB omits शश्वत्. GB यत्तां for यत्र. 1-2. GB transposes हरति and सर्वान्यदृष्टिं. 2. GB omits कीदृशं and reads दरेति for the phrase दरदलित etc. 3. GB भासतीति for भवतीति. 4. The quotation occurs in a somewhat different form in Viśva. 9. GB एवं for एतादृशमति-. 10. GB omits अपि after केवलया. GB omits न. GA दृश्य इति for दृश्यते इति. 11. GB राधादिसुन्दरीणां. 12. श्रीकृष्णास्य. 15. CB, CD omit दैन्योदयात्तत्. CB inserts अनामृश्यमिति after आह. CB, CD omit दुर्लभं. 16. CC तत्रापि हेतु for तथा. 16-17. CB, CD omit all words from तथा to तर्हि. 17. CB, CD ०दिष्टमार्गैः for ०दिष्टैरुपायैः, and उपास्य for प्रत्यक्षीकृत्य. CB, CD insert इति चेत्तत्राह after पश्य.

पराम्रश्यं ततस्तद्दूरे। तदप्राप्यमित्यर्थः। किं च, मुनिसमुदयानां वाचापि न स्पृष्टम्। तर्हि कथं दिदृक्षा—व्रजवधूषु या दृष्टिस्तदनुगतिस्तया शश्वल्लभ्यम्॥४८

सारङ्गरङ्गदा

अथ कचित्कुञ्जाभ्यर्णे स्फूर्त्या तं दृष्ट्वा पुनरस्फूर्त्या विक्लवायाः, त्वया दृष्टोऽसौ किमिति खिद्यसे इत्याश्वासयन्तीः सखीः प्रति प्रलपन्त्या वचोऽनुवदन्नाह—हे सख्यः, देवं क्रीडापरं कृष्णं कदा दरीदृश्ये भृशं वाञ्छापूर्त्या पश्यामि। तत्र हेतुः—दरदलितेति त्रिभुवनेति च। अतो मुनिसमुदयानां महाकवीन्द्राणां व्यासादीनां वाचाप्यनामृश्यमस्पृश्यम्। एतादृक्सौन्दर्यविशिष्टतया वक्तुमशक्यमित्यर्थः। किं वा, ननु तवैवायम्, कदापि द्रक्ष्यसि, तत्र

अखिलदेहिनामन्तरात्मदृक्

(भा० १०. ३१. ४) इतिवत्तद्दौर्लभ्यमाह—मुनीनां वाचाप्यनामृश्यम्। नन्वेवं चेत्त्वं कथं दिदृक्षसे, तत्राह—व्रजेति। व्रजवधूनां युष्माकं दृशा दृश्यम्। तत्रापि शश्वन्निरन्तरम्। अत इयं लालसेत्यर्थः। ननु काले द्रक्ष्यसि, इदानीं क्व लभ्योऽसावत्र, तदुद्देशं कथयन्त्याह—मुनीति। मुनिगणाः

विहगा वनेऽस्मिन्

1. CC omits तत् after ततः. CD omits all words from परामृश्यं to किं च and reads instead : दूरे। अतस्तत्पथिभिरनामृश्यं न विचारितम्। कुतः. 2. CB, CD प्राप्त्याशा, CC तद्दिदृक्षा for दिदृक्षा. CB, CD omit all words from तदनुगतिः to लभ्यं and read instead : दृश्यं तदनुगत्या प्राप्तमित्यर्थः। कीदृशम्—ईषद्विकशितनीलोत्पलवद्रुचिर्यस्य। असमानोर्ध्वरूपमित्यर्थः. 4. KA, KD omit क्वचित्. KP स्फूर्त्या for अस्फूर्त्या. KP omits त्वया. 5. KP अपि for इति. 6. KC तं देवं, KP तदेव for देवं. KP तदा for कदा. 7. KC inserts अपि after मुनिसमुदयानां. KP omits महाकवीन्द्राणां. 8. KC, KP insert अपि after वक्तुं. 9. KC omits इत्यथः. After इत्यर्थः KC, KP insert : अनिशमुदयानामिति पाठे—अनिशमुदयानां नित्योदयानां वाचां श्रुतीनामप्यनामृश्यम्. KP द्रक्ष्यसि. 11. KC omits तत् before दौर्लभ्यं. 13. KC अत्यन्तं for अत इयं. 14. KC, KP मुनयो (so in Bhāgavata text) for मुनिगणाः; for the whole verse, partially paraphrased here, see above p. 4, l. 12.

(भा १०. २१. १४) हरिमुपासते धृतमौना इत्यादिदिशा मुनीनां तद्दर्शनेन जातस्तम्भमोहादितया धृतमौनानां पक्षिमृगाणां पथि पथि परामृश्यम् । तत्रापि दूरे । दूरादेवात्र वास्त इत्यनुमेयम् ॥ स्वान्तर्दशायाम्—स्वसमानसखीः प्रत्युक्तिः । देवमनया सह क्रीडन्तं तं कदा दरीदृश्ये पुनः साक्षात्पश्यामि । अन्यत्समम् ॥ बाह्ये—भावशाबल्योदयादाह—तं कदा दरीदृश्ये । तत्र हेतुः—दरेति । पुनः सनैराश्यमाह—परेति । सर्वयामित्वेनानुमेयम् । पुनर्विचार्य सलालसमाह—व्रजेति । अतस्तद्भावशालिना मयापि दृश्यो भवेत् । पुनः सनैराश्यमाह—अनेति । मुनीनां वागगोचरमहं द्रष्टुमिच्छामि, अहो मूर्खोऽस्मि । पुनः सोत्कण्ठमाह—त्रिभुवनेति । तथा, मुनीनां दूरेऽनुमेयं वागगोचरं च, व्रजवधूदृशा दृश्यं नीलोत्पलरुचमित्याश्चर्यम् ॥४८

लीलाननाम्बुजमधीरमुदीक्षमाणं
नर्माणि वेणुविवरेषु निवेशयन्तम् ।
दोलायमाननयनं नयनाभिरामं
देवं कदा नु दयितं व्यतिलोकयिष्ये ॥४६

कृष्णावल्लभा

संप्रतिपादितमवलोकयन्तमवलोकयामि, तदा महत्कौतुकमिति हर्षौत्सुक्येनाह—लीलेति । दयितं संजातदयं बहुदातारं वा । देवं द्योतमानं कदा नु व्यति-

1. KC inserts विहगाः before धृतमौनाः. KC, KP omit तत् in तद्दर्शनेन. 2. KP inserts युष्माकं तत्रापि befor पक्षिमृगाणां. KC inserts अदूरे, KP दूरे again, after दूरे. 3. KP [illegible] for अनुमेयं. KA स्वं, KP समान० for स्वसमान०. 4. KP क्रीडयन्तं for क्रीडन्तं. KP repeats पुनः. KB omits अन्यत्समं. 6-7. KP omits haplologically all words from परेति (l. 6) to सनैराश्यमाह (l. 7). 8. KA omits अहं. KP अतो for अहो. 9-10. KP नीलोत्पलतया for नीलोत्पलरुचं. KC ०रुचि for ०रुचं. 13. PS डोलायमान०. 14. PS वन्दे for देवं. 16. GB तत् for तदा.

लोकयिष्ये। क्रियाव्यतिहारे व्यतिः। पश्यन्तं तं द्रक्ष्यामीत्यर्थः। यद्वा, अनुदयितम्। अनुकूला अनुगता दयिता वल्लभा यस्मिंस्तं देवं क्रीडन्तम्। रासविहारिणमित्यर्थः। कीदृशं देवम्—लीलाननाम्बुजम्। लीला शृङ्गारभावजा क्रिया तद्युक्तमाननाम्बुजं यस्य तम्। पुनः कीदृशम्—अधीरं चञ्चलम्। यद्वा, न विद्यते धीर्यत्र स अधीर्मोहस्तं राति ददातीति वा। अधीरं यथा भवति तथोदीक्षमाणम्। उदुत्कृष्टमीक्षमाणं पश्यन्तम्। पुनः कीदृशम्—वेणुविवरेषु वेणोश्छिद्रेषु नर्माणि परिहासोक्तीर्निवेशयन्तमर्पयन्तम्। वेणुवादेन स्मरपरिहासं कुर्वन्तमित्यर्थः। पुनः कीदृशम्—दोलायमाननयनम्। दोलायमाने घूर्णायमाने नयने यस्य तम्। अतो नयनयोरभिरामं सुन्दरम्॥ वसन्ततिलकं छन्दः॥४६

सुबोधनी

पुनरपि तथैव सलालसमाह—नु वितर्के देवं पुरः क्रीडन्तं कदा व्यतिलोकयिष्ये। स मां द्रक्ष्यत्यहमपि तं द्रक्ष्यामि। स कथं त्वामवलोकयेत्—लीला नानाभावोद्गारभङ्गी तद्युक्तमाननाम्बुजं यस्य। अतएवाधीरं यथा स्यात्तथोद्वीक्षमाणम्। तथा, वेणुविवरेषु नर्माणि निवेशयन्तम्। अतो दोलायमाननयनम्। कौतुकी लीलया मामवलोकयेदित्यर्थः। त्वं कथं तं दिदृक्षसे—दयितम्। अतएव नयनाभिरामम्॥४६

2. GC अनुकूलानुगता. GB यत्र for यस्मिन्. 3. GB omits लीलाननाम्बुजं. 4. GB omits कीदृशं. 5. GB यस्य for यत्र, and तथा for वा. GB omits अधीरं यथा भवति. 6. GB omits उत् before उत्कृष्टं. 7. GB वंश- for वेणोः. 8. GB omits कीदृशं दोलायमाननयनं. 11. CB, CD omit अपि तथैव सलालसमाह and read instead : उत्कण्ठयान्योन्यावलोकं प्रार्थयते (CD ०लोकनं प्रार्थयन्नाह)—लीलेति. 11-12. CB, CD omit all words from पुरः to व्यतिलोकयिष्ये and read instead : दुलभं दयितम्। कदा. 12. CB, CD कीदृशं for स कथं त्वामवलोकयेत्. After अवलोकयेत् CC inserts दोलायमाननयनम्। तत्र हेतुः. 13. CD मनोहरं for आननाम्बुजं. CB, CD omit एव after अतः. CB उदीक्ष्यमाणां, CD उदीक्षमाणां. After उद्वीक्षमाणां CC inserts तद्व्यापारपारवश्येन मामवलोकयेत. 14-15. CC omits all words from तथा to इत्यर्थः. 15. CB, CD omit all words from कौतुकी to दयितं. 15. CC दिदृक्षसि for तं दिदृक्षसे. After दयितं CC inserts कथं तदभिगमः—वेणुविवरेषु नर्माणि निवेशयन्तम्.

सारङ्गरङ्गदा

अथ पूर्वप्रेरणकालान्योन्यदर्शनस्मृतया सोत्कण्ठं ताः पृच्छन्त्या वचोऽनुवदन्नाह —नु भोः सख्यस्तं ममैव दयितं देवं क्रीडन्तं कदा व्यतिलोकयिष्ये। स मां कुञ्जे प्रेरणार्थं द्रक्ष्यत्यहमपि तं तदङ्गीकारज्ञापनार्थं कदा द्रक्ष्यामि। कीदृशम्— लीला नानाभावोद्गारयुक्तनिरक्षरसंकेतकथने भङ्गी तद्युक्तमाननाम्बुजं यस्य। अधीरं यथा तथोदीक्षमाणमूर्ध्वनेत्रचालनया मां कुञ्जे प्रेरयन्तम्। अतोऽन्य-तज्ज्ञानभिया दोलायमाने नयने यस्य। तथा, नर्माणि मत्प्रेरणसंकेतरूपाणि वेणुविवरेषु निवेशयन्तम्। अतो नयनाभिरामम्॥ स्वान्तर्दशायाम्—तां कुञ्जाय नेतुं मां स द्रक्ष्यत्यहमपि तज्ज्ञानार्थं तम्। अन्यत्समम्॥ बाह्ये— कृपावलोकनं तस्य, ममापि विस्मयावलोकनम्॥४९

लग्नं मुहुर्मनसि लम्पटसंप्रदाय-
लेखावलेहिनि रसज्ञमनोज्ञवेषम्।
रज्यन्मृदुस्मितमृदूल्लसिताधरांशु-
राकेन्दुलालितमुखेन्दु मुकुन्दबाल्यम्॥५०

कृष्णवल्लभा

इदानीं तस्य चापल्यं मनसि लग्नम्, तत्पुनः कदा नु भवितव्यमिति हर्षो-ज्जृम्भितेन स्मरन्नाह—लग्नमिति। मुकुन्दस्य स्मृतिमात्रेणापि मुक्तिं ददतः

2. KP ०कालः for ०काल-, and उत्कण्ठं for सोत्कण्ठं. KP स्पृशन्त्याः for पृच्छन्त्याः. 3. KP क्रीडयन्तं. 3-4. KC places मां after प्रेरणार्थं. 4. KA, KB कुञ्ज- for कुञ्जे. KC places तं after ०ज्ञापनार्थं. 5. KP ०युक्तं for ०युक्त-, and कथनं for कथने. 6. KB ततः for अतः. KC अन्येन for अन्य-. 9. KB, KC omit सः. KD transposes मां and सः. KP संद्रक्ष्यति for स द्रक्ष्यति. KC, KP ०ज्ञापनार्थं for ०ज्ञानार्थं. 11. PS संप्रदायि. 12. PS ०लेखिनि for ०लेहिनि. 13. PS (v. l. as in text) लज्जन्मृदु० for रज्यन्मृदु०, and ०मधुस्नपिता० for मृदूल्लसिता०. 16-17. GB औत्सुक्येन for हर्षोज्जृम्भितेन.

श्रीकृष्णस्य बाल्यं चापल्यं मुहुर्वारंवारं मनसि लग्नम्। कदापि मनसो नापैति तद्वशान्मोक्षानन्दस्यापि विस्मृतेः। कीदृशे मनसि—लम्पटसंप्रदायलेखावलेहिनि। लम्पटः प्रकृते श्रीकृष्णविषयलीलारसास्वादनाय लम्पटवद्वर्तमानो यः संप्रदायः परंपरागतसजातीयसमूहस्तस्य लेखो देवः श्रीकृष्णस्तमवलेढुमास्वादयितुं शीलं यस्य तस्मिन्। यद्वा, कृष्णविषयमधुरप्रीतिरसलम्पटसंप्रदायस्तत्र लिख्यन्ते ये तद्रसास्वादलेखा लिपयः श्रेण्यो वा विचित्रप्रकारास्तानवलेढुं शीलं यस्य तस्मिन्।

लेखो लेख्ये च देवे च लेखा श्रेण्यां लिपावपि

इति मेदिनी। कीदृशं मुकुन्दबाल्यम्—रसज्ञमनोज्ञवेषम्। रसं जानन्तीति रसज्ञा रसविशेषभावनाचतुराः। एतद्रसमेव परमपुरुषार्थत्वेन जानन्त इत्यर्थः। तेषां मनोज्ञो मनोहारी वेणुवनमालाकौस्तुभवर्हावतंसादियुक्तो वेषो यत्र तत्। पुनः कीदृशम्—रज्यन्मृदुस्मितमृदूल्लसिताधरांशुराकेन्दुलालितमुखेन्दु। रज्यदधिकाधिकरागं स्नेहं प्राप्नुवन्मृदु मनोहारि यत्स्मितं तद्युक्ता ये मृदूल्लसिताः सुकुमारोल्लासं प्राप्ता अधरांशवो यत्रैवंविशिष्टः। राकेन्दुना राका पूर्णिमाभेदस्तस्या इन्दुना। पूर्णचन्द्रेणेत्यर्थः। लालितो लालनं कारितो मुखेन्दुर्यत्र तत्। यन्मुखमधुरिमाणमवलोक्य पूर्णचन्द्रोऽप्यारात्रिकवदात्मानं करोतीत्यर्थः।

पौर्णमासी तु पूर्णिमा।
कलाहीने सानुमतिः पूर्णे राका निशाकरे॥

इत्यमरः (१. ३. ७-८)। यद्वा, रज्यन्तोऽनुरागं प्राप्नुवन्त्यो या मृदवो गोप्यस्तासां स्मितेन मृदूल्लसिता अधरांशवो यत्रेति पृथक्पदं वा। अन्यत्समानम्॥ वसन्ततिलकं छन्दः॥५०

1. GC inserts कदा नु before कदापि. 2. GC तादृशात् for तद्वशात्. GB omits the phrase लम्पटसंप्रदाय etc. 3. GB प्रकृत- for प्रकृते; GC omits the word. 7. The quotation occurs in a somewhat different form in the Medinī, kānta° 8. GB reads बाल्यं for मुकुन्दबाल्यं, and omits रसज्ञमनोज्ञवेषम्. 11. GB omits कीदृशं and reads रज्यद्द्युति for the phrase रज्यन्मृदु etc. 11-12. GB अधिक° for अधिकाधिक°. 13. GB reads सः for एवंविशिष्टः and omits राकेन्दुना. 14. GB omits इत्यर्थः. 16. Mss पूर्णमासी.

सुबोधनी

अथ स्वमन उपालभमानस्तथैवाह—मे मनसि मुकुन्दबाल्यं मुहुर्लग्नम्। इदानीं दृढं लग्नमित्यर्थः। तत्र हेतुः—लम्पटसंप्रदायानां श्रेणीमवलेढुं शीलं यस्य तस्मिन्। महालम्पटे इत्यर्थः। अथवास्य को दोषः—रसज्ञानां मनोज्ञो वेषो यत्र। तथा, अनुरागयुक्तश्च मृदुस्मितेनाल्पोल्लसितश्च योऽधरस्तस्यांशुर्यत्र, राकेन्दुभिः सेवितो मुखेन्दुर्यत्र, तच्च तच्च ॥५०

सारङ्गरङ्गदा

अथ तन्माधुर्यार्णवे सर्वेन्द्रियमनोनयेन पुनर्मोहं गच्छन्त्याः, अयि सखि क्षणं तं विस्मृत्य सुखिनी भवेति सखीनामाश्वासात्ताभ्यस्तदशक्तिं कथयन्त्या वचोऽनुवदन्नाह—मुखे कुन्दवद्धास्यं यस्य तस्य मुकुन्दस्य बाल्यं कैशोरं चापल्यं वा मम मनसि, वस्त्रे माञ्जिष्ठराग इव, लग्नम्। किं करोमीत्यर्थः। ननु ततो निवर्त्यान्यत्र निवेशयेत्यत्र तदपि मद्वशं नेत्याह। कीदृशे—लम्पटसंप्रदायस्य लेखामवलेढुं शीलं यस्य। महालम्पटे इत्यर्थः। अथवास्य वराकस्य को दोषो यत एतादृशं तदत्याह—रसज्ञानां मनोज्ञो वेषो यस्मिन्। तथा, रागयुक्तश्च मृदुस्मितेन मृदूल्लसितश्च योऽधरस्तस्यांशुर्यस्मिन्। पृथक्पदं वा। तथा, राकेन्दुभिर्लालितः सेवितो मुखेन्दुर्यत्र ॥ स्वान्तर्दशायाम्—समानसखीः प्रत्युक्तिः। बाल्यं तया सह कुञ्जे कैशोरचापलम् ॥ बाह्ये—स्वान्यप्रत्युक्तिः ॥५०

2. CB, CD omit all words from अथ to आह and read instead : पुनरन्तःस्फूर्त्या सलालसमाह—लग्नमिति. CA उपालम्भमानः. CD मम for मे. 3. CD अत्र for तत्र. 4. CA, CC omit तस्मिन्. CA ०लम्पटं for ०लम्पटे. CB inserts यतो, CD अतो before रसज्ञानां. 5. CC transposes, after तथा, the sentence राकेन्दुभिर्लालितो मुखेन्दुर्यत्र, omitting it (with its v. l.) in l. 6, and continues : तदेव व्यनक्ति. CD राग० for अनुराग०. 6. CA inserts अतः before राकेन्दुभिः. CD राकेन्दुकोटिभिः. CB, CD insert लालितः before सेवितः. CA यस्मिन् for यत्र (after मुखेन्दुः). CB omits तच्च तच्च. 8. KP ०मनोनयनेन. 9. KP omits तं. KP तच्छक्तिं for ताभ्यस्तदशक्तिं. 10. KP omits तस्य. 11. KP मञ्जिष्ठारागः. 12. KP निवृत्या० for निवर्त्या०. KP मद्वशेन for मद्वशं न. 14. KB यत् for यतः. KB omits च after ०युक्तः.

अहिमकरकरनिकरमृदुमुदितलक्ष्मी-
सरसतरसरसिरुहसदृशदृशि देवे ।
व्रजयुवतिरतिकलहविजयनिजलीला-
मदमुदितवदनशशिमधुरिमणि लीये ॥५१

कृष्णवल्लभा

अथ तस्य चापल्यादि सर्वमेव मधुरमधुरम्, तस्मान्मधुरिमशब्दवाच्य एवायम्, अतोऽहमत्रैव विलीय तिष्ठामीत्यौत्सुक्येनाह—अहिमकरकरेति त्रिभिः। देवे दिव्यति द्योत्यत इति देवस्तस्मिन्नहं लीनो भवामि। श्रीकृष्णे एवं रसाविष्टे विहरति सत्यहं तत्रैव लीनो भूत्वा पश्यामीत्यर्थः। कीदृशे—अहिमकरकरनिकरमृदुमुदितलक्ष्मीसरसतरसरसिरुहसदृशदृशि। अहिमकरः सूर्यः। न हिमाः शीतलाः कराः किरणा यस्य। शीता न भवन्ति तावन्न तूष्णा इत्यहिमपदात्प्राप्यते। तस्य करनिकरेण किरणसमूहेन कृत्वा मृदुर्मृद्वी कोमला। स्निग्धेति यावत्। मुदिता हृष्टा स्फीता च या लक्ष्मीः शोभा तया सरसतरमतिसरसं यत्सरसिजं कमलं तत्सदृशे दृशौ यस्य तस्मिन्। यदि मध्याह्नकालीनस्तीक्ष्णः सूर्यरश्मिसंबन्धस्तर्ह्यन्तर्मकरन्दत्वेऽपि बहिःशुष्कतैव स्यात्, अतो कार्कश्यापत्तिः। यदि चातिप्रातःकालीनः सूर्यकरसंयोगस्तर्हि न विकाशबाहुल्यम्। अतो नातिप्रचण्डसूर्यकरनिकरेण बहिःस्निग्धता विकाशबाहुल्यं च यस्य कमलस्य तद्वन्नयनशालित्वं सूचितम्। पुनः कीदृशे—व्रजयुवतिरतिकलहविजयनिजलीलामदमुदितवदनशशिमधुरिमणि। व्रजस्था युवतयो गोपाङ्गनास्तासां रतिविषये यः कलहो दृढालिङ्गनहारत्रोटनचुम्बनलीलाकमलताडनादिरूपस्तत्र यो विजयस्तत्र या निजलीला

3. Caitanyadāsa and Kṛṣṇadāsa ०विजयि० for ०विजय०. 6. GB मधुरतमं for मधुरमधुरं. 8. GB omits देवे. 9. GB inserts देवे after कीदृशे, but reads अहिमकरेति for the phrase अहिमकरकर etc. 10. GB omits अहिमकरः सूर्यः. 13. GC मुदिताद्धर्षात् for मुदिता हृष्टा. GA, GC omit तया. 14-15. GA सूर्यः रश्मिसंबद्धः. 16. GC वाति० for चाति०. 18. GB omits कीदृशे, and reads व्रजेति for the phrase व्रजयुवति etc.

शृङ्गारभावजा तया यो मदो हर्षस्तेन मुदितो वदनशशी। कज्जलरेखाङ्कितत्वाद्वदनशशीत्युक्तम्। तत्र यो मधुरिमापूर्वः कोऽपि माधुरीचमत्कारो यस्य तस्मिन्। यथा यथा तासां मृदङ्गीनां गाढश्लेषादिरूपा क्रिया तथा तथा सरसतरत्वं चोक्तम्। अत्र समासबाहुल्यं पौनरुक्त्यं च न दोषः। तदनुस्मरणेन तदाकारान्तःकरणवृत्तित्वात् ॥५१

सुबोधनी

पुनरत्यार्तिस्फुरितस्य माधुर्ये मज्जन्नाह त्रिभिः—अहं देवे लीनो भवामीति त्रिष्वप्यन्वयः। कीदृशे—सूर्यकिरणसमूहेनेषद्विकशितेन या शोभा तया सरसतरं यत्सरसिरुहं तत्सदृशौ दृशौ यस्य। दृशोर्विकाशे हेतुः—व्रजयुवतिभिः सह यो रतिकलहस्तत्र विजयिनी निजासाधारणी या लीला तया यो मदो गर्वस्तेनोल्लसितो यो वदनशशी तस्य माधुर्यं यत्र ॥५१

सारङ्गरङ्गदा

अथ तस्य तन्माधुर्ये मनआदीनां लयेन मुह्यन्त्याः पुनर्मूर्तिमाशङ्क्य सखीः प्रति, एतावानेव भवतीभिः सह संगम इति प्रलपन्त्या वचोऽनुवदन्नाह त्रिभिः श्लोकैः। तत्र प्रथमं कुट्टमितादिभावविवशेनात्मना स्वसखीभिश्च सह तस्य कञ्चुकाकर्षण-

1. GB inserts क्रीडा before तया. 2. GB transposes अपूर्वः and कोऽपि. 4. GA, GC omit च (before न). 5. After ०वृत्तित्वात् GC continues : शशिशोभा छन्दः. 7. CC मज्जयन्नाह. CB, CB omit all words from आर्तिस्फुरितस्य to त्रिभिः and read instead : आर्तिभरस्फूर्त्यानन्देन मुह्यन्नाह—अहमिति. 8. CC त्रयाणां for त्रिषु. CB, CD insert एवं before अन्वयः. CB तत्र वैशिष्ट्यमाह for कीदृशे. CB, CD ०विकशितं च लक्ष्म्या शैत्यादिशोभासंपत्त्या च for ०विकशितेन या शोभा तया. 9. Some Mss सरसीरुहं CD सदृश्यौ. CB, CD ततोऽपि वैशिष्ट्यमाह for दृशोर्विकाशे हेतुः. 10. CC omits निजा. CB, CD omit या and मदः. CC महागर्वः for मदो गर्वः. 13. KB अतः for अथ. KC तत्तत्० for तत्० ; KB omits तत्. 14. KC एतावदेव. 15. KP अथ for तत्र. KA, KP अमुना for आत्मना. KB, KD, KP omit च.

हठालिङ्गननर्मादिभङ्गीरतिकलहमाधुर्यस्फूर्त्या तत्र मनआदेर्लयेन प्रलपन्त्या वचोऽनुवदन्नाह—अहं देवे मनोज्ञक्रीडाविजिगीषापरे श्रीकृष्णे। विशेषणे तात्पर्यम्। तन्माधुर्यार्णवे इत्यर्थः। लीये लीना भवामि। कीदृशे—व्रजयुवतिभिर्युष्मदादिभिः सह यो रतिकलहस्तत्र विजयिनी या निजलीला सनर्मकञ्चुकाकर्षणस्तनाधरादिग्रहणकेलिस्तया यो मदो गर्वस्तेन मुदितो यो वदनशशी तस्य मधुरिमा यस्मिन्। तथा, सूर्यकरनिकरेण प्रथमोद्गतेन मृदुमुदितमीषद्विकशितं च लक्ष्म्या शोभया शैत्यादिगुणसंपत्त्या सरसतरं च यत्सरसिरुहं तत्सदृशौ दृशौ यस्य तस्मिन्। कुट्टमितलक्षणम् (उज्ज्वल०, अनुभावप्रकरण ४४)—

स्तनाधरादिग्रहणे हृत्प्रीतावपि संभ्रमात्।
बहिः क्रोधो व्यथितवत्प्रोक्तं कुट्टमितं बुधैः॥

स्वान्तर्दशायाम्—तया सह तादृशक्रीडापरे॥ बाह्यार्थः स्पष्टः॥५१

करकमलदलकलितललिततरवंशी-
कलनिनदगलदमृतघनसरसि देवे।
सहजरसभरभरितदरहसितवीथी-
सततवहदधरमणिमधुरिमणि लीये॥५२

कृष्णावल्लभा

पुनरपि श्रीकृष्णचन्द्रे सर्वात्मना चित्तलयमेवाध्यवस्यति—करकमलेति। देवे लीये इति पूर्ववदन्वयः। कीदृशे देवे—करकमलदलकलितललिततरवंशीकलनिनदगलदमृतघनसरसि। कर एव कमलदलम्। यद्वा, कर एव कमलं तस्य

1. KP ०माधुर्यादि० for ०माधुर्य०. KB, KP मनआदि- for मनआदेः. 2. KP तात्पर्यात्. 3. KP omits युष्मदादिभिः. 7. KC inserts च before सरसतरं. Some Mss सरसीरुहं. KC, KD तत्सदृश्यौ. KB, KC, KP omit तस्मिन्. 8. KA inserts यथा after ०लक्षणम्. 12. PS ०दलित० for ०कलित०. 17. GC inserts त्रिभिः before पुनरपि. 18. GB करेति, GC करेत्यादि सरसीत्यन्तं for the phrase करकमल etc.

दलानि पत्राण्यङ्गुल्यस्तैः कलिता धृता ललिततरातिललिता या वंशी तस्याः कलनिनदा एव गलदमृतानि। तेभ्यो गलन्त्यमृतानीति वा। तादृशे घनसरसि निविडतडागे। तेषां घनं निविडं सर इव सरस्तस्मिन्निति वा। एतेन वंशीवादनसमयो व्यज्यते। अत्र श्रीकृष्णविग्रहस्यामृतसरोरूपता, करयोः कमलत्वम्, वंशीनिनादस्य मकरन्दामृतरूपत्वं च ध्वनितम्। पुनः कीदृशे—सहजरसभरभरितदरहसितवीथीसततवहदधरमणिमधुरिमणि। सहजः स्वभावजो यो रसो माधुर्यं तस्य भरोऽतिशयस्तेन भरितं पुष्टं यद्दरहसितमीषद्धास्यं तस्य वीथी परंपरा तया निमित्तभूतया सततं निरन्तरं वहन्प्रवाहरूपेण स्फुरन्योऽधरः स एव मणिरत्युज्ज्वलत्वात्पद्मरागस्तस्य मधुरिमा माधुरीविशेषो यस्मिन्। अयमभिप्रायः—पूर्वश्लोके रतिकलहविजयेत्यादिना जिगीषुणैव स्थितम्, अत्र विजये जाते वंशीं वादयित्वा स्थितम्। तत्र च पराजये सति व्रजयुवतीनां प्रेमकोपो जातस्तेन तस्य हास्यं जातमिति ॥५२

सुबोधनी

पुनस्तत्र वंशीरवमाधुर्यस्फूर्त्याह—करकमलयोर्दलैरङ्गुलिभिर्वादिता या ललिततरा वंशी तस्याः कलनिनदा एव गलदमृतानि तैः सान्द्रसरोवरे। तत्संपादयन्नाह—सहजरसैर्भरितं यदीषद्धसितं तस्य वीथ्या धारया निरन्तरवहदधरमणेर्मधुरिमा यत्र ॥५२

सारङ्गरङ्गदा

अथ सस्मितं वंशीध्वनिकृतपूर्वस्वप्रेरणस्फूर्त्या तन्माधुर्ये प्रलीनमिवात्मानं

3. GC omits all words from निविडतडागे to वंशी. 5. GB तथा for पुनः कीदृशे, and सहजेति for the phrase सहजरस etc. 7. GB omits पुष्टं. 9. GB inserts तस्मिन् after यस्मिन्. 10. GB °विजयेन for विजयेत्यादिना. 11. GB व्रजाङ्गनानां for व्रजयुवतीनां. 14. CB, CD omit all words from पुनः to आह and read instead अन्यदपि. CD drops वादिता. 14-15. CB, CD तरलतरा या for या ललिततरा. 15. CB °निनादाः for °निनदाः. CC °रससरोवरः for °सरोवरे. CB तथा for तत्संपादयन्नाह. 16. CB °रसभरैः for °रसैः. 17. CB यस्य तस्मिन्, CD यस्य for यत्र. 19. KB, KP सस्मितवंशी°. KA °माधुर्यप्रलीनं.

मत्वा प्रलपन्त्या वचोऽनुवदन्नाह—देवे एतल्लीलापरे श्रीकृष्णे पूर्ववदहं लीये। कीदृशे—करकमलदले कलिता ललिततरा च या वंशी तस्याः कलनिनदा एव गलदमृतानि तेषां घनसरसि सान्द्रसरोवरे।

घनः सान्द्रे दृढे दार्ढ्ये विस्तरे लोहमुद्गरे

इति विश्वः (नान्त० ३)। तथा, सहजरसभरैर्भरितं पूर्णं यद्दरहसितं तस्य या वीथी धारा सरणिर्वा तस्यां तया वा सततं वहन्प्रसरन्नधरपद्मरागमणेर्मधुरिमा यस्य ॥ स्वान्तर्दशायां पूर्ववत् ॥ बाह्यार्थःस्पष्टः ॥५२

कुसुमशरशरसमरकुपितमद्गोपी-
कुचकलसघुसृणरसलसदुरसि देवे।
मदमुदितमृदुहसितमुषितशशिशोभा-
मुहुरधिकमुखकमलमधुरिमणि लीये ॥५३

कृष्णवल्लभा

किं च—कुसुमेति। देवे लीये इति पूर्ववत्। कीदृशे—कुसुमशरशरसमरकुपितमदगोपीकुचकलसघुसृणलसदुरसि। कुसुमशरः कामस्तस्य शराः कचग्रहणपूर्वकचुम्बनाधरनखक्षतादिरूपास्तैर्यः परस्परं समरः संग्रामस्तत्र कुपितानां मदानां प्रेमरसमत्तानां गोपीनां कुचकलसयोर्घुसृणरसः कुङ्कुमरसस्तेन लसच्छोभमानमुरो यस्य तस्मिन्। घुसृणस्य प्रस्वेदजलेनाशोषणाद्रसावस्थैवेति रसेत्युक्तिः। गोपीनामनुरागो वा मूर्त इव। पुनः कीदृशे—मदमुदितमृदुहसितमुषितशशिशोभामुहुरधिकमुखकमलमधुरिमणि। मदेन हर्षेण मुदितं स्फीतं मृदु सरसं

1. KB कृष्णे for श्रीकृष्णे. KC inserts इति before पूववत्. 2. KB, KC ०निनादाः, KP ०निनदः for ०निनदाः. 4. KA दीर्घे for दार्ढ्ये. KP विस्तारे. KA, KB, KP लौह०. 10. PS ०लुलित० for ०मुदित०. 13. GB कुसुमेति for the phrase कुसुमशर etc. 16. After कुङ्कुमरसः GB inserts : घुसृणं कुङ्कुमं स्मृतमिति धरणिः. 17-18 All words from घुसृणस्य to मूर्त इव omitted in GB. 18. GB omits कीदृशे and reads मदेति for the phrase मदमुदित etc. 19. GC omits स्फीतं.

यद्धसितं तेन मुषिता चोरिता या शशिनश्चन्द्रस्य शोभा कान्तिस्तया मुहुरधिकः संततोद्रिक्तो मुखकमलमधुरिमा यस्य तस्मिन्। यद्वा, मुखकमलविशेषणम्—मदमुदितं मृदुहसितम्। मुषितश्चोरितः शशी येन तत् मुषितशशि। शोभाभिर्मुहुरधिकम्। पूर्वक्षणगतशोभात् उत्तरक्षणशोभाया अधिकत्वात्। तस्मिन्मधुरिमा यस्य तस्मिन् ॥५३

सुबोधनी

पूर्वोक्तसंभोगान्ततन्माधुर्यस्फूर्त्याह—कुसुमशरशरैर्नखाङ्कादिभिर्यद्रतियुद्धं तत्र कुपिता या प्रेमसंरम्भोन्मत्ता गोपी

एका भ्रुकुटिमाबध्य

(भा० १०. ३२. ६) इत्याद्युक्ता। मुख्येत्यर्थः। तस्याः कुचकलसयोर्घुसृणरसेन लसदुरो यस्य। तत्स्पर्शानन्दविकारमाह—स्मरमदेन या मुत् तया व्याप्तं यन्मृदुहसितं तेन मुषितशशिशोभया मुहुरधिको मुखकमले मधुरिमा यस्य। एभिर्दैन्येनात्मनो दशमी दशा सूचिता ॥५३

सारङ्गरङ्गदा

अथ संभोगान्तकालीनतन्माधुर्यस्फूर्त्या तत्र लीयमानमिवात्मानं मत्वा प्रलपन्त्या वचोऽनुवदन्नाह—देवे एतत्क्रीडापरे श्रीकृष्णे पूर्ववदहं लीये। कीदृशे—-

2. GB सततो० for संततो०. 7. CB, CD omit all words from पूर्वोक्त० to आह and read instead किं च. CB, CD omit नखाङ्कादिभिः. CC inserts नखाङ्कादौ after तत्र. 8. CB, CD प्रेम० for प्रेमसंरम्भ०. 10. CB, CD उक्तदिशा श्रेष्ठा for आद्युक्ता मुख्या. CB, CD ०कलस- for कलसयोः. After घुसृणरसेन, CC inserts चन्दनरसेन. 11-12. CB, CD omit all words from तत्स्पर्शा० to व्याप्तं and read instead : अतएव हर्षेणोद्गतं. 11. CC मुदितमुल्लासितं for या मुत्तया व्याप्तं. 12. CC तिरस्कृत० for मुषित०. CB, CD मुषिता शशिशोभा येन तस्मिन् for मुषितशशिशोभया. CC inserts प्रतिक्षणं after मुहुः. 13. After यस्य CD inserts : तेन मुषितः शशिशोभाभरो येन तस्मिन्विमले मुखकमले मधुरिमा यस्य and continues विमलो मुखेन मधुरिमा यस्येति वा. CB, CD omit all words from एभिः to सूचिता. 15. KP संभोगान्तःकालीन०. 16. KD inserts कुसुमेति after आह.

कुसुमशरस्य शरेण तदाघातेन समरे रतियुद्धे कुपिता स्मरमदेन मधुपानजमदेन च युक्ता या गोपी तस्याः स्वयंग्रहाश्लेषेण लग्नो यः कुचकलसघुसृणरसस्तेन लसदुरो यस्य। अत्रात्मस्थाने गोपीति सामान्योक्तिर्वैदग्ध्या। तथा, मदेन स्मरमदेन मुदितं तद्धाष्टर्य्यदर्शनाद्यन्मृदुहसितं तेन मुषितः शशी येन तादृशश्च शोभया क्षणे क्षणेऽधिकश्च मुखकमलस्य मधुरिमा यस्य। यद्वा, तादृशहसितेन मुषितः शशी यया तया शोभया मुहुरधिकं यन्मुखकमलं तस्य मधुरिमा यस्मिन्॥ स्वान्तर्दशायाम् पूर्ववत्॥ बाह्यार्थः स्पष्टः॥५३

आनम्रामसितभ्रुवोरुपचितामक्षीणपक्ष्माङ्कुरे-
ष्वालोलामनुरागिणोर्नयनयोरार्द्रां मृदौ जल्पिते ;
आताम्रामधरामृते मदकलामम्लानवंशीस्वने-
ष्वाशास्ते मम लोचनं व्रजशिशोर्मूर्तिं जगन्मोहिनीम् ॥५४

कृष्णवल्लभा

वंशीं वादयतः श्रीकृष्णस्य श्रीमूर्तिं द्रष्टुं समुत्कण्ठत इत्याह—आनम्रामिति। मम लोचनं कर्तृ व्रजपतेर्व्रजपालकस्य जगन्मोहिनीं जगन्ति मोहयितुं शीलं यस्याः सा तां मूर्तिं श्रीविग्रहमाशास्ते। द्रष्टुमिच्छतीत्यर्थः। व्रजशिशोरिति पाठे—व्रजे शिशुरिव चेष्टत इति व्रजशिशुस्तस्य कृष्णस्येति। कीदृशीं मूर्तिम्—असितयोः श्यामयोर्भ्रुवोरानम्रामीषन्नम्राम्। तेन चेषन्नम्रतयात्यपूर्वकन्दर्पकार्मुका-

2. KP वा for च. KC inserts च again after युक्ता. 3. KP तत्र for अत्र. 4. KP omits स्मरमदेन. KA ०स्मितं for ०हसितं. 5. KC reads स चासौ for तादृशश्च, and inserts मुहुः after शोभया. 5-6. KD omits haplologically all words from मधुरिमा (l. 5) to तस्य (l. 6). 6. KC inserts च before मुषितः, and again a second च after शोभया. KP तन्मुख० for यन्मुख०. 11. Gopāla Bhaṭṭa (v. l. as in text) व्रजपतेः for व्रजशिशोः. 13. GB omits सं before उत्कण्ठते. 14. GB omits जगन्मोहिनीं. 16. GB श्रीकृष्णस्य for कृष्णस्य. 17. GC omits श्यामयोः.

कृतिना समस्तमोहनं युक्तमेव। पुनः कीदृशीम्—अक्षीणपक्ष्माङ्कुरेषूपचितां घनीभूताम्। अक्षीणेत्यल्पताया अभावमात्रमुक्तम्। उपचितेति वृद्धिः। पुनः कीदृशीम्—अनुरागिणोर्नयनयोरालोलां समन्ततश्चपलाम्।

सदानुभूतमपि यः कुर्यान्नवनवं प्रियम्।
रागो भवन्नवनवः सोऽनुराग इतीर्यते ॥

इति (उज्ज्वल०, स्थायिभावप्रकरण, १३४)। पुनः कीदृशीम्—मृदौ सहजसुकुमाराक्षरे जल्पिते आर्द्रां स्निग्धाम्। मन्मथरसनर्ममयत्वादतिसरसामित्यर्थः। पुनः कीदृशीम्—अधर एवामृतं घनीभूतं तस्मिन्नाताम्रां सर्वतोऽरुणाम्। पुनः कीदृशीम्—अम्लानवंशीस्वनेषु मदकलाम्। अम्लाना अन्तर्हर्षविशालानामाधुर्यादिरूपा ये वंशीस्वनास्तेषु मदकलां हर्षव्याप्ताम्। आनम्रोपचयालोलत्वाताम्रत्वमदकलादिनासितत्वादिना माधुरीचमत्कारविशेषेणातिमोहकत्वमुक्तम्॥ शार्दूलविक्रीडितं छन्दः ॥५४

सुबोधनी

पुनस्तदपगमेऽत्युत्सुकस्तद्दर्शनमाशास्ते—मम लोचनं व्रजशिशोर्मूर्तिं द्रष्टुमाकाङ्क्षति। को वास्य दोषः—जगन्मोहिनीम्। तत्र हेतूनाह—श्यामयोर्भ्रुवोरानम्रां कुटिलाम्। अनल्पेषु पक्ष्माङ्कुरेषु समृद्धिमतीम्। सघनपक्ष्माङ्कुरा-

1. GB omits कीदृशीं. GC omits (? haplologically) all words from अत्यपूर्व० (p. 181 l. 17) to अल्पतायाः० (l. 2). 3. GB omits कीदृशीं and inserts आ before समन्ततः. 4. GA अप्रियः for अपि यः. 5. GC भवेत् for भवन्. 6. GB omits इति and कीदृशीं. GB सुकुमारा० for सहजसुकुमारा०. 7. GC inserts भाषणे after जल्पिते. GB omits the first कीदृशीं. GB ०रसापादकत्वात् for ०रसनर्ममयत्वात्. 8-9. GB omits all words from the second कीदृशीं to मदकलां. 10. GC ०मदकलादीनामसित०. 14. CB, CD अत्युत्कण्ठितः for अत्युत्सुकः. After आशास्ते CB, CD insert आनन्दामिति. CA inserts अये before मम. 15. CC च for वा. CB, CD insert यतः after दोषः. CD अत्र for तत्र. CB, CD श्याम- for श्यामयोः. 16. CB omits समृद्धिमतीं.

मित्यर्थः। निजाभीष्टविषयानुरागयुक्तयोर्नयनयोरतिसतृष्णाम्। अतो मृदौ जल्पिते स्निग्धाम्। तेनैवाधरमृतेऽत्यरुणाम्। म्लानिर्म्लिष्टतास्पष्टस्वरादिस्तद्रहितेषु वंशीस्वनेषु हर्षेण मधुराम् ॥५४

सारङ्गरङ्गदा

अथ मूर्छन्त्याः सखीभिः प्रबोधिताया अत्यौत्सुक्यात्तत्तन्माधुर्यस्फूर्त्या भूमौ निमत्य नेत्रे निमील्यैव ताः प्रति प्रलपन्त्या वचोऽनुवदन्नाह—अहो, एतादृशदशायामपि मम लोचनं व्रजशिशोर्व्रजकिशोरस्य मूर्तिमाशास्ते द्रष्टुमाकाङ्क्षति। अथवास्य को दोषः, यतः—जगन्मोहिनीम्। तत्र हेतूनाह—श्यामभ्रुवोरानम्रां कुटिलाम्। अक्षीणेषु पक्ष्माङ्कुरेष्वुपचितां समृद्धिमतीम्। प्रोद्भटसघनपक्ष्माङ्कुरामित्यर्थः। मद्विषयानुरागयुक्तयोर्नयनयोरालोलां प्रसारितपक्ष्मपक्षाभ्यामुड्डिडीषुबद्धखञ्जनयुगवच्चञ्चलाम्। मृदौ जल्पिते आर्द्राम्। अधरामृते आताम्रामत्यरुणाम्। अम्लानवंशीस्वनेषु मदकलाम्। स्मरमदोद्गारेण गम्भीरामित्यर्थः। स्मरमदं वर्धयतीति वा॥ दशाद्वये सुगमोऽर्थः ॥५४

तत्कैशोरं तच्च वक्त्रारविन्दं
तत्कारुण्यं ते च लीलाकटाक्षाः।
तत्सौन्दर्यं सा च सान्द्रस्मितश्रीः
सत्यं सत्यं दुर्लभं दैवतेऽपि ॥५५

1. CB, CD omit यतः 2. CB, CD omit तेनैव. CB omits अस्पष्टस्वरादिः. 2-3. CB तद्रहिते वंशीस्वरे. CD omits all words from म्लानिः to मधुरां and reads instead श्लिष्टता तद्रहिते वंशी। 3. CB मधुरास्फुटां for मधुरां. 5. KB, KP तत्० for तत्तत्०. 6. KD inserts आनम्रामिति after आह. 7. KA, KB, KP किशोरस्य for व्रजकिशोरस्य. 8. KC इत्याह for यतः. KA, KD जगन्मोहनीं. KD, KC, KP हेतुं for हेतून्. 10. KD inserts यद्वा before मद्विषया०. KC, KD उड्डीयमान० for उड्डिडीषु. 11. KP युगपत् for युगवत्. 16. Gopāla Bhaṭṭa माधुर्यं for सौन्दर्यं. PS मन्द० for सान्द्र०. 17. PS दैवतेषु.

कृष्णवल्लभा

अथ किशोराकृतिश्रीकृष्णस्य तत्तन्माधुरीचमत्कारपरमोत्कर्षसीमत्वं स्वानुभवेन शपथपूर्वकं वदन्विदुषां चेतसि विश्वासमुल्लासयति—तत्कैशोरमिति। तत्प्रसिद्धं कैशोरम्। लोके तावत्कैशोरं वय एव चित्ताकर्षकम्, तत्रापि श्रीकृष्णगतं मुक्तानामपि चित्तहरम्। कैशोरे च तदित्यद्भुतं वक्त्रारविन्दं मुखकमलं नयनाधरगण्डभ्रूविलासादिमाधुरीविशेषवत्। तत्कारुण्यं जीवनप्रदकरुणा। तदिति निरुपाधि। ते च लीलाकटाक्षाः। ते इति करुणाशालिनो लीलाप्रधानाश्चपलभ्रूभङ्गियुतदृग्भङ्गिरूपाः। तन्माधुर्यं मधुरिमा। सा चालौकिकी सान्द्रस्मितश्रीर्गहनस्मितकान्तिः। एतत्सर्वं दैवतेऽपि। देव एव देवता। स्वार्थे तल् (पा० ५. ४. २७)। तत्समूहो दैवतम्।

तस्य समूहः

(पा० ४. २. ३७) इत्यण्। तस्मिन्नपि दुर्लभम्।

नपुंसकानपुंसकयोर्नपुंसकमेकवद्वा

(पा० १. २. ६९) इति दुर्लभमिति नपुंसकम्। यद्वा, देवा ईश्वरा अवतार्यवताररूपास्तांस्तांस्तायते विस्तारयति स्वेच्छयाविर्भावयति स देवता श्रीकृष्णः। स्वार्थेऽणि दैवतम्। तस्मिन्नपि दुर्लभम्।

विस्मापनं स्वस्य च सौभगर्द्धेः
परं पदं भूषणभूषणाङ्गम्।

(भा० ३. २. १२) इत्युक्तेः। एतत्सत्यं सत्यं शपथपूर्वकं प्रतिजान इत्यर्थः॥ शालिनी छन्दः—

मात्तौ गौ चेच्छालिनी वेदलोकैः (छन्दोमञ्जरी २) ॥५५

2. GB तत्० for तत्तत्०. 4. GC omits लोके तावत्. 5. GB omits कैशोरे च. 6. GB तन्निरुपाधिकं for तत् (before कारुण्यं), omitting तदिति निरुपाधि. 7-8. GB inserts all words from करुणाशालिनः to दृग्भङ्गिरूपाः before लीलाकटाक्षाः, omitting them in their proper place. 7. GB omits ते इति. 9. GC omits देव एव. 10. GC omits तत्समूहो दैवतं. 12. GA inserts एवेति before अण्. 13. The Pāṇini-sūtra is quoted in a slightly different form. 14. GA inserts दैवते before देवाः. 16. GB inserts दुराकलनीयं after दुर्लभं. 19. GB inserts अहं after ०पूर्वकं. 21. GB inserts इति after वेदलोकैः.

सुबोधनी

अथ तत्कैशोरादेर्दौर्लभ्यस्फूर्त्याह—मम तद्दर्शनं दुर्लभमिति किं वक्तव्यम्, यतः स्वर्गादिवैकुण्ठपर्यन्तस्य देवसमूहेऽपि तत्कैशोरं तद्वक्त्रारविन्दं च दुर्लभमिति सत्यं सत्यं सशपथं सत्यम्। दर्शनं चेद्दुर्लभं तर्हि तत्कारुण्यं ते च तद्युक्तलीलाकटाक्षाः सुदुर्लभा एव। तत्सौन्दर्यं सा च सान्द्रस्मितश्रीश्चातिदुर्लभैव ॥५५

सारङ्गरङ्गदा

अथ अहिमकरादिश्लोकत्रय्युक्त(श्लो० ५१-५३)तत्तन्माधुर्यस्फूर्त्या तदप्राप्तिवैक्लव्याद्विलपन्त्या वचोऽनुवदन्नाह—तत्कैशोरं तद्वक्त्रारविन्दं च दैवतेऽपि स्वर्गादिवैकुण्ठपर्यन्तस्थदेवसमूहेऽपि दुर्लभमिति सत्यं सत्यम्। तथा, तत्कारुण्यं ते लीलाकटाक्षाश्च दुर्लभाः। तथा, तत्सौन्दर्यं सा च सान्द्रस्मितश्रीश्च दुर्लभा। यद्वा, मम पुनस्तद्दर्शनं तादृशरहोलीलादिकं च दुर्लभमेवेति भावयन्त्यास्तत्कालं वामोरुनेत्रकुचादिस्पन्दनमनुभूय तद्भाग्यमप्यतिनैराश्येनोपालभमानाया वचोऽनुवदन्नाह—हे दैव तद्दर्शनसूचकभाग्य ते तवापि तत्कैशोरं तद्वक्त्रारविन्दं च।

2-3. CB, CD omit all words from अथ to यतः; CB reads instead पुनस्तन्माधुर्यदौर्लभ्यमाह—तत्कैशोरमिति। तत्कैशोरमित्यादिकं सर्वं; CD श्रीकृष्णचन्द्रकरुणामयव्रजतरुणीगणरतिविलासश्रमजलनिवारणसुखस्पर्शनकरकमलमधुरतरमुरलीरवामृत-जगतीजनमाधुर्यदौर्लभ्यमाह—तत्कैशोरमित्यादिकं सर्वं. 3. CB, CD ०पर्यन्तस्थदैवतसमूहेषु for ०पर्यन्तस्य देवसमूहे. CB, CD omit तत्कैशोरं तद्वक्त्रारविन्दं च. 4. CB, CD do not repeat सत्यं. CC inserts पुनः सविमर्शमाह before दर्शनं. CC तद्युक्तास्ते च for ते च तद्युक्त-. 4-5. CB, CD omit all words from दर्शनं to अतिदुर्लभैव and read instead: नात्र (CD omits) नात्र सन्देह इत्यथः. 5. CC अतिदुलभं for अतिदुलभा. 7. KA, KB, KP omit अथ. KD, KP ०त्रय० for ०त्रयी०. KP ०युक्त० for ०उक्त०. KA ०तत्० for ०तत्तत्०. 8. KC ०तच्च वक्त्रारविन्दं. KA वक्त्राम्बुजं for वक्त्रारविन्दं 9. KC does not repeat सत्यं. KA inserts च after तथा. 10. KP लीलादि० for लीला०. KB omits च after ०कटाक्षाः. KC omits तथा. KD, KP omit च after सा. KB omits च after ०श्रीः. 11. KC inserts एतत् after दुलभं, and एव after तत्कालं. 13. KP देव for दैव, and ०भाग्यं for ०भाग्य.

तद्दर्शनमित्यर्थः। पुनर्दुर्लभम्। ननु भाग्यस्य दुर्लभमिति न वाच्यम्, तत्राह —सत्यं सत्यम्। दुर्लभमेवेत्यर्थः। तत्रापि चेद्दुर्लभं तदा तद्युक्तानां वराकानां किमुतेत्यर्थः। दर्शनमपि दुर्लभं चेत्तदा सर्वांस्त्यक्त्वा येन मयैव रेमे तत्कारुण्यम्, यैर्मां रहः प्रेरितवांस्ते लीलाकटाक्षाश्च सुदुर्लभा एव। एवं चेत्तर्हि सुरतान्ते यत्तत्सौन्दर्यम्, केलिविशेषे मां सुवेषां दृष्ट्वा या सान्द्रस्मितश्रीः सा चातिदुर्लभैव॥ स्वान्तर्दशायाम्—तया सह विलसतस्तस्य तत्सर्वमिति॥ बाह्ये—तद्वैकृव्याद् विठ्ठलरङ्गनाथादिदर्शनोपदेशिनः स्वान्प्रत्युक्तिः। दीव्यन्तीति देवाः श्रीनारायणादयः। स्वार्थे तल्। दैवतेऽपि तत्समूहेऽपि। ननु तेऽपि नित्यकिशोरा एव, तत्राह—तत्साक्षान्मन्मथमन्मथत्वेन वर्णितम् (भा० १०. ३२. २) इति। अन्यत्समानम्॥५५

विश्वोपप्लवशमनैकबद्धदीक्षं
विश्वासस्तवकितचेतसां जनानाम्।
प्रश्यामप्रतिनवकान्तिकन्दलार्द्रं
पश्यामः पथि पथि शैशवं मुरारेः॥५६

कृष्णवल्लभा

तत्कैशोरादिकं दैवतेऽपि दुर्लभमित्युक्तम्, संप्रति तच्चापल्यविशेषदर्शनमनुभवन्नाह—विश्वोपप्लवेति। मुरारेः श्रीकृष्णस्य शैशवं चापल्यं पथि पथि वीथ्यां वीथ्यां पश्यामोऽनुभवामः। दृशेर्ज्ञानवचनत्वात्। अनेन तारुण्योपकारित्वेन

1. KP inserts एव after the first दुर्लभं. KP एव for इति (before न वाच्यं). 2. KP omits तदा. 3. KP तद्दर्शनं for दर्शनं, and सर्वान् for सर्वाः. KA, KB insert अद्य after मयैव. 4. KA, KB omit च after ०कटाक्षाः. 5. KA omits अति- after च. 6. KD inserts तु after बाह्ये. 8. KB तनुक, KP तन् for तल्. KP दैवतेति. 9. KP तथा for तत्र. KP साक्षान्मन्मथत्वेन. 13. PS पश्यामः for प्रश्याम-. 17. GB विश्वेति for विश्वोपप्लवेति. 18. GC ०वाचकत्वात् for वचनत्वात्.

चापल्यस्यातिमधुरत्वमुक्तम् । कीदृशं शैशवम्—विश्वासस्तकितचेतसां जनानां विश्वोपप्लवशमनैकबद्धदीक्षम् । विश्वासैः प्रत्ययैः स्तवकितानि परमकारुणिकः श्रीकृष्णोऽयमिति फुल्लप्रायाणि चेतांसि येषां तेषां जनानां विश्वस्य समस्तस्योपप्लवस्य शमनाय शान्त्यै बद्धा गृहीतैका मुख्या दीक्षा येन तत् । पुनः कीदृशम्—प्रश्यामप्रतिनवकान्तिकन्दलार्द्रम् । प्रश्यामा प्रकृष्टश्यामा या प्रतिनवा प्रतिक्षणं नवा नव्या कान्तिस्तस्याः कन्दल उद्भेदस्तेनार्द्रं सरसम् । यद्वा, प्रश्यामप्रतिनव-कान्तिकन्दलेनार्द्रयतीति तथा ।। प्रहर्षिणी छन्दः ।।५६

सुबोधनी

पुनरकस्मात्पुरः स्फुरच्चापल्यं पश्यन्निवाह—मुरारेः शैशवं पथि पथि पश्यामः । तद्दर्शने तत्कारुण्यमेव निदानमित्याह—विश्वासेन स एव सर्वं संपादयिष्यतीति निश्चयेनोत्फुल्लचेतसां जनानां सर्वे य उपद्रवास्तेषां शमने केवला गृहीता दीक्षा येन । तन्माधुर्यस्फूर्त्याह—प्रकर्षेण श्यामाः प्रतिक्षणनूतनाश्च ये कान्त्यङ्कुरा-स्तैरार्द्रम् ।।५६

सारङ्गरङ्गदा

अथ स्फूर्तिसाक्षात्कारयोर्भ्रमः पञ्चभिः । तत्रातिनैराश्येन पुनर्मूर्छन्त्याः, अयि सखि कारुणिकेन तेन कति विपद्गणाम्न रक्षिताः स्मः, तदधुनाप्यकस्मात्केनापि पथागत्य नः सुखयिष्यतीति सखीवाक्याद्

विषजलाप्ययात्

(भा० १०. ३१. ३) इतिवत्तद्गुणगानपूर्वकं सर्वतः पथोऽवलोक्य तत्र तत्र तत्स्फूर्त्या

1-2. GB विश्वासेति for all the words from विश्वासस्स्तवकित० to ०बद्धदीक्षं. 4-5. GB omits कीदृशं, and reads प्रेति for the phrase प्रश्याम etc. 9. CD omits पुनरकस्मात्पुरः. CB, CD insert सत् before चापल्यं. CB, CC, CD omit इव. After आह CB, CD insert विश्वोपेति (CD विश्वोपप्लवेति). 10. CB, CD omit all words from तद्दर्शने to संपादयिष्यति, and read instead : तच्चापल्यस्यात्मीयजनताक्लेशोपशमकता(CD शमरूपता)मतमनुभवन्नाह—विश्वासेन सर्वतोऽस्मत्पालकः स एव. 11. CC omits गृहीता. 15. KA inserts श्लोकैः after पञ्चभिः. 16. KA inserts वयं before न. 19. KC इत्यादि० for इति०. KP ०गान० for ०गुणगान०. KA, KC do not repeat तत्र.

सखीः प्रति कथयन्त्या वचोऽनुवदन्नाह—हे सख्यः, मुरारेः परमसुन्दरस्य तस्य शैशवं कैशोरं तद्वयःसौन्दर्यादि पथि पथि पश्यामः।

कुन्ताः प्रविशन्ति

इति न्यायात्किशोरं तमेवेत्यर्थः। कीदृशम्—प्रकर्षेण श्यामाः प्रतिनवाः क्षणे क्षणे नूतनाश्च ये कान्तिकन्दलास्तैरार्द्रम्। तथा, जनानां स्वीयानां व्रजवासिनां सर्वेषामेव। किमुतास्माकमेवेत्यर्थः। विश्वे सर्वे य उपप्लवास्तेषां शमने एका केवला बद्धा गृहीता दीक्षा येन तत्। कीदृशाम्—

एष वः श्रेय आधास्यत्

(भा० १०. २६. १९) इत्यादिगर्गवाक्यात्

सुदुस्तरान्नः स्वान्पाहि

(भा० १०. १७. २४) इत्यादिविश्वासैः स्तवकितं चेतो येषाम्॥ स्वान्तर्दशायाम्—तस्याः सङ्गे तथा स्फूर्त्यैव॥ बाह्ये तु—मथुरानिकटमागतस्य तस्य सर्वत्र तत्स्फुर्त्या तथोक्तिः। तत्र

प्रतिज्ञा तव गोविन्द

इत्यादिविश्वासयुक्तानां जनानां भक्तानाम्। तथा

सकृदेव प्रपन्नो यस्तवास्मीति च याचते।
अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम॥

(रामायण ६. १८. ३३) इत्यादि तद्दीक्षा ज्ञेया। अन्यत्समम्॥५६

2. KC omits कैशोरं. KC ०सौन्दर्यादिकं. 3. For this quotation see Sāraṅgaraṅgadā on verse 33. 6. KA, KD insert उपद्रवाः after उपप्लवाः. 6-11. KP omits haplologically all words from शमने (l. 6) to चेतो येषां (l. 11). 7. KB कीदृशानां. 12. KC, KD omit तस्य. 14. After गोविन्द KC continues : न मे भक्तः प्रणश्यतीति संस्मृत्य प्राणान्संधारयाम्यहं. The entire verse is cited from the Mahābhārata by the Bhaktirasāmṛta० (1. 2. 35): प्रतिज्ञा तव गोविन्द न मे भक्तः प्रणश्यति। इति संस्मृत्य संस्मृत्य प्राणान्संधारयाम्यहम्॥. 16. For this verse see Sāraṅgaraṅgadā on verse 12. 6. KB omits ज्ञेया.

मौलिश्चन्द्रकभूषणो मरकतस्तम्भाभिरामं वपु-
र्वक्त्रं चित्रविमुग्धहासमधुरं बाले विलोले दृशौ ।
वाचः शैशवशीतला मदगजश्लाघ्या विलासस्थिति-
र्मन्दंमन्दमये क एष मथुरावीथीं मिथो गाहते ॥५७

कृष्णवल्लभा

अथ दृढभावनाभावितान्तःकरणः पुरतः स्फुरन्तं श्रीकृष्णविग्रहं वर्णयति— मौलिरिति । अये अहो । स्वमेव संबोधयति । क एष मथुरावीथीं मथुरा गम्यते यया तां वीथीं वर्त्म । न तु मथुरास्थां वीथीम् । मिथो रहसि गाहतेऽव-गाहते । लीलाविशेषैः परि च क्रामतीत्यर्थः ।

मथ्यते जगत्सर्वं तु ब्रह्मज्ञानेन येन वा ।
तत्सारभूतं यद्यस्यां मथुरा सा निगद्यते ॥

इति श्रीगोपालोत्तरतापनीप्रसिद्धेः (श्लो० ५०) । किंचिन्निकटागते संभ्रमादाह— मौलिश्चन्द्रकभूषणः । चन्द्रकाञ्चितचूड इत्यर्थः । वपुर्गात्रं मरकतस्तम्भादप्यभि-रामं सुन्दरम् । वस्तुतस्त्विन्द्रमणितुल्यम्, तत्रापि सुवर्णालंकृतिकान्तिव्याप्तत्वा-न्मरकतस्तम्भतुल्यम् । अतिसंनिहितं दृष्ट्वाह—वक्त्रं मुखं चित्रविमुग्धहासमधुरम् । चित्रं परमाश्चर्यं विमुग्धं विशेषेण मुग्धं सुन्दरं यथा स्यात्तथा हासेन मधुरं मूर्तिमान्मधुररस इव । किं च—बाले कोमले विलोले सहजचापले दृशौ नेत्रे । किंचिद्वदति सति नीचैराह—वाचः शैशवशीतलाः । शैशवं सौकुमार्यं तेन शीतलाः स्निग्धाः । कृष्णादन्यः कोऽपि नायमिति निश्चित्याह—विलासस्थिति-

1. This verse is omitted in PS. Cited in Bhakti-rasāmṛta° 3.2.58. 8. GB मार्ग for वर्त्म. 9. Should the reading be परिचङ्क्रमतीत्यर्थः ? 10. GB प्रमथ्यते; GC मथ्यते तु, omitting तु later. The reference is to the edition of the text, included in the *Vaiṣṇava Upaniṣads* edited by A. Mahādeva Śāstri, Madras 1923, p. 72, verse 50. 12. GB omits श्री before गोपाल°. 15. GB °तुल्यत्वं for °तुल्यं. GB omits the phrase चित्रविमुग्धहासमधुरं after मुखं. 16. GB omits स्यात्. 18. GB भाषणानि for शैशवशीतलाः. 19. GB श्रीकृष्णात्. GB transposes अयं and न.

विलासस्य स्थितिस्तत्तदङ्गचालनेन क्रीडामर्यादा मदगजश्लाघ्या। मदो मत्तो यो गजस्तेन तस्माद्वा श्लाघ्या श्लाघनीया। यथैकचरो गजो वनमध्ये तिष्ठन्मन्दं मन्दं भ्रमति तथायमायातीति भावः॥ शार्दूलविक्रीडितं छन्दः॥५७

सुबोधनी

एवं स्फूर्तिक्रमेण मथुरामेत्य तद्वीथ्यां तत्स्फूर्त्या साश्चर्यमाह—अये इति वितर्के, क एष मथुरावीथीं मिथः परस्परं ममाश्रयपरिजनैः सहितं शनैः शनैर्गाहते विलासगत्याक्रम्य गच्छति। कीदृक्—यस्य मौलिश्चन्द्रकैर्भूषणं यस्य। तथा, वपुर्मरकतस्तम्भादप्यतिरमणीयम्। तद्रमणीयत्वं व्यनक्ति—वक्त्रं चित्रविशिष्ट-मनोहरहासेन मधुरम्। तथा, दृशौ क्रीडाविष्टे सतृष्णे च। अन्यदपि—वाचः कैशोरेण तापहारिण्यः। अपरं च—मन्थरगमनकरचालनादिना विलासेन स्थितिर्मदगजैरपि श्लाघ्या॥५७

सारङ्गरङ्गदा

अथ पुरः कुञ्जवर्त्मन्यागच्छन्तमिव तं दृष्ट्वा प्रतिपदनवनवतन्माधुर्यस्फूर्त्याहृष्ट-

1. GB omits मदगजश्लाघ्या, and मदः. 3. GB inserts एव after तथा. 5. After एवं CB, CD insert पथि पथि. CB, CD मथुरावीथ्यां for मथुरामेत्य तद्वीथ्यां. CB, CD तस्यैव for तत्- (before स्फूर्त्या). CB, CD omit साश्चर्यं, and insert मौलिरिति after आह. 6. CB, CD मथुरायां मार्गं for मथुरावीथीं, अन्योन्यं for परस्परं and मदभीष्टवर्ग- for ममाश्रयपरिजनैः. CB, CD प्रविशति for गाहते. 7. CD omits विलासगत्याक्रम्य गच्छति. CC क्रमेण for आक्रम्य. CB repeats the first यस्य! After मौलिः CD inserts चन्द्रकभूषणः. CB चन्द्रकेन for चन्द्रकैः. CB omits तथा. 8. CB, CD किं च for तद्रमणीयत्वं व्यनक्ति. 8-9. CB, CD omit all words from चित्रविशिष्ट० to कैशोरेण and read instead : चित्रवन्निरन्तरोऽतएव विशेषेण मनोहरो यो हासस्तेन मधुरम्। तथा, केल्याविष्टे अतएवातिसतृष्णे दृशौ (CB adds यस्य)। अपि च वाचः शैशवेन कलस्वनेन. 10-11. CB omits all words from अपरं to श्लाघ्या. 10. CD मन्थरावलोकनकर०. CC, CD ०चालनादिविलासेन. 13. KP वतन्यां. KC, KD ०वत्मन्यां for वत्मनि. KP प्रतिपदं नव०.

पूर्वमिव तं मत्वा पार्श्वस्थां सखीं पृच्छन्त्या वचोऽनुवदन्नाह—अये बाले मिथो रहसि। एक एवेत्यर्थः। क एष मन्दं मन्दं वीथीं कुञ्जवीथीं गाहते। विलास-गत्याक्रम्यागच्छतीत्यर्थः। यस्य मौलिः शिरो मुकुटं वा चन्द्रकैर्भूषणं यस्य। तथा, वपुर्मरकतस्तम्भादप्यभिरामम्। वक्त्रं चित्रो विमुग्धश्च यो हासस्तेन मधुरम्। दृशौ विलोले। वाचः शैशवेन कैशोरेण शीतलाः। तथा, गत्यव-लोकनकरचालनादिविलासस्थितिर्मदगजैरपि श्लाघ्या। पुनः कीदृशी—मथुरा। पश्यतां मनो मथ्नातीति मथुरा। औणादिकोरच्-प्रत्ययात्। तथा सर्वपदानां लिङ्गव्यत्ययेन विशेषणमिदम्। मोलिर्मथुरो वक्त्रं मथुरमित्यादि॥ स्वान्त-र्दशायाम्—तथास्फूर्त्यौ पार्श्वस्थसखीं प्रत्युक्तिः॥ बाह्ये तु—मथुरां प्रविष्टस्तथा-स्फूर्त्याह। अये इत्याकाशे संबोधनम्। क एष मथुरावीथीं गाहते यस्य दृशौ बाले स्मरमदालसे विलोले च। अन्यत्समम्॥५७

पादौ वादविनिर्जिताम्बुजवनौ पद्मालयालम्बितौ
पाणी वेणुविनोदनप्रणयिणौ पर्याप्तशिल्पश्रियौ।
बाहू दोहदभाजनं मृगदृशां माधुर्यधाराकिरौ
वक्त्रं वाग्विषयातिलङ्घनमहो बालं किमेतन्महः॥५८

कृष्णवल्लभा

अथातिमधुरभावेन श्रीकृष्णं भावयन्मनसि स्फुरमाणं तद्रूपमनुभूयात्याश्चर्येण तर्कयति—पादाविति। अहो किमेतदत्याश्चर्यं बालं सुकुमारं महज्ज्योतिः। किं वा विशुद्धसत्त्वमयम्, किं वा ब्रह्मज्योतिः, नैकमपि संभवतीत्याह—महस्तावन्निरवयवम्,

1. KP inserts मौलिरिति after आह. 2. KC inserts एकान्ते after रहसि. 3. KP गच्छति for आगच्छति. 5. KP विलोचने for विलोले. KB, KC omit कैशोरेण. 8. KP मधुरः for मथुरः and मधुरं for मथुरं. 9. KC मथुराप्रविष्टः. 11. KP विलोचने for विलोले. KC omits विलोले च. 12. PS पाद० for वाद०, and ०लंकृतौ (v. l. as in text) for ०लम्बितौ. 14. PS ०धारा गिरौ for धाराकिरौ. 15. PS ०लङ्घितं for लङ्घनं. 17. GA स्फुरमाण-तद्रूप०. 19. GB omits किं वा before ब्रह्म०.

अस्य तावत्पादौ वादविनिर्जिताम्बुजवनौ। वादेन विनिर्जितमम्बुजवनं याभ्याम्। पादादिमत्त्वाद् ब्रह्मज्योतिष्ट्वं निरस्तम्। अम्बुजवने पद्मा वर्तते, कथमस्य विनिर्जितत्वमत आह—पद्मालयालम्बितौ। पद्मालया लक्ष्मीस्तयालम्बितावाश्रितौ। कमलवनं हित्वात्रैव वसतीति भावः। पाणी हस्तौ वेणुविनोदनप्रणयिनौ। वेणोर्विनोदने वादने प्रणयिनौ सकौतुकौ। पर्याप्तशिल्पश्रियौ पर्याप्ताः पर्यवसानं प्राप्ताः शिल्पश्रियो ययोस्तौ। समस्तकलाकलापकुशलावित्यर्थः। बाहू कीदृशौ—मृगदृशां व्रजसुन्दरीणां दोहदभाजनम्। दोहदस्य प्रेम्णो मनोरथस्य वा भाजनं पात्रम्। माधुर्यधाराकिरौ माधुर्यधारां किरत इति तथा तौ। किंपि रूपम्। सर्वाङ्गानां यथाकथंचिन्निरूपणं कृतम्, वक्त्रं तु निरूपयितुमशक्यमित्याशयेनाह—वक्त्रं वाग्विषयातिलङ्घनम्। वाचां विषयोऽधिकारस्तं लङ्घयतीति तथा तत्। वागगोचरमाधुर्यमित्यर्थः॥ शार्दूलविक्रीडितं छन्दः॥५८

सुबोधनी

पुनस्तदावेशमोहेन सविस्मयमाह—एतत्पुरो दृश्यमानं महः किम्। क्षणं विमृश्याह—अहो बालं किशोराकारम्। तत्कथम्—यतोऽस्य पादौ दृश्येते। कीदृशौ—वादेन विनिर्जितान्यम्बुजवनानि याभ्याम्। अतः पद्मालयया तानि त्यक्त्वा-

1. GB तु for तावत्. GB omits the phrase वादविनिर्जिताम्बुजवनौ. 3. GB omits पद्मालयालम्बितौ. GB आलम्बिनी for आलम्बितावाश्रितौ. 4. GB तत्र for अत्र. GB omits वेणुविनोदनप्रणयिनौ. 5. GB तथा for the phrase पर्याप्तशिल्पश्रियौ. 6. GB omits कीदृशौ. 7. GB omits दोहदभाजनं. 8. GB तथा for माधुर्यधाराकिरौ. 9. GB omits आशयेन. 10. GB omits वक्त्रं वाग्विषयातिलङ्घनं. GB omits तत्. 11. GA वागगोचरे मा०. 13. CB, CD omit all words from पुनः to आह and read instead : परं च (CD omits) पुनस्तदपगमे सामान्यस्फूर्त्या ससंशयमाह—पादाविति. CA तदावेशे मोहेन. CB, CD कान्तिपुञ्जं for महः. 14. CB, CD omit तत्कथं 15. CB omits वादेन. CB, CD insert तौ after याभ्यां. CC यतः for अतः. CA inserts अम्बुजवनानि and यत्र respectively before and after त्यक्त्वा.

श्रितौ। पुनरूर्ध्वं विलोक्य, पाणी च कीदृशौ—वेणोर्विनोदने यः प्रणयस्तद्युक्तौ। तथा, परि सर्वतोभावेनाप्ता शिल्पश्रीर्यत्र। ततोऽस्योर्ध्वं वीक्ष्य, बाहू च कीदृशौ—माधुर्यधारां किरत इति तत्किरौ। अतो मृगदृशां सर्वाभीष्टस्य पात्रम्। तदुपर्यपि वक्त्रं च कीदृशम्—वाग्विषयमतिक्रामति यत्तदगोचरम् ॥५८

सारङ्गरङ्गदा

पुनस्तदतिशयस्फूर्त्या ससंशयं प्रलपन्त्या वचोऽनुवदन्नाह, अहो एतत्पुरो दृश्यमानं महः कान्तिपुञ्जः किम्—बालं किशोरम्। तदाकारमित्यर्थः। यतोऽस्य पादौ वादेन विनिर्जितान्यम्बुजवनानि याभ्यां तादृशौ। अतः पद्मालयया तानि त्यक्त्वालम्बितावाश्रितौ। तथास्य पाणी वेणुविनोदने यः प्रणयस्तद्युक्तौ। तथा, पर्याप्ता शिल्पश्रीर्यत्र याभ्यां वा तौ। तथास्य बाहू च माधुर्यधारां किरत इति तत्किरौ। अतो मृगदृशां सर्वाभीष्टस्य भाजनं पात्रं यौ। तथास्य वक्त्रं वाग्विषयमतिलङ्घयति यत्तत्। अनिर्वचनीयमित्यर्थः। यद्वा, निर्विशेषमाधुर्यपुञ्जस्फूर्त्याह—एतन्महः किं कीदृशम्। मनोनेत्रहारकत्वादाश्चर्यमित्यर्थः। किंचिद्विशेषस्फूर्त्या कन्दर्पोदयादाह—अहो बालं किशोरमेतत्। सम्यग्विशेषस्फूर्त्या माधुर्योदयादाह—अस्य पादौ। तत्रापि वादेति पूर्ववत्॥ दशान्तरद्वये सुगमम् ॥५८

1. CA ०स्थितौ for ०श्रितौ. CB ततः, CD अतः for पुनः. CB, CD प्रेरणैः for विनोदने. 2. CB, CD insert तौ after यत्र. CC आप्तशिल्पसंपद्यत्र. CB, CD च for अस्योर्ध्वं वीक्ष्य. 3. CB, CD omit च after बाहू. 4. CB, CD insert यौ after पात्रं. CB, CD ततश्च for तदुपर्यपि. CB, CD omit च after वक्त्रं. 5. CB अनिर्वचनीयमित्यर्थः for अगोचरं. CC inserts वाग्- before अगोचरं 7. KP inserts पादौ वादेत्यादि after आह. KC omits अहो. 8. KB, KP ०पुञ्जं for पुञ्जः. 9. KB निर्जितानि. KC तौ for तादृशौ. 9-10. KP पद्मालयजातानि. 13. KA, KD omit अस्य after तथा. KD, KP अभि० for अति०. 14. KB, KP omit पुञ्ज. 15. KB अत्याश्चर्यं, KD अनिर्धार्यं for आश्चर्यं.

एतन्नाम विभूषणं बहुमतं वेषाय शेषैरलं
वक्त्रं द्वित्रिविशेषकान्तिलहरीविन्यासधन्याधरम् ।
शिल्पैरल्पधियामगम्यविभवैः शृङ्गारभङ्गीमयं
चित्रं चित्रमहो विचित्रमहहो चित्रं विचित्रं महः ॥५६

कृष्णावल्लभा

संप्रति श्रीकृष्णचन्द्रमतिमधुरभावेन नित्यमनुध्यायंस्तत्रापि विशेषतः श्रीमुखारविन्दमेव निर्भरभावनाभाव्यमानं प्रतिपदमधिकाधिकसौन्दर्यवत्तया सम्यगनुभवन्नतिबोभूयमानचमत्कार आह—एतदिति । अहो चित्रं महः । सर्वतः परमाश्चर्यमित्यर्थः । कीदृशं महः—चित्रं नानावर्णव्यतिकरसंवलितम् । सगुणत्वात् । पुनः कीदृशम्—चित्रं नयनाधरादिषु । तत्रापि पुनराह—अहहो विचित्रम् । दृग्भङ्ग्यादिषु विविधं चित्रं रचना यत्र तत् । न च चित्रं पृथगुपलभ्यमानम्, न च विचित्रं पृथगुपलभ्यमानम्, चित्रं विचित्रं मिश्रितमेवेत्यर्थः । एवं चित्रचमत्कारपरमावधिमुक्त्वा स्फुटतरं सविशेषमाह—यद्यपि तस्य सर्वाण्यङ्गानि स्वतो भूषणानि तथाप्येतदेव विभूषणं विशिष्टं भूषणम् । नाम प्राकाश्ये । बहुमतम् । बहूनां संमतमित्यर्थः । यत्प्रतिज्ञायते तत्किम्—वक्त्रमिति । वेषाय वेषार्थं शेषैः शिल्पैस्तिलकरचनादिचातुर्यविशेषैरलं पर्याप्तम् । वेषेण विनैवात्यर्थं शोभमानत्वात् । कीदृशैः शिल्पैः—अल्पधियामगम्यविभवैः । अगम्यो विभवो विविधोत्पत्तिर्येषां तैः । कीदृशं वक्त्रम्—द्वित्रिविशेषकान्तिलहरीविन्यासधन्याधरम् । द्वयोस्त्रयाणां वा विशेषा यत्र सा चासौ कान्तिलहरी

1. PS बर्हं for एतत्. 2. PS द्वित्र०, v. l. in Gopāla Bhaṭṭa चित्र० for द्वित्रि०. 3. PS शोलैः for शिल्पैः. 4. PS वक्त्रं for the first चित्रं. PS विचित्रितमहो for विचित्रमहहो. 7. GB ०सौन्दर्यवित्तया. 9. GA omits सगुणत्वात्. 10. GB तथा for पुनः कीदृशं. 13. GB शेषं for सविशेषं. 14. GB सर्वाङ्गानि. 15. GB प्रसिद्धं for प्राकाश्ये. GB प्रतिज्ञातं for प्रतिज्ञायते, and आह for किं. 16. GB शिष्टैः for शिल्पैः. 17. GB omits अगम्यविभवैः. 18. GB द्वित्रीति for the whole phrase द्वित्रिविशेष etc. 19. GB inserts वंशीस्मितयोः after द्वयोः, and दृग्भ्रूनमयां after त्रयाणां.

च। तस्या विन्यासेन विलासेन धन्यो रम्योऽधरो यत्र तत्। अयं भावः—द्वयोर्वंशीस्मितयोः, त्रयाणां दृग्भ्रूनर्मणामिति। चित्रविशेषकान्तिलहरीविन्यास-धन्याधरमिति पाठे—चित्रविशेषेषु वक्त्रवर्तिषु यः कान्तिलहरीविन्यासस्तेन धन्योऽधरो यत्र तत्। यद्वा, चित्रं विचित्रं यद्विशेषकं तिलकं तस्यान्ति अन्तिमा या लहरीरेखा तस्या विन्यासेन धन्यानि वस्तून्यधरयतीति तत्। पुनः कीदृशम्—शृङ्गारभङ्गीमयम्। दृग्भ्रूस्मितनर्मवेणुगीतगतिविलासप्रचुरमित्यर्थः। अथवा—अहो महः परमतेजोमयमिदं वपुश्चित्रम्। एतादृशं कृष्णस्य बहुतरदीप्तिमन्मया कदापि न दृष्टम्, केनापि भाग्यविशेषेणाद्य मे फलितमित्यर्थः। अहो चित्रं चित्रमित्यादरे वीप्सा। अहहो अद्भुते। विचित्रं विविधानि चित्राणि तिलकरचनाद्या यस्मिंस्तत्। विचित्रं दृष्टिवागङ्गचेष्टितैर्विशेषेण चित्रम्। शेषं पूर्ववत्॥ शार्दूलविक्रीडितं छन्दः॥५९

सुबोधनी

पुनरतिशयेन तन्माधुर्यस्फूर्त्याह—अहो चित्रं चित्रम्। अत्याश्चर्ये वीप्सा। पुनः सविस्मयम्—अहहो विचित्रम्। सन्नकण्ठत्वादहो अहो इति वक्तव्ये अहहो इत्युक्तिः। किं तत्—चित्रं विचित्रम् महः। तत्र चित्रतामाह—एतद्वक्त्रम्, नाम प्रकाश्ये, वेषसाधनाय बहूनां तन्माधुर्यविदां संमतम्। अतः शेषैः कुण्डला-

1-2. GB omits from अयं भावः to ०नर्मणामिति. 2-3. For the whole phrase चित्रविशेषकान्तिलहरीविन्यासधन्याधरमिति GB reads चित्रविशेषकान्तीति. 5. The Ms GC ends here at लहरीरेखा, with श्री॥ श्री॥ after the word. 6. GB omits कीदृशं. 7. GB inserts एवं योजना after अथवा. 8. GB भाग्योदयेन for भाग्यविशेषेणाद्य. 10. GB रचनादीनि for रचनाद्या. GB यत्र for यस्मिन्. The word विशेषेण lost in GA. 11. GB omits छन्दः. 13. CB, CD insert साश्चर्यं before, and एतदिति after आह respectively. CA आश्चर्ये, CB अत्राश्चर्ये for अत्याश्चर्ये. 14. CB विस्मये for सविस्मयं. 14-15. CB, CD haplologically omit all words from सन्नकण्ठत्वात् to विचित्रं. CC omits इति after अहो. 15. CB, CD विचित्रतां for चित्रतां. CB, CD omit एतत्. 16. CB, CD ०माधुर्यानुभाविनां. Before अतः CB, CD insert यत एतदेव विशिष्टभूषणं.

दिभिरलं वारणे। तत्सामग्रीं संपादयन्नाह—द्वयोः कपोलयोस्त्रयाणां नासादशनचिबुकानां विशेषतो नीलश्वेतादिलहरीणां विशिष्टार्पणेन धन्योऽधरो यत्र। विचित्रतामाह—शिल्पैररुणाधरस्य चतुर्दिक्षु कपोलादीनां मध्ये दन्तपङ्क्तिद्वयस्य च कान्तीनां यथोचितरचननैपुण्यैर्वेषस्य या परिपाटी तत्प्रचुरम्। शृङ्गाररसस्य स्मितादिप्रचुरं वा। कीदृशैः—अल्पबुद्धीनां ब्रह्मादीनामदृश्या विभवा येषाम् ॥५९

सारङ्गरङ्गदा

पुनरतिविशेषेण तन्मुखमाधुर्यस्फूर्त्या प्रलपन्त्या वचोऽनुवदन्नाह—एतद्व्यक्तं, नाम प्राकाश्ये, वेषाय बहुमतं विभूषणम्। शेषैर्नानामणिमयैरलं पर्याप्तम्। ननु नानामणीनां वर्णशाबल्याच्छोभाविशेषः स्यात्, तत्राह—द्वौ वा त्रयो विशेषा यस्यां तादृशी या कान्तिलहरी तस्या विन्यासेन धन्योऽधरो यस्मिन्। स्मिताधरगण्डादेः शौक्ल्यारुण्यश्यामता इति विशेषा ज्ञेयाः। पुनर्माधुर्यातिशयानुभवाज्ज्योतिःपुञ्जत्वेन स्फूर्तिः। पुनः सर्वाङ्गावयवमनुभूय तेषां च भूषणत्वेनानुभवात्साश्चर्यमाह—इदं महः कान्तिपूरश्चित्रं चित्रम्। अवयवित्वात्। पुनस्तत्सौष्ठवस्फूर्त्यात्याश्चर्यमाह—कस्यचिदपूर्वविधेः शिल्पैरेव या शृङ्गारभङ्ग्यो भूषणभङ्ग्यस्तन्मयम्। अतः, अहो विचित्रमिदम्। ततोऽप्यतिशयस्फूर्त्याह—अहहो इदं चित्रं विचित्रम्। यतः कीदृशैस्तैः—अल्पधियामेतद्विध्यादीनामगम्यो

1. CB, CD ०संपदं, CC ०सामग्रीः for ०सामग्रीं. 2. CA ०चिकुराणां for चिबुकानां. CB, CD नीलश्वेतादिकान्तिस्तस्याः for नीलश्वेतादि-. CB, CD रम्यः for धन्यः. 4. CD ०नैपुण्येन. CB omits here all words from यथोचित० to परिपाटी and inserts them as below. 5. CB, CD insert श्लिष्टार्थतया before शृङ्गार०. CC शृङ्गारस्य for शृङ्गाररसस्य. CB, CD omit वा. After कीदृशैः CB inserts : यथोचितरचननैपुण्येन वेषस्य या परिपाटी. 5-6. CB, CD अदृश्यो विभवो. 12. KP शौक्ल्यारुण्य० for शौक्ल्यारुण्य०. 13. KC, KP स्फूर्त्या for स्फुर्तिः, omitting पुनः after it. 14. KB, KP do not repeat चित्रं. KP सावयवत्वात् for अवयवित्वात्. 15. KB आश्चर्यं, KC साश्चर्यं for अत्याश्चर्यं. 16. KP omits अतः ; KC omits अहो. KB, KD reads ततः for अतः. KB अधिक-, KC अति- for अतिशय-. 17. KA, KP अहो, KC अहो अहो for अहहो.

विभवो येषां तैः। सन्नकण्ठत्वादहो अहो इति वक्तव्ये अहहो इत्युक्तिः॥ दशाद्वये सुगमम् ॥५९

अग्रे समग्रयति कामपि केलिलक्ष्मी-
मन्यासु दिक्ष्वपि विलोचनमेव साक्षि।
हा हन्त हस्तपथदूरमहो किमेत-
दाशाकिशोरमयमम्ब जगत्त्रयं मे ॥६०

कृष्णवल्लभा

अहो चित्रं विचित्रमित्याद्यनुभवसुखमनुभूय तादृशश्रीकृष्णमपरोक्षमिवान्तर्बहिः सर्वत्र पश्यञ्श्रीकृष्णशक्तिं परमानुग्रहमयीं प्रति त्वत्प्रसादान्ममैवं जातमिति निवेदयति—अग्र इति। अम्ब मातः श्रीकृष्णरसमग्नोपलालनकर्तृतदनुग्रहशक्ते भवत्या एव प्रसादात्संप्रति जगत्त्रयं मे ममाशाकिशोरमयम्। आशामयकिशोरस्तत्स्वरूपेण परिणतम्। विपरिणामे मयट्। स्वरूपतः स्फुरणमात्रं न, किं तु केलिविशिष्टतयेत्यत आह—अग्र इति। अग्रे पुरतः कामप्यनिर्वचनीयां केलिलक्ष्मीं क्रीडासंपदं समग्रयति समग्रां संपूर्णां करोति। न केवलं पुरतः, अन्यासु सर्वासु दिक्ष्वपि। दिशासु संपूर्णां दर्शयतीत्यर्थः। अत्र प्रमाणं किं प्रत्यक्षमेवेत्यत आह—मे मम विलोचनमेव साक्षि। तर्हि कथं खिद्यसे, तत्राह—हा हन्तेति खेदे, अहो हस्तपथदूरं हस्तपथाद्दूरं किमेतत् किमिदमिति वितर्के। न जानामीति शेषः॥ वसन्ततिलकं छन्दः॥६०

सुबोधनी

अतः साक्षात्तं मत्वा सविचारमाह—अहो एतत्किम्। पुनर्निरीक्ष्याह—

1. KC संलग्न-(?), KD समुत्- for सन्न-. KP does not repeat अहो. 6. PS आसीत् for आशा. 8. GA चित्रं for विचित्रं. 10. GB ०कर्त्रि० for ०कर्तृ०. 12. GB परिणामे for विपरि०. 14. GB omits समग्रां. 15. GB inserts अपि after दिशासु, and omits संपूर्णां. 16. GB omits अतः. 20. CB, CD omit all words from अतः to आह and read instead : तत्र (CB omits) कटाक्षादिस्फूर्त्या पुनस्तथैवाह—अग्र इति. CC ततः for अतः. CA ०विरामं for ०विचारं. CB, CD तदेवाह for पुनर्निरीक्ष्याह.

ममाग्रे कामपि केलिलक्ष्मीं सम्यक्करोति। न केवलमग्रेऽन्यासु दिक्ष्वपि। एकोऽनेकत्र कथं स्यात्—विलोचनमेव साक्षि। प्रत्यक्षे कः संदेहः। पुनरुत्कण्ठया ग्रहीतुं बाहुं प्रसार्य सविषादमाह—हा खेदे, हन्त विषादे, हस्तपथाद्दूरम्। ततः स्फूर्त्यपगमे सवितर्कमाह—हे अम्ब, इत्याकाशे सविषादसंबोधनम्। ममाशयैव किशोरमयं जगत्त्रयं कथमभूत्॥६०

सारङ्गरङ्गदा

ततः साक्षात्त्वं मत्वा स्वभाग्यातिशयमननात्किमिदं सत्यमिति सविचारं प्रलपन्त्या वचोऽनुवदन्नाह—अग्रे मम पुरः कामपि केलिलक्ष्मीं समग्रयति सम्यक्करोति। अतः सत्यमेव। पुनः पार्श्वतः पृष्ठतश्चालोक्याह—अन्यासु दिक्ष्वपि तथा। तदेकः कथं सर्वत्र भवत्विति संशय्य सप्रत्ययमाह—विलोचनमेव साक्षि। प्रत्यक्षं दृश्यते, कथमन्यथा स्यात्। भवतु स्पृष्ट्वा निर्धारयामीति बाहू प्रसार्य तत्र तत्र गत्वा ततोऽपि दूरे तमालोक्य सविषादमाह—हा हन्त हस्तपथदूरम्। हस्तपथाद्दूरे एतदिति सवितर्कमाह—अहो किमेतत्। क्षणं विमृश्य सनिर्णयदैन्यमाह—अम्ब, इत्याकाशे विषादसंबोधनम्। आशाकिशोरमयं जगत्त्रयं मे जातम्॥ दशान्तरद्वये सुगमम्॥६०

चिकुरं बहलं विरलं भ्रमरं
मृदुलं वचनं विपुलं नयनम्।
अधरं मधुरं वदनं मधुरं
चपलं चरितं च कदा नु विभोः॥६१

2. CB, CD एकस्य for एकः. 2. CB, CD स्थितिं संभावयन्नाह for कथं स्यात्. CB, CD न संदेहः कार्य इत्यर्थः for कः संदेहः. 3. CB omits हन्त विषादे. 4. CB, CD पुनः for ततः. CD omits सवितर्कमाह. CB omits, CA reads विषाद- for सविषाद-. 5. CB omits the words from ममाशयैव to जगत्त्रयं and reads instead : निजभावाभिव्यक्तया वा जगत्त्रयं ममाशयैवाविर्भूतः किशोर आशाकिशोरस्तन्मयं. 10. KC तथापि for तथा. 11. KA, KP insert एव after प्रत्यक्षं. 12. KC does not repeat तत्र. 13. KB omits हस्तपथदूरं. 16. PS बहुलं. 18. PS ललितं वदनं for वदनं मधुरं. 19. PS (v. l. as in text) कदानुभवे.

कृष्णवल्लभा

एवं यदि हस्तपथदूरे तदा कथमभिलाषः संपत्स्यतामिति स्वप्राणनाथनिभृत-सेवामाशास्ते—चिकुरमित्यादि। विभोः श्रीकृष्णस्य। न्विति वितर्के प्रश्ने वा। कदा बहलं समृद्धं चिकुरं बालं विचित्रशिखिपिच्छकुसुमरचनादिना रचयामि। विभोरित्युक्त्वा केलिस्फुरणरसवैवश्यात्क्रियापदोक्त्यभावः। इदमिद-मङ्गमित्थमित्थं सेविष्ये इति मनोरथपरंपरा कथमेकक्रियया स्फुटीभविष्यतीति क्रियापदोक्त्यभावो वा। तत्र केशकुसुमलोभेनायास्यन्तीं भ्रमरबाधामनुस्मृत्याह—विरलं विरलीभूय वर्तमानं भ्रमरम्। सौगन्ध्यलोभेन मुखाम्बुजे पतन्तं कदा समुत्सारयामीत्यर्थः। तन्निरसनार्थं मृदुलं वचनं कदा श्रोष्यामि। न केवलमवादीत्, किं त्वद्राक्षीच्च, तदनुस्मृत्याह—विपुलं महन्नयनम्। सद्यः-समुच्छलितमहानन्दाम्भोधिकल्लोलान्दोलितं कदा द्रक्ष्यामीत्यर्थः। मृदुलवचन-सानुरागदर्शनानन्तरं स्नेहरसेन योऽधरस्पन्दो जातस्तमनुस्मृत्याह—मधुरमधरं कदा वंशीसहितमवलोकयिष्यामि। वदनं दृष्टिवाङ्माधुर्यविशेषवत्तया मधुरं कदा द्रक्ष्यामि। तदनु यच्चपलं चरितं तच्चेति। एवमुक्त्वा दीर्घं निश्वस्य च तथैवाशया स्थितमिति भावः॥ तोटकं छन्दः—

वद तोटकमब्धिसकारयुतम् (छन्दोमञ्जरी २)॥६१

सुबोधनी

एवमत्यौत्सुक्यावार्तः सलालसमाशास्ते—विभोः रतिगलितकेशं कदा गुम्फामि। कीदृशम्—बहलं निविडम्। तथा, ललाटालकं च कदोच्चच्छामि। कीदृशम्

4. GB inserts पुष्पादिभिः after समृद्धं. 5. GB inserts इति after रचयामि. 7. GB यास्यन्तीं for आयास्यन्तीं. 15. GB तयैव for तथैव. 18-19. CB, CD (the latter drops some words) omit all words from आर्तः to गुम्फामि and read instead : मुहुर्मुहुस्तन्माधुर्यमेव ध्यायति। चिकुरमिति। विभो-श्चिकुरम्। कदा नु द्रक्ष्यामीति शेषः. 18. CC inserts सन् after आर्तः. 19. CB, CD insert भ्रमरं after तथा. CC repeats तथा. CA omits च before कदा. CB, CD omit कदोच्चच्छामि. CC reads द्रक्ष्यामि for उच्चच्छामि.

—विरलमलिपङ्क्तिवत्पृथक्पृथक् स्थितम्। तथा च, मृदुलं वचनं कदा श्रोष्यामि। विपुलं नयनं कदा द्रक्ष्यामि। मधुरमधरं कदा पास्यामि। मधुरं वदनं कदा चुम्बिष्यामि। चपलं चरितं कदानुभविष्यामि। गाढार्त्या निगूढाभिव्यक्तेर्वागसमाप्तिः ॥६१

सारङ्गरङ्गदा

अथ तदलाभान्मथुरावीथ्यां पतितः, पुनस्तस्या भूमौ निपत्य मूर्छन्त्याः, अधुनैवागतस्य तत्तन्माधुर्यमनुभविष्यसीति सखीभिः प्रबोधिताया नेत्रे निमील्यैव कुञ्जे लीलावसानसमये तस्य स्वेष्टतत्तत्सेवाद्यप्राप्तिस्फूर्त्या ताः प्रति प्रलपन्त्या वचोऽनुवदन्नाह—नु भोः सख्यः, विभोरेतद्दुःखहरणसमर्थस्य चिकुरम्। कदा चुडात्वेन बध्नामीति शेषः। एवमग्रेऽपि। कीदृशम्—बहलं स्निग्धनिविडम्। तथा, भ्रमरं ललाटालकं कदोद्यच्छामि। कीदृशम्—विरलमलिपङ्क्तिवत्पृथक्पृथक् स्थितम्। मृदुलं वचनं कदा श्रोष्यामि। विपुलं नयनं कदा द्रक्ष्यामि। मधुरमधरं कदा पास्यामि। मधुरं वदनं कदा चुम्बिष्यामि। चपलं चरितं कदानुभविष्यामि। गाढार्त्या लज्जया च वागसमाप्तिः॥ दशान्तरद्वये सुगमम्॥६१

1-2. CB omits all words from तथा च to श्रोष्यामि and reads instead : किं च. 1-3. CD omits all words from स्थितं to अनुभविष्यामि. 2. CB च for कदा द्रक्ष्यामि. CB च for कदा पास्यामि. CC पश्यामि for पास्यामि. 2-3. CA omits मधुरं वदनं कदा चुम्बिष्यामि. 3. CB च for कदा चुम्बिष्यामि. After चरितं CB inserts च। तथा मृदुलं मृदुलं वचनं. CB नु श्रोष्यामि for अनुभविष्यामि. 4. CB, CD omit निगूढाभिव्यक्तेः; CC reads for it निगूढाभिलाषाभिव्यक्तेः. After असमाप्तिः CD continues : श्रीकृष्णनयनं च मधुरमधरं च चपलं चरितं च. 7. KC inserts तस्य after ०गतस्य. KB, KP ०माधुर्यमधु वितरिष्यती(KP ०सी)ति. 8. KC omits all words from कुञ्जे to स्फूर्त्या. 9. KP inserts चिकुरमित्यादि after आह. 11. KC उत्पश्यामि for उद्यच्छामि. KC does not repeat पृथक्. 13. KA transposes मधुरं and अधरं. KC (on margin as in text), KP पश्यामि for पास्यामि. 14. KP दशाद्वये.

परिपालय नः कृपालये-
त्यसकृज्जल्पितमार्तबान्धवः ।
मुरलीमृदुलस्वनान्तरे
विभुराकर्णयिता कदा नु नः ॥६२

कृष्णवल्लभा

अथ श्रीकृष्णभाववर्त्मनि संचरन्नौत्कण्ठ्यमाविष्करोति—परिपालयेति । विभुः श्रीकृष्णो नोऽस्माकमिति वक्ष्यमाणमसकृद्वारंवारं जल्पितं वचनं मुरलीमृदुलस्वनान्तरे मुरल्या मृदुलस्वनस्यान्तरं छिद्रमुपरतिर्यत्र तस्मिन्काले कदा न्वाकर्णयिताकर्णयिष्यति । श्रोष्यतीत्यर्थः । यद्यपि वेणुवादनानन्दरसमग्नस्यान्यत्र कुत्रापि नेन्द्रियवृत्तिः संभवति तथाप्यतिदुःखितस्य दुःखखण्डनाय भक्तवचःश्रवणे प्रवर्तमानत्वात्तच्छ्रवणसंभवः । अतो मुरलीवादनावसर एव विभुत्वान्मद्वचः श्रोष्यतीति भावः । यतो हि—आर्तानां बान्धवः । तत्किम्—हे कृपालय कृपानिधे नोऽस्मान्दर्शनानन्ददानेन परिपालय । यथा सफलं जीवामस्तथा कुर्वित्यर्थः ॥ वैतालीयं छन्दः ॥६२

सुबोधनी

पुनस्तथैव सदैन्यमाह—हे कृपालो सकृदेत्य नोऽस्मान्पालय । आगमनं तावदास्ताम्—हे आर्तबान्धव, आर्तानां नो जल्पितं मुरलीमृदुलस्वनस्यान्तरे तस्य मध्ये सकृदपि कदा नु श्रोष्यसि । तत्र हेतुः—विभुरस्मत्प्रभुः ॥६२

1. PS and Gopāla Bhaṭṭa split up कृपालयेत्यस० into कृपालय+इति असं०; but Caitanyadāsa and Kṛṣṇadāsa (v. l. ás in text) into कृपालो+एत्य स०. 2. PS (v. l. as in text) आत्मबान्धवः ; Caitanyadāsa आर्तबान्धव. 8. GB omits तस्मिन्. 11. GB प्रवर्तमानस्य for ०मानत्वात्. GB ०श्रवणावकाशः for ०श्रवणसंभवः. 12. GB inserts वचनं सदाह after तत्किं. 16. CD omits पुनः. CB, CD insert परीति after आह. 17. CB, CD अस्तु for आस्तां. CB, CD ०स्वनस्य मध्ये, CC ०स्वनमध्ये for ०स्वनस्यान्तरे तस्य मध्ये. 18. CD omits सकृदपि कदा नु श्रोष्यसि and reads instead कदा परिपोष्यसि (corrupt).

सारङ्गरङ्गदा

ततः क्षणादुत्थाय वृन्दावनं गच्छन्नेतद्वदन्त्यां तस्यां मूर्छितायां तत्सखीनामन्योन्यप्रलपितस्फूर्त्या तदनुवदन्नाह द्वाभ्याम्। नु भोः सख्यः। हे कृपालो एत्य नोऽस्मान्परिपालयेत्यस्माकं बहुजल्पितानां मध्ये सकृज्जल्पितमेकजल्पितमपि विभुः सर्वरक्षासमर्थः श्रीकृष्णो मुरलीस्वनस्यान्तरे मध्ये कदाकर्णयिता श्रोष्यति। तत्र हेतुः—आर्तेति। कृपालयेत्यसकृदिति पाठे—हे कृपालय इत्यसकृज्जल्पितम्॥ दशान्तरद्वये सुगमम्॥६२

कदा नु कस्यां नु विपद्दशायां
कैशोरगन्धिः करुणाम्बुधिर्नः।
विलोचनाभ्यां विपुलायताभ्या-
मालोकयिष्यन्विषयीकरोति॥६३

कृष्णवल्लभा

अहो मुरलीवादनव्यापृतेनैव तेन स्थीयते, तेनैवास्माकं परिदेवनं न श्रूयत इति सर्वोत्तमभाववर्त्मनि सततं संचरन्नौत्सुक्येन मुक्तकण्ठं क्रन्दन्नाह—कदा न्विति। न्विति वितर्के। कैशोरगन्धिः कैशोरस्याल्पो गन्धो यस्य सः। अल्पाख्यायाम् (पा० ५. ४. १३६) इति गन्धस्येत्।

आद्यं मध्यं तथा शेषं कैशोरं त्रिविधं भवेत्

(भक्तिरसामृत० २. १. १२३) इत्युक्तेः प्रथमकैशोरमित्यर्थः। कदा, नु प्रश्ने, नोऽस्मान् रसशीतलाभ्यां रसेन रागेण शीतलाभ्यां स्निग्धाभ्यां विलोचनाभ्यामालोकयिष्यन्विषयीकरोति [विषयी]करिष्यति। विपुलायताभ्यामिति पाठे—विपुले चायते

4. KP omits एकजल्पितं. 6. KP इति सकृत् for इत्यसकृत् (second time). 8. PS कदा तु. 10. PS and Gopāla Bhaṭṭa (v. l. in both, as in text) रसशीतलाभ्यां for विपुलायताभ्यां. 11. PS व्यालोकयिष्यन्. 13. GB नैव for तेनैव, and तु for न. 18. GB inserts काले after कदा. 20. GB ते स्वायते च for चायते चेति.

चेति ताभ्याम्। विपद्दशायामिति चेत्, तादृशी च विपद्दशा कदा भविष्यति। इतः परा तद्दर्शनरूपा विपद्दशा नास्त्येवेति भावः। आलोकनं संभवति च, यतः —करुणाम्बुधिः कृपासमुद्रः। न हि तत्परः कश्चित्परमकारुणिकः, मत्परः परमशोच्यतमश्च (पद्यावली ६६) इति विचिन्त्य यदुचितं तत्करिष्यतीति तात्पर्यार्थः॥ उपेन्द्रवज्रा छन्दः॥६३

सुबोधनी

पुनरतिदैन्येन सकरुणमाह—करुणाम्बुधिः, नु वितर्के, कस्मिन्क्षणे इतोऽप्यधिकायां कस्यां नु विपद्दशायां विपुलायताभ्यां विलोचनाभ्यामालोकयिष्यन्नः स्वदृष्टिगोचरान्करिष्यति। कंचित्प्रियजनमालोकयंस्तदेकाश्रयानस्मानप्यालोकयिष्यतीति गूढोऽभिप्रायः। तत्र हेतुः—कैशोरगन्धिः। नवयौवनोन्मुख इत्यर्थः॥६३

सारङ्गरङ्गदा

ननु स्वजनविपद्भरमसहिष्णुः कृपालुरयं श्रीकृष्ण एत्य नः पालयिष्यतीति कस्याश्चिद्वाक्यात्सदैन्यं प्रलपन्तीनां वचोऽनुवदन्नाह—स करुणाम्बुधिः कदा नु कस्मिन्क्षणे इतोऽप्यधिकायां कस्यां नु विपद्दशायां विपुलायताभ्यां विलोचनाभ्यामालोकयिष्यन्विषयीकरोति स्वगोचरीकरिष्यति। इतोऽपि विपत्संभवेन्नाम। कीदृक्—कैशोरगन्धिः। स्वल्पार्थे इत् (पा० ५.४.१३६) समासान्तः। नवकैशोर इत्यर्थः॥ दशाद्वये सुगमम्॥६३

1. After चेत् GB inserts तत्राह—कस्यां दशायां नु सत्यां. GB omits च after तादृशी. 2. GB संभावयति for संभवति च. 3. GB कश्चिन्मत्परः for तत्परः कश्चित्. GB तत्समः for मत्परः. 4. GA करिष्यसीति. 5. GB तात्पर्य for तात्पर्यार्थः. The metre is उपजाति. 7. CB, CD insert अपि after पुनः and कदेति after आह. CB, CD कदा कस्मिन्काले for कस्मिन्क्षणे. 7-8. CC इतोऽप्यधिकं. CB, CD omit इतोऽप्यधिकायां. 8. CB, CD insert वा after कस्यां नु. Before and after नः respectively CB, CD insert अन्यत्राप्यालोकयितुमिच्छन् and विषयीकरोति. 9. CA ०दृग० for ०दृष्टि०. CB, CD insert इति न जाने after करिष्यति. CB किं च for कंचित्. CB, CD ०श्रयं मां for ०श्रयानस्मान्. 10. CB, CD कीदृक for तत्र हेतुः. 15. KB inserts नः after आलोकयिष्यन्. 16. KA कीदृशः for कीदृक्. Some Mss इच् for इत्. 16-17. KC नवकिशोरः.

मधुरमधरबिम्बे मञ्जुलं मन्दहासे
शिशिरममृतनादे शीतलं दृष्टिपाते ।
विपुलमरुणनेत्रे विश्रुतं वेणुवादे
मरकतमणिनीलं बालमालोकये नु ॥६४

कृष्णवल्लभा

अथ परमभावेन श्रीकृष्णं भावयन्पुरतः स्फुरमाणमभिलषति— मधुरमिति । मरकतमणिनीलं मरकतमणिमिव श्यामं बालं सुकुमारम् अन्वनुवृत्तिपूर्वकम्, अनुक्षणं वा, आलोकये पश्यामि । कीदृशम्—अधरबिम्बे मधुरं मधुररसरूपम् । पुनः कीदृशम्—मन्दहासे ईषद्धास्ये मञ्जुलं मनोहरम् । पुनः कीदृशम्—अमृतनादे अमृतवच्छ्रवणपेये नादे शिशिरं हिमकणनिकरवत्तापज्वालाशमनम् । पुनः कीदृशम्—दृष्टिपाते दृष्टीनां दृष्टिभेदानां पाते पातने शीतलं भावितापशङ्काया अपि नाशकम् । शिशिरशीतलयोरयं भेदः—शिशिरं मृद्वाश्रयम्, यदवस्था हिमकणाः । नादस्य स्तोकत्वात्स्निग्धत्वाच्च तथात्वम् । शीतलं कठिनाश्रयमपि भवति । तेन दृष्टिपातस्य कठिनत्वात्कठिनमपि श्लथयति मर्म स्पृशतीति च । शीतलत्वादाप्यायकत्वं चेति । पुनः कीदृशम्—अरुणनेत्रे । अरुणं च तन्नेत्रं च तस्मिन् । जातावेकवचनम् । विपुलं विस्तीर्णम् । तथा, वेणोर्वादे वादने विश्रुतं ख्यातम्, वांशिकः कोऽपि नैतादृश इति ॥ मालिनी छन्दः ॥६४

3. Caitanyadāsa and Kṛṣṇadāsa वेणुनादे. 4. Gopāla Bhaṭṭa reads अनु for नु. 6. GA अभिलपति for अभिलषति. 7. GB omits मरकतमणिनीलं, but inserts नीलं before श्यामं. 8. GB अनु लक्षणं for अनुक्षणं. 9. GA तथा for पुनः कीदृशं (also in lines 11, 15). 10. GB omits अमृतनादे. 11. GB omits दृष्टिपाते. GB भुवि for भावि-. 12. GA omits अयं before भेदः. GA omits मृद्वाश्रयं. 13. GB inserts तु after शीतलं. 14. GB omits अपि before भवति. 15. GA omits चेति. GB omits अरुणनेत्रे. 16. GA विस्तरं for विस्तीर्णं. 17. GB नादे for वादे, and तत्र for वांशिकः.

सुबोधनी

पुनः स्फूर्त्याह—नु निश्चये, मरकतनीलं बालं पश्यामि। तत्संभावयन्नाह—अधरबिम्बे मधुरम्। तत्कुतः—मन्दहासे मञ्जुलम्। तदपि कथम्—अमृतनादे वचसि शिशिरम्। तत्रापि हेतुः—दृष्टिपाते च शीतलम्। तत्कथम्—अरुणनेत्रे विपुलम्। वेणुनादे प्रसिद्धम् ॥६४

सारङ्गरङ्गदा

अथोन्मत्तेवोत्थायोपविश्य नेत्रे निमील्यैव सखीः प्रति सोत्कण्ठं पृच्छन्त्या वचोऽनुवदन्नाह—नु भोः सख्यः, तं मरकतमणिनीलं बालं किशोरमालोकये। कदा द्रक्ष्यामीत्यर्थः। आकाङ्क्षायां लिङ्। कीदृशम्—अधरबिम्बे मधुरम्, मन्दहासे मञ्जुलम्, अमृतनादे वाचि शिशिरम्, दृष्टिपाते शीतलम्, अरुणनेत्रे विपुलम्, वेणुनादे विश्रुतम् ॥ दशान्तरद्वये सुगमम् ॥६४

माधुर्यादपि मधुरं मन्मथतातस्य किमपि कैशोरम्।
चापल्यादपि चपलं चेतो बत हरति हन्त किं कुर्मः ॥६५

कृष्णावल्लभा

किं च—माधुर्यादिति। मन्मथतातस्य कामजनकस्य श्रीकृष्णस्य। मन्मथस्य तातो विस्तारो यस्माद्वा। मन्मथतां साक्षान्मन्मथत्वमतति प्राप्नोतीति मन्मथतातस्तस्येति वा। एतेन सौन्दर्याधिक्यं ध्वनितम्। किमप्यनिर्वाच्यं कैशोरं

2. For आह CB, CD read : माधुर्यं वर्णयन्नाह—मधुरमिति. CB, CD ०मणिनीलं for ०नीलं, and विलोकये (CD आलोकये) for पश्यामि. CB, CD प्रतिपादयन् for संभावयन्. 3. CB, CD अतः for तत्कुतः, and ततः for तदपि कथं. 4. CC ०नादेन च for ०नादे. CB, CD वाचि for वचसि. CB, CD तथा for तत्रापि हेतु. CB, CD omit च and तत्कथं. 7. KA omits उपविश्य. 9. KB, KP omit आकाङ्क्षायां लिङ्. 10. KP omits वाचि. 13. PS मम for बत. 15. GB omits श्रीकृष्णस्य. 16. GB inserts अथवा before मन्मथतां, and omits साक्षात्. GB व्याप्नोति for प्राप्नोति. 17. GB omits वा. GB सूचितं for ध्वनितं. GB inserts तस्य श्रीकृष्णस्य before किमपि, and किशोरभावः after कैशोरं.

कर्तृ । बत विस्मये । चेतः कर्म हरति चोरयति । चेतश्चेद्धरति तदा प्रतीकारः कर्तुमुचित इत्याह—किं कुर्मः । करणशक्त्यभावात् । तच्चरणैकान्तिकीं परमनिभृतसख्यपदव्याशां नैव त्यक्तुं शक्नुम इत्यर्थः । यद्वा, तस्य कैशोरमेव मन्मथता मन्मथस्वरूपम् । समस्तपरमरसचमत्कारधारिणीति भावः । कीदृशं कैशोरम्—माधुर्यादपि मधुरम् । सर्वावस्थाविशेषेषु माधुर्यं (साहित्यदर्पण ३.९७) भावविशेषः, तस्मादपि मधुरम् । समस्तमाधुर्यविलक्षणमाधुर्यमित्यर्थः । एवं चापल्यं भावविशेषः, तस्मादपि चपलम् ॥ आर्या छन्दः ॥६५

सुबोधनी

अथ स्वचित्तोन्मादे स एव निदानमित्याह—मनो मथ्नातीति मन्मथोऽभिलाषस्तस्य जनकस्य, बताश्चर्ये, किमपि कैशोरं चेतो हरति । हन्त खेदे । किं तदवनाय कमुपायं कुर्मः । सर्वैर्मिलित्वा गृहाण—चापल्यात्तद्रूपधर्मादपि चपलम् । ग्रहीतुमपि न शक्नुमः । चेतोऽपहारे हेतुः—माधुर्यादपि तथा मधुरम् । अतिमधुरमित्यर्थः ॥६५

सारङ्गरङ्गदा

अथोत्थायेतस्ततो धावन्त्याः सखीभिरञ्चले गृहीत्वा, सखि किमित्युन्मत्तासि, धैर्यं कुर्विति प्रबोधितायाः सधैर्यमिव वचोऽनुवदन्नाह । मन्मथतातस्य मनो मथ्नातीति मन्मथो दुःखदः कामस्तं जनयतीति मन्मथजनकस्तस्येति वक्तव्ये भाववैवश्यात्समानपर्यायत्वाच्च तत्तातस्येत्युक्तिः । तस्य कृष्णस्य किमप्यनिर्वचनीयं कैशोरं चेतो हरति । हन्त खेदे । किं कुर्मः । तत्र हेतुमाह । कीदृशम्

4. GB ०धारयीति. 5-6. GB transposes माधुर्यं and भावविशेषः. 9. CB, CD omit all words from अथ to आह and read instead : पुनस्तद्दर्शनावेशेन हसन्निवाह—माधुर्यादिति. 10. CB omits हरति. 11. CC तदनाग्रायनाय for तदवनाय. CB, CD omit all words from सर्वैर्मिलित्वा to चपलं and read instead : तमेव (CD तदेव) गृहीत्वा रक्षत—चापल्यादपि चपलम् । सर्वैरपि मिलित्वा. 12. CC ग्रहीतुमशक्नुमः. CB, CD insert इत्यर्थः after शक्नुमः. CB, CD omit तथा and अतिमधुरमित्यर्थः. 13. CA inserts एव before अर्थः. 17. KD inserts मनोरथः after मन्मथः. 18. KB श्रीकृष्णस्य for कृष्णस्य. KB omits अनिवचनीयं. 19. KA inserts इति after हन्त.

—माधुर्यात्तद्रूपधर्मादपि मधुरम्। लक्षणयातिमधुरमित्यर्थः। नन्वयि मुग्धे कस्याश्चेतो न हरति, कान्या त्वमिवोन्माद्यति, तत्राह। कीदृशं चेतः—चापल्यात्तद्रूपधर्मादपि चपलम्। तदस्यैव दोष इत्यर्थः। यद्वा, तस्य कृष्णस्य मन्मथता कैशोरं व्याप्य मनो हरतीत्यन्वयः। कालाध्वनोरत्यन्तसंयोगे (पा० २. ३. ५) इति द्वितीया। किं वा, कैशोरं कीदृशम्—मन्मथता तत्स्वरूपम्॥ स्वान्तर्दशायाम्—समानसखीः प्रत्युक्तिः॥ बाह्ये सङ्गिजनान्प्रति॥६५

वक्षःस्थले च विपुलं नयनोत्पले च
मन्दस्मिते च मृदुलं मदजल्पिते च।
बिम्बाधरे च मधुरं मुरलीरवे च
बालं विलासनिधिमाकलये कदा नु॥६६

कृष्णवल्लभा

अथ दृढभावनाभावितान्तःकरणोऽग्रतः स्फुरत्तद्रूपनिश्चायकतामनुभवन्नाशास्ते—वक्ष इति। न्विति प्रश्ने। विलासनिधिं बालं कदालोकये इत्यन्वयः। विलासा निधीयन्तेऽस्मिन्निति तं बालं प्रकृष्टपुरुषम्। यथा बालाशब्दः स्त्री-विशेषपरस्तथात्रापि। बलत इति कर्तरि घञ्। कदा कस्मिन्समय आलोकये। स्वभावतस्तदत्याकृष्टचेता आलोकयिष्यामि। कीदृशं बालम्—वक्षःस्थले च नयनोत्पले च विपुलं महत्तरम्। मन्दस्मिते च मदजल्पिते च। मदेन यज्जल्पितं तस्मिन्। मृदुलं मृदुं लाति गृह्णातीति तथा तम्। बिम्बाधरे

3. KA, KP तस्य for तदस्य. KB श्रीकृष्णस्य for कृष्णस्य. 4. KP मन्मथ- for मन्मथता. 10. Gopāla Bhaṭṭa आलोकये for आकलये, contrary to metre. 12. GB स्फुरन्तमिति for स्फुरत्तद्रूप-. 13. GB वितर्के for प्रश्ने. GB omits all words from विलासनिधिं to अन्वयः. 15. GB °विशेषपरः for वाचकः. 15. For इति (after बलते) GB reads संभजते भक्तानिति बालः. 17-18. GB मदनयज्जल्पं तस्मिंश्च for च मदजल्पिते च मदेन यज्जल्पितं तस्मिन्. 18. GB कोमलं for मृदुं लाति गृह्णातीति तथा तम्.

च मुरलीरवे च मधुरं मधुररसप्रदम्। नयनश्रवणयोरमृतवर्षीत्यर्थः। अत्र तत्तत्स्थानसौन्दर्यमाधुर्यलावण्याधिक्यसूचनार्थं च-समुच्चयः॥ वसन्ततिलकं छन्दः॥६६

सुबोधनी

पुनस्तदप्रगमे सलालसमाह—नु प्रश्ने, बालं किशोरं कदाकलये। द्रक्ष्यामीत्यर्थः। किशोरत्वं व्यनक्ति—वक्षःस्थले नयनोत्पले च विस्तीर्णम्। मन्दस्मिते मदजल्पिते च मृदुलम्। बिम्बाधरे मुरलीरवे च मधुरम्। अतएव विलासनिधिम्। तत्समुद्रमित्यर्थः॥६६

सारङ्गरङ्गदा

नन्वधुनैव तं द्रक्ष्यसि, क्षणं धैर्यं कुर्विति पुनस्ताभिः प्रबोधितायाः सलालसं वचोऽनुवदन्नाह—नु भोः सख्यः, तं विलासनिधिं तत्समुद्रं बालं नवकिशोरं कदाकलये। द्रक्ष्यामीत्यर्थः। कीदृशम्—वक्षःस्थले च नयनोत्पले च विपुलं विस्तीर्णम्। मन्दस्मिते च मदजल्पिते च मृदुलम्। बिम्बाधरे च मुरलीरवे च मधुरम्॥ दशाद्वये सुगमम्॥६६

1. GB omits च before मुरलीरवे. 5. CB leaves blank space for some words (for all words from पुनः to आह) and begins the commentary : वक्षःस्थल इति ; CD inserts these words after आह. CB, CD विलासस्य निधिं (CD विलासनिधिं) तत्समुद्रं वा for बालं किशोरं. CB, CD काले for आकलये. 6. CB omits किशोरत्वं व्यनक्ति, for which CD reads कीदृशं. CB, CD insert च after वक्षःस्थले. CB, CD insert तथा before मन्दस्मिते, after which CB inserts च. 7. CB, CD insert किं च before and च after बिम्बाधरे. 7-8. CB, CD omit all words from अतएव to इत्यर्थः. 10. KB प्रतिबोधि० for प्रबोधि०. 12. All Mss (except KC) and KP आलोकये for आकलये! 14. KD inserts तत् before दशा०. KC, KP दशान्तर० for दशा०.

आर्द्रावलोकितधुरा परिणद्धनेत्र-
माविष्कृतस्मितसुधामधुराधरोष्ठम् ।
आद्यं पुमांसमवतंसितबर्हिबर्ह-
मालोकयन्ति कृतिनः कृतपुण्यपुञ्जाः ॥६७

कृष्णवल्लभा

अहो तद्दर्शनमतिदुर्लभम्, ये कृतपुण्यपुञ्जास्त एव पश्यन्तीत्याह—आर्द्रेति। कृतपुण्यपुञ्जाः कृताः पुण्यानां पुञ्जा राशयो यैस्ते। कृतं करणं प्रशस्तं सर्वतो भावनिष्ठारूपं येषामस्ति ते कृतिनः। आद्यं पुमांसं पुरुषोत्तममालोकयन्ति सम्यक् पश्यन्ति। तर्हि किं नारायणस्वरूपम्, नेत्याह— अवतंसितबर्हिबर्हम्। अवतंसितानि कृतोत्तंसानि बर्हिबर्हाणि मयूरपिच्छानि येन तम्। सहजगोप-वेषमित्यर्थः। पुनः कीदृशम्—आर्द्रावलोकितधुरा परिणद्धनेत्रम्। आर्द्रं सरसम्। स्निग्धमिति यावत्। यदवलोकितं तस्य धूर्भारस्तया परिणद्धानि वशीकृतानि जगन्मात्रस्य नेत्राणि येन तम्। यद्वा, आर्द्रा सरसा श्रीराधाद्या गोप्यस्तासां यदवलोकितं तस्य धुरा तदतिशयेन परिणद्धे शृङ्खलादिभिरिव तास्वेव बद्धे नेत्रे यस्य तम्। पुनः कीदृशम्—आविष्कृतस्मितसुधामधुराधरोष्ठम्। आविष्कृता भङ्ग्या प्रकटीकृता या स्मितसुधा तया मधुरावधरोष्ठौ यत्र तम्। यद्वा, स्मितसुधया मधुराण्यधरयति तादृशमोष्ठं यस्य तम्॥ वसन्ततिलकं छन्दः ॥६७

1. PS transposes verse 67 and 68. PS ०धरा. 4. v. l. in Kṛṣṇadāsa आकर्णयन्ति for आलोकयन्ति. 6. GB inserts ननु before अहो and reads for the sentence from तद्दर्शनं to एव (which it omits) as follows: ये कृतिनस्त एवातिदुर्लभं तद्दर्शनं. 7. GB कृतानां for कृताः and येषां ते तद्रूपा वा for यैस्ते. 10. GB शेखरीकृतानि for कृतोत्तंसानि. 11. GB omits कीदृशं and reads आर्द्रेति for all words from आर्द्रा० to ०नेत्रम्. 13. GB सर्वस्य for जगन्मात्रस्य. 15. GB omits कीदृशं and reads आविरिति for the phrase आविष्कृत etc. 15-16. GA haplologically omits all words from पुनः कीदृशं to अधरोऽष्ठौ यत्र तम्. 17. GB तादृशो-ऽधरोष्ठो for तादृशमोष्ठं.

सुबोधनी

पुनस्तद्दौर्लभ्यस्फूर्त्या तद्दर्शनकारिणोऽभिनन्दन्सदैन्यमाह—ये सुकृतिनस्तत एव कृतः पुण्यानां भक्तिलक्षणानां पुञ्जो यैस्त एवाद्यं पुमांसं पुरुषश्रेष्ठं पश्यन्ति। न तु तद्विपरीता मादृशाः। एतत्कृपैव निदानमाह—स्निग्धजनस्यावलोकितधुरया तदतिशयेन परिणद्धे स्ववशीकृते नेत्रे यस्य। तेनैवाविष्कृतं यत्स्मितं तदेव सुधा तया मधुरावधरोष्ठौ यस्य। श्रेष्ठतामेवाह—अवतंसितानि बर्हि-बर्हाणि येन ॥६७

सारङ्गरङ्गदा

अथातिदैन्योदयात्सदैन्यं तद्दर्शनकारिणोऽभिनन्दन्त्या वचोऽनुवदन्नाह—तमाद्यं पुमांसं पुरुषश्रेष्ठं ये कृतिनः कृतपुण्यपुञ्जास्त एवालोकयन्ति। आ-कर्णयन्तीति पाठे—एतादृशं ये शृण्वति त एव धन्याः, किमुत ये पश्यन्तीत्यर्थः। आद्यं प्रेमवज्जनैरास्वाद्यमिति वा। कीदृशम्—प्रणयकरुणरसैरार्द्रयावलोकितधुरा तदतिशयेन परिणद्धे युक्ते नेत्रे यस्य। आविष्कृतं यत्स्मितं तदेव सुधा तयातिमधुरावधरोष्ठौ यस्य। तथा, अवतंसितानि बर्हिणां बर्हाणि येन तम् ॥ दशान्तरद्वये सुगमम् ॥६७

2. CB, CD place सदैन्यं before तद्दर्शन० and inserts आर्द्रेति after आह. CD ०अधिकारिणः for ०कारिणः, and अभिनन्द्य for अभिनन्दन्. 2-3. CB, CD omit तत एव. 3. CB, CD श्रेष्ठं पुरुषं for पुमांसं पुरुषश्रेष्ठं. 4. CB, CD omit all words from एतत्कृपैव to स्निग्धजनस्य and read instead : श्रेष्ठतामाह—स्निग्धैः (गुरोर्जनैः added by CD) कर्तृभिः. CC तत्र तत्० for एतत्०. CB ०धुरा तया for ०धुरया. 5. CA वशी० for स्ववशी०. 6. CC, CD मधुर- for मधुरौ. CB, CD insert ततोऽपि before श्रेष्ठतां and omit एव after the word. 9. KB तथा for अथ. KP inserts आर्द्रावलोकितेत्यादि after आह. 11. KP तादृशं for एतादृशं, after which word KC inserts तं. 12. KC आर्द्रा या for आर्द्रया. 13. KC, KD तदतिशयस्तेन for तदतिशयेन. KC reads तद्युक्ते for युक्ते and inserts इत्यथः after यस्य. 14. KD ०मधुर- for मधुरौ. 15. KB दशाद्वये.

मारः स्वयं नु मधुरद्युतिमण्डलं नु
माधुर्यमेव नु मनोनयनामृतं नु ।
वेणीमृजो नु मम जीवितवल्लभो नु
बालोऽयमभ्युदयते मम लोचनाय ॥६८

कृष्णवल्लभा

संप्रति श्रीकृष्णचरणैकान्तिकभक्तिमेव वर्धयन्नुत्कण्ठार्तिभरेण पुरः स्फुरन्तमिव तं वीक्ष्योन्मत्त इव विविधं वितर्कयन्नाह—मार इति। अयं पुरोवर्ती बालः सुकुमारो मम लोचनाभ्यां निमित्तभूताभ्यामभ्युदयतेऽभि सर्वत उदयते प्रकाशते। अम्बुदयत इति पाठे—अम्बुद इवाचरत्यम्बुदयते। कथं ममैवायं भ्रम इति विविधवितर्कमाह—स्वयं नु मारः किम्। न हि न हि, अनङ्गत्वात्। मधुरद्युतिश्चन्द्रस्तन्मण्डलं नु। न हि न हि, सकलङ्कत्वात्। तन्मण्डलं च कान्तिमाधुर्यमात्रम्, इदं तु परममाधुर्यमेव घनीभूतं दिव्याकारम्। तर्हि माधुर्यमेव नु किम्। न हि न हि, तदमूर्तम्। तर्हि—मनोनयनामृतं नु। न हि न हि, अमृतं तु द्रवप्रायम्, इदं तु यावदेवामृतं नामास्ति तत्सर्वबीजभूतम्। पुनरपि निपुणं निभाल्य व्रजसुन्दरीरमण एवा यमित्याह—वेणीमृजो न्विति। मार्ष्टीति मृजः। इगुपध (३.१.१३५) इति कः। वेण्या मार्जनकर्ता। व्रजसुन्दरीकेशप्रसाधक इत्यर्थः।

वेणीमृजो महानीलमणौ केशप्रसाधके

इति विश्वः। यद्वा, वेण्या मृजा मार्जनं यस्य सः। गोप्यः श्रीवृन्दावनादागतस्य तस्य स्ववेणीभिः पादमार्जनं कुर्वन्तीत्यर्थः। मम जीवितवल्लभो नु। न्वत्र प्रश्ने।

1. PS transposes verses 68 and 67. 3. PS वाणीमृजा (v. l. वेणीमृजा and वेणीदधा). 4. Gopāla Bhaṭṭa लोचनाभ्यां. 6. GB कुर्वन् for वर्धयन्. 7. GA omit अयं. 11. GA omits अनङ्गत्वात्. GA ननु चन्द्रस्तावत्कलङ्काङ्कितः for सकलङ्कत्वात्. 12. GB दिव्यन्तं for दिव्य-. 14. GB तद्बीज० for तत्सर्वबीज०. 15. GB विचार्य for निभाल्य. 16. GB omits इति before कः. 18. This quotation is not found in the printed text of the Viśva°. 20. GB इति for अत्र.

जीवितादपि वल्लभः। यस्य निमिषार्धविरहात्प्राणा न तिष्ठन्ति स कोऽप्यनिरूप्यरसमयवस्तुविशेषः। आश्चर्यतमरूपकान्तिमाधुर्यमनोनयनाप्यायनपरमानन्दसाम्राज्यचमत्काररूपत्वादित्यर्थः॥ वसन्ततिलकं छन्दः॥६८

सुबोधनी

अथ वृन्दावनं प्रविश्य साक्षाच्छ्रीकृष्णं विलोक्य प्राग्वत् स्फूर्तिशङ्कया सवितर्कमाह—नु किं मारः स्वयमागतः। य आत्मानं स्फोरयित्वा मां मारयति स एवागतः किमिति वितर्कः। न, स निर्दयोऽतिकठिनः कथमागच्छेत्। मधुरद्युतिमण्डलं नु। मूर्ततयैतदपि न। माधुर्यमेव नु। तद्धर्म एव मूर्तिमानित्यर्थः। तस्य नेत्रमात्रविषयत्वात्तदपि न। मनोनयनोरमृतं तदाह्लादकं किमपि। स्वस्य तदनन्यविषयत्वमवधाय निश्चिनोति—श्रीराधाया वेणीं मार्ष्टीति वेणीमृजः प्रोष्यागतः कान्तः स एव नु। अतएव मम जीवितस्य वल्लभोऽयं किशोरो मल्लोचनाय मल्लोचनमानन्दयितुमुदयते॥६८

सारङ्गरङ्गदा

अथ श्रीवृन्दावनं प्रविष्टे तस्मिँल्लीलाशुके श्रीकृष्णः

5. For वृन्दावनं प्रविश्य साक्षात् CB, CD read : श्रीवृन्दावनं (CD omits श्री) प्रविष्टस्य तस्यार्तिगीःश्रवणाच्यग्रतयाविर्भूतं. CC पूर्ववत् for प्राग्वत्. CB ०संभावनया, CD ०संभावनस्य for ०शङ्कया. 6. CB, CD insert मार इति after आह. CB transposes नु and किं. CB, CD insert मामेव after यः. CB चोरयित्वा for स्फोरयित्वा. CB, CD omit मां. 7. CB, CD insert सु before निर्दयः. 8. CB परिच्छिन्नतयेदं for मूर्ततयैतत्. 9-10. CB, CD omit all words from तदाह्लादकं to श्रीराधायाः and read instead ; नु मनोनयनानन्दकं (CD नयनयोरानन्दकं) किमपि वस्त्वित्यर्थः। अत्रावयवदर्शनादिदमपि न. 10. CC राधायाः, without श्री. 11. CB inserts कान्तिश्च (!), CD कान्तः after वेणीमृजः. CD inserts अयं after स एव. For अतएव मम जीवितस्य CB, CD read : तद्विशिष्य सनिश्चयमाह—मम जीवितस्य जनस्य मदभीष्टायाः श्रीराधिकाया इत्यर्थः. 12. CB, CD बालो मम लोचनं for किशोरो मल्लोचनाय मल्लोचनं. CB, CD insert अभि- before उदयते. 14. KB, KD omit श्री- prefixed to वृन्दावनं. KC omits लीलाशुके.

तासामाविरभूत्

(भा० १०. ३२. २) इतिवत्तासां मध्य आविर्भूतस्तल्लीलाविशिष्ट एव तस्याग्रेऽप्याविरभूत्। स च तं विलोक्य स्वयं जाततत्तद्भ्रमोऽपि तस्याः श्रीराधाया अस्माकं तद्दर्शनभाग्यं नास्त्येवेति सखीभिः सह रुदत्या अकस्मात्तं किंचिद्दूरे विलोक्य भ्रमबाहुल्येन प्रलपन्त्या वचोऽनुवदन्नाह। प्रथमं दर्शनादेव विरहविह्वला कन्दर्पभ्रान्त्या सभयमाह—यस्तावदद्दश्य एव जगन्मारयति स मारः स्वयमागतः किम्। नु वितर्के। पुनर्माधुर्यमनुभूय साश्चर्यमाह—स तावदीदृङ्मधुरो न भवति। तदिदं मधुरद्युतीनां मण्डलं नु किम्। पुनरत्याश्चर्यमाह—न तदेतत्। किं तु माधुर्यमेव नु। तद्धर्म एव परिणतः सन्नागतः किम्। पुनर्मनोनयनयोरतितृप्त्या ससंतोषमाह—मनोनयनयोर्मृतं तद्रूपमिदं नु किम्। पुनरवयवत्रमनुभूय ससंभ्रममाह—वेणीमृजो नु। वेणीं मार्ष्टि उन्मोचयतीति वेणीमृजः प्रोष्यागतः कान्तः स एवायं किम्। पुनः सम्यगवलोक्य सानन्दमाह—नु भोः सख्यो मम जीवितवल्लभोऽयं बालो नवकिशोरो मम लोचनाय तदानन्दयितुमभ्युदयते। यूयं पश्यतेति शेषः॥ स्वान्तर्दशायां तु—तदनुगत्यैव व्याख्येयम्॥ बाह्येऽपि स एवार्थः॥ निश्चयान्तसंदेहनामायमलंकारः॥६८

बालोऽयमालोलविलोचनेन
वक्त्रेण चित्रीकृतदिङ्मुखेन।
वेषेण घोषोचितभूषणेन
मुग्धेन दुग्धे नयनोत्सवं नः॥६९

कृष्णवल्लभा

किं च, मदीयनेत्रोत्सवं पूरयन्नायातीत्याह—बालोऽयमिति। अयं बालः सुकुमारः। अयमित्यङ्गुल्या निर्दिशति। मुग्धेन मनोहरेण वक्त्रेण वेषेण

1. KC आविर्भूतः for आविरभूत्. 3. KB श्रीराधिकायाः 4. KD, KP रुदन्त्या. 8. KD तत् इदं for तदिदं. 9. KC omits किं तु. KP omits नु. KD साकारपरिणतः for परिणतः. 15. KB omits अयं. 16. Gopāla Bhaṭṭa reads ०विलोकितेन for ०विलोचनेन. 21. GB omits अयं. 21-22. GB transposes बालः सुकुमारः and अयमित्यङ्गुल्या निर्दिशति.

नोऽस्माकं नयनोत्सवं दुग्धे। दुहिरुभयपदी। प्रपूरयतीत्यर्थः। नोऽस्मान्नयनोत्सवं दुग्ध इति द्विकर्मकता वा। अन्यदोहस्तु पाणिनैव, अयं तु वक्त्रेण वेषेण चेति व्यतिरेकालंकारो ध्वनितः। कीदृशेन वक्त्रेण—आलोलविलोकितेन। आलोलं चञ्चलं विलोकितं दर्शनं यस्मिंस्तेन। कीदृशेन वेषेण—घोषोचितभूषणेन। घोष आभीरनिवासस्तदुचितं भूषणं शिखिपिच्छगुञ्जाधातुरागपल्लवाद्यलंकृतिर्यत्र तेन। पुनर्वक्त्रेण कीदृशेन वेषेण च—चित्रीकृतदिङ्मुखेन। चित्रीकृतं दिङ्मुखं येन तेन च। चिकुराणां श्यामिम्ना, लोचनयोररुणिम्ना, स्मितसुधाया धवलिम्ना, कुण्डलयोः पीतिम्ना, अधरस्य शोणिम्ना, गुञ्जाधातुरागपल्लवानां विचित्रिम्ना सर्वमेव दिङ्मुखं चित्रीकृतमिति।

केशच्छवितिलकच्छविनयनच्छविसुस्मितच्छविभिः।
अधरच्छविबहुरत्नाञ्चितकाञ्चनकुण्डलच्छविभिः॥
परमसुचिक्कणकृष्णादिकवर्णादिभिर्दिशश्चित्राः।
कुर्वदतिमोहनं श्रीमुखं स्मरत राधिकाबन्धोः॥

इन्द्रवज्रा छन्दः ॥६६

सुबोधनी

न केवलं ममैवाक्षिगोचरोऽयं मत्सङ्गिनामपीत्याह—अयं बालो वक्त्रेण वेषेण च नोऽस्माकं नयनोत्सवं दुग्धे प्रपूरयति। कीदृशा वक्त्रेण—आ सम्यक्सतृष्णे लोचने यत्र। प्रियेक्षणायेत्यर्थात्। अतएव तदर्थं चित्रमिव कृतं

1. GB पूरयति for प्रपूरयति, transposing दुहिरुभयपदी and पूरयतीत्यर्थः 2. GB inserts भवति after पाणिनैव. 5. GB omits घोषोचितभूषणेन. 6. GB उभयोर्विशेषणं for पुनर्वक्त्रेण कीदृशेन वेषेण च. 7. GB omits च after तेन. 13. The Mss read श्रीमुखबिम्बं (for श्रीमुखं), which would be unmetrical. 14. GB omits इन्द्रवज्रा छन्दः. 16. CB, CD insert बाल इति after आह. 17. CB, CD omit नः and दुग्धे. CD प्रापयति for प्रपूरयति. CB, CD कीदृशेन for कीदृशा. 18. For तदर्थं CB, CD read : दिक्षु स्थितं तत्प्रियसख्यवलोकनात्.

दिशां मुखं येन। वेषेण कीदृशा—घोषो व्रजस्तद्योग्यानि बर्हगुञ्जादिमयानि भूषणानि यत्र। अतो मनोहरेण ॥६९

सारङ्गरङ्गदा

अथ तया ताभिश्च मिलितं तं साक्षाद्दृष्ट्वा जातबाह्यस्फूर्तिस्तन्माधुर्याकृष्ट-सर्वेन्द्रियः साक्षान्मन्मथमन्मथ(१०. ३२. २)रूपस्य तस्य सर्वेन्द्रियानन्दनत्वं सप्तभिः श्लोकैर्वर्णयन्प्रथमं नयनानन्दत्वमाह द्वाभ्याम्। अयं बालः किशोरो वक्त्रेण वेषेण च नोऽस्माकं नयनयोरुत्सवं दुग्धे प्रपूरयति। वक्त्रेण कीदृशा—स्वापराध-भयेन युगपत्सर्वासां दर्शनेन च, आ सम्यग् लोले विलोचने यत्र। तथा, स्मिताधरादिकान्तिधाराभिश्चित्रमिव कृतं दिशां मुखं येन। वेषेण कीदृशा—घोषो व्रजस्तद्योग्यानि बर्हगुञ्जादीनि भूषणानि यत्र। अतो मुग्धेन ॥६९

आन्दोलिताग्रभुजमाकुललोलनेत्र-
मार्द्रस्मितार्द्रवदनाम्बुजचन्द्रबिम्बम्।
शिञ्जानभूषणचितं शिखिपिच्छमौलि
शीतं विलोचनरसायनमभ्युपैति ॥७०

कृष्णवल्लभा

अथ कयापि लीलया पुरः परिस्फुरच्छ्रीकृष्णस्वरूपमनुभूयमान (!) आह—आन्दोलितेति। विलोचनरसायनम्—विलोचनयो रसायनं रसास्वादपात्रम्। रस ईयत अनुभूयतेऽनेनेति रसायनम्। किमप्यभ्युपैति। अभि सर्वत

1. Before वेषेण CB, CD insert: अनेन तत्साहित्यमपि (CD omits अनेन to अपि) ०गुञ्जितं. CB, CD कीदृशेन for कीदृशा. CA ०गुञ्ज० for ०गुञ्जादि०. 2. CD यस्य for यत्र. CD मनोहराणि. 4. KP omits तं. 5. KB ०नन्दत्वं for ०नन्दनत्वं. 6. KC omits श्लोकैः. KA, KC ०नन्दनत्वं for ०नन्दत्वं. 8. KB विलोले लोचने for लोले विलोचने. 11. PS ०नेत्रलील० for ०लोलनेत्र-. 12. PS ०स्मितं च for ०स्मितार्द्र०. (PS notices v. l. आविः-स्मितं for आर्द्रस्मितं.) 13. PS ०शतं for ०चितं, and ०पिञ्छ० for ०पिच्छ०. 17. GB omits विलोचनरसायनं. 18. GB inserts अनिर्वाच्यं after किमपि.

उपेत्यायाति। कीदृशम्—शीतं परमशीतलं सर्वेन्द्रियगतमहासंतापशमनम्। पुनः कीदृशम्—आन्दोलिताग्रभुजम्। आन्दोलितावग्रभुजौ भुजाग्रं यत्र तत्। अत्र लताकारौ हस्तौ ज्ञातव्यौ। तल्लक्षणं च यथा संगीतरत्नाकरे (७. १०४)—

पताकौ दोलितौ तिर्यक्प्रसृतौ स्तो लताकरौ।
तर्जनीमूलसंलग्नकुञ्चिताङ्गुष्ठको भवेत्।
पताकः संहताकारः प्रसारिततलाङ्गुलिः॥

पुनः कीदृशम्—आर्द्रस्मितार्द्रवदनाम्बुजचन्द्रबिम्बम्। आर्द्रं स्निग्धं यत्स्मितं तेनार्द्रं सरसं वदनमेवाम्बुजं कमलं चन्द्रबिम्बं वा यत्र तत्। द्वयोरेव साधर्म्यादार्द्रार्द्रेति पौनरुक्त्यं न दोषः। आर्द्रार्द्राम्बुजचन्द्रबिम्बादिशब्दाः शीतमित्यस्य हेतवः। यद्वा, आर्द्रं सरसं स्मितं यासां ता राधाद्या गोप्यस्ताभिः कृत्वार्द्रं रसभरेण बुडितं यद्वदनं तदेवाम्बुजं चन्द्रबिम्बं वा यत्र तत्। पुनः कीदृशम्—शिञ्जानभूषणचितम्। शिञ्जानैः स्वनं कुर्वद्भिर्भूषणैर्नूपुरकिङ्किणीकेयूरादिभिश्चितं व्याप्तम्। पुनः कीदृशम्—शिखिपिच्छमौलि। शिखिपिच्छं मौलौ चूडारूपसंयतविचित्रकुसुमशोभितकेशकलापे यस्य तत्। शिखिपिच्छयुक्तो मौलिः किरीटं यत्र वा तत्। एतेन गोपवेषमाधुर्यम्॥ वसन्ततिलकं छन्दः॥७०

सुबोधनी

ततोऽपि निकटमायान्तमालोक्य सहर्षमाह—विलोचनयो रसायनं सौन्दर्यामृतपानपात्रं संमुखमायाति। तदागमनं विवृणोति—आन्दोलितौ भुजाग्रौ

1-2. GB reads तथा for पुनः कीदृशं and omits आन्दोलिताग्रभुजं. 3. GB omits यथा 4. This line only is not found in the printed text of the Saṃgīta-ratnākara. GB पताकान्दोलितौ. GB स्तौ for स्तः. 7. GB reads तथा for पुनः कीदृशं, and आर्द्रेति for the phrase आर्द्रस्मित etc. 11. GB रसभरे मग्नं for रसभरेण बुडितं. 14. GA क्रीडा० for चूडा०. 18. CB omits अपि. For सहर्षमाह CB, CD read : नेत्रानन्दरूपतया निर्दिशन्नाह —आन्दोलितेति. 19. CB, CD insert अतः शीतं after आयाति, and एव after तत्. CB, CD संभावयन्नाह for विवृणोति. CD is corrupt in the passage from आन्दोलितौ to स्फूर्त्याह (l. 1, p. 217)

यस्य। अतः शब्दायमानैः कङ्कणनूपुरादिभिश्चितम्। स्वस्मिन्कारुण्यस्फूर्त्याह—करुणयाकुले नेत्रे यस्य। तत्राश्चर्यमाह—स्निग्धस्मितेनार्द्रं यद्वदनं तदेवाम्बुजं चन्द्रबिम्बं च यत्र। अतः शीतम्। शीतत्वादम्बुजत्वम्, रसायनत्वादिन्दुत्वम्। सर्वत्र हेतुः—शिखिपिञ्छैर्मौलिर्यस्य ॥७०

सारङ्गरङ्गदा

काचित्कराम्बुजं शौरेः

(भा० १०. ३२. ४) इत्यादिवत्ताभिर्मिलित्वा नृत्यन्तमिवागच्छन्तं तं विलोक्य नेत्रातितृप्त्या सहर्षमाह—इदं शीतं विलोचनयो रसायनमभ्युपैति पुरत आयाति। कीदृशम्—तासां स्पर्शोत्थकम्पात्सनृत्यगत्या चान्दोलिताविवभुजौ यस्य। करुणयाकुले पूर्ववल्लोले च नेत्रे यस्य। आर्द्रस्मितेनार्द्रं वदनाम्बुजचन्द्रबिम्बं यस्य। तत्र तासां दर्शनानन्दोत्फुल्लत्वात्सुरभित्वाच्चाम्बुजत्वम्। शैत्यमाधुर्यकान्त्यादिभिर्नेत्रप्रीणनत्वाच्चन्द्रत्वम्। शिञ्जानानि यानि कङ्कणनूपुरादिभूषणानि तैश्चितम्। अनेन श्रोत्रानन्दनत्वं चोक्तम्। शिखिपिञ्छैर्मौलिर्यस्य ॥७०

पशुपालबालपरिषद्विभूषणः
शिशुरेष शीतलविलोललोचनः।
मृदुलस्मितार्द्रवदनेन्दुसंपदा
मदयन्मदीयहृदयं विगाहते ॥७१

कृष्णवल्लभा

संप्रति परमभावमभ्यस्यञ्श्रीकृष्णचन्द्रेण स्वहृदयाक्रमणमभिलषतीत्याह—पशु-

1. CB कङ्कणादि° for कङ्कण°. 1-2. CC omits all words from तः (in अतः) to नेत्रे यस्य. 2. CB, CD करुणाकुलिते, CD करुणयाकुलेऽतो लोले for करुणयाकुले. 3. CB, CD omit अतः शीतं. CB, CD शीतलतया for शीतत्वात्. 4. CB, CD तथा for सर्वत्र हेतुः. 7. KD omits तं. 8. KA, KD नेत्राभितृप्त्या (KD °तृप्ता). KA, KB omit अभ्युपैति. 9. KD नृत्य° for सनृत्य°. 11-12. KC °माधुर्यात् for °माधुर्यकान्त्यादिभिः. 13. KD श्रोत्रानन्द° for श्रोत्रानन्दन°. 14. PS (v. l. as in text) °विभूषणः.

पालेति। एषोऽपरोक्षतया स्फुरञ्शिशुः सुकुमारो मृदुलस्मितार्द्रवदनेन्दुसंपदा मृदुलं यत्स्मितं तेनार्द्रं सरसं यद्वदनं तदेवेन्दुस्तस्य या संपल्लावण्यमाधुर्यसौकुमार्यसौरभ्यरूपा संपत्तिस्तया मदयन्हर्षयन्मदीयहृदयं विगाहते विशेषेणाक्रमति। स्वायत्तीकरोतीत्यर्थः। कीदृशः—पशुपालबालपरिषद्विभूषणः। पशुपालबालानां गोपशिशूनां श्रीदामसुबलादीनां परिषदं सभां विभूषयतीति सः। यद्वा, पशुपालानां गोपानां बाला रमण्यो यस्यां सा चासौ परिषच्च तां विशेषेण भूषयति मण्डयतीति सः। पुनः कीदृशः—शीतलविलोललोचनः। शीतले परमशान्तिप्रदे विलोले चञ्चले विशिष्टे हावभावकटाक्षनानादृष्टियुक्ते लोचने यस्य सः॥ मञ्जुभाषिणी छन्दः॥७१

सुबोधनी

पूर्वोक्तं राधिकादिसाहित्यं व्यनक्ति—एष शिशुर्मदीयानां हृदयं मृदुलस्मितार्द्रवदनेन्दोः स्मितावलोकादिसंपत्त्या हर्षयन्विगाहते। व्याप्नोतीत्यर्थः। तत्साहित्यमाह—पशुपालानां बाला यस्यां सा पशुपालबाला, सा चासौ परिषच्चेति कर्मधारये पुंवद्भावः (पा० ६. ३. ४२), सैव विभूषणं यस्य। अतः शीतले विलोले लोचने यस्य॥७१

सारङ्गरङ्गदा

अथ परितस्ता दृष्ट्वा

चकास गोपीपरिषद्गतो विभुः

(भा० १०. ३२. १४) इत्यादिलीलाविशिष्टं तं विलोक्य सहर्षमाह—एष शिशुः किशोरः सर्वासामपि विशेषतो मदीयानां स्वसंमुखस्थश्रीराधाललितादीनां हृदयं

1. GB omits मृदुलस्मितार्द्रवदनेन्दुसंपदा. 4. GB inserts शिशुः after कीदृशः, and omits the phrase पशुपाल etc. 6. GB विभूषयति for विशेषेण भूषयति. 7. GB reads तथा for पुनः कीदृशः, and omits शीतलविलोललोचनः. 8. GA कटाक्षे for कटाक्ष-. GA, GB तं for सः. 11. CB, CD prefix श्री to राधिका. After व्यनक्ति CB, CD insert पश्चिति. 12. CA ०वलोकितादि०, CD ०लोकादि० for ०वलोकादि०. CB प्रविशति for विगाहते व्याप्नोतीत्यर्थः; CD is corrupt. 14. CB, CD भूषणं for विभूषणं.

एतन्नो ब्रूहि

(भा० १०. ३२. १६) इत्यादिना स्वान्तःकोपप्रश्नश्रवणाद्यन्मृदुस्मितं तेनार्द्रो यो वदनेन्दुस्तस्य

मासूयितुं मार्हथ

(भा० १०. ३२. २१) इत्यादिप्रेमोक्तिकौमुदीरूपा या संपत्तया मदयन्नानन्दयन्विगाहते। व्याप्नोतीत्यर्थः। तद्दृष्ट्वा मम हृदयं च कीदृक्—पशुपालबालानां गोपकिशोरीणां परिषदं विभूषयतीति तथा। तत्सभैव विभूषणं यस्येति वा। तया वेष्टितो बभावित्यर्थः। अग्रे

राधापयोधर

(श्लो० ७६) इत्यादौ

धेनुपालदयितास्तनस्थलीं

(श्लो० ७७) इत्यादौ तथा वर्णितत्वात्। प्रेमवैवश्येन बालापरिषदिति वक्तव्ये बालपरिषदित्युक्तिः। यद्वा, पशुपालानां बाला यस्यां सा पशुपालबाला, सा चासौ परिषच्चेति कर्मधारये पुंवद्भावः (पा० ६. ३. ४२)। किं वा तद्बालगोष्ठीनां विभूषणवद्विभूषणं यस्य सः। तदुक्तम्—

वेषेण घोषोचितभूषणेन

(श्लो० ६९) इति। सामान्यवयस्यवर्गवृत इत्यर्थस्तु प्रक्रमाप्राप्तः। तथा, शीतले विलोले च लोचने यस्य ॥७१

किमिदमधरवीथीक्लृप्तवंशीनिनादं
किरति नयनयोर्नः कामपि प्रेमधाराम्।
तदिदममरवीथीदुर्लभं वल्लभं न-
स्त्रिभुवनकमनीयं दैवतं जीवितं च ॥७२

2. KC इत्यादौ for इत्यादिना. KA तासामन्तःकोप० for स्वान्तःकोप०. KP स्वान्तकोपः स्वप्रश्न०. KP मृदुल० for मृदु०. 4. After मार्हथ KC, KD, KP insert इत्यादि न पारयेऽहम् (भा० १०. ३२. २२); Cf. Sāraṅga-raṅgadā on verse 72. 5. KP ०रूपया for रूपा या. 8. KC बालो वा for बभौ. 17. KB क्रमप्राप्तः, KD क्रमात्प्राप्तः, KP प्रक्रममव्याप्त for प्रक्रमाप्राप्तः. 21. Gopāla Bhaṭṭa reads ०वीथीवल्लभं दुर्लभं. 22. PS ०भजनीयं for ०कमनीयं.

कृष्णवल्लभा

अथ श्रीकृष्णचन्द्रस्य परमप्रेमाविर्भावकत्वं परमदुर्लभत्वं च वदन्स्वस्य परममहाप्रीतिभक्तिविशेषनिष्ठोक्त्या दौर्लभ्याभावं सूचयति—किमिदमिति। किमिदमत्याश्चर्यम्। यावत्सुखविशेषरूपं वस्तु ततोऽपि विलक्षणमिदम्, अनुभूयमानत्वात्। नोऽस्माकं नयनयोः कामप्यनिर्वचनीयां प्रेमधारां प्रेम्णो धारां किरति वर्षति। कीदृशम्—अधरवीथीक्लृप्तवंशीनिनादम्। अधरवीथ्यां विशेषोल्लासरूपायां क्लृप्तो रचितो वंशीनिनादो यत्र तत्। विनापि वंशीं तन्नादमनुकुर्वन्नवरिवर्तीति। यद्वा, अधरवीथ्यामधरपुटे क्लृप्ता, न तु समग्योजिता, दत्तफूत्कारा वा, या वंशी सा निनादा नितरां नादवती यत्र तत्। आ ज्ञातम् —नोऽस्माकं दैवतमेकान्तभक्तिभावतः समाराध्यम्। न केवलं दैवतम्—जीवितं च, जीवनवत्परमप्रेमास्पदम्। यद्दैवतं तज्जीवितं न, यज्जीवितं तद्दैवतं न भवति। इदं तु द्वयमेव। अतः—त्रिभुवनेषु कमनीयं मनोहरम्। पुनः कीदृशम्—अमरवीथीवल्लभम्। अमराणां देवानां वीथी पङ्क्तिस्तस्य वल्लभं प्रियम्। दुर्लभं च। तेषाममृतपानेन नामरत्वम्, किं तु तद्वल्लभतयेत्यर्थः। यद्वा, प्रसिद्धामृतं तुच्छीकृत्य भगवत्कथामृतपानपरत्वादमरा जीवन्मुक्ताः श्रीकृष्णैकभक्तिरसनिमग्नाः। तद्वीथ्यां तत्पङ्क्तौ वल्लभं प्रियम्॥ मालिनी छन्दः ॥७२

सुबोधनी

अथ तद्दर्शनानन्दावेशेन संशय्य पुनर्निश्चिनोति—किमिदं यन्नो नयनयोः कामपि प्रेमधारां किरति। आं ज्ञातं तदेव—नो दैवतमिदम्। नैव तावत्—वल्लभं च। न केवलं वल्लभम्—जीवितं च। कथमेज्ज्ञातम्—

5. GB omits प्रेम्णो धारां. 6. GB अधरेति for the phrase अधरवीथी etc. 9. GB omits निनादा. 13. GB omits कीदृशममरवीथीवल्लभं. 14. GB inserts एव before इत्यर्थः. 19. CB, CD संदिह्य for संशय्य. CC omits पुनः. CB, CD insert किमिदमिति after निश्चिनोति. 20. CA अहो for आं 21. CB, CD किमुत for न केवलं, and तज्ज्ञाने हेतुः for कथमेतज्ज्ञातं.

अधरवीथ्यां कल्पनार्पिता या वंशी तस्या निनादो यत्र। अतः, अमरवीथ्यां स्वर्गाद्यनन्तवैकुण्ठवलये दुर्लभम्। अतएव त्रिभुवनानां कमनीयम्। तदिदं मन्नेत्रगोचरमहो भाग्यमित्यर्थः ॥७२

सारङ्गरङ्गदा

इति श्लोकत्रय्या सामान्यत्वेन तं निर्वर्ण्य तन्मम जीवितमेवैतदिति वर्णयन्प्रथमं तासां

न पारयेऽहम्

(भा० १०. ३२. २२) इत्यादिस्ववागमृतक्षालितेर्ष्यालवपङ्के स्वान्ते पुनर्विलासलालसातरङ्गिणीमुच्छलयितुं वंशीनादामृतं वर्षति कृष्णघने, तत्र जातप्रेमानन्दोद्रेकः किमिदं वस्त्विवति संशय्य पुनर्निश्चिनोति—किमिदं वस्तु यन्नोऽस्माकं नयनयोः कामपि प्रेमधारां किरति। क्षणं विमृश्य, आं विदितं तदेव—अस्माकं दैवतमिदम्। पुनः सशङ्कम्, किमुत दैवतम्—वल्लभं च। पुनः सप्रणयम्, किमुत वल्लभम्—जीवितं च। कथं ज्ञातं तत्राह—अधरवीथ्यां कल्पना चित्रवदर्पिता या वंशी तस्या निनादो यत्र। अतः, अमरवीथ्यां देवश्रेण्यां तस्या अपि वा दुर्लभम्। अतः, त्रिभुवनकमनीयम्। तदिदं मन्नेत्रगोचरमित्यहो भाग्यमिति भावः ॥७२

तदिदमुपनतं तमालनीलं
तरलविलोचनतारकाभिरामम्।
मुदितमुदितवक्त्रचन्द्रबिम्बं
मुखरितवेणुविलासि जीवितं मे ॥७३

1. CB, CD omit all words from अधरवीथ्यां to निनादो and read instead : अधरेण कृत्वा वीथ्यां व्रजस्य संकीर्णमार्गे कल्पतोऽसाधारणतया वादितो वंशीनिनादो. 2. CB, CD omit स्वर्गाद्यनन्तवैकुण्ठवलये. CC ततः for अतः. 3. CB, CD मम दृग्गोचरं for मन्नेत्रगोचरं. 5. KB omits एव. 8. KP ०नव० for ०लव०. 9. KB ०प्रेमामृत० for ०प्रेमानन्द०. 15. KB, KD ०गोचर इति for ०गोचरमिति. 20. PS ०विलासजीवितं.

कृष्णावल्लभा

अथ श्रीकृष्णस्वरूपं संततवर्धिष्णुप्रेम्णा निरीक्ष्यमाणः क्षणमपि तिरोधानेनाकुलितचित्तः पूर्वश्लोकोक्तमेव दृढीकरोतीत्याह—तदिदमिति। तदिदं यन्महाभाववद्भ्यः श्रुतम्। इदमित्यपरोक्षतया। मे मम जीवितं जीवितरूपमुपनतं प्राप्तम्। अवगतं वा। मनागप्रकाशे मरणमेव स्यादिति भावः। कथमवगतम्, तत्राह—तमालनीलम्। तमालवृक्षवन्नीलः श्यामो वर्णो यस्य तत्। शृङ्गाररसरूपमित्यर्थः। न केवलं तथा—तरलविलोचनतारकाभिरामम्। तरलविलोचनयुक्ते ये तारके कनीनिके ताभ्यामभितः सर्वतोभावेन रमयति सुखयतीति तत्। पुनः कीदृशम्—मुदितमुदितवक्त्रचन्द्रबिम्बम्। मुदितमुदितेत्यतिशयार्थे वीप्सा। यद्वा, मुदितं यथा स्यात्तथोदित उदयं प्राप्तो वक्त्रचन्द्रबिम्बो यस्य तत्। पुनः कीदृशम्—मुखरितवेणुविलासि। मुखरितो वादितो यो वेणुस्तेन विलासि विलासयुक्तम्। यद्वा, मुखरितो वेणुर्याभ्यो गोपीभ्यो निमित्तभूताभ्यस्ताभिः सह विलासि॥ पुष्पिताग्रा छन्दः—

अयुजि नयुगरेफतो यकारो
युजि तु नजौ जरगाश्च पुष्पिताग्रा (छन्दोमञ्जरी २)॥७३

सुबोधनी

पुनः सनिश्चयमाह—तदेव मम जीवितं समीपमागतम्। कथं ज्ञातम्—तमालवन्नीलम्। ततोऽपि कुतः—प्रियादर्शनाय तरलाभ्यां विलोचनयोस्तारका-

3-4. GB महद्भ्यः for महाभाववद्भ्यः. 4. GA मया for मम. 6. GB omits तमालनीलं. GB नीलं श्यामवर्णं for नीलः श्यामो वर्णो यस्य तत्. 7. GB omits the phrase तरलविलोचन etc. 8. GA अभिरमयति for रमयति. 9. GB omits कीदृशं and the phrase मुदितमुदितवक्त्र etc. 11. GB omits कीदृशं मुखरितवेणुविलासि. 13. GB omits सह. 17. CB, CD insert तदिदमिति after आह, and उपनतं after जीवितं. CB समीपगतं. CB, CD तदेव कुतः for कथं ज्ञातं. CC तज्ज्ञातं for ज्ञातं. 18. CC reads कथं for कुतः and continues मुखरितो यो वेणुस्तेन विलसितुं शीलं यस्य, omitting this sentence (वादितो यो वेणुः etc.) with its v. l. on p. 223, lines 1-2.

श्यामभिरामम् । अतएवातिमुदितं वक्त्रचन्द्रबिम्बं यत्र। वादितो यो वेणुस्तेन विलसितुं शीलं यस्य ।।७३

सारङ्गरङ्गदा

रासोत्सवः संप्रवृत्तः

(भा० १०. ३३. ३) इत्यादिवत्पुनस्तद्विलासारम्भिणं तं निश्चित्याह—तदिदं मम जीवितमुपनतं समीपमागतम् । कीदृशम्—विलासि रासविलासारम्भि । मुखरितो वेणुर्येन। शब्दितवेणोर्विलासयुक्तं वा। तमालनीलम्—कनकवल्लीनां तासां मध्ये तमालवद्भ्राजमानम् । सर्वगोपीमण्डलवक्त्रदर्शनाय तरलाभ्यां विलोचनयोस्तारकाभ्यामभिरामम् । मुदितमुदितमतिमुदितं वक्त्रचन्द्रबिम्बं यस्य। मुदितमानन्दितमुदितवक्त्रचन्द्रबिम्बमिति वा ।।७३

चापल्यसीम चपलानुभवैकसीम
चातुर्यसीम चतुराननशिल्पसीम ।
सौरभ्यसीम सकलाद्भुतकेलिसीम
सौभाग्यसीम तदिदं व्रजभाग्यसीम ।।७४

कृष्णावल्लभा

संप्रति पुरः स्फूर्तिमत्तद्रूपमनुभवन्नभिनयन्नेवाह—चापल्यसीमेति। तदिदं पुरोवर्ति व्रजभाग्यसीम। व्रजजनानां भाग्यस्यैव सीमा यस्मिंस्तत् । कीदृशम्—चापल्यसीम। चापल्यं महादुर्लभपदनिमित्तमुत्तरलताभावनाभिनिवेशबलात्प्राप्स्यामीत्येवंरूपं तस्य सीमा यत्र तत्। विचारेण चापल्यं दूरीकुर्विति चेन्न, आश्वासप्राप्त्या तदतिवृद्धेरित्याह—चपलानुभवैकसीम। चपलस्य ममानुभवानामेकसीमा यत्र। स्वानुभवेनैव कथयामीत्यभिप्रायः। पुनः कीदृशम्, अनु-

1. CB, CD यस्य for यत्र. CB, CD omit all words from वादितो to यस्य and read instead : तलश्च मुखरितः (CD omits मुखरितः) कथितो वेणुनादे यो (CB omits यो) विलासः सोऽस्ति यस्य. 4. KP संवृत्तः for संप्रवृत्तः. 6. KA समीपागतं, KD समीपसमागतं. 8. KD, KP वल्लवीनां for वल्लीनां. 10. KC, KP आनन्दित उदित०. KA omits वा. KP inserts छेदः after वा. 21. GB omits पुनः कीदृशम्.

भवाकारमेवाह—चातुर्यसीम। चातुर्यस्य सीमा यस्मिन्। तदनुभवेनैव मम चातुर्यमपि स्फुरतीत्यर्थः। पुनः कीदृशम्—चतुराननशिल्पसीम। चतुराननो ब्रह्मा तच्छिल्पस्य रचनायाः सीमा यत्र। अतः परं तस्य कौशलं नास्तीत्यर्थः। तन्मूर्तेर्विधातृसृज्यत्वाभावेऽपि लोकदृष्टिरियमुक्ता। यद्वा, चतुरा विचित्रानने शिल्पस्य तिलकादिरचनायाः सीमा यत्र तत्। चतुरा प्रेमातिशयगोष्ठी तस्या आनने यच्छिल्पं चित्रकवित्वादिकौशलं तस्य सीमा यत्रेति वा। पुनः कीदृशम्—सौरभ्यस्य सौगन्ध्यस्य सीमा यत्र तत्। पुनः कीदृशम्—सकलाद्भुतकेलीनां सीमा यत्र तत्। कलाभिः सहिताः सकलाः, ताश्च ता अद्भुतकेलयश्चाश्चर्यक्रीडास्तासां सीमा मर्यादा वा। पुनः कीदृशम्—सौभाग्यसीम। सौभाग्यस्य सौन्दर्यस्य सीमा यत्र तत्॥ वसन्ततिलकं छन्दः॥७४

सुबोधनी

ततस्तस्य तत्तच्चापल्यादिकमनुभूय तत्तदवधित्वेन साश्चर्यमाह—तदिदं मम जीवितं चापल्यानां सीमावधिर्यत्र। तत्कुतः—चपलानां गोपाङ्गनानां यस्तत्स्पर्शादिसुखानुभवस्तस्यैका मुख्या सीमा यत्र। ताभिरेव तदनुभवितुं शक्यमित्यर्थः। तदेकवेद्यत्वमपि कुतः—चातुर्यैकसीम। तदपि कुतः—विधेः शिल्पस्य सीमा यत्र। इदमालोक्य तस्य शिल्पित्वं गतमित्यर्थः। तत्सौरभ्यं लब्ध्वा—

1. GB अनुभवमेव दर्शयति for अनुभवाकारमेवाह. 2. GB तथा for पुनः कीदृशं चतुराननशिल्पसीम. 3. GB omits all words from अतः to इत्यर्थः and reads instead : तद्व्यतिरेकेण तस्य सृष्टिसामर्थ्याभावात्. 4. GA लोकस्य for लोक-. 6-7. GB तथा for पुनः कीदृशं (also in lines 7 and 9). 9-10. GB omits सौभाग्यसीम. 12. CB, CD omit तस्य ; CB reads तत् for तत्तत् occurring after it ; CA omits तत्तत्. 12-13. CB, CD omit all words from साश्चर्यमाह to तत्कुतः and read instead : निर्दिशन्नाह —चापल्येत्यादि. 14. CC एव for एका. CA तस्यैकं मुख्यं सीम सीमा यत्र. CB, CD यस्मिंस्तत् for यत्र. CD inserts तादृशीभिरेव before, CB reads the same for ताभिरेव तत्. 15f. CB, CD omit all words from तदेकवेद्यत्वं to भाग्यसीम at the end of the commentary. 15. CC omits चातुर्यैकसीम and reads instead : यतो निजान्तर्भावप्रकाशकानां चातुर्याणां सीमा यत्र. CC तथा for तदपि कुतः 16. CC सीमत्वं for शिल्पित्वं.

सौरभ्यसीम। तत्केलिपरिपाटीं दृष्ट्वाह—सकलाद्भुतकेलिसीम। क्षणं विमृश्याह—व्रजदेवीनां सौभाग्यसीम। न केवलं तासाम्—व्रजस्यैव भाग्यसीम ॥७४

सारङ्गरङ्गदा

रासे तस्य तत्तच्चापल्यादिकमनुभूय साश्चर्यमाह। प्रथमं नृत्यगतिलाघवं दृष्ट्वाह—तदिदं मम जीवितं चापल्यसीम। तेषां सीमा यत्र तदवधिभूतमित्यर्थः। तादृशगोपीभिश्चुम्बितालिङ्गितं तं विलोक्याह—सहनृत्यचुम्बनाद्यर्थं चपलानामासां यस्तत्स्पर्शादिसुखानुभवस्तस्यैका प्रधाना सीमा यत्र। तादृशीभिस्ताभिरेवानुभवितुं शक्यमित्यर्थः। तत्तच्चातुर्यं दृष्ट्वाह—चातुर्येति। सौन्दर्यं दृष्ट्वाह—चतुराननेति। चतुराननस्य विधेः शिल्पस्य सीमा यत्र। सौरभ्यं लब्ध्वाह—सौरभ्येति। तत्केलिसौष्ठवं दृष्ट्वाह—सकलेति। व्रजदेवीनां प्रेमावेशं सौन्दर्यादिकं च दृष्ट्वाह—सौभाग्येति। क्षणं विमृश्य, न केवलमासां व्रजस्यापि भाग्यसीमा यत्र ॥७४

माधुर्येण द्विगुणशिशिरं वक्त्रचन्द्रं वहन्ती
वंशीवीथीविगलदमृतस्रोतसा सेचयन्ती।
मद्वाणीनां विहरणपदं मत्तसौभाग्यभाजां
मत्पुण्यानां परिणतिरहो नेत्रयोः संनिधत्ते ॥७५

4. KA, KD omit तस्य. KB तत् for तत्तत्. KC चाञ्चल्या० for चापल्या०. 6. KA, KP omit तं. KA सनृत्य० for सहनृत्य०. 7. KB एकं, KC, KP एक-, KD एव for एका. All Mss (except KA) and KP प्रधानं for प्रधाना. KB, KD, KP सीम for सीमा. 8. KA, KP तत् for तत्तत्. 9. KC, KP omit चतुराननेति. KC reads रचना for सीमा. KA, KB omit all words from चतुराननस्य to सीमा यत्र. 10. KA, KB omit तत् before केलि०. KC ०परिपाटीः, KP ०परिपाटीं for ०सौष्ठवं. KD वीक्ष्य for दृष्ट्वा. KC, KP insert तत् before प्रेम०. 10-11. KC प्रेमसौभाग्यादि for प्रेमावेशं सौन्दर्यादिकं च. 11. KC एव for अपि. 15. PS मस्त० for मत्त०.

कृष्णवल्लभा

इदानीं भावनापरिपाकतः स्वभाग्यमत्याश्चर्यरूपमाह—माधुर्येणेति। अहो विस्मये। मत्पुण्यानां परिणतिः परिणामः। फलमिति यावत्। नेत्रयोः संनिधत्ते संनिहिता भवति। ईदृक्फलं शास्त्रेऽपि दुर्लभमित्याह—वंशीवीथी-विगलदमृतस्रोतसा मद्वाणीनां विहरणपदं सेचयन्ती। वंशीवीथ्याः सकाशा-द्विगलतोऽमृतस्य स्रोतसा प्रवाहेण मम वाणीणां वाचां विहरणपदं क्रीडास्थानं सेचयन्ती। यथा यथा तदनुभवविशेषो भवति तथा तथा तद्वर्णयन्ती वाग्रसमग्ना भवतीत्यर्थः। कीदृशीनां वाणीनाम्—मत्तसौभाग्यभाजाम्। तद्रसेन मत्तं यत्सौभाग्यं तद्भजन्तीति तास्तासाम्। मत्ताश्च ताः सौभाग्यभाजश्चेति वा। सर्वस्यैवात्यन्तचित्तहारिणीनामित्यर्थः। पुनः कीदृशी परिणतिः—माधुर्येण मधुरिम्णा द्विगुणं शिशिरं यत्र, वाणीनां नेत्रयोश्च माधुर्येण द्विगुणं शिशिरमिति वा, तादृशं वक्त्रचन्द्रं वहन्ती धारयन्ती॥ मन्दाक्रान्ता छन्दः—

मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ गौ ययुग्मम् (छन्दोमञ्जरी)॥७५

सुबोधनी

ततोऽपि निकटमायान्तमालोक्य सहर्षमाह—मत्पुण्यानां परिपाकोऽयं मन्नेत्रयोः संनिधिमायाति। अहो आश्चर्यम्—वक्त्रचन्द्रं वहन्ती। कीदृशम्—स्वभावशीतलमपि माधुर्येण द्विगुणशीतलम्। तत्र हेतुः—वंश्या मार्गेण विशेषतो

2. GB transposes स्वभाग्यं and अत्याश्चर्यरूपं. 4-5. GB omits all words from वंशीवीथी० to सेचयन्ती. 6. GB मद्वाणीनां मद्वाचां for मम वाणीनां वाचां. 8. GB कीदृशानां. 8-9. GA transposes तद्रसेन and मत्तं. 10. GB omits पुनः. 15. Before ततोऽपि CD inserts a pious ejaculation हे कृष्ण प्रसीद दीनबन्धो कृपालय यमुनातटसमीपमधुरकुञ्जावनीषु प्रफुल्लकुसुमसंदोहसौरभमाद्यन्मधुपवृन्दमुखरितासु व्रजबालसुन्दरीगणमण्डितप्राणनाथ॥. CD ततोऽति०. CB, CD insert माधुर्येति after आह, and read अनेकजन्मार्जितसुकृतानां फलं for परिपाकोऽयं. 16. CB, CD insert क्षणं विमृश्य before अहो. CB, CD आश्चर्यं. 17. CB, CD सहज० for स्वभाव०. CB, CD तथा for तत्र हेतुः. CB, CD विशेषेण for विशेषतः.

गलदमृतस्रोतसा जगत्सेचयन्ती। कति दूरे—मद्वचनानां गोचर इत्यर्थः। मत्ता अनवस्थिता अपि यास्तद्विषयतया सौभाग्यं भजन्ति तासाम् ॥७५

सारङ्गरङ्गदा

तादृशस्तस्य साक्षाद्दर्शनानन्देन स्वसौभाग्यातिशयं मत्वा साश्चर्यमाह—अहो आश्चर्यं मत्पुण्यानां परिणतिः परिपाकोऽयं मन्नेत्रयोः संनिधत्ते साक्षाद् बभूव। अहो मम भाग्यमिति भावः। कीदृशी—वक्त्रचन्द्रं वहन्ती। कीदृशं तम्—स्वभावशीतलमपि माधुर्येण द्विगुणशिशिरम्। तथा, वंशीवीथीभिस्तन्मार्गविशेषेण गलन्ति यान्यमृतस्रोतांसि तत्प्रवाहास्तैर्व्रजदेवीर्मां जगच्च सेचयन्ती। तथा, मद्वाणीनां विहरणपदं विहारस्थानम्। कीदृशम्—मत्ताः प्रेमोन्मत्ताश्च तत्सौन्दर्यादिवर्णनात्सौभाग्यभाजश्च यास्तासाम्। तद्वक्ष्यते च—

समुज्जृम्भा गुम्फा

(श्लो० १०१) इत्यादौ ॥७५

तेजसेऽस्तु नमो धेनुपालिने लोकपालिने।
राधापयोधरोत्सङ्गशायिने शेषशायिने ॥७६

कृष्णवल्लभा

अथ श्रीराधारसमग्नस्य श्रीकृष्णस्य सर्वतः परमोत्कर्षं वर्णयन्परमभावेन नमस्करोति—तेजस इति। तेजसे तेजोरूपाय नमोऽस्तु। तं विनास्माकं सर्वेषां विश्वस्यान्धकारमयत्वात्। तर्हि किं ब्रह्मज्योतिर्निराकारम्, न—

1. CB, CD insert अत आह after दूरे. 2. CB inserts कीदृशानां, CD कीदृशां before मत्ता. CB, CD प्रेमोन्मत्ता for अनवस्थिता. 5. KD आश्चर्यं. 6. KD inserts परिणतिः after कीदृशी. KA omits तं. 11. KA inserts मधुरिमकिरां after गुम्फा. 13-14. Kṛṣṇadāsa has a v. l. अलोक० for लोक०, and Caitanyadāsa and Kṛṣṇadāsa read अशेषशायिने, which however make no difference in the wording of the text. 18. GB omits सर्वेषां. GB inserts च after विश्वस्य. GB निर्गुणं ब्रह्म for ब्रह्मज्योतिर्निराकारं. GB inserts इत्याह after न.

लोकपालिने लोकानां पालकाय। पुनः कीदृशाय—धेनुपालिने। गोपालायेत्यर्थः। लोकपालो भूत्वा धेनुपाल इत्यहो तव वैदग्ध्यम्। पुनः कीदृशाय—राधापयोधरोत्सङ्गशायिने। राधायाः पयोधरयोरुत्सङ्गे च शयितुं शीलमस्येति तस्मै। पुनः कीदृशाय—शेषशायिने। शेषः श्रीबलभद्रस्तदुत्सङ्गे शयितुं शीलमस्य तस्मै। तमुत्सङ्गे शाययितुं शीलमस्येति वा॥ अनुष्टुप् छन्दः॥७६

सुबोधनी

अथ तदानन्दावेशेन सनर्म नमस्करोति द्वाभ्याम्—कस्मैचित्तेजसे तत्पुञ्जाय नमोऽस्तु। कीदृशे—अहो आश्चर्यम्, राधायाः पयोधरयोर्मध्ये शयितुं शीलं यस्य। न केवलं तस्या अपि त्वशेषाणां तत्सखीनामप्यङ्कशायिने। तद्योग्यतामापादयन्नाह—एकेनानन्तगोपालरूपाय। अतस्तल्लीलाप्रवर्तनाल्लोकपालिने॥७६

सारङ्गरङ्गदा

अथ नृत्यगतिलाघवेनैकेन वपुषैवाशेषगोपीनां हृदयात्क्षणमप्यनपगतमविभाव्यकान्तिप्रवाहोच्छलितं तं विलोक्य निर्वक्तुमसमर्थः साश्चर्यं केवलं नमस्करोति द्वाभ्याम्—अस्मै कस्मैचित्तेजसे तत्पुञ्जरूपाय नमोऽस्तु। कीदृशे—राधापयोधरोत्सङ्गे शयितुं निरन्तरं तन्निकटे स्थातुं शीलं यस्य तस्मै। तस्मात्क्षण-

1. GB omits लोकपालिने, and पुनः कीदृशाय धेनुपालिने. 2. GA reads धेनूः पालयति for धेनुपालः, and omits इति after it. GA inserts इति after वैदग्ध्यं. GB reads तथा for पुनः कीदृशाय and omits the phrase राधापयोधर etc. 3. GA राधापयोधरोत्सङ्गे for राधायाः पयोधरयोरुत्सङ्गे च. 4. GB reads तथा for पुनः कीदृशाय and omits शेषशायिने. 5. GA omits तस्मै after शीलमस्य and inserts it after वा. GB omits छन्दः. 7. CB, CD omit तदानन्दावेशेन सनर्म and read instead : तदानन्दाविष्टस्तन्निर्वक्तुमशक्नुवन्प्रभावस्फूर्त्या केवलं. CB, CD omit कस्मैचित्. 8. CB, CD omit all words from कीदृशे to पयोधरयोः and read instead : तदेवाह—लोकान्पालयितुं शीलं यस्य तस्मै। तद्वैशिष्ट्यमाह—धेनुपालिने। तत्रापि निजाभीष्टत्वं प्रतिपादयन्नाह—राधापयोधरयोः. 9. CB, CD ०सखीजना० for ०सखी०. 9-10. CB, CD omit all words from तद्योग्यतां to लोकपालिने. 10. CC तत्तल्लीलावर्तनात्. 13. KB omits तं. KA नमस्कारं करोति for नमस्करोति.

मप्यनपगतायेत्यर्थः। पुनः परितो वीक्ष्य साश्चर्यमाह—तादृशायाप्यशेषेषु समस्तगोपीस्तनोत्सङ्गेषु शायिने तत्तन्निकटस्थिताय। नन्वेकस्य कथमेतत्सं-भवेदिति विमृशन्ब्रह्ममोहनलीलास्फूर्त्यास्य नैतदश्चर्यमित्याह—

एकं सपाणिकवलं

(भा० १०. १३. ६१) इत्यादिदिशा धेनुपालिने। एकेन स्वरूपेणैवानन्तगोपाल-रूपायापि। लोकपालिने लोका अनन्तब्रह्माण्डानि तत्तदुपास्यतत्तच्चतुर्भुजरूपेण तत्तत्पालिने। किं वा, अकारो विष्णुः, अ-स्य विष्णोर्लोका वैकुण्ठलोका-स्तत्पालिने ॥७६

धेनुपालदयितास्तनस्थली-
धन्यकुङ्कुमसनाथकान्तये।
वेणुगीतगतिमूलवेधसे
ब्रह्मराशिमहसे नमो नमः ॥७७

कृष्णवल्लभा

वल्लवीसौभाग्योत्कर्षं वर्णयन् हर्षेण भूयो भूयो नमस्कुर्वन्नाह—धेनुपालेति। ब्रह्मराशिमहसे ब्रह्मराशिरूपं महस्तेजो यस्य। यद्वा, ब्रह्मसुखराशीनां मह उत्सवो यस्मात्। भक्तानामिति शेषः। तस्मै गोपालरूपिणे श्रीकृष्णाय नमो नम इत्यादरे वीप्सा। गोपालरूपत्वं विशेषयन्नाह, कीदृशाय—धेनुपाल-दयितास्तनस्थलीधन्यकुङ्कुमसनाथकान्तये। धेनुपाला गोपास्तेषां दयिता गोप्यः। यद्वा, धेनुपाल्यश्च धेनुपालाश्च धेनुपाला इत्येकशेषः। तेषां दयिता

2. KA, KB, KP तत्° for तत्तत्°. KB निकटस्थाय. 3. KP ब्रज° for ब्रह्म°. 4. KB सपाणिं, KP सपाणिकरतलं for सपाणिकवलं. 7. KB तल्लोक-पालिने for तत्तत्पालिने. 12. For the fourth pāda of the verse PS reads तेजसे सदिदमों नमो नमः. 17-18. GB omits कीदृशाय and reads धेन्विति for the phrase धेनुपाल etc. 19. GB omits धेनुपालाः; GA omits इति after it.

परमप्रेमास्पदीभूता श्रीराधा, तस्याः स्तनस्थल्यकृत्रिमा भूमिः सहजसौभाग्यवती, तत्र वर्तमानं यद्धन्यं कुङ्कुमं तेन सनाथा सैश्वर्या कान्तिर्यस्य। राधास्तनविषये सनाथा सोपतापा कान्तिरिच्छा यस्येति वा तस्मै। पुनः कीदृशाय—वेणुगीतगतिमूलवेधसे। वेणुना गीतं वेणुगीतं तस्य गतयो गमकादिप्रकारास्तासां मूलवेधस आदिवेधसे। यावन्त ईशमारभ्य वेणुगीतगतिस्रष्टारस्तेषामपि मूलवेधसे। वेणुगीतक्रमास्तत एव जाता इत्यर्थः। महाकर्षणमोहनादिशक्तिमद्वेणुगीतायेत्यर्थः ॥ उद्धता छन्दः —

रात्परैर्नरलगौ रथोद्धता (छन्दोमञ्जरी २) ॥७७

सुबोधनी

ततोऽप्यत्यानन्देनाभिनयन्नाह—तेजोरूपाणां ब्रह्मणां व्यापकानां यो राशिः समूहस्ततोऽपि महः कान्तिर्यस्य तस्मै नमो नमः। अतस्तत्तत्समाधानदुर्घटशङ्कापि न। तदेव व्यनक्ति—धेनुपालदयितानां स्तनतटीसंबन्धेन धन्यं यत्कुङ्कुमं तेन सनाथा शबला कान्तिर्यस्य। तथा, वेणुगीतस्य या गतयः स्वरग्राममूर्छनादिकास्तासामादिस्रष्ट्रे। ब्रह्मादिसृष्ट्यतीतगानप्रवीणायेत्यर्थः ॥७७

सारङ्गरङ्गदा

अथ तत्कुचकुङ्कुममनोज्ञकान्तिमपूर्वं वेणुं वादयन्तं तं विलोक्य सविस्मयमाह—अस्मै नमो नमः। आदरे वीप्सा। कीदृशे—तासां स्तनसंबन्धित्वाद्धन्यं

3-4. GB तथा for पुनः कीदृशाय वेणुगीतगतिमूलवेधसे. 4. GB omits वेणुगीतं. 10. CB, CD omit all words from ततः to तेजोरूपाणां and read instead : तदेवातिशयेनाभिनन्दयन्नाह—धेन्विति. CB omits यः. 11. CB, CD महस्तद्रूपाय for महः कान्तिर्यस्य तस्मै. 12. CA omits अपि न. CB, CD insert इत्यर्थः after न. CB, CD अतएव for तदेव व्यनक्ति. CD स्तनतटीधन्यं. 13. CB, CC, CD सफला, CA सबला for शबला. 14. CC, CD तेषां for तासां. CB, CD ०सृष्टिकर्त्रे for ०स्रष्ट्रे. CC ब्रह्म० for ब्रह्मादि०. CD ०ज्ञानप्रदीपाय for ०गानप्रवीणाय. After इत्यर्थः CB, CD continue : गाम्भीर्यस्वाभाव्याभिजाभीष्टस्य निर्विशेषोक्तिरियम. 16. KA, KP अपूर्ववेणुं. 17. KP आदरेण.

यत्कुङ्कुमं तेन सनाथा शबलात्युत्फुल्ला कान्तिर्यस्य। सहजकुङ्कुमगन्धवर्णानां तासां कुचस्थत्वात्सौरभ्यकान्त्यतिशयप्राप्त्या तस्य धन्यत्वम्। विरहे म्लानायाः कान्तेश्च तदालिङ्गनादिप्राप्त्यानन्दोत्फुल्लत्वात्सनाथत्वम्। तथा, विधातृसृष्ट्यतिरिक्तानां वेणुगीतगतीनां मूलवेधसे प्रथमस्रष्ट्रे। तदुक्तम्—

सवनश

(भा० १०. ३५. १५) इत्यादौ

कश्मलं ययुः

(तत्रैव) इति। कथमस्य तत्स्रष्टृत्वमिति विमृशन्पूर्ववत्तल्लीलानुस्मरणान्नैतच्चित्र-मित्याह—ब्रह्मराशीनां तत्तच्चतुर्भुजस्तावकविधिसमूहानां महः प्रकाशो यस्मात्। विधातृविधातुः कियदिदमिति भावः।

यस्य प्रभा

इत्यादि

तद्ब्रह्म

इत्यनन्तब्रह्मसंहितोक्तानुसारेण (ब्रह्मसं० ४०)

परात्परं ब्रह्म च ते विभूतयः

(यमुनाचार्यस्तोत्र) इति श्रीरामानुजीयसिद्धान्तानुसारेण च निर्गुणब्रह्मपुञ्जं महः कान्तिपूरो यस्येति केचिद् व्याख्यान्ति। तथैव श्रीगीतासु (१४. २७) च

ब्रह्मणो हि प्रतिष्ठाहम्

इति। प्रतिष्ठाश्रय इति ॥७७

1. KA, KP कुचकुङ्कुमं KP सरला (mislection for शबला ?). KC transposes the words वर्ण and गन्ध. 2. KC सौगन्ध्य for सौरभ्य. 8. KC, KD, KP ०स्मरणात् for ०अनुस्मरणात्. 9. For स्तावकचतुर्भुज see Padyāvalī no. 65. 10. KP inserts तस्य before विधातृ०. KA, KB omit इदं. 15. This occurs as the last pāda of a verse cited from Yamunācārya-Stotra in Bhakti-rasāmṛta०, *ad*. 2. 1. 69. 16. KB, KC, KP omit च. 17. KB व्याख्यायन्ति. KA, KP तत्र for तथा.

मृदुक्वणन्नूपुरमन्थरेण
बालेन पादाम्बुजपल्लवेन ।
अनुस्मरन्मञ्जुलवेणुगीत-
मायाति मे जीवितमात्तकेलि ॥७८

कृष्णवल्लभा

अथ कविर्भावनापरिपाकतः साक्षादिव स्फुरत्पुरो विलासवतः श्रीकृष्णस्यागमनं वर्णयति—मृदुक्वणन्निति। मे जीवितमायाति। कीदृशं जीवितम्—बालेन कोमलेन पदाम्बुजपल्लवेन, मृदु यथा स्यात्तथा क्वणता नूपुरेण मन्थरं यत्तेन च, आत्तकेलि। आत्ता गृहीता केलिर्येन तत्। एतेन नानागतरूपं नृत्यं ध्वन्यते। किं कुर्वत्—मञ्जुलवेणुगीतमनुस्मरत्। मञ्जुलं मनोहरं यद्वेणुगीतं तदनुस्मरत्। शनैर्गच्छता नूपुरेण तथा क्वणितं यथा वेणुध्वनिः स्मर्यत इति। यद्वा, अनुक्षणं स्मरत्स्मरवदाचरन्मञ्जुलं वेणुगीतं यस्येत्येकपदं वा॥ उपेन्द्रवज्रा छन्दः॥७८

सुबोधनी

पुनस्तदागमनं वर्णयति चतुर्भिः—मम जीवितं पादाम्बुजपल्लवेनायाति। अम्बुजपल्लवतोऽप्यतिकोमलेनेत्यात्मन्यतिकारुण्यमुक्तम्। कीदृशेन—बालेन क्रीडाविशिष्टेन। क्रीडावेशं व्यनक्ति—मृदुक्वणन्नूपुरं च तद्विलासावेशेन मन्थरं च

3. PS अनुक्वणत् for अनुस्मरत्. 7. GB मृद्विति for मृदुक्वणन्निति. 9. GB omits आत्तकेलि. 11. GB श्रूयते for स्मर्यते. 12. The metre is उपजाति. 14. CB, CD insert एव before वर्णयति. CC inserts तु after जीवितं. 15. CB, CD omit all words from अम्बुजपल्लवतः to उक्तम् and read instead : अम्बुजपल्लवतयोक्तिरियमतिकोमलेनात्मन्य(CD अम्बुजपल्लववत्कोमलेन दृढकठिनभूमिगमनव्यञ्जनया तन्विति)प्रतिप्रादिका। जात्यैकवचनम्। CA आत्मना for आत्मनि. 15-16. CB, CD omit all words from क्रीडाविशिष्टेन to व्यनक्ति and read instead : चञ्चलेन। अतः. 16. CB omits विलासावेशेन and च respectively before and after मन्थरं.

यत्तेन। तत्र हेतुः—मञ्जुलवेणुगीतमनुस्मरत्। प्रियाविलासं स्मारं स्मारं वादयदित्यर्थः। अतस्तत्र प्रकटीकृतः केलिर्येन। तत्तत्कलिसूचकतया वादयदित्यर्थः ॥७८

सारङ्गरङ्गदा

अथ दूरादात्तकेलिं दर्शयित्वा वेणुनादपूर्वकं स्वसमीपमागच्छन्तं तमालोक्य
समाधिविघ्नाय

(श्लो० ३४) इत्यादि

विजयतां मम वाङ्मयजीवितम्

(श्लो० ८) इत्यादि साफल्यात्सहर्षं तदागमनं वर्णयति चतुर्भिः—इदं मे जीवितमात्तकेलि यथा स्यात्तथायाति। कीदृशम्—मञ्जुलवेणुगीतमनुस्मरत्। नवनववेणुगीतं स्मारं स्मारं सृजदित्यर्थः। पादकौमल्यात्सस्नेहसखेदमाह—अहो बत पादाम्बुजपल्लवेनायाति। कीदृशा—बालेन कोमलेन। तथा, मृदुक्वणन्नूपुरं तच्च गीतस्मरणमग्नचित्तत्वान्मन्थरं च यत्तेन ॥७८

सोऽयं विलासमुरलीनिनदामृतेन
सिञ्चन्नुदञ्चितमिदं मम कर्णयुग्मम्।
आयाति मे नयनबन्धुरनन्यबन्धो-
रानन्दकन्दलितकेलिकटाक्षलक्ष्मीः ॥७९

कृष्णवल्लभा

पुनरपि तदागमनं वर्णयन्क्रमपि विशेषमाह—सोऽयमिति। सोऽयं य

1-2. CB omits all words from तत्र हेतुः to अतस्तत्र and reads instead : कीदृशम्—तत्तत्प्रियनामस्मरणपूर्वकं वेणुं वादयदित्यर्थः. 1. CA inserts च after वेणुगीतं. 2. CC omits वादयत्. 8-9. KA omits all words from विजयतां to इत्यादि. 9. KA मम for मे. 12. KB कीदृशेन for कीदृशा. 15. Gopāla Bhaṭṭa मदकर्ण० for मम कर्ण०. 16. PS अनन्यबन्धुः. 17. PS ०लक्ष्मः for ०लक्ष्मीः.

एतावत्कालं परोक्षरूप आसीत्स इदानीमयं साक्षात्। अनन्यबन्धोः, न विद्यतेऽन्यः श्रीकृष्णाद्विना बन्धुर्यस्य तस्य, मे मम नयनबन्धुर्नेत्रसंतापहारी। नयने बध्नाति स्वप्रवणे करोतीति वा। आयाति, मां सुखयितुमिति शेषः। अहो मद्भाग्यपरंपरा। कीदृशः—आनन्दकन्दलितकेलिकटाक्षलक्ष्मीः। आनन्देन कन्दलिताः सप्ररोहा ये कटाक्षा गतागतविश्रान्तिविचित्रवर्तनापूर्वकनयनविलासास्तेषां लक्ष्मीः शोभा यत्र सः। न केवलं रूपलीलायाश्चाक्षुषापरोक्षवज्ज्ञानम्, अपि तु शब्दस्यापि श्रावणप्रत्यक्षप्रायतामाह। किं कुर्वन्नायाति—विलासमुरलीनिनदामृतेन विलासनिमित्तभूता विलासयुक्ता वा या मुरली तस्या निनादः स एवामृतं तेनोदञ्चितमुत्सुकं श्रवणाभिनिवेशेनोन्नमितं वा। गोलकेन्द्रिययोरभेदारोपादेवमुक्तिः। इदं मदीयं मदकर्णयुग्मं माद्यत्कर्णयुगलं सिञ्चन्नायाति॥ वसन्ततिलकं छन्दः॥७६

सुबोधनी

पुनः पूर्वोक्तं वेणुनादं विवृण्वन्नाह—सोऽयं मे नयनबन्धुरायाति। तत्र हेतुः—नास्त्यन्यो बन्धुर्यस्य तस्य मम। स्वस्मिंस्तत्कारुण्यमाह—उदञ्चितं तच्छ्रवणोत्सुकमिदं मम कर्णयुग्मं विलासमुरलीरवामृतेन सिञ्चन्। यतो विलासस्मरणानन्देनाङ्कुरिता केलिकटाक्षलक्ष्मीर्यत्र॥७६

1. GB अद्य for अयं (before साक्षात्). GB omits अनन्यबन्धोः. 4. GB मे for मद्- 6. GB चक्षुषा०. 7. GB omits किं कुर्वन्नायाति and reads विलासेति for the phrase विलासमुरलीनिनदामृतेन. 8. GB omits सः after निनादः. 10. GB आप्याययन् for आयाति 13. CB, CD omit all words from पूर्वोक्तं to आह and read instead : वेणुनादमेव विशेषतो वर्णयन्स निश्चयमाह—सोऽयमिति। CB, CD omit अयं after सः and read it before आयाति. 13-14. CB, CD omit all words from तत्र to आह and read instead : किं कुर्वन्. 15. CC ०उन्मुखं for ०उत्सुकं. CB ०निनाद० for ०रव०. 15-16. CB, CD omit all words from यतः to यत्र and read instead : तथा, आनन्देनाङ्कुरिता ये (CD याः) केलयः संकल्परूपास्तत्सूचकैः कटाक्षैर्लक्ष्मीः शोभा यत्र। कीदृशो मे—नास्त्यन्यो बन्धुर्यस्य.

सारङ्गरङ्गदा

आभ्यां विलोचनाभ्याम्

(श्लो० ४३) इत्यादि पूर्वकृततद्दर्शनोत्कण्ठासाफल्यात्पुनः सहर्षमाह—सोऽयं मे नयनबन्धुरायाति। कीदृशो मे—अनन्यबन्धोः। नास्त्यन्यो बन्धुर्यस्य। कीदृगयम्—आनन्देन कन्दलितः प्रफुल्लितो यः केलिकटाक्षस्तस्य लक्ष्मीः शोभा यस्मिन्। तथा, मम कर्णयुग्मं विलासमुरलीनिनदामृतेन सिञ्चन्। कीदृशं तत्—उदञ्चितं तच्छ्रोतुमुन्मुखम् ।।७९

दूराद्विलोकयति वारणकेलिगामी
धाराकटाक्षभरितेन विलोकितेन ।
आरादुपैति हृदयंगमवेणुनाद-
वेणीमुखेन दशनांशुभरेण देवः ॥८०

कृष्णवल्लभा

संप्रति स्वं दूराद्विलोकयन्तं श्रीकृष्णं साक्षान्निरीक्षमाण आह—दूरादिति। दीव्यति क्रीडति द्योतते वा देवः श्रीकृष्णो दूराद्विलोकितेन विशिष्टदृष्ट्या विलोकयति। मामिति शेषः। कीदृशेन विलोकितेन—राधाकटाक्षभरितेन। राधायाः कटाक्षैर्भरितेन पोषितेन। एतेन युगपद् द्वयोर्मदालोकनम्, अहो मद्भाग्यमहिमेति भावः। धारेति पाठे—धारारूपा ये कटाक्षास्तैर्भरितेन पूर्णेन। कीदृशो देवः—वारणकेलिगामी। वारणवत्केलिपूर्वकं गमो गमनमस्यास्ति। मन्थरगतिरित्यर्थः। क्षणान्तरे निकटमागच्छन्तमालक्ष्याह—हृदयंगमो मनोहरो यो वेणुनादस्तस्य वेणी प्रवाहस्तद्युक्तमुखेन विशिष्टः। विशेषणे तृतीया (कातन्त्र

3. KA omits तत before दर्शनो०. 6. KC ०रव० for ०निनद०. 8. PS ०खेल० for ०केलि०. 9. Gopāla Bhaṭṭa (v. l. as in text) राधा० for धारा०. PS विलोचमेन for विलोकितेन. 11. PS वेणीदुधेन दशनावरणेन. 13. GA निरीक्ष्यमाणः. 15. GA अथः for शेषः. GB omits राधाकटाक्षभरितेन. 17. GB महद्भाग्य० for मद्भाग्य०. 18. GB omits वारणकेलिगामी and inserts गजवत् after वारणवत्. GB यस्य सः for अस्यास्ति. 18-19. GB मन्दगामी for मन्थरगतिः. 20. GB उपलक्षितः and उपलक्षणे respectively for विशिष्टः and विशेषणे.

२. ४. ३२)। आरान्निकटमुपैत्युपसर्पति। कीदृशेन—दशनांशूनां भरो यस्मिन्मुखे तेन। एतेन स्मितं व्यञ्जितम्। यद्वा, दशनांशुभरेण मुखेन विशिष्टः। स कीदृशः—हृदयंगमवेणुनादवेणी। हृदयंगमं वेणुनादं वेणयितुं वादयितुं शीलं यस्य सः। वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु (धा० १. ६२६) ॥ वसन्ततिलकं छन्दः ॥८०

सुबोधनी

तत्कारुण्यमेव व्यनक्ति—देवः प्रवाहरूपा ये कृपाकटाक्षास्तैः पूर्णेन विलोकितेन दूरादेव विलोकयति। मामिति शेषः। न केवलं पश्यति, आरान्निकटेऽप्युपैति। कीदृक्—वारणकेलिगामी। तत्रात्माभीष्टसिद्धिं सूचयन्नाह—हृदयंगमा ये वेणोर्नादास्तैर्युक्तं यद्वेणीमुखं मिलद्विविधकान्तिधाराञ्चितमुखं तेनोपलक्षितः। वेणीत्वं कथम्—सहजस्मितेन प्रसृमरा ये दशनांशवस्तेषां भरो यस्मिन्। तत्र दन्तकटाक्षाधरांशुधारा गङ्गायमुनासरस्वत्यो ज्ञेयाः ॥८०

सारङ्गरङ्गदा

अथ

आलोकयेदद्भुतविभ्रमाभ्याम्

(श्लो० ४५) इत्यादिस्वोत्कण्ठासाफल्यात्सानन्दमाह—सोऽयं देवो दूरादेव विलोकितेन

2. GB omits मुखे. GB व्यज्यते for व्यञ्जितं. 3. GB किंभूतः for सः कीदृशः. 3-4. GB वीणयितुं and विणृ respectively for वेणयितुं and वेणृ. 4. For गतिज्ञान etc. GB reads निशामनवादित्रादानगमनज्ञानचिन्तासु. 7. For तत्कारुण्यमेव व्यनक्ति, CB, CD read : पुनरपि तथैवालोकयन्नायान्तमालोक्याह—दूरादिति. CC विवृणोति for व्यनक्ति. CB कटाक्षाः for कृपाकटाक्षाः. 8. CB, CD omit all words from न केवलं to उपैति. CA अभ्युपैति. 9. CB, CD omit all words from तत्र to आह and read instead : तथा, आरान्निकटे उपैति। कीदृक्. 10. CD ०केलि० for ०कान्ति०. CC omits अञ्चित before मुखं. 10-11. CB, CD कीदृशा for वेणीत्वं कथं. CC व्यनक्ति for कथं. CD transposes प्रसृमराः and ये. For प्रसृमराः CC प्रसृत्वधाराविशेषसत्वरा (corrupt). 12. CB, CD ०कान्ति० for ०अंशु०. 16. KA, KB ०सोत्कण्ठा० for ०स्वोत्कण्ठा.

विलोकयति। मामिति शेषः। राधां वा। कीदृशा—धारा प्रवाहरूपा ये कटाक्षास्तैर्भरितेन पूर्णेन। स कीदृक्—वारणवत्केलिगामी। तथा, आरान्निकट उपैति। कीदृक्—हृदयंगमा ये वेणोर्नादास्तेषां या वेणी परंपरा तद्युक्तं यन्मुखं तेनोपलक्षितः। कीदृशा—सहजस्मितेन प्रसृमरा ये दशनांशवस्तेषां भरो यस्मिंस्तेन। यद्वा, दशनांशुभरेणोपलक्षितः। कीदृशा—तादृशवेणुनादकल्लोलयुक्तवेणीकृतं तन्मुखं येन। तत्र दन्तकटाक्षाधरकान्तिधारा गङ्गायमुनासरस्वत्यो ज्ञेयाः॥८०

त्रिभुवनसरसाभ्यां दिव्यलीलाकुलाभ्यां
दिशि दिशि तरलाभ्यां दृप्तभूषादराभ्याम्।
अशरणशरणाभ्यामद्भुताभ्यां पदाभ्या-
मयमयमनुकूजद्वेणुरायाति देवः॥८१

कृष्णवल्लभा

अथ पुनश्चक्षुर्गोचरमिव निकटमायान्तं श्रीकृष्णं विचित्रलीलावेषादिविशिष्टमनुभवन्नाह—त्रिभुवनसरसाभ्यामिति। देवोऽसाधारणद्युतिक्रीडाविशेषयुक्तः श्रीकृष्णः। अयमयं संभ्रमाद् द्विरुक्तिः। कीदृशः—अनुकूजन्वेणुर्यस्य सः। वेणुं वादयन्नेवायातीत्यर्थः। काभ्यामायाति—अद्भुताभ्यां पदाभ्याम्। न तु यानादिना। अहो मद्भाग्यमहिमा स्वचरणकमले दर्शयन्नायातीत्यर्थः। पदाभ्यां विशिष्ट इति वा। कीदृशाभ्याम्—त्रिभुवनेषु सरसाभ्याम्। रसः परमानन्दस्तद्वद्भ्याम्। त्रिभुवनमित्युपलक्षणम्। अतः परं त्रिभुवने सरसता नास्तीत्यर्थः। मधुररसचमत्काराणां तत्रैव परमातिशयत्वात्। यद्वा, त्रिभुवनं सरसं सानुरागं ययोः। पुनः कीदृशाभ्याम्—दिव्यलीलाकुलाभ्याम्। दिव्याना गतिलीलानां

7-8. PS transposes दिव्यलीलाकुलाभ्यां and दृप्तभूषादराभ्यां (reading दीप्त०). 8. PS दृशि दृशि शिशिराभ्यां; v. l. in Kṛṣṇadāsa दृशि दृशि सरसाभ्यां. Kṛṣṇadāsa दीप्त० for दृप्त०; v. l. in Gopāla Bhaṭṭa ०भूषाधराभ्यां. 13. GB त्रिभुवनेति for त्रिभुवनसरसाभ्यामिति. 16. GA यत् for इत्यथः. 17. GB उपलक्षितः for विशिष्टः. 18. GB inserts अन्येषां after ०लक्षणं. 20. GB omits all words from पुनः to दिव्यलीलाकुलाभ्यां and reads instead तथा.

कुलं समूहो ययोः। यद्वा, दिव्यलीला यासां ता गोप्यस्ताभिर्निमित्तभूताभिराकुलाभ्याम्। अतएव—दिशि दिशि तरलाभ्याम्। ता यस्यां दिशि गच्छन्ति तासामानयनार्थं चञ्चलाभ्यामित्यर्थः। पुनः कीदृशाभ्याम्—दृप्तभूषादराभ्याम्। दृप्तोद्रिक्तनाददीप्तविषया या भूषा पादाङ्गदनूपुरादिरूपा तयादरो ययोः। तच्चलने तेषां सोल्लासनादपरत्वात्। धराभ्यामिति पाठे—दृप्ताया भूषाया अलंकृतेर्धराभ्यां पोषकाभ्याम्। दृप्तभूषाधराधो ययोरिति वा। ध्वजवज्रादिचिह्नवत्तया। पुनः कीदृशाभ्याम्—अशरणानामस्माकं शरणाभ्याम्। येषामन्यच्छरणं नास्ति, स्वाभीष्टस्यान्यतोऽसिद्धेः, तेषां रक्षितृभ्यामित्यर्थः।

शरणं गृहरक्षित्रोः

इत्यमरः (३. ३. ५३)॥ मालिनी छन्दः ॥८१

सुबोधनी

पुनश्चरणदृष्ट्यागमनमेव विशिनष्टि—अयमयं देवः पद्भ्यामेवायाति। वीप्सा प्रत्यक्षबोधिका। कथं सोऽभिज्ञातः—अनुकूजद्वेणुः। कीदृग्भ्याम्—अद्भुताभ्याम्। तदेव व्यनक्ति—त्रिभुवनं सरसं शृङ्गाररससंकुलं याभ्याम्। तदपि कुतः—दिव्या या लीलास्ताभिराकुलाभ्याम्। अतएव—दिशि दिशि तरलाभ्याम्। तेन, दृप्ताः शब्दिता या नूपुरादिभूषास्ताभिरादरो ययोः। अतः—त्यक्तगृहाणामाश्रयाभ्याम् ॥८१

2. GB omits ता before यस्यां, and reads it before गच्छन्ति. 3. GB तथा for all words from पुनः to दृप्तभूषादराभ्यां. 4. GB नूपुराङ्गदादि० for पादाङ्गदनूपुरादि०. GB आदराभ्यां for आदरो ययोः. 4-5. GB omits तच्चलने तेषां सोल्लासनादपरत्वात्. 5. GA appears to be damaged here and some phrases in lines 5-6 (धराभ्यां पोषकाभ्यां and ध्वजवज्रादिचिह्नवत्तया) are obscure or lost. 6-7. GB तथा for पुनः कीदृशाभ्यां. 8. GA omits तेषां रक्षितृभ्यामित्यर्थः. 10. GA omits अमरः. 12. CB, CD insert त्रिभुवनेति after विशिनष्टि. 13. CB, CD आदरे for प्रत्यक्षबोधिका. CB, CD omit all words from कथं to अनुकूजद्वेणुः. 14-15. CB, CD omit all words from तदपि कुतः to तरलाभ्यां and read instead : यतोऽलौकिकलीलाभिराकुलाभ्याम्। अतएव दिशि दिशि चञ्चलाभ्याम्. 16. CB, CD ततः for तेन.

सारङ्गरङ्गदा

किमपि वहतु चेतः कृष्णपादाम्बुजाभ्याम्

(श्लो० १२) इत्याद्युत्कण्ठासाफल्यात्सोल्लासमाह—अयमयं देवः पद्भ्यामायाति। कीदृग्भ्याम्—अद्भुताभ्याम्। तदेव व्यनक्ति—त्रिभुवनं सरसमानन्दितं शृङ्गाररससंकुलं वा याभ्यां ताभ्याम्। दिव्या या लीला मत्तेभगतिनिन्दिविलासास्तैराकुलाभ्यां तत्प्रचुराभ्याम्। तथा नृत्यगत्या—दिशि दिशि तरलाभ्याम्। दृशि दृशि सरसाभ्यामिति पाठे—दर्शने दर्शने नूतनाभ्याम्। दीप्ता प्रोज्ज्वलिता या नूपुरादिभूषास्तासामादरो ययोः। अशरणानां त्यक्तगृहाणामासां गोपीनां शरणाभ्यामाश्रयाभ्याम्। अयं कीदृक्—अनुकूजद्वेणुः। नूपुरध्वनिपादतालं चानु तदनुसारेण कूजन्वेणुर्यस्य। अनु निरन्तरं वा ॥८१

सोऽयं मुनीन्द्रजनमानसतापहारी
सोऽयं मदव्रजवधूवसनापहारी।
सोऽयं तृतीयभुवनेश्वरदर्पहारी
सोऽयं मदीयहृदयाम्बुरुहापहारी ॥८२

कृष्णवल्लभा

संप्रति पुरः स्फुरच्छ्रीकृष्णस्वरूपमवलोकयन्नाह—सोऽयमिति। स यादृशो महद्भिरुपवर्णितः श्रुतियुक्तिनिर्धारितश्चिरं च भावितस्तादृश एवायम्। मदीयहृदयाम्बुरुहापहारी—ममेदं मदीयम्, मदीयहृदयमेवाम्बुरुहम्। श्रीकृष्णप्रेममकरन्दसंभृतत्वात्। तस्यापहारी। सर्वात्मना मद्बुद्धेः स्वैकप्रवणताकारीत्यर्थः। किं च, यः परमनिजरसमयपदवीविश्रान्तिपर्यन्तविचारप्रदः स एवायम्—मुनीन्द्रजनमानसतापहारी।

4. KC अद्भुतत्वं for तदेव. 6. KB omits तत्प्रचुराभ्यां. 7. KP प्रज्वलिता for प्रोज्ज्व०. 8. KP ताभिः for तासां. KP inserts वा before ययोः. 9-10. KB, KD चानुसारेण for चानु तदनुसारेण. 14. PS ०हृदयाम्बुजतापहारी. 17. GB ०युक्तिभिश्च निर्धारितः. 19. GB ०निष्ठता० for ०प्रवणता०. 20. GB omits मुनीन्द्रजनमानसतापहारी.

मुनीनां सर्वेषां य इन्द्राः परमपदवीयाः। स्वरूपस्यर्षिमननत्वात्। त एव जना निजजनास्तेषां मानसतापमनिश्चयजं हरतीति सः। किं च, मदानां श्रीकृष्णरसमत्तानां व्रजवधूनां यो वसनस्यापहर्ता सोऽयम्। तृतीयभुवनेश्वरदर्पहारी—तृतीयभुवनेश्वर इन्द्रस्तस्य दर्पं गोवर्धनोद्धरणेन हृतवान्स एवायम्। अयं भावः—मुनीन्द्राणामन्तरनुभवेनाज्ञाननाशकत्वमात्रम्, न त्वनुभवविशेषः। व्रजवधूनां वसनापहरणेन संभोगसुखमात्रम्। इन्द्रदर्पहरणेन व्रजस्य पालनमात्रम्। मम तु सर्वतः परमं सर्वं कृतम्, तेन महन्मम भाग्यमिति। अथ वा मुनीन्द्राणां मानसतापमेव हरति, गोपीनां वसनमेव, इन्द्रादीनां दर्पमेव, न तु मनो हृतवान्। अस्माकं तु मनो हरतीति महान्विशेष उक्तः॥ वसन्ततिलकं छन्दः॥८२

सुबोधनी

ततोऽतिहर्षेण सनर्माह—स एवायं को यो मदीयानां हृदयाम्बुरुहापहारी। श्लाघ्य एवायम्। कथमेवं ब्रूषे—हर्षयुक्तानां व्रजकुमारीणां वसनापहारी यः सोऽयम्। तेन नर्मणा तत्कृते को दोषः। इन्द्रस्यापि गिरिधृत्या गर्वहारी। स्वद्वेषिणि तदपि वीरस्य न गर्ह्यम्। मुनिजनानां मानसे यस्तापस्तस्याप्यपहारी। प्रसिद्धचौरेऽस्मिन्न संदेहः॥८२

1. GA स्वरूपस्पर्शि. GA ॰मननत्वात् GB ॰मनस्कत्वात् for ॰मननत्वात्. 5. GA संताप॰ for अज्ञान॰. 6. GB वसनापहारेण. GB ॰सुखमात्रत्वं and पालनमात्रत्वं. 7. GB transposes महत् and मम. GA च for वा. 11. CD omits अति-. CB, CD insert सोऽयमिति after आह. CD omits कः. 12-13. CB, CD omit all words from श्लाघ्यः to दोषः. CC श्लाघ्येऽस्मिन् for श्लाघ्य एवायं. 13. CB, CD insert न केवलं मदीयानामपि तु before इन्द्रस्य. CB, CD दर्पहारी यः सोऽयं for गर्वहारी. 14. CB omits all words from स्वद्वेषिणि to अपहारी; CD omits all words from स्वद्वेषिणि to गर्ह्यं and reads instead: तथा हर्षयुक्ता या व्रजवध्वो गोपकुमार्यस्तासां वसनापहारी यः सोऽयम्। किं च. CC transposes तदपि and वीरस्य. 15. CD मुनीन्द्र॰ for मुनि॰. CD omits अपि after तस्य. CD inserts सोऽयं after तस्याप्यपहारी. CB, CD insert अतः before प्रसिद्ध॰, and कार्य इत्यर्थः after संदेहः.

सारङ्गरङ्गदा

साक्षात्तद्दर्शनप्राप्त्या परमानन्दमग्नः साश्चर्यमाह—मुनीन्द्राश्च ते जना भक्ताश्च तेषां नारदादीनामपि मानसतापमेव सदा ध्याने स्फूर्त्या हर्तुं शीलं यस्य सोऽयम् । तादृशोऽपि मद्युक्ता गर्वेण भर्त्सयन्त्यो या व्रजवध्वस्तासां वसनापहारी यः सोऽयम् । तथा, तृतीयभुवनेश्वरस्य स्वर्गेशस्य गिरिधृत्या दर्पहारी यः सोऽयम् । तादृशोऽपि मदीयानामासां ममैव वा हृदयाम्बुरुहापहारी यः सोऽयमित्याश्चर्यम् ॥८२

सर्वज्ञत्वे च मौग्ध्ये च सार्वभौममिदं महः ।
निर्विशन्नयनं हन्त निर्वाणपदमश्नुते ॥८३

कृष्णावल्लभा

अथ परमानन्दसाम्राज्यपरमसीमामनुभवन्नभिलषति—सर्वज्ञत्व इति । इदं पुरः स्फुरच्छ्रीकृष्णाख्यं महः सर्वोज्ज्वलं ज्योतिः सर्वज्ञत्वे मौग्ध्ये च सार्वभौमं चक्रवर्ति । सर्वतः श्रेष्ठमित्यर्थः । कदाचित्सर्वज्ञोऽपि भवति, कदाचिन्मुग्धोऽपि भवति, लीलारसमयत्वात् । हन्तेति हर्षे । तन्महो नयनं निर्विशन्नयनगोचरीभवन्निर्वाणपदं निर्वाणानां सर्वासां निवृत्तीनां मधुरानन्दरसानां पदमाधारभूतं मधुरानन्दसाम्राज्यमश्नुते व्याप्नोति । यद्वा, तन्महः कर्म, निर्विशन्नयनं कर्तृ, निर्वाणपदं परमानन्दमश्नुते । सर्वमास्वादयतीत्यर्थः ॥ अनुष्टुप् छन्दः ॥८३

सुबोधनी

न केवलं तद्दर्शने मम सुखं तस्यापि मद्दर्शने सुखमित्यानन्दविस्मयोत्फुल्लः

2. KD omits तत् before दर्शन०. 3. KC reads मानसे for मानसतापमेव and inserts तापं before हर्तुं. 5. KC reads स्वर्गेश्वरस्य (for स्वर्गेशस्य) and transposes it and गिरिधृत्या. 8. Caitanyadāsa सर्वज्ञत्वेन and मौग्ध्येन. 13 GB omits अपि भवति कदाचित् after सर्वज्ञः, and reads च for अपि after मुग्धः. 17. GB omits अनुष्टुप् छन्दः. 19. CB, CD omit all words from न केवलं to सन्नाह (see p. 242, line 1) and read instead : पुनस्तदावेशेन नेत्रे प्रविशन्तमिवालोक्याह—सर्वज्ञे ति.

सन्नाह—सर्वज्ञत्वेन मदन्तर्वृत्तिज्ञातृतया मनोहरत्वेन च सर्वविजयीदं महो नयनं निःशेषेण विशत्, हन्ताश्चर्यं, परमानन्दं भुङ्क्ते ॥८३

सारङ्गरङ्गदा

पूर्वं यथा स्वप्रार्थितं तथाविधत्वेनाविर्भावात्रासे तासां हृदयेच्छापूरकत्वाच्च सर्वज्ञतायाः, लीलाविशिष्टत्वेन सहजपरमैश्वर्यादेरननुसंधानान्मुग्धतायाश्चानुभवानन्द-विस्मयोत्फुल्लः सन्नाह—पूर्ववदिदं महो नयनं निर्विशत्तद्द्वारा प्रविश्य निर्वाणं परमानन्दरूपं तत्पदं हृदयमश्नुते व्याप्नोति विस्मयेन स्तब्धं करोति। हन्तेत्याश्चर्ये। कीदृशम्—सर्वज्ञत्वे मौग्ध्ये च सार्वभौमम्। अतिश्रेष्ठमित्यर्थः ॥८३

पुष्णानमेतत्पुनरुक्तशोभा-
मुष्णेतरांशोरुदयान्मुखेन्दोः ।
तृष्णाम्बुराशिं द्विगुणीकरोति
कृष्णाह्वयं किंचन जीवितं मे ॥८४

कृष्णवल्लभा

इदानीमतिमधुरविलासप्रसक्तरूपेण साक्षाच्चक्षुर्भ्यामिव पेपीयमाने परिस्फुरति प्रतिपदपरमानन्दरसवर्षिण्यपि श्रीकृष्णचन्द्रे नैव तृष्णाशान्तिः, प्रत्युत कोटि-गुणवृद्धिरेवेत्याह—पुष्णानमिति। कृष्णाह्वयं कृष्ण इत्याह्वयो नाम यस्य

1. CB ०भूततया for ०ज्ञातृतया. 2. CD inserts इति after हन्त. After भुङ्क्ते CB, CD continue : मद्दर्शनेऽस्याप्यानन्दो (CD omits अपि) भवतीत्यर्थः. 4. KC, KD, KP repeat यथा. KC, KP तथा विधत्ते नाविर्भावात्. 5. KC inserts तथा before लीला०. KC ०परमैश्वर्याद्यननुसंधानेन. KA अनुभवात्, KC अनुभावा- for अनुभवा-. 8. KA inserts च after सर्वज्ञत्वे. After इत्यर्थः KD continues : मौग्ध्ये सौन्दर्ये वा. 9. PS ०शोभ- for ०शोभा-. 10. PS उदयं. 11. PS त्रिगुणी०. 14. GB संप्रति for इदानीं. GB transposes इव and पेपीयमाने. 16. GB ०गुणावर्धत for ०गुणवृद्धिरेव. After पुष्णानमिति GB inserts (from p. 243, ll. 3-4) all words from मुखेन्दोरुदयात् to पोषयन्तं (with v. l.), omitting them in their proper place. GB omits कृष्णाह्वयं.

तत्किंचन जीवितम् । एतज्जीवनतोऽप्यतिप्रियतमं जीवनकोटीर्निर्मन्थ्यैकनखच्छवि । मे मम तृष्णाम्बुराशिं तृष्णैवाम्बुराशिः समुद्रस्तं द्विगुणीकरोति। तृष्णासागरं वर्धयतीत्यर्थः। एतत्कृष्णाख्यं मुखेन्दोरुदयात्प्रादुर्भावात्, उष्णेतरांशोरुष्णादितरेऽशंवो यस्य तस्य चन्द्रस्य पुनरुक्तशोभां पुष्णानं पोषयन्तम् (!)। अम्बुराशेर्वर्धनं तु चन्द्रोदयेनैव, तन्मुखं चन्द्रादप्यधिकम्, तेन तृष्णाम्बुराशेर्द्विगुणीभावो न चित्रमिति भावः। मुखेन्दोरुदयादुष्णेतरांशोरित्यादौ व्याहतदोषो नाशङ्क्यः। इन्दुशब्दोऽयमनुत्कर्षार्थः। यथा च रघुवंशे (१.१२)—

दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव

इति। अथवैवं योजना—मुखेन्दोरुदयान्मे तृष्णाम्बुराशिं द्विगुणीकरोति द्विगुणीकुर्वदेव वर्तते। प्रथमं द्विगुणीकृतं पुनर्द्विगुणीकरोतीत्थं द्वैगुण्यधारा। चन्द्रान्तरापेक्षयास्य विशेषमाह—उष्णेतरांशोश्चन्द्रस्यैतदुदये, तत्र शैत्यानुभवाभावात्, एतेन मुखेन्दुना कृता या तस्य पुनरुक्तशोभाधिका दीप्तिः, प्रकाशकार्यस्यैतच्चन्द्रिकयैव कृतत्वात्, तां पुष्णानं स्वमुखचन्द्रिकाभिः पुष्टं कुर्वत्। यद्यपि चन्द्रस्य प्रयोजनान्तरं नास्ति, स्वस्य कृतार्थतायै समुदेतीति भावः॥ इन्द्रवज्रा छन्दः॥८४

सुबोधनी

अतः स एव स्वस्य शोभया मत्तृष्णां वर्धयतीति सविस्मयमाह—किंचना-

1. GB ततः for एतज्जीवनतः. GB ०मुखच्छवि for ०नखच्छवि. 2. GB omits तृष्णाम्बुराशिं. 3-4. For the reading of GB see p. 242, fn. 16. 3. GB omits एतत् कृष्णाख्यं. GA omits प्रादुर्भावात्. GB omits उष्णेतरांशोः 4. GB inserts प्रसिद्धं after चन्द्रोदयेनैव. 5. GB inserts तु after तन्मुखं. 6-9. GB omits all words from मुखेन्दोरुदयात् to इति. 12. GA omits अधिका. 13. GA कुवन्तं for कुवत्. 13-14. GB omits all words from यद्यपि to भावः and reads instead : यस्य भासा सर्वमिदं विभाति इति श्रुतेः (Kaṭha 5. 15 ; Muṇḍaka 2. 2. 10 ; Śvetāśvatara 6. 14). 15. GA omits इन्द्रवज्रा छन्दः. 17. CB, CD omit all words from अतः to सविस्मयमाह and read instead : ततः (CD अथ) तदास्यशोभायाः स्वतृष्णायाश्चानुत्तमां वृद्धिमाह—पुष्णानमिति. CC परं for स एव.

निर्वचनीयमेतत्कृष्णाह्वयं मे जीवितं मुखेन्दोरुदयात्तृष्णाम्बुधिं द्विगुणीकरोति। कथम्—हिमांशोस्तदुदयादेव व्यर्थीकृतां शोभां पुष्णानम्। स्वस्य कान्त्येन्दुं तिरस्कृत्य पुनस्तयैव तस्य तामुच्छलितां कुर्वाणमित्यर्थः ॥८४

सारङ्गरङ्गदा

पुनस्तच्छ्रीमुखशोभायाः स्वतृष्णायाश्च क्षणे क्षणे वर्धिष्णुत्वमनुभूय सविस्मयमाह—एतत्किंचनानिर्वचनीयं कृष्णाह्वयं मम जीवितं मुखेन्दोरुदयान्मे तृष्णाम्बुराशिं द्विगुणीकरोति। कीदृशम्—उष्णेतरांशोर्हिमांशोस्तदुदयादेव पुनरुक्ता व्यर्थीकृता या शोभा तां पुष्णानम्। स्वश्रीमुखकान्त्येन्दोः शोभां व्यर्थीकृत्य पुनस्तयैवोच्छलितां कुर्वाणमित्यर्थः। किं वा, श्रीव्रजदेवीनां तद्दर्शनोच्छलितां शोभां दृष्ट्वाह—एतासां तद्दर्शनात्पुनरुक्तां व्यर्थीकृतां म्लानां शोभां पुष्णानं स्थूलीकुर्वत्। मुखेन्दोः कीदृशः—उष्णेतरांशोरतिशीतस्य ॥८४

तदेतदाताम्रविलोचनश्री-
संभाविताशेषविनम्रगर्वम्।
मुहुर्मुरारेर्मधुराधरोष्ठं
मुखाम्बुजं चुम्बति मानसं मे ॥८५

कृष्णवल्लभा

संप्रति श्रीकृष्णमुखाम्बुजं साक्षादिव वीक्षमाण आह—तदेतदिति। तदेतद्दृश्यमानमेव मुरारेः श्रीकृष्णस्य मुखाम्बुजं कर्म मे मानसं कर्तृ मुहुर्वारंवारं चुम्बति स्वायत्तीकरोति। यद्वा, तत्संलग्नं सच्चुम्बनसुखमनुभवतीत्यर्थः।

1. CB, CD transpose कृष्णाह्वयं and मे. 2. CB, CD कीदृशं for कथं. CB, CD insert पुनरुक्तां before व्यर्थीकृतां. CB, CD उदयेन for कान्त्या. 3. CB reads तेन for तया and omits तस्य. CD तेनैवं for तयैव तस्य. CB, CD समुच्छलितं. (CB omits सं) for तामुच्छलितां. 13. PS ॰विनम्रवगम्. 17. GB तदिति for तदेतदिति. 19. GA तदा॰ for स्वा॰ and यत् for सत्.

गोपीतादात्म्यभावनयेति भावः। कीदृशं मुखाम्बुजम्—आताम्रविलोचनश्रीसंभाविताशेषविनम्रगर्वम्। आताम्रयोः सर्वतोऽरुणयोर्विलोचनयोः श्रिया कान्त्या संभावितः संपादितोऽशेषाणां विनम्राणां भक्तानां गर्वो येन तत्। पुनः कीदृशम्—मधुराधरोष्ठम्। मधुरमधरोष्ठं यत्र तत्। यद्वा, मधुरं वस्त्वधरयतीति तदोष्ठं यत्र तत्॥ उपेन्द्रवज्रोपजातिश्छन्दः॥८५

सुबोधनी

अथ तद्दर्शनानन्दावेशेनोद्घाटितं मनोगतमुद्गिरति—मुरारेरेतन्मुखाम्बुजं मे मानसं मुहुश्चुम्बति। तत्र हेतुः—मधुराधरोष्ठम्। तत्प्रवृत्तौ तदेव निदानमित्याह—आताम्रयोरनुरागयुक्तयोर्विलोचनयोर्या लक्ष्मीः शोभा तया संभावितोऽशेषनम्राणां गर्वोऽभिमानविशेषो येन॥८५

सारङ्गरङ्गदा

स्वस्य भावविशेषाश्रयत्वात्पुनस्तत्र जाततृष्णः सलालसमाह—तत्
वीक्षिष्ये तव वदनाम्बुजम्

(श्लो० ४४) इत्यादौ पूर्वप्रार्थितमेतन्मुरारेर्मुखाम्बुजं मे मानसं मुहुश्चुम्बति नेत्रभृङ्गद्वारा निपीयास्वादयति। निजभावानुसारेण विशेषयति, कीदृशम्—मधुरावधरोष्ठौ यत्र। तथा, आताम्रयोरीषदरुणयोर्विलोचनयोर्या श्रीः शोभा कृपाकटाक्षादिसंपद्वा तया संभावितो वर्धितोऽशेषविनम्राणां भक्तानामनुकूलानामासां च सौभाग्यगर्वो येन॥८५

1. GB मुखं for मुखाम्बुजं, and आताम्रेति for the whole phrase आताम्रविलोचन etc. 3. GB reads तथा for पुनः कीदृशं. 4. GB omits मधुराधरोष्ठं. 5. GB उपेन्द्रवज्रा. The metre is उपजाति. 7. CB, CD read ततः for अथ, and omit आनन्द in ०दर्शनानन्द०. CB inserts तदेतदिति after उद्गिरति. 8. CD omits मुहुः. CB, CD कीदृशं for तत्र हेतुः 8-9. CB, CD तन्निदानतामेवाह for तदेव निदानमित्याह. 10. CD ०आवेश० for ०विशेष०. 13. KP बत for तत्र. 17. KA, KB, KP omit वा. 18. KC भाग्य० for सौभाग्य०.

करौ शरदिजाम्बुजक्रमविलासशिक्षागुरू
पदौ विबुधपादपप्रथमपल्लवोल्लङ्घिनौ ।
दृशौ दलितदुर्मदत्रिभुवनोपमानश्रियौ
विलोकय विलोचनामृतमहो महः शैशवम् ॥८६

कृष्णावल्लभा

अथ पुरः स्फुरति श्रीकृष्णेऽतिप्रवृद्धताद्दग्दर्शनलालस आह—कराविति। हे विलोचन, अहो आश्चर्यम्, अमृतममृतस्वरूपं शैशवं सौकुमार्यं मह उत्सवरूपं वपुः। यद्वा, महःशैशवं महसां शैशवं सुकुमारताम्। विलोकय पश्येति प्रार्थये। प्रार्थनायां लोट्। इदमेव त्वया विलोकनीयम्, स्वप्नेऽपि नान्यत्र दृष्टिर्देयेत्यर्थः। यस्य करावीदृशौ—शरदिजाम्बुजक्रमविलासशिक्षागुरू। शरदि जातानि शरदिजानि। अलुक्समासः। तानि चाम्बुजानि, तेषु क्रमन्ते स्फीतीभवन्ति विलासा विविधलसनानि शोभाः -शैत्यसौकुमार्यसौगन्ध्यादिरूपाः, तासु शिक्षागुरू। यद्वा, शरदिजानाम्बुजानां क्रमः परिपाटी तस्या विलासशिक्षागुरू। पादौ कीदृशौ—विबुधपादपप्रथमपल्लवोल्लङ्घिनौ। विबुधानां देवानां पादपस्य कल्पद्रुमस्य प्रथमो यः पल्लवः पत्रं तमुल्लङ्घयितुं शीलं ययोस्तौ। ततोऽप्यधिककारुण्यसौकुमार्यादिमत्त्वात्। दृशौ कीदृशौ—दलितदुर्मदत्रिभुवनोपमानश्रियौ। दलितानि दुर्मदानि समस्तदिग्विजयात्प्राप्तमदानि त्रिभुवनस्थानि यान्युपमानानि मृगमीनखञ्जनचकोरचञ्चरीककुवलयादीनि तेषां श्रीर्याभ्यां ते ॥ पृथ्वी छन्दः ॥८६

1. PS शरदुदञ्चिताम्बुजविलास०. 4. PS महच्छैशवं for महः शैशवं 6. GB प्रवृद्धलालसः for अतिप्रवृद्धताद्दग्दर्शनलालसः. 8-9. GA omits इति (after पश्य), and transposes प्रार्थये and प्रार्थनायां लोट्. 10 GB omits ईदृशौ and the phrase शरदिजाम्बुज etc. 11. GB यानि for शरदिजानि अलुक्समासस्तानि च. 12. GB inserts ये before विलासाः, and reads ०विलसनानि for ०लसनानि. 14. GB reads तथा for पादौ कीदृशौ, and omits the phrase विबुधपादप etc. 15. GB अङ्कुरः for पत्रं. GA तत् for तं. 16. GB reads यस्य दृशौ दृष्टी for दृशौ कीदृशौ, and omits the phrase दलितदुर्मद etc. GB inserts विख्यातानि after दलितानि. 17-18. GA is damaged here, and the letters and words ०मस्तदिग्विजयात्, मृगमीनखञ्जन and श्रीर्याभ्यां ते are lost. 18. GA हरिणी for पृथ्वी.

सुबोधनी

ततो बहिः संभाल्य सावहित्थमाह—अहो महो विलोकय। कीदृशम्—विलोचनयोरमृतम्। पुनः सहर्षमाह—शैशवं कैशोरमिदम्। यतोऽस्य करौ। कीदृशौ—शरदि जातानामम्बुजानां ये क्रमेण विलासा आन्दोलनादयस्तेषां शिक्षागुरू। स्वभावालम्बनतयादौ करयोर्निरुक्तिः। पुनर्दैन्यादवाग्विलोक्य, पादौ च कीदृशौ—कल्पवृक्षाणामग्रभागस्थपल्लवान् कौमल्यारुण्यादिनोल्लङ्घयितुं शीलं ययोः। ऊर्ध्वं वीक्ष्य, दृशौ च कीदृशौ—दलिता निर्जिता दुर्मदैरत्यूर्जितौपम्यगुणैर्युक्तानां त्रिभुवनस्थपद्मादीनामुपमानानां श्रीः संपत्तिर्याभ्याम्॥८६

सारङ्गरङ्गदा

तत्तदनन्तमाधुर्याब्धिमग्नः प्रेमानन्दवैह्वल्यात्सर्वं विस्मृत्य पूर्ववत्तमन्विष्य प्राप्ततद्दर्शनायाः श्रीवृन्दावनेश्वर्याः पार्श्वस्थात्मस्फूर्त्या तां प्रति। बाह्ये तु—स्वसङ्गिनं किंचित्स्वमित्रं प्रति।

लीलास्वयंवररसं लभते जयश्रीः

(श्लो० १) इतिवत्स्वान्तोद्गतं तदङ्गानामुपमानजेतृत्वमाह। अहो आश्चर्यं। इदं पुरो दृश्यमानं महः पूर्ववत्कान्तिपुञ्जं विलोकय। कीदृशम्—विलोचनयोरमृतम्। तद्वत्तत्संतर्पकम्। क्षणं निर्वर्ण्य सविस्मयमाह—इदं शैशवम्। कैशोरमित्यर्थः। स्वार्थेऽण्। यतोऽस्य करौ। कीदृशौ तौ—शरदिजाम्बुजानां

2. CB, CD संभल्य for संभाल्य. CB, CD insert करावित्ति after आह. 4. CD omits अम्बुजानां. CB, CD transpose ये and क्रमेण. 5. CB, CD निजभावाव(CD ०भावा)लम्बनतया. CD omits आदौ before करयोः. CB, CD तथास्य for पुनर्दैन्यादवाग्विलोक्य. 6. CB, CD omit च after पादौ. 7. CB, CD अपरं चास्य for ऊर्ध्वं वीक्ष्य. CC विलोक्य for वीक्ष्य. CD omits दृशौ च कीदृशौ. CB omits च before कीदृशौ. 8. CA त्रिभुवनस्य पद्मा०. CD omits त्रिभुवनस्थ-. CB, CD insert तत् before संपत्तिः. 10. KC पुनस्तत् for तत्तत्. KD ०माधुर्यादि० for ०माधुर्याब्धि०, and वैकल्यात् for वैह्वल्यात्. 11-12. KC किंचित् सङ्गिनं for तु स्वसङ्गिनं. 14. KC ०जयत्व० for ०जेतृत्व०. KA आश्चर्यं. 16. KB omits तत् before संतर्पकं. 17. KD reads किशोरं for, KB inserts किशोरं after कैशोरं. KB omits तौ.

क्रमेण परिपाट्या ये विलासास्तेषां शिक्षायां गुरू। तथास्य पादौ। कीदृशौ—विबुधपादपानां कल्पवृक्षाणां प्रथमपल्लवांस्तत्तद्गुणैरुल्लङ्घयितुं शीलं ययोस्तादृशौ। तथास्य दृशौ। कीदृशौ—दलिता दुर्मदानि त्रिभुवने यानि पद्मादीन्युपमानानि तेषां श्रीयाभ्यां तादृशौ ॥८६

आचिन्वानमहन्यहन्यहनि साकारान्विहारक्रमा-
नारुन्धानमरुन्धतीहृदयमप्यार्द्रस्मितार्द्रश्रिया।
आतन्वानमनन्यजन्मनयनश्लाघ्यामनर्घ्यां दशा-
मानन्दं व्रजसुन्दरीस्तनतटीसाम्राज्यमुज्जृम्भते ॥८७

कृष्णवल्लभा

अथ व्रजसुन्दरीस्तनतटीमाश्लिष्टस्य श्रीकृष्णस्य स्वरूपं यथानुभवमनुवर्णयति—आचिन्वानमिति। आनन्दं ब्रह्म नित्यपरमानन्दभूयस्त्ववत्। भूमार्थेऽर्श आद्यच् (पा० ५. २. १२७)। उज्जृम्भते प्रकाशते। मम स्फुरतीत्यर्थः। तर्हि किं निर्गुणम्, न। व्रजसुन्दरीस्तनतट्याः साम्राज्यं परममहानन्दाधिकसमृद्धिर्यस्य तत्। यद्वा, व्रजसुन्दरीस्तनतटीसाम्राज्यं कर्तृ। व्रजसुन्दरीस्तनतट्यां साम्राज्यं चक्रवर्तित्वं यस्य तत्। आनन्दं यथा स्यात्तथोज्जृम्भते। कीदृशम्—अहन्यहन्यहनि साकारानाकारसहितान्विहारक्रमान्विलासपरिपाटीराचिन्वानं संचितं(!) कुर्वत्। प्रतिदिनमन्य एवाकारोऽन्यैव च विहारपरिपाटी। पूर्वाधिकचमत्कारवन्माधुरीभृदित्यर्थः। यं यमाकारं गृहीत्वा यां यां क्रीडां करोति सैव सैव मूर्तेव परिस्फुरतीति भावः। अतएव, आर्द्रस्मितार्द्रश्रिया, आर्द्रं सरसं यत्स्मितं

1. KP शिक्षागुरू for शिक्षायां गुरू. KC omits कीदृशौ. 3. KC कीदृशे for कीदृशौ. KB, KP दलितानि for दलिता. 4. KP inserts येषां before तेषां. KC तादृशे. 6. PS (v. l. as in text) ०स्मिताल्पश्रिया. 8. PS आमन्दं. 11. भूयस्त्व lost in GA. 13. Before व्रजसुन्दरीस्तनतट्याः GB inserts व्रजेति 14. GB omits व्रजसुन्दरीस्तनतटीसाम्राज्यं कर्तृ. 15. After तत् GB inserts कर्तृ. GB omits स्यात्. GA अनुजृम्भते for उज्जृम्भते. 19. GB मूर्तवत् for मूर्तेव. GB omits आर्द्रस्मितार्द्रश्रिया.

तेनार्द्रा स्निग्धा या श्रीः शोभा तया, अरुन्धत्याः हृदयमप्यारुन्धानं रुन्धत्। स्वाधीनीकुर्वदित्यर्थः। एतेन जगन्मोहकत्वम्। महाश्चर्यसहजसाध्वीधैर्यव्रतहानेः। पुनः कीदृशम्—अनर्घ्याममूल्याम्, सर्वपूज्यां वा।

मूल्ये पूजाविधावर्घः

इत्यमरः (३. ३. २७)। दशामाकारम्। सौन्दर्यविशेषमित्यर्थः। आतन्वानम्, आ समन्तादङ्गप्रत्यङ्गेषु तन्वानं तन्वद्विस्तारयत्। दशां विशिनष्टि—अनन्यजन्मनयनश्लाघ्याम्। अनन्यानामस्माकं जन्मनयनयोः श्लाघ्यां श्लाघार्हाम्। यद्वा, अनन्यजन्मा कामस्तस्यापि नयनश्लाघ्याम्।

कुसुमेषुरनन्यजः

इत्यमरः (१. १. २६)॥ शार्दूलविक्रीडितं छन्दः॥८७

सुबोधनी

पुनः सर्वाकर्षकतल्लीलामाधुर्यस्फूर्त्या स्मरलालसोत्पादकानन्दत्वेनाह—अहो तन्मह आनन्दम्, आ सम्यगानन्दो यस्मात्तद्रूपं सन्नवनवत्वेन प्रकाशते। तदुदयस्थानं व्यनक्ति—व्रजसुन्दरीस्तनतटयामेव साम्राज्यं यस्य। तत्संपादयति—अहन्यहनि प्रतिदिनं विहारक्रमान् क्रमेण विहारान्मुर्तिमत आचिन्वानं जगन्मनोभूमौ

1. GB inserts स्थिरचित्तायाः before हृदयं. 2. GB inserts उक्तं after ०मोहकत्वं. GB अतिचमत्कार० for महाश्चर्य० 3. GB omits कीदृशं. 5. GA omits इत्यमरः. GA प्रत्याकारं for आकारं. GB omits इत्यर्थः. 12. Before पुनः CD inserts : यः खलु भुवि समवतीर्य रसविशेषपरिपोषाय नानाविधलीलापरिशीलितमखिल(!). CB, CD तदेवानन्दतयानुभवन् for सर्वाकर्षकतल्लीलामाधुर्यस्फूर्त्या. CB, CD ०तन्माधुर्यं वर्णयन्नाह आचिन्वानमिति for आनन्दत्वेन. 12-13. CB, CD omit all words from अहो to प्रकाशते and read instead : सदेवानन्दमुदयते. 13. CA inserts अहन्यहनि प्रतिदिनं before प्रकाशते. 14. CB, CD व्रजसुन्दरीणां स्तनतट्य एव (CD omits एव), CC ०सुन्दरीस्तनतटीमेव. CB inserts सर्वसंपदुद्बोधको देशः after, CD for साम्राज्यं. CB अतो, CD अहो for तत्संपादयति. 15. CA omits अहन्यहनि प्रतिदिनं ; CC omits प्रतिदिनं before विहार०. CA भूमौ, CC जगद्भूमौ for जगन्मनोभूमौ.

संचिन्वन्तम् (!)। तन्मोहकतामाह—स्निग्धस्मितस्य स्निग्धशोभयारुन्धत्या अपि हृदयं स्वमाधुर्येणावृण्वानम्। तत्र हेतुः—अनर्घ्याम्। यत्र या न संभवति तां दशां विस्तारयत्। कीदृशीम्—न विद्यतेऽन्यजन्म येषां तेषां नयनानां योग्याम्। दिव्यचक्षुषामित्यर्थः ॥८७

सारङ्गरङ्गदा

पुनर्दशाद्वयसंवलितः स्मरलालसोत्पादकतन्माधुर्यदर्शनानन्दमग्नस्तदेवानन्दं मत्वाह—तदेतन्मह आनन्दम्, आ सम्यगानन्दो यस्मात्तदानन्दम्, तद्रूपं सदुज्जृम्भते क्षणे क्षणे नवनवत्वेन प्रकाशते। परितः पश्यन्

राधापयोधरोत्सङ्गशायिनेऽशेषशायिने

(श्लो० ७६) इतिवत्तं दृष्ट्वाह—व्रजसुन्दरीणां स्तनतट्य एव साम्राज्यं सुखदस्थानं यस्य। तासां तद्वा तासु साम्राज्यं यस्येति वा। तत्रैव तादृशत्वेन सुलभमित्यर्थः। अतः काममप्यनुपमां दशां कोटिमन्मथमोहिनीमातन्वानं प्रकटयन्तम्। माधुर्यस्यानन्त्यान्नेत्राभ्यामनुभवितुमसमर्थः कोटिनयनं प्रार्थयन्स्वपुंस्त्वात्तत्राप्ययोग्यतामननात्सामान्यस्त्रीत्वं प्रार्थयंस्तत्राप्ययोग्यतां विचार्य सदैन्यमाह, कीदृशीं ताम्—अन्यजन्मानि व्रजसुन्दरीव्यतिरिक्तानि यानि जन्मानि तेषु यानि नयनानि तैः श्लाघितुमशक्याम्। किमुतानुभवितुम्। आभिर्व्रजदेवीभिरेवानुभाव्यामित्यर्थः। विलाससौष्ठवं दृष्ट्वाह—अहन्यहनि प्रतिदिनं प्रतिक्षणं प्रतिनिमेषं साकारान्मूर्तिमतो विहारक्रमांस्तत्परिपाटीराचिन्वानं सृजन्तम्। एवं चेत्तर्हि तदन्यो जनस्तदाशां त्यक्त्वा सुखं तिष्ठतु, अत्र सोपालम्भमाह—आरुन्धेति। सहजार्द्रस्य स्मितस्य

1. CB, CD अतएव for तन्मोहकतामाह. 2. CB, CD insert आरुन्धानं after हृदयं. CC inserts स्वासक्तं कुर्वन्तं after आवृण्वानं. CB, CD अतएव for तत्र हेतुः. 3. CB omits दशां. CD विस्तारयन्तं. 4. CB, CD omit दिव्यचक्षुषामित्यर्थः. 7. KP inserts आचिन्वानमिति after आह. KC omits आनन्दं (after महः). KC inserts यत्र and वा respectively before and after यस्मात्, and omits तदानन्दं. 9. KC omits ०शेषशायिने. 10. KD स्तनतट्येव. 11. KP यद्वा for तद्वा. KB सुलभः for सुलभं. 15. KA omits यानि before जन्मानि. 16. KB, KD, KP insert अपि after श्लाघितुं. 17. KA, KC ०निमिषं. KB, KD insert च after ०निमेषं. 18. KC तद्दशां for तदाशां. 18-19. KB अन्ये जनाः and तिष्ठन्तु.

यार्द्रा श्रीः शोभा तयैवारुन्धत्या अपि हृदयमारुन्धानम्। आत्मन्यारुध्य स्थापयेत्। सुन्दरं पुरुषं दृष्ट्वा पुरुषा अपि तं श्लाघन्ते, तस्यास्तच्छ्लाघापि नास्ति। अस्या अपीति कथमन्यो जनः सुखं तिष्ठेदित्यर्थः ॥८७

तदुच्छ्वसितयौवनं तरलशैशवालंकृतं
मदच्छुरितलोचनं मदनमुग्धहासामृतम्।
प्रतिक्षणविलोभनं प्रणयपीतवंशीमुखं
जगत्त्रयमनोहरं जयति मामकं जीवितम् ॥८८

कृष्णावल्लभा

इदानीं तस्यैव सर्वोत्कर्षं वर्णयति स्वानुभवेन—समुच्छ्वसितेति। ममेदं मामकं जीवितं जयति सर्वोत्कर्षेण वर्तते। कीदृशम्—समुच्छ्वसितयौवनम्। समन्तादङ्गदृग्वाग्गत्यादिष्वुच्छ्वसितमभिव्यक्तं यौवनं यस्य तत्। पुनः कीदृशम्—तरलशैशवालंकृतम्। तरलेन गच्छता शैशवेनालंकृतम्। यद्वा, तरलयतीति चेतांसि तादृशेन शैशवेन सौकुमार्येणालंकृतम्। तारल्यमात्रकारिशैशवमिश्रित-यौवनमित्यर्थः। पुनः कीदृशम्—मदच्छुरितलोचनम्। मदो गर्वस्तेन छुरिते आरुण्यघूर्ण्यमानत्वादिना व्याप्ते लोचने यस्य तत्। पुनः कीदृशम्—मदन-मुग्धहासामृतम्। मदनेन मुग्धं मनोहरं हासामृतं यस्य। मदनोऽपि मुग्धो येन तादृग् हासामृतं यस्येति वा तत्। पुनः कीदृशम्—प्रतिक्षणं विलोभयतीति। विशेषेण लोभजनकमित्यर्थः। पुनः कीदृशम्—प्रणयेन प्रेम्णा पीतं वंश्या

3. After नास्ति KD inserts पतिव्रतानां शिरोमणित्वात्. 4. Gopāla Bhaṭṭa समुच्छ्वसित०. 5. PS मदविमुग्धहासा०. 10. GB omits समुच्छ्वसित-यौवनं. 11-12. GB reads तथा for पुनः कीदृशं and omits तरलशैशवालंकृतं. 13. चेतांसि lost in GA. GA तादृशशैशवेन. GB तारुण्य० for तारल्य०. 14. GB reads तथा for पुनः कीदृशं, and omits मदच्छुरितलोचनं. 15. GA ०घूर्णमान०. 15-16. GB reads तथा for पुनः कीदृशं and omits मदनमुग्धहासामृतं. 17. GB omits तत्, and reads तथा for पुनः कीदृशं here as well as in line 18.

रन्ध्ररूपं मुखं येन। प्रणयेन पीता कृष्णाधररसपानवती वंशी मुखे यस्य वा तत्। जगत्त्रयस्य मनो हरतीति तत्॥ पृथ्वी छन्दः॥८८

सुबोधनी

अतो ममाभीष्टं स एव संपादयिष्यतीति सहर्षमाह—तन्मामकं जीवितं सर्वोत्कर्षेण वर्तते। सर्वोत्कर्षतां विशिनष्टि—न केवलमरुन्धत्या अपि तु जगत्त्रयमनोहरम्। तत्कथम्—उद्गतं यौवनं यत्र। अतस्तरलं गतप्रायं यच्छैशवं तेनालंकृतम्। तच्चेष्टामाह—प्रियेक्षणहर्षेण व्याप्ते लोचने यत्र। अतएव मदनो मुग्धो यस्मात्तादृशहास एवामृतं यस्मिन्। अतः प्रतिक्षण-विलोभनम्। पुनः सनर्माह—प्रेम्णा पीतं वंश्या मुखं येन॥८८

सारङ्गरङ्गदा

पुनरन्तर्लालसया सहर्षमाह—तदिदं मामकं जीवितं जयति सर्वोत्कर्षेण वर्तते। सर्वोत्कर्षतामेवाह विशेषणैः। कीदृशम्—न केवलमरुन्धत्या अपि तु जगत्त्रयमनोहरम्। उच्छ्वसितं यौवनं तत्पूर्वावस्था यस्मिन्। तथा, तरलं गत्वरं किंचिदवशिष्टं यच्छैशवं तेनालंकृतम्। विशेषणाभ्यां किशोरमित्यर्थः। अतः स्मरमदैश्छुरिते व्याप्ते लोचने यस्य। मदनो मुग्धो यस्मात्तादृशो हास एवामृतं तद्यस्मिन्। अतः प्रतिक्षणविलोभनम्। कर्तरि ल्युट्। प्रणयेन पीतं चुम्बितं वंश्याः सुभगाया मुखं येन॥८८

1-2. GB इति वा for वा तत्. 4 CB, CD omit all words from अतः to सहर्षमाह and read instead: पुनः साश्चर्यमाह—तदिति. CB, CD insert एव जयति after जीवितं. 5. CB, CD तदेव प्रतिपादयन् for सर्वोत्कर्षतां. CC व्यनक्ति for विशिनष्टि. 5-6. CB, CD omit all words from न केवलं to तत्कथं. 6. CC inserts अपि before कथं. 7. CB, CD ततः for तच्चेष्टामाह प्रियेक्षण-. 8. CC तत एव for अतएव. CB, CD तादृशो हासः. 9. CB, CD यतः for पुनः सनर्माह. Before येन CB, CD insert अधरं, and after येन continue: नर्मोक्तिरियम्। अतो जगत्त्रयमनोहरम्. 11. KA, KB, KP omit अन्तः. 12. KP omits कीदृशं. 13. KP जगत्त्रये. 14. KB, KD सत्वरं for गत्वरं. KA, KB, KP transpose यत् and शैशवं. 17. KP omits सुभगायाः (Mss read शुभ०).

चित्रं तदेतच्चरणारविन्दं
चित्रं तदेतन्नयनारविन्दम् ।
चित्रं तदेतद्वदनारविन्दं
चित्रं तदेतद्वपुरस्य चित्रम् ॥८९

कृष्णवल्लभा

संप्रति तदेव जीवितमाश्चर्यरूपत्वेन वर्णयति—चित्रमिति। तदेवैतच्चरणारविन्दं ध्वजवज्रयवाङ्कुशरेखादियुक्तं चित्रमाश्चर्यम्। तदेवेति दुर्लभं यन्मुनिभिश्चिन्त्यते परं, न तु दृश्यतेतराम्। एतदिति सुलभं यदस्मदनुग्रहदृष्ट्या प्रत्यक्षीकृतम्। अतएव चित्रम्। एवं नयनारविन्दादिष्वपि। तदेवैतन्नयनारविन्दं हावभावविविधदृष्टियुतम्। तदेवैतद्वदनारविन्दं महाश्चर्यसौन्दर्यमाधुर्यलावण्यादिमत्। अस्येत्याश्चर्ये। तदेतद्वपुश्चित्रं चित्रम्। आश्चर्यमाश्चर्यमिति। स्निग्धघनेन्दीवरमरकतकान्तिच्छटापरिभावकमित्यर्थः॥ इन्द्रवज्रा छन्दः ॥८९

सुबोधनी

पुनस्तत्साम्राज्यं विवृण्वंस्तत्प्रत्यङ्गमाधुर्यमनुभवन्नाह—अस्य तदेतच्चरणारविन्दं चित्रं प्रियोरःकुङ्कुमाक्ततयाद्भुतम्। ऊर्ध्वं विलोक्य—तदेतद्वदनारविन्दं तद्दशनक्षतादिनाद्भुतम्। तद्रतिजागरारुणं तदेतन्नयनारविन्दमद्भुततरम्। एतैस्तदेतद्वपुरद्भुततमम्। वीप्सात्र तत्तच्चित्रचित्रिततयात्याश्चर्ये ॥८९

4. PS पुनरम्ब for वपुरस्य. Gopāla Bhaṭṭa and v. l. in Kṛṣṇadāsa अम्ब for अस्य. 9. GB नयनादिष्वपि for नयनारविन्दादिष्वपि, adding योज्यं after it. 15. CB अतः for पुनः. CB, CD एतत्प्रत्यङ्गमाश्चर्यतया for तत्प्रत्यङ्गमाधुर्यं. CB, CD insert चित्रमिति after आह. 16. CB, CD प्रियवक्षः० for प्रियोरः०. CB, CD insert आह after विलोक्य. 17. CB, CD अत्यद्भुतं for अद्भुतं. CB, CD तथारुणतया for तद्रतिजागरारुणं. CC ०जागरात् for ०जागर-. CB, CD अतः for एतैः. 18. CC तत्० for तत्तत्०. CB ततोऽपि, CD (corrupt) for तत्तच्चित्रचित्रिततयाति-.

सारङ्गरङ्गदा

पुनस्तत्प्रत्यक्षमाधुर्यानन्त्यस्फूर्त्या साश्चर्यमाह—तत्

कृष्णपादाम्बुजाभ्याम्

(श्लो० १२) इत्यादिना प्रार्थितमेतदस्य चरणारविन्दं चित्रमद्भुतम् । तथा,

मूर्तिं जगन्मोहिनीम्

(श्लो० ५४) इत्यादौ प्रार्थितं तदेतदस्य वपुश्चित्रमत्यद्भुतम् ।

मुखपङ्कजं मनसि मे विजृम्भताम्

(श्लो० ६) इत्यादौ प्रार्थितं तदेतद्वदनारविन्दं चित्रमत्यद्भुततरम् । तथा

प्रस्फुरल्लोचनाभ्याम्

(श्लो० १३) इत्यादौ प्रार्थितं तदेतन्नयनारविन्दं चित्रमत्यद्भुततमम् । तदेतत्सर्वं मम प्रत्यक्षं जातमिति चित्रमतितमाद्भुततम् । वपुरम्बेति पाठे—अम्बेत्याश्चर्यद्योतकाकाशसंबोधनम् ॥८९

अखिलभुवनैकभूषणमधिभूषितजलधिदुहितृकुचकुम्भम् ।
व्रजयुवतिहारवल्लीमरकतनायकमहामणिं वन्दे ॥९०

कृष्णवल्लभा

संप्रति राधारतिविहारप्रसक्ते श्रीकृष्णस्वरूपे स्वसंनिष्ठामाह—अखिलेति । तं वन्दे स्तौमि नमामि च । कीदृशम्—अखिलभुवनस्यैकमेव भूषणमलंकृतिर्यस्मात्तम् । अखिलभुवनेषु परमानन्दरसमयपर्यन्तेष्वेकं मुख्यं श्रीवृन्दावनं तस्य भूषणमेव स्वरूपं यस्य वा तम् । पुनः कीदृशम्—अधिभूषितजलधि-

2. KC तत्र, KD तच्च for तत् (after आह). 4. KC, KD तदेतस्य for एतदस्य. KD पादाम्बुजं for चरणारविन्दं. 7. KC, KD omit विजृम्भतां. 8. KP चरणा० for वदना०. KB, KC, KD omit अति before अद्भुततरं, and also (except KD) before अद्भुततमं in line 10. 10. KA, KB insert तत् before the second तदेतत्. 11. KC, KD omit the second अम्ब. 17. GB नौमि for नमामि. 18. GB omits तं. 19. GB transposes वा and तं. GB reads तथा for पुनः कीदृशं, and omits the phrase अधिभूषित etc.

दुहितृकुचकुम्भम्। अध्यधिकं भूषितौ कस्तूरीमकरीविरचनादिना जलधिरिव जलधिः श्रीकृष्णैकान्तिकस्नेहसमुद्रः श्रीवृषभानुनामा गोपस्तस्य दुहिता राधा तस्या कुचकुम्भौ येन तम्। पुनः कीदृशम्—व्रजयुवतिहारवल्लीमरकतनायकमहामणिम्। व्रजयुवतीनां हारवल्ली हारलता तस्यां मरकतमयं नायकं मध्यगतं महामणिम्। महामणिरिव महामणिस्तम्। तासामुरसि निरन्तरं तिष्ठन्नपि राधया सह विहरतीति भावः॥ आर्या छन्दः॥९०

सुबोधनी

पुनस्तद्वपुर्जगदानन्दकतयानुभवैः सनर्म नमन्नाह—तदखिलभुवनानां मुख्यं भूषणं वन्दे। कुत एतत्—अधिकं भूषितौ जलधिदुहितुः, जलमाधीयते स्वकिरणैराकृष्य संचीयत इति जलधिर्भानुस्तन्नाम्नो गोपस्य दुहितुः श्रीराधायाः कुचकुम्भौ येन। अतो व्रजयुवतीनां तत्सखीनां हारवल्ल्या मरकतमहानायकमणिं तद्वत्तद्धृदयोल्लासकम्॥९०

सारङ्गरङ्गदा

पुनः कियद्दूरे स्थित्वा ताभिः सह चुम्बनालिङ्गनादिभिर्विलसन्तं तमालोक्य विस्मितः सन्क्षणं विचार्य, अस्य नैतदाश्चर्यमित्याह—एतादृशममुं वन्दे। न केवलं व्रजवनस्यैव किं त्वखिलानां भुवनानामेकं श्रेष्ठं नीलमणिरूपं भूषणं तद्वत्स्थितम्। तदुक्तं श्रीजयदेवैः (गीतगोविन्द ५. २० —

3. GB reads तथा for पुनः कीदृशं and omits the pharse व्रजयुवतिहार etc. 4. GB हारावली for हारवल्ली. 5. GB omits महामणि. 8-9. CB, CD omit all words from तद्वपुः to कुत एतत् and read instead : तदेव विशिनष्टि—अखिलेति. CA अखिलगुणानां. 9-10. CB, CD (haplologically ?) omit all words from जलमाधीयते to गोपस्य दुहितुः. 10. CB, CD ०राधिकायाः for ०राधायाः 11. After येन CB, CD insert तं वन्दे. CB omits, CD यतः, CC न केवलं तस्या अपि तु for अतः. CB, CD ०वल्लीमरकत०. 12. CB, CD अतोऽखिलभुवनानां मुख्यं भूषणं for तद्वत्तद्धृदयोल्लासकं. 15. KP omits सन् after विस्मितः. KP तादृशं for एतादृशं. 16. KB व्रजजनस्य for ०वनस्य. KC, KD omit एव. KC, KD omit किं तु, and read चतुर्दश- before भुवनानां. KD insert अपि after भुवनानां. KP एवं for एकं. KC, KD omit भूषणं.

त्रैलोक्यमौलिस्थली-
नेपथ्योचितनीलरत्नम्

इति। तथा, अधिभूषिता विष्ण्वादिस्वरूपेण पादसंवाहनपराणां लक्ष्मीणां स्वपादस्पर्शेन कुचकुम्भा येन। आसां सर्वासां तु नायकमणिवत्कण्ठस्थितमित्याश्चर्यम्। यद्वा, नन्वीशस्य प्रकाशभेदेन नैतच्चित्रं यतोऽखिलानां वैकुण्ठानामेकभूषणं स्वयमेव तत्तद्रूपेण तेषु स्थितम्। तथा, अधिभूषितास्तत्तत्प्रेयसीनां लक्ष्मीणां कुचकुम्भा येन। क्षणं विमृश्य नैतत्प्रकाशभेद इत्याह—आसां त्वेकेन वपुषैव नायकमणिम्। तच्चित्रमेवैतत्, वन्दनमेव कार्यं न तु विचार्यमित्यर्थः। अथ वा

यद्वाञ्छया श्रीर्ललनाचरत्तपः (भा० १०. १६. ३६)
नायं श्रियोऽङ्ग (भा० १०. ४७. ६०)

इत्यादिदिशा स्वमाधुर्येण तामाकृष्याधिभुव्युपितौ विरहवह्निज्वालया तापितौ तस्याः कुचकुम्भौ येन। उष दाहे (धा० १. ७२७)॥६०

कान्ताकचग्रहणविग्रहलब्धलक्ष्मी-
खण्डाङ्गरागलवरञ्जितमञ्जुलश्रीः।
गण्डस्थलीमुकुरमण्डलखेलमान-
घर्माङ्कुरः किमपि गुम्फति कृष्णदेवः॥६१

कृष्णवल्लभा

संप्रति राधया सह संगत्य विहरन्तं श्रीकृष्णं वर्णयन्नाह—कान्तेति। दीव्यति क्रीडति मोदते वा देवः। कृष्णश्चासौ देवश्चेति। किमपि गुम्फति।

4. KC, KD transpose सर्वासां and तु. KC, KD नायकमणिं तद्वत्स्थितं. 6. KP एकं भूषणं. 8. KC, KD insert तत् before वन्दनं. KB inserts एव after विचार्यं. 9. KA, KP अथ for अथ वा. 12. KC ०ज्वालातापितौ. 14. PS omits this verse. Gopāla Bhaṭṭa ०लक्ष्मीः. 20. GB inserts माद्यति after मोदते.

अर्थात्त्रुटितान्वेणीहाररशनादिकान् ग्रथ्नातीत्यर्थः। क्रीडारसाविष्टतयासम्यग्गुम्फनात्किमपीत्युक्तम्। कीदृशो देवः—कान्ताकचग्रहणविग्रहलब्धलक्ष्मीः। कान्ताया राधायाः कचग्रहणे केशप्रसाधने यो विग्रहो रतिकलहो नखदन्तक्षतादिरूपस्तेन लब्धा लक्ष्मीः शोभा येन सः। पुनः कीदृशः—खण्डाङ्गरागलवरञ्जितमञ्जुलश्रीः। रतिकलहेन खण्डो योऽङ्गरागस्तस्य लवेन रञ्जिता, अतएव मञ्जुला श्रीर्यस्य सः। पुनः कीदृशः—गण्डस्थलीमुकुरमण्डलखेलमानघर्माङ्कुरः। गण्डस्थल्येव मुकुरमण्डलम्, तत्र खेलमाना घर्माङ्कुरा यस्य सः। राधायाः केशप्रसाधनसमये केनचित्सुखविशेषेण रतिकलहनिर्वृत्तहारादीनां त्रुटिः, स्वस्य परिश्रमात्स्वेदजलकणा अपि जाताः, तेनाङ्गरागोऽपि खण्डीभूतः, पश्चात्तस्या हारोऽपि ग्रथित इति समुदायार्थः॥ वसन्ततिलकं छन्दः॥९१

सुबोधनी

पुनस्तद्वपुषोऽद्भुतभूषणं व्यञ्जयंस्तथैवाह—कृष्णदेवः किमपि कान्तिवेषमालां ग्रथ्नाति। तद्वक्तुं न शक्नोमीत्यर्थः। तदभिनयन्नाह—कान्तायाः श्रीराधायाः कचग्रहणाय यः प्रणयकलहो हस्ताहस्ति तेन लब्धा या लक्ष्मीरुन्मुक्तकेशादिशोभा तया युक्ताः खण्डा विच्छिन्ना येऽङ्गरागास्तेषां लवै रञ्जितातएव मञ्जुला श्रीर्यस्य। तल्लक्षयति—गण्डस्थल्यौ स्वच्छतया मुकुरमण्डले ये तयोः खेलमाना घर्माङ्कुरा यस्य॥९१

2. GB omits the phrase कान्ताकच etc. 3. GA नखक्षतादि०. 4. GB reads तथा for पुनः कीदृशः and omits the phrase खण्डाङ्गराग etc. 6. GB reads तथा for पुनः कीदृशः and omits the phrase गण्डस्थली etc. 7. After सः GA inserts खेलमानेत्यात्मनेपदि चाच्छित्यं (?). 7-8. GB राधाकेश०. 8. GB रतिकलहे जाते हारादीनां. 12. CB, CD omit all words from तद्वपुषः to आह and read instead: तदानन्दावेशेन तल्लीलाविशेषस्फूर्त्याह—कान्तेति. CD श्रीकृष्णा०. 13. CC शक्नुमः for शक्नोमि. CB, CD तदेवाभिनन्दयन् for तदभिनयन्. 14. CC ०ग्रहणे for ०ग्रहणाय. CC omits लब्धा. CB, CD omit या. 15. CB, CD omit all words from तया युक्ताः to अङ्गरागाः and read instead: यै खण्डैर्विच्छिन्नै रङ्गरागैः. CB सत्र for अतएव. 16. CD यत्र for यस्य. CB ततः, CD अतः for तल्लक्षयति. CC inserts एव before लक्षयति. 17. CB, CD insert प्रिययाञ्चलेन वीज्यमानतया after तयोः, and अत्यल्पतया after खेलमानाः.

सारङ्गरङ्गदा

अथ श्रीराधया सर्वाभिर्वा कृतलीलाविशेषस्य तस्य शोभाविशेषं विलोक्य सहर्षमाह—कृष्णदेवः क्रीडन्कृष्णः किमपि गुम्फति माधुरीसुमनोमालां ग्रथ्नाति। कीदृशः—कान्तायास्तासां वा सालिङ्गनचुम्बनाधरपानार्थं यत्कचग्रहणं तत्र कुट्टमिताख्यभावेन हस्तादिक्षेपेण निवारयन्त्या तया ताभिर्वा सह यो विग्रहस्तेन लब्धाः श्रीमदङ्गे लग्ना ये ते च, लक्ष्मीः शोभा तद्युक्ताश्च। मध्यपदलोपी समासः। खण्डाः खण्डखण्डाश्चेदृशस्तस्यास्तासां वा सिन्दूरकुङ्कुमचन्दनाञ्जनाद्यङ्गरागाणां ये लवास्तै रञ्जिता, अतोऽतिमञ्जुला श्रीः शोभा यस्य। तेन विग्रहेण लब्धा या लक्ष्मीस्तया च तदङ्गसङ्गेन खण्डाः क्वचित्क्वचित्खण्डिता ये कुङ्कुमादिनिजाङ्गरागास्तेषां लवैश्च रञ्जिता स्वभावमञ्जुला श्रीर्यस्येति वा। तथा, गण्डस्थलयावेव मुकुरमण्डले तयोः खेलमाना घर्माङ्कुराः श्रमोत्थप्रस्वेदकणा यस्य। यद्वा, तस्या नर्मभिर्जितस्तां जेतुं नर्मप्रहेलिकादिरूपं किमपि गुम्फति ॥९१

मधुरं मधुरं वपुरस्य विभो-
र्मधुरं मधुरं वदनं मधुरम्।
मधुगन्धि मृदुस्मितमेतदहो
मधुरं मधुरं मधुरं मधुरम् ॥९२

कृष्णवल्लभा

अथ श्रीकृष्णस्य प्रतिक्षणमनन्यमाधुरीविशेषमनुभवन्नाह—मधुरमिति। अस्य पुरः स्फुरतो विभोर्विविधं भवतीत्येवमनन्तरूपस्य श्रीकृष्णस्य मधुरं सहजरमणीयमपि वपुः पुनर्मधुरम्। राधया सह केलिकलारसेनातिरमणीय-

4. KP आलिङ्गन० for सालिङ्गन०. KP कुच० for कच०. 5. KB ०विक्षेपेण for ०क्षेपेण. 7. KP omits ईदृशः. 8. KP omits शोभा. 9. KP omits च. KC, KP do not repeat क्वचित्. 11. KC श्रमोत्था प्र०. 12. KB ०स्वेद for प्रस्वेद. KP ०कलाः for ०कणाः.

मित्यर्थः। मधुरं वपुरिति सामान्येन समुदायमुक्त्वावयवं वर्णयति–वदनं सहजकान्तिविशेषोदयेन मधुरमपि मधुरम्। दृष्टिवाग्विलासादिचिह्नेनातिमधुरमित्यर्थः। अहो आश्चर्यम्। एतन्मृदुस्मितं मधुरं महामधुरमपि पुनर्मधुरम्, ततोऽपि पुनर्मधुरम्, ततोऽपि पुनर्मधुरमिति माधुरीप्रवाहवदिति। तत्र हेतुः—मधुगन्धिमृदुस्मितम्। मधूनि च गन्धाः सौरभाणि च भूयांसि सन्त्यत्र, एतादृशं मृदुस्मितं यत्र तत्॥ तोटकं छन्दः॥ ६२

सुबोधनी

तदुपभुक्ततदङ्गमाधुर्यालोकात्सहर्षमाह—अहो, अस्य विभोः कृतसर्वसमाधानस्य वपुर्मधुरं मधुरं परमास्वाद्यमपि तद्भुक्ततयातिमधुरम्। पुनः श्रीमुखमालोक्याह—वदनं तु तद्दशनक्षताधरादिभिर्मधुरं मधुरं मधुरम्। अतितरां मधुरमित्यर्थः। तत्र च तदधरमधुगन्धयुक्तमेतन्मृदुस्मितं तु मधुरं मधुरं मधुरं मधुरम्। अतितमां मधुरमित्यर्थः॥६२

सारङ्गरङ्गदा

तादृशानन्ततन्माधुर्यविशेषमनुभूय साश्चर्यमाह—अस्य विभोर्वपुर्मधुरं मधुरम्। अतिसुमधुरमित्यर्थः। पुनः श्रीमुखमालोक्य सशिरश्चालनमाह—वदनं तु मधुरं मधुरं मधुरम्। अतितरां सुमधुरमित्यर्थः। तत्र स्मितमनुभूय सशीत्कारं तन्निर्देशकतर्जनीचालनपूर्वकमाह—एतन्मृदुस्मितं तु मधुरं मधुरं मधुरं मधुरम्। अतितमां सुमधुरमित्यर्थः। कीदृशम्—मधुगन्धि मधुसौरभयुक्तम्। मुखाब्जस्य मकरन्दरूपत्वात्सर्वमादकमित्यर्थः। सुरते कृतमधुपानत्वात्तदीपद्गन्धि वा॥६२

8. CB, CD insert अथ before तदुपभुक्त०. CC प्रियोपभुक्त० for तदुपभुक्त०. CD तदुपयुक्त०. CB, CD read ०माधुर्यमनुभवन् for ०माधुर्यलोकात्सहर्षं and insert मधुरमिति after आह. CB, CD omit अहो. 8-9. CC एतत् for कृतसर्वसमाधानस्य. 9. CC inserts अहो after वपुः and omits all words from the second मधुरं to ०भुक्ततयातिमधुरं. 10. CB, CD omit ०अधर०. 11. CB, CD पुनः for तु. 12. CD अतितरां मधुरं for अतितमां मधुरं. 14. KB एतादृश० for तादृश०. KP ०तत्तन्माधुर्य०. 16. KP ०मधुरं for ०सुमधुरं. 20. KP मुखाब्जं यस्य for मुखाब्जस्य.

श्रृङ्गाररससर्वस्वं शिखिपिच्छविभूषणम्।
अङ्गीकृतनराकारमाश्रये भुवनाश्रयम् ॥६३

कृष्णवल्लभा

संप्रति श्रीकृष्णस्वरूपं परमाश्रयतमं कथयन्स्वाश्रयणीयत्वमेवाह—शृङ्गारेति। भुवनाश्रयमाश्रये—भुवनानां तद्वर्तिनां चाश्रयमाधारं श्रीकृष्णमाश्रये। आ सम्यक् श्रये सेवे। किं भुवनाश्रयत्वेन तदाश्रयणं प्रार्थ्यते, नेत्याह, कीदृशम्—शृङ्गाररससर्वस्वम्। शृङ्गाररसस्य सर्वस्वं यस्मिंस्तत्। अनेनैव वयोवर्णादिमाधुरीविशेषश्च सूचितः। पुनः कीदृशम्—शिखिपिच्छविभूषणम्। शिखिपिच्छरूपं विशिष्टं गोपत्वव्यञ्जकं भूषणमसाधारणं यस्य तम्। तस्य स्वतोभूषणरूपस्य हारनूपुरादिना भूषणं न संभवति। तथापि मयूराश्च परममहामेघबुद्ध्या प्रेम्णातिप्रमोदा नृत्यन्ति, तदा पतन्ति पिच्छानि भूषणतां प्राप्नुवन्त्येवेति भावः। पुनः कीदृशम्—अङ्गीकृतनराकारम्। सर्वाभिः परममहाशक्तिभिः संसेव्यमानोऽप्यङ्गीकृतः स्वीकृतो नरस्यैवातिपरममहावैदग्ध्यवानाकारो येन।

नराकृति परं ब्रह्म

(विष्णुपुराण ४. ११. २) इति स्मरणात्॥ अनुष्टुप् छन्दः ॥६३

सुबोधनी

इदानीं तथाभूतस्य सर्वोत्तमतां निश्चित्य तमाश्रयन्नाह—शृङ्गाररसः सर्वस्वं

1. PS ०पिञ्छ० for ०पिच्छ०. 2. v. l. in Kṛṣṇadāsa ०नवाकार०. 5. GA omits आधारं. GB omits आ. 6. GB omits श्रये. 6-7. GB omits कीदृशं शृङ्गाररससर्वस्वं. 7. GB ०रसः for ०रसस्य. 8. GB तथा for पुनः कीदृशं, omitting शिखिपिच्छविभूषणं. 11. GB प्रेमातिशयेन for प्रेम्णातिप्रमोदा. GB omits एव. 12. GB reads तथा for पुनः कीदृशं and omits अङ्गीकृतनराकारं. 13. GB सेव्य० for संसेव्य०. 17. CD omits इदानीं and reads तथाद्भुतस्य for तथाभूतस्य. CB, CD सर्वोत्तमतानिश्चयावेशात् for सर्वोत्तमतां निश्चित्य. CB, CD insert एव after तं, and शृङ्गारेति after आह. After आह CB, CD continue: आविष्कृतो नराकारो नरानुरूपचेष्टा येन तमाश्रये। तत्र हेतुः—भुवनानां प्राकृताप्राकृता(CB omits अप्राकृता)नामाश्रयभूतो यः। तदुपपादयन्विशिनष्टि—शिखिपिञ्छमौलिः। तथा. CA आश्रयं for आश्रयन्. Mss सर्वस्वः.

यस्य तमाश्रये। कीदृशम्—शिखिपिञ्छविभूषणम्। तेनैव तद्वैशिष्ट्यमाह—अङ्गीकृतः स्वरूपेण गृहीतो नराकारो येन। अतएव भुवनानां प्राकृताप्राकृताना-माश्रयभूतो यः ॥६३

सारङ्गरङ्गदा

तस्य तद्रसावेशं विलोभयाह—इदं शृङ्गारश्चासौ रसराजत्वाद्रसानां सर्वस्वं च यत्तदाश्रये। ननु स तावदमूर्तस्तत्राह—भुवनं तत्स्थजीवचय आश्रयो यस्य तादृशोऽप्यङ्गीकृतो नराकारो येन तत्। नवाकार इति पाठे-स्वीकृतो नूतनाकारो येन। तद्रस एवायं मूर्तिमानित्यर्थः। तदुक्तम् (गीतगोविन्द १.४८)—

शृङ्गारः सखि मूर्तिमान्

इत्यत्र। कीदृशम्—शिखिपिञ्छविभूषणम्॥ यद्वा—शिखिपिञ्छविभूषणममु-माश्रये। कीदृशम्—स्वस्वरूपेणाङ्गीकृतः सदा गृहीतो नराकारो येन। तत्र हेतुः—ब्रह्ममोहने (भा० १०. १३-१४) तत्स्वरूपेणैव भुवनानां तत्तद्वैकुण्ठानां तत्तद्ब्रह्माण्डानां चाश्रयम्। तस्मिन्नेवोत्पन्नप्रलीनत्वात्तेषाम्। तादृशमपि। शृङ्गाररस एव सर्वस्वं यस्य तादृशं च। तस्य सर्वस्वं वा ॥६३

नाद्यापि पश्यति कदापि निदर्शनाय
चित्ते तथोपनिषदां सुदृशां सहस्रम्।
स त्वं चिरान्नयनयोरनयोः पदव्यां
स्वामिन्कया नु कृपया मम संनिधत्से ॥६४

1-3. CB, CD omit all words from तमाश्रये to आश्रयभूतो यः. 1. CC तदेव व्यनक्ति for कीदृशं. 5. KB तत्र for तद्रस०. KD शृङ्गाररसः for शृङ्गारः. 6. KP ०जीवश्च for ०जीवचयः. 7. KP omits तत्. KD नवाकारं. 8. KA, KB, KP तत्र सः for तद्रसः. KC, KD insert सन् विहरत after मूर्तिमान्. 10. KA इत्यर्थः, KC इति for इत्यत्र. KD अहं for अमुं. 12. KD inserts भुवनाश्रयं after हेतुः. 13. KC उत्पन्नत्व०. 14. KD omits च. KB omits वा. 15. PS कदाचन दर्शनेन for कदापि निदर्शनाय. 16. PS चित्तेन चोपनिषदा. 17. PS and Gopāla Bhaṭṭa चिरं for चिरात्.

कृष्णावल्लभा

संप्रति विस्मयगर्वहर्षातिरेकपूर्वकं स्वस्य श्रीकृष्णकृपातिशयपरमकाष्ठापात्रत्वमाह—नाद्यापीति। भो स्वामिन्सर्वोत्तम स त्वं विशुद्धपूर्णमधुररसमूर्तिः कया नु कृपया ममानयोर्नयनयोः पदव्यां चिरं चिरकालं संनिधत्से संनिहितो भवसि। नैतत्तर्कयितुं शक्नोमि। तथेति कृपया। अनिरूप्यतां दर्शयति—यत्त्वां सुदृशां शोभनज्ञानानामुपनिषदां वेदरहस्यभागानां सहस्रमद्यापि कदापि चकितमपि चित्ते निदर्शनाय दृष्टान्ताय हेतवे न पश्यति। यादृशं तव स्वरूपं तथा नानुभवतीत्यर्थः। मम तु नयनपदवीं यातोऽसि, अहो ते कृपामहिमा।

उपनीय तमात्मानं ब्रह्मापास्तद्वयं यतः।
हिनस्त्यविद्यां तज्जं च तस्मादुपनिषन्मता॥

इति॥ वसन्ततिलकं छन्दः॥६४

सुबोधनी

ततः समीपमागतं वीक्ष्य दृग्दुर्लभस्त्वं कथं मद्दृष्टिगोचरोऽसीति तमेव पृच्छति—हे स्वामिन्, स प्राङ्निर्दिष्टोऽसमानोर्ध्वस्त्वं ममानयोः प्राकृतविषयिणोर्नयनयोः पदव्यां कया कृपया, नु प्रश्ने, संनिधत्से। तामहं न जाने, त्वमेव कथयेत्यर्थः। प्राग्वत्ते स्फूर्तिरेवेयम्, न,—चिराच्चिरकालं व्याप्य। न

1-2. GB ०काष्ठं for ०काष्ठापात्रत्वं. 4. GB अपि for नु. 5. GB तव कृपया त्वां जानन्ति नान्यथेत्याह for तथेति कृपया अनिरूप्यतां दर्शयति. 6. GB. reads च for चकितमपि. 7. GB inserts विषये after चित्ते. GB यादृक्ते स्वरूपं तादृक् for यादृशं तव स्वरूपं तथा. 8. GB नेति नेति निषेधरूपत्वात् for इत्यर्थः. 9. The letters तमा lost in GA. GB उपनियममात्मानं ब्रह्मायास्तद्वयं यतः. 13. CB, CD omit all words from ततः to दृष्टिगोचरोऽसीति and read instead : तस्य समीपमागतस्य कारुण्यमेवागमनकारणमित्यनुभूय (CD मित्यर्थः) साश्चर्यं (CD omits); CD continues किं कथां (?) साश्चर्यं. 14. CB, CD insert नाद्येति after पृच्छति. CB ०निर्दिष्टासमानो०. 15. CD omits तां. 16. CB, CD तत्र for प्राग्वत्ते. CC तत् for ते. CB, CD insert इति चेत् before न. CC चिराच्चिरकालं. CB नाद्यापि चिर० for न साचिर० (p. 263, l. 1).

साचिरकालव्यापिनी। नन्वक्षिसंनिकृष्टे किं दौर्लभ्यम्—सुष्ठु दृग् व्रजसुन्दरीणामिव दृष्टिर्यासां तासामुपनिषद्देवीनामपि सहस्रं कदापि कस्मिंश्चिदवसरेऽपि चित्तेऽपि निदर्शनाय त्वत्सादृश्यदर्शनायाद्यापि न पश्यति। अतोऽस्मद्दृग्गोचरस्त्वं केवलकृपयैव ॥६४

सारङ्गरङ्गदा

अथ स्वसमीपमागतस्य तादृशस्तस्य साक्षाद्दर्शनप्राप्त्यानन्दोन्मत्तः साश्चर्यं तमेव पृच्छति—हे स्वामिन्

व्रजवधूदृशा दृश्यम्

(श्लो० ४८) इत्याद्यनुसारेणासामेव दृश्यस्त्वमीदृशः कया नु कृपया मम नयनयोः पदव्यां संनिधत्से। नु आशङ्कायाम्। ननु पूर्ववत्स्फूर्तिरेवेयं तव, इत्यत्र सविमर्शमाह—चिराद् बहुकालं व्याप्य। तत्स्फूर्तिर्नेयमित्यर्थः। ननु सत्यमीदृशोऽहमन्यागोचरः, किं तु तव तादृशभावाद्दृष्टोऽस्मि, किमत्र चित्रम्, अत्राह—अनयोः प्राकृतपुरुषदेहाङ्गविशेषयोरिति दुर्घटमेतदित्यर्थः। ननु भवतु ते प्राकृतपुंस्त्वम्, तेन किम्, एतद्भावेनैव यस्य कस्याप्यहं दृश्यः स्याम्, तत्र सशिरश्चालनं कैमुत्यन्यायेनाह—सुदृशां वेणुनादमत्तत्रिजगद्वर्तिसुन्दरीणां तथोपनिषदामपि सहस्रं यस्य तव त्वदङ्गानां च साक्षाद्दर्शनं तावद्दूरेऽस्तु, तन्निदर्शनाय सादृश्यदर्शनायापि किमपि कदापि चित्तेऽप्यद्यापि न पश्यति। यद्वा, उपनिषदां सहस्रं तव तादृशेन भावेनापि न पश्यति। ननु ता अमूर्ताः कथं पश्यन्तु, तत्राह—सुदृशामिति। तथा तेन प्रकारेण त्वत्प्राप्त्यर्थं सुदृशः सत्यस्तपस्यन्ती-

2. CD omits देवीनां. 3. CD omits चित्तेऽपि निदर्शनाय. CC transposes अद्यापि and न. CD drops अद्यापि न पश्यति. CB, CD °दृष्टिगोचरः for °दृग्गोचरः. 7. KB transposes तं and एव. 8. KP ब्रह्म° for व्रज°. 9. KP कथा for कया. 11. All Mss (except KA) and KP सविमर्षं. KB तत्तत्स्फूर्तिः. 12. KP अन्यगोचरः. KP, KC विचित्रमित्याह for चित्रमत्राह. KB inserts इति before अत्राह. 13. KD नयनयोः for अनयोः. 15. KC, KD कैमुत्येन for कैमुत्यन्यायेन. 16. KP सदङ्गानां. KP omits च. 19. KP तत्प्राप्त्यर्थं. KP सद्यस्तत्पश्यन्तीनां

नामपीत्यर्थः। तदाभिर्गोपसुन्दरीभिरेव दृश्यस्त्वं यया कृपया मम साक्षाद्भूतोऽसि का सेति कथ्यतामिति भावः॥९४

केयं कान्तिः केशव त्वन्मुखेन्दोः
कोऽयं वेषः कापि वाचामभूमिः।
सेयं सोऽयं स्वादतामञ्जलिस्ते
भूयो भूयो भूयशस्त्वां नमामि॥९५

कृष्णवल्लभा

अथ शृङ्गाररससर्वस्वमूर्तेः श्रीकृष्णस्य साक्षादिवानुभूयमानां श्रीमुखेन्दोः शोभां वेषं च वर्णयन्नाह—केयमिति। हे केशव, प्रशस्ताः केशा अस्येति।

केशाद्वोऽन्यतरस्याम्

इति सूत्रेण (पा० ५. २. १०९) वः। त्वन्मुखेन्दोस्तत्र मुखचन्द्रस्येयं कान्तिः कात्यपूर्वा। पद्मचन्द्रादीनां कान्तिर्निरूपयितुं शक्यते, इयं तु वक्तुमशक्या। कान्तिस्तु दूरादास्ताम्—अयं वेषः कः। वेषस्तिलकरचनादिनिर्माणम्। निर्वक्तुमशक्य इत्यर्थः। कान्तिवेषौ कथं वक्तुमशक्यौ तत्राह—वाचां काप्यभूमिरविषयः। अनिर्वचनीयस्वाद्यत्वात्। तदेवाह—सेयं कान्तिः सोऽयं वेषः स्वादतां स्वयमेवास्वाद्यौ भवताम्। अस्माकमास्वाद्यौ न स्तः, तर्हि तदाशंसया किम्, तत्राह—ते तुभ्यमञ्जलिः प्रार्थनारूपः, तत्प्रतिबन्धकाज्ञानावरणनिराकरणार्थम्। भूयो भूयो भूयशः।

बह्वल्पार्थ

(पा० ५. ४. ४२) इति सूत्रेण बहुत्वे शस्। त्वामेव नमामि। तत्रोपायान्तराभावात्। यद्वा, सेयं सोऽयं स्वादतां चक्षुषा समासाद्यौ भवताम्। मद्विधानां

1. KB omits अपि before इत्यर्थः 5. PS स्वादुता मञ्जुलश्रीः for स्वादतामञ्जलिस्ते. 6. PS तत् for त्वां. 11. After वः GB inserts : कश्चेशश्च ते केशा गुणावतारास्तान्वाति स्वीकरोतीति वा. 13. GB तावत् for तु दूरात्. GB omits वेषः कः. 13-14. GB को वक्तुं शक्यः for निर्वक्तुमशक्यः. 19-20. GB बाहुल्यार्थं च for बह्वल्पार्थेति सूत्रेण बहुत्वे. 21. GB भवतः for भवतां.

महादुरन्ततदाशानां तादृशसौभाग्यं त्वत्कृपां विना न घटत इति भावः ॥ शालिनी छन्दः ॥९५

सुबोधनी

पुनः श्रीमुखस्य तादृशकान्तिवेषौ च दृष्ट्वा सनर्म पृच्छति—हे केशव, उन्मुक्तकेश, त्वन्मुखेन्दोरियं कान्तिः

कान्ताकचग्रहण

(श्लो० ९१) इत्याद्युक्ता काप्यदृष्टपूर्वा। तदुपलक्षितोऽयं वेषो वा कोऽप्यदृष्टपूर्वः। अतस्त्वां पृच्छामीत्यर्थः। त्वमेवानुभूय कथयेति चेत्—सा कापीयं स्वादतां सुष्ठु आ सम्यगदताम्। एतदास्वादकस्त्वत्पार्श्ववर्तिजनानामपि वाचामभूमिरविषयम्। मम तु का वार्तेत्यर्थः। सोऽयं वेषोऽपि तथा। अतस्ते भूयो ममाञ्जलिरेवास्तु। पुनः ससंभ्रमम्—भूयशस्त्वां नमाम्येव। केवलं न किंचिद्वक्तुं शक्त इत्यर्थः ॥९५

सारङ्गरङ्गदा

पुनस्तादृशश्रीमुखकान्तिं वेषसौष्ठवं च दृष्ट्वा तद्वर्णयितुमुद्यतस्तदशक्त्या सचमत्कारसंशयं तं पृच्छति—हे केशव स्निग्धकुञ्चिकेशरचितचूड, इयं त्वन्मुखेन्दोः कान्तिः का, अयं वेषश्च कः। ननु पूर्वं त्वयैव वर्णिताविमौ, तत्राह—इयमयं च काप्यनिर्वाच्या वाचामभूमिः। नेमौ तद्गोचरावित्यर्थः। यद्वा, इयं काप्यनिर्वाच्या, अयं च वाचामभूमिः। ननु वर्णने शक्तिर्न चेत्तर्हि चक्षुर्मनोभ्यामास्वादयेति तथा चिकीर्षुस्तदशक्त्या सनिश्चयमाह—सेति। सा

नाद्यापि

(श्लो० ९४) इत्यादिरीत्यास्मादृशैर्द्रष्टुमशक्या गोपीभिरेवास्वाद्येयम्। अयं च स तादृशः। स्वयमेवास्वाद्यतामेव, नैतद्वर्णनास्वादनाशया प्रयोजनम्। अतस्ते

4. CA repeats पुनः. CB, CD omit च, and insert केयमिति after पृच्छति. 5. CB, CD नानाकान्तियुक्त for उन्मुक्तकेश. 8. CB, CD insert तत्राह after चेत्. 8-9. CB, CD omit सुष्ठु आ सम्यगदतां. 10. CA सोऽपि for वेषोऽपि. CB, CD omit वेषः. CB, CD insert तव after ते. CC omits मम after भूयो. 11. CC शक्नोमि for शक्तः. CA omits इत्यर्थः. 14. KB omits तं. 18. KD सनियमं for सनिश्चयं. 20. KD inserts अपि after द्रष्टुं.

तुभ्यमञ्जलिरस्तु। भूयो भूयो भूयशस्त्वां नमामि। किं वा, तल्लुब्धः सकातर्यमाह—तुभ्यमञ्जलिरस्तु, मुहुस्त्वां नमामि, इमौ स्वादताम्। मह्यमिति शेषः। अन्तर्णिजर्थो ज्ञेयः। यथेमौ मयास्वाद्यौ भवतस्तथा कुर्वित्यर्थः ॥९५

वदनेन्दुविनिर्जितः शशी
दशधा देव पदं प्रपद्य ते।
अधिकां श्रियमश्नुतेतरां
तव कारुण्यविजृम्भितं कियत् ॥९६

कृष्णावल्लभा

अथ चन्द्रमात्रे श्रीकृष्णमुखेन्दुकान्तिकणापि नास्तीति निर्धारितवानपि रासावसरोदितचन्द्रस्य किंचित्तत्संभावयञ्श्रीकृष्णकृपाविलसितं मन्वानो विस्मितमिव हसन्नाह—वदनेन्द्विति। हे देव क्रीडापर, शशी खस्थश्चन्द्रस्तव वदनेन्दुना विनिर्जितः संस्ते तव पदं दशधा दशप्रकारेण प्रपद्य नखचन्द्रदशकस्य तादात्म्यं भावयन्नधिकां श्रियमश्नुतेतराम्। या याधिकात्यधिकादिश्रीस्तां प्राप्नोतीत्यर्थः। तव कारुण्यविजृम्भितं कृपोद्रेकः कियदेतत्। त्वत्कृपयेतोऽपि महत्पदं प्राप्यत इति भावः। यद्वा, कियदेतत्किं परिमाणमिति न विद्मः। जितस्तु निःश्रीक एव भवति, अयं त्वधिकामेव श्रियं लेभे, एकोऽप्यनेको बभूव। अतः परं किं ते कारुण्यमिति भावः॥ वैतालीयं छन्दः ॥९६

सुबोधनी

खण्डितरागादिभिः का शोभा को वेष इति प्रतिवचनमाशङ्क्य तच्चरणमेवात्र

3. KB अन्तर्भावित० for अन्तः०. 5. Kṛṣṇadāsa प्रपद्यते, also देवपदं as a v. l. 7. PS तारुण्य० for कारुण्य०. 9. GB ०लेशः for ०कणा. 10. GB inserts तत्र before मन्वानः. 11. GA omits खस्थः. 13. GB omits या या, and reads ०कादिश्रियं for ०कादिश्रीस्तां. 19. CA inserts ननु, CD अथ before खण्डित०. CB, CD खण्डिताङ्ग० for खण्डित०. CB, CD insert वा before वेषः. CD वचनं for प्रतिवचनं. CB, CD त्वच्चरण०.

प्रमाणमिति पुनस्तथैवाह—हे देव वदनेन्दुविनिर्जितः शशी दशखण्डमात्मानं कृत्वा ते पदं प्रपद्याधिकां शोभामतिशयेनाप्नोति। अतस्त्वयीदृशावेव शोभावेपाविति भावः। ममैतद्दर्शनं तव कृपयैवेति प्रागुक्तं द्रढयति—तव कारुण्यस्य विलसितं कियत्प्रमाणमिति च न जानामीत्यर्थः ॥९६

सारङ्गरङ्गदा

अथ तस्य स्वकर्णामृतरूपस्वादर्शनदुःखजस्वदर्शनानन्दजोन्मादप्रलापश्रवणानन्दिना तद्वर्णनाशक्त्या नमस्कृत्य मौनमास्थितं तं दृष्ट्वा पुनस्तदुक्तिशुश्रूषुणा स्वमुखादिवर्णनेश्वरान्तरभजनवरप्रार्थनाद्याज्ञया तत्तत्स्थापनाय च प्रेमनिष्ठादिक्मुद्घाटयितुं विवदमानेन श्रीकृष्णेण सह विवदमानः सप्तदशश्लोकीमाह। तत्र प्रथमम्—अयि लीलाशुक चन्द्रपद्माद्युपमेयतया किमिति मन्मुखाद्यङ्गं न वर्णयसीति तद्वाक्यात्क्षणं विमृश्य

लीलास्वयंवररसं लभते जयश्रीः

(श्लो० १) इतिवत्तानयोग्यान्मत्वा श्रीचरणारविन्दे दृष्टिं क्षिपन्कैमुत्येन भङ्गीपूर्वकमाह—हे देव, अयं शश्यखण्डनिर्मलोज्ज्वलत्वद्वदनेन्दोरुदयेनैव स्वपराजयं मत्वा श्रीनखरवरूपेण दशधात्मानं कृत्वा ते पदं प्रपद्यतेऽद्यापि सेवते। देवस्य तव पदं वा। ननु भद्रम्, नखानेव तथा वर्णय, इत्यत्र न हि न हीत्याह—अधीति। अत्र त्वत्कारुण्येनाधिकां श्रियं तत्तद्गुणसंपत्तिमश्नुतेतराम्। मुहुः प्राप्नोतीत्यर्थः। नखेन्दुचन्द्रयोर्निर्दोषसदोषत्वेन महद्वैषम्यात्। नन्वेतत्प्राप्तिरेव मे करुणेति सशङ्कमाह—इदं तव कारुण्यसिन्धूनां विजृम्भितं कियदल्पम्। तत्कणिकैवेत्यर्थः। अतो योऽयं खस्थः शशी स ते नखसाम्येऽप्ययोग्य इति भावः ॥९६

1. CB, CD insert वदनेति after आह. CB, CD वदनेन्दुना for वदनेन्दु-. 2. CC प्राप्य for प्रपद्य. 3. CB, CD अर्थः for भावः. CB inserts एव after प्रागुक्तं. 3-4. CD omits all words from ममैतद्दर्शनं to जानामीत्यर्थः. 7. KC omits तं. 8. KP ०प्राथनाद्या ज्ञया. 9. KD ततः for तत्र. 10. KA ०पद्माद्युपमान० for ०पद्माद्युपमेय०. KC, KD तन्मुखा०. 13. KC इति for इतिवत्. 14. KP inserts वदनेन्दुरिति after आह. 16. KC inserts इति after इत्यत्र. KP reads नहि thrice. 17. KP तत्र for अत्र. 18. KC, KD मुखेन्दु० for नखेन्दु०. 20. KB, KD omit यः.

तत्त्वन्मुखं कथमिवाम्बुजतुल्यकक्षं
वाचामवाचि ननु पर्वणि पर्वणीन्दोः ।
तत्किं ब्रुवे किमपरं भुवनैककान्त-
वेणु त्वदाननमनेन समं नु यत्स्यात् ॥६७

कृष्णवल्लभा

संप्रत्यत्याश्चर्यरूपेण स्फुरच्छ्रीकृष्णमुखं पुनर्वर्णयति—तत्त्वन्मुखमिति। ननु विभो श्रीकृष्ण तत्त्वन्मुखं कथमिवाम्बुजतुल्यकक्षं पद्मसदृशम्। नित्यप्रफुल्लत्वात्। तर्हि चन्द्रसमं भवतु, न हि न हि–इन्दोर्यत्पर्वणि पर्वणि। सौभाग्यमिति शेषः। न तु सर्वदा। तच्च वाचामवाचि वाचामधः। अवाञ्चनमवाक्। संपदादित्वात् (वार्त्तिक पा० ३. २. ६४) क्विप्। वक्तुं शक्यम्। इदं तु न तथा। तथापि तस्य पर्वणि पर्वण्येव पूर्णता, इदं तु सदा पूर्णम्॥ यद्वा, मुखं विशिनष्टि—पर्वणि पर्वणीन्दोर्वाचामिन्दुप्रतिपादकवचसामवाचि। वाचयितुं शीलमस्य वाचि, न वाच्यवाचि। इन्दुर्नाम कश्चिदस्तीति शब्दमपि कोऽपि न प्रयुङ्क्त इत्यर्थः॥ अथ वा, इन्दोः पर्वणि पर्वण्यमावस्याममावस्यां यद्यदवाचि। अवाचयितुं शीलमस्य तत्। तत्तस्मात्किं ब्रुवे कथयामि। न किमपि ब्रूयां यदन्यदेतत्सदृशमिति भावः। नन्वपरं मन्मुखमेवैतन्मुखतुल्यं स्यादिति चेदत आह—अपरं त्वदाननं किं भुवनैककान्तवेणु। भुवनेष्येकः सुखसीमा वेणुर्यत्र तत्। यदपरं त्वदाननमनेन त्वन्मुखेन समं नु स्यात्॥ एवं योज्यं वा—

1. PS (v. l. as in text) अब्जसमान० for अम्बुजतुल्य०. 2. For this pāda PS reads : वाङ्माधुरीबहुलपक्कलासमृद्धम्. 3. PS ०कान्तं for ०कान्त-. 4. For this pāda PS reads : यस्य त्वदाननसमा उपमा सदा स्यात्. 6. GB तत् for तत्त्वन्मुखं. 7. GB ०विकसित० for ०प्रफुल्ल०. 9. GA अथः for शेषः. 11. GB inserts इति after पूर्णं. 13. GB वचनवाचि (corrupt) for वाचि न वाच्यवाचि. GB इन्दौ for इन्दुः. GB करिवत् (corrupt) for कश्चित्. 14. GB अमावस्यायां for अमावस्याममावस्यां. 15. GB वाचयितुं for अवाचयितुं 16. GB एतस्य for अन्यदेतत. 17. GB omits अपरं. 18. GB inserts अथ वा before एवं, and omits वा after योज्यं.

यत्त्वन्मुखं भुवनैककान्तवेणु तादृशमनेन सममपरं त्वदाननं किं स्यात्। न स्यादेवेति। वेणुयुतं श्रीमुखं श्रीवृन्दावनगोचरस्य भवत एव, नापरस्य तवावतारस्येति भावः॥ वसन्ततिलकं छन्दः॥६७

सुबोधनी

अतस्तवेदं मुखं निरुपममित्याह—ननु वितर्के तत्तथाभूतं त्वन्मुखमम्बुजं तुल्यकक्षायां यस्य तादृशं कथं स्यात्। तत्राम्बुजे दोषं वदंश्चन्द्रं दूषयति—दर्शे दर्शे इन्दोर्यद्भवति तद्वाचामप्यवाचि, वाचापि न वाच्यम्। क्षयशब्दस्यामङ्गल्याद्वचनायोग्यमित्यर्थः। यदीन्दोरीदृगवस्था तदा त्वत्पादतिरस्कृताब्जस्य कथं तदास्यतुल्यत्वमित्यर्थः। क्षणं विमृश्य, अपरं तवैवापरस्वरूपाणां वा मुखं ब्रूषे—नु भो इदं त्वदाननमनेन तदाननेन सम किं कथं ब्रुवे। तदपि समं वक्तुं न शक्नोमीत्यर्थः। तत्र हेतुः—यद्यस्मात्त्वदाननं भुवनानामनन्तवैकुण्ठादिलोकानाम्। तन्नाथानामित्यर्थः। एकः कान्तः केवलं द्रष्टुमाकाङ्क्षितो वेणुर्यत्र तादृशम्॥६७

सारङ्गरङ्गदा

नन्वये त्वं बालोऽसि,

एको हि दोषो गुणसंनिपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः।

इति (कुमारसंभव १. ३) तत्साम्येन वा मन्मुखं किं न वर्णयसीति तेन सह

2. GB omits इति. 5. CB, CD insert तदिति after आह. 6. CB, CD अम्बुज- for अम्बुजे. CB, CD अप्याक्षिपति for दूषयति. 7. CB, CD omit अपि after वाचां. CB अधःप्रदेशे for वाचापि न वाच्यं. 7-8. CB, CD transpose क्षयशब्दस्यामङ्गल्यात् and वचनायोग्यमित्यर्थः. 8. CB, CD omit यदीन्दोरीदृगवस्था तदा. CA, CC यस्य for यदि (the emendation is ours). CC omits तदा. CB, CD तत्पाद०. 9. CC inserts पुनः before क्षणं. Before क्षणं, CB, CD insert तत्त्वन्मुखमनेने(CD ०मुखमण्डलमि)न्दुना वा समं कथं ब्रवीमि, and omit all words from अपरं to ब्रूषे. 10. CB, CD प्रश्ने for भोः. CB, CD omit all words इदं to ब्रुवे and read instead : अपरं स्वजातीयं तवैवापरस्वरूपाणां मुखं किं (CD inserts कथं) ब्रुवे. 11. CB, CD omit तत्र हेतुः. 17. KC, KD वर्णयसि for वर्णयसि.

विवदमानो भङ्ग्याह—तन्निरुपममेतत्त्वन्मुखमम्बुजं तुल्यकक्षायां यस्य तादृशं कथं भवेत् । ननु किमत्र दूषणमित्यत्र चन्द्रे दोषान्तरं वदन्पद्ममप्यतितरां दूषयति —पर्वणि पर्वणि दर्शे दर्शे इन्दोर्यद्भवति तद्वाचामवाच्यधः । संक्षयस्यामङ्गल्याद्वाग्विषयेऽपि कर्तुं न योग्यमित्यर्थः । यदीन्दोरप्येवं तदा तत्पदाघातैस्तिरस्कृतस्य पद्मस्य कथं त्वन्मुखसाम्यमिति भावः । ननु न भवतु तत्साम्यम्, वर्ण्यं चेत्तर्हि केनाप्यपरेण मुखेन्दुना समतया वर्णयेति, क्षणं विमृश्य, आं अपरं तवैव व्रजविलासिस्वरूपादपरस्वरूपाणां मुखं किं देवेनोच्यते—नु भोः स्वामिन्, इदं त्वदाननमनेन तत्तदाननेन समं यत्स्यात्तत्किं ब्रुवे कथमेतत्कथयामि । तत्तु मया वक्तुं न शक्यत इत्यर्थः । ननु किं विक्षिप्तोऽसि, तदेतन्मुखमेकमेव, कस्तावदसाम्ये हेतुरिति, बहून् हेतुन् हृदि विभाव्यैकमेव सकरमार्जनं नीचैराह—इदं त्वदाननं भुवनैककान्तो वेणुर्यत्र तादृशम् । एतदपूर्वामृतं तेषु नास्ति, मया किं कर्तव्यमित्यर्थः । यद्वा, तत्तस्मादनेनाब्जेनेन्दुना च त्वन्मुखं समं यत्स्यात्तत्किं ब्रुवे कथं ब्रवीमि । किमपरं श्रीमुखादि त्वयोच्यते, अनेनापि समं यत्स्यात्तदहं कथं ब्रुवे, यदिदं भुवनैककान्तवेणु । अपरशब्दस्यान्यद्यत्किंचिदर्थे कृते भुवनेति विशेषणस्य वैयर्थ्यं स्यात् ।

दर्शे दर्शे क्षयी चन्द्रस्तेनाप्यर्दितमम्बुजम् ।
निर्वर्णून्यपरास्यानि केन तुल्यं त्वदाननम् ॥६७

शुश्रूषसे शृणु यदि प्रणिधानपूर्वं
पूर्वैरपूर्वकविभिर्न कटाक्षितं यत् ।
नीराजनक्रमधुरां भवदाननेन्दो-
र्निर्व्याजमर्हति चिराय शशिप्रदीपः ॥६८

1. KP तत् for एतत् (after निरुपमं). KB मुखं for त्वन्मुखं. 4. KB तदेतत्० for तदा तत्०. 5. KB, KD तन्मुख० for त्वन्मुख०. 7. KD श्रीमुखं for मुखं. KP कियदेव न for किं देवेन. 8. KP omits तत्तदाननेन. 9. KC, KD वातुलः for विक्षिप्तः. 10. KP तदाननं 11. KP omits किं. 12. KP अब्जेन्दुना. KA, KB, KP omit च. 14. KP यत इदं for यदिदं. 16. KP तत्पदार्दितं for तेनाप्यर्दितं. 18. PS omits this verse. 20. Caitanyadāsa ०धुरं.

कृष्णवल्लभा

अथ श्रीकृष्णं प्रत्येव स्वकृतां तन्मुखेन्दुवर्णनामाह—शुश्रूषस इति। हे विभो यदि शुश्रूषसे श्रोतुमिच्छसि तदा प्रणिधानपूर्वमवधानपूर्वकं शृणु, पूर्वैः प्राचीनैरपूर्वकविभिः। अपूर्वा अद्भुता ये कवयस्तैः। यन्न कटाक्षितमल्पमपि न दृष्टम्। किं तदित्याह—शशिप्रदीपो भवदाननेन्दोर्भवतस्तवाननचन्द्रस्य नीराजनक्रमधुरां निर्मञ्छनपरिपाटीभारं निर्व्याजं निष्कपटं चिराय चिरमर्हति योग्यो भवति। चन्द्रस्तव वदनस्योपमां नार्हत्येव किं तु निर्मञ्छनार्थं प्रदीप इवार्हतीत्यर्थः। अन्यप्रदीपेनोष्णेनानाह्लादकेन कृष्णमुखनीराजस्यानौचित्यात्। कृष्णमुखेन्दौ विभ्राजमाने चिदचिल्लोकमात्राप्लाविपरमानन्दसुधारसशिशिरचन्द्रिकाम्भोधिवर्षिण्यन्यचन्द्रस्य प्रयोजनाभावाद्वेति भावः॥ वसन्ततिलकं छन्दः॥९८

सुबोधनी

तर्हि यथा शक्यसे तथैव कथयेति चेत्तत्र सनर्माह—यदि श्रोतुमिच्छसि

3. GA अवधानपूर्वं 4. GB omits अपूर्वकविभिः. 5. GB omits भवदाननेन्दोः. 6. After नीराजनक्रमधुरां GB inserts नीराजनस्याराात्रिकस्य क्रमेऽनुक्रमे धुरां मुख्यत्वं. GB आरात्रिक° for निर्मञ्छन°. 7. GA नीराजनार्थं for निर्मञ्छनार्थं. This apparently late word निर्मञ्छन is not listed in St. Petersberg Dictionary; but Monier Williams notes the word as निमञ्जन and explains it as equivalent to नीराजन, on the authority of a scholiast on *Naiṣadhīya-carita*, where the word is used, from "*nir√+mañc* (ind. p. -*mañcya*), to perform the ceremony of lustration with anything." In *Naiṣadhīya*° vii. 43, however, where the word निर्मञ्छ्य occurs, the commentators are apparently puzzled over it; Mallinātha emends it to निमित्य (=प्रक्षिप्य), while Nārāyaṇa and Premcandra read respectively निमिच्छ्य and निर्मञ्च्य but explain it as नीराजनं कृत्वा. The word occurs in *Kumāra-sambhava* xiii. 18 with v. l. *nirucchana* or *niruñchana*, explained as अन्योन्यवेषपरिवर्तन! But in Bengal Vaiṣṇava literature the word is found (see Kṛṣṇadāsa and Caitanyadāsa below) in the form of *nirmañchana*; see Jñānendra Mohan Dās, *Bāṅgālā Bhāṣār Abhidhān*, s.v. निर्मञ्छन. Has the word anything to do with the late Sanskritisation of the Pkt. *ṇimmacchana* (*nir+√ mrakṣ*) occurring in the sense of विलेपन in *Bhavisattakahā*, the sense of नीराजन being secondary? 8. GA एव for इव. 10. GA चन्द्रस्य for अन्यचन्द्रस्य. GB omits वा. 12. CB, CD शक्नोषि, तथा तत (CB omits तत्) for शक्यसे तथैव. CB, CD insert शुश्रूषस इति after आह.

तर्हि सावधानं शृणु। किं तदिति सगर्वमाह—प्राचीनैराधुनिकैरपि कविभिर्नेक्षितमिति यत्। तदेव किम्—अयमिन्दुर्निष्कपटं यथा स्यात्तथा चिराय चिरकालं व्याप्य तन्मुखमाराध्य शशिप्रदीपः कर्पूरदीपो भूत्वा भवदाननेन्दोर्नीराजनस्य क्रमे क्रमदीपमण्डले या धूर्भारः। तदधिकार इत्यर्थः। तामर्हति। तन्मण्डलं प्रविश्य त्वन्मुखं निर्मञ्छ्य दूरे प्रक्षेप्तुं योग्यो भवति। नोपमायोग्य इत्यर्थः ॥९८

सारङ्गरङ्गदा

ननु यद्येवं तर्हि कवयः कथं मन्मुखस्मितादिकं तत्तत्साम्येन वर्णयन्ति, त्वया वा कथं न वर्ण्यमित्यत्र सगर्वपरिहासमाह द्वाभ्याम्—भो विदग्धशेखर यदि शुश्रूषसे तदा पूर्वैः प्राचीनैरपूर्वकविभिर्यत्प्रणिधानपूर्वमपि न कटाक्षितं न दृष्टं तच्छृणु। यद्वा, प्रणिधानपूर्वं शृण्विति परिहासः। सावधानः सन्नित्यर्थः। किं तत्—अयं शशिप्रदीपो भवदाननेन्दोर्नीराजनक्रमधुरां निर्मञ्छनपरिपाटीभारं चिराय निर्व्याजं यथा स्यात्तथार्हति। त्वदाननं निर्मञ्छ्य दूरे प्रक्षेप्तुं योग्योऽयमित्यर्थः ॥९८

अखण्डनिर्वाणरसप्रवाहै-
र्विखण्डिताशेषरसान्तराणि।
अयन्त्रितोद्वान्तसुधार्णवानि
जयन्ति शीतानि तव स्मितानि ॥९९

1. CB, CD तदा for तर्हि. 2. CD omits from यत् to किं. CA omits एव किं. CB आह for किं. CC चिरात् for चिराय. 3. CB omits व्याप्य. CD चिरकालपर्यन्तं for चिरकालं व्याप्य. CC, CD कर्पूरप्रदीपः. 4. CC omits क्रमे. 4-6 CD omits all words from तामर्हति to नोपमायोग्य इत्यर्थः. CB omits all words from तन्मण्डलं to नोपमायोग्यः and reads instead : तन्मण्डलप्रवेशयोग्यो भवति. 5. CA, CC प्रवेश्य. CC omits भवति. 8. KB transposes कवयः and कथं. KD तन्मुख० for मन्मुख०. 9. KA omits वा. KA, KD ०सपरिहासं for ०परिहासं. KD inserts शुश्रूषेति after द्वाभ्यां. 10. KA, KB, KP omit न दृष्टं. 13. KC तथेति for स्यात्तथार्हति. 15. PS ०प्रवाह- for प्रवाहैः.

कृष्णावल्लभा

अथ श्रीकृष्णपरममहानन्दरससाम्राज्याविर्भावकस्फूर्त्या समुल्लसित आह— अखण्डेति। हे कृष्ण तव शीतानि परमाह्लादकानि स्मितानि जयन्ति। कीदृशानि—अखण्डेति। अखण्डा न विद्यते केनापि खण्डनं येषामेवंभूता ये निर्वाणरसाः परमानन्दरसास्तेषां प्रवाहैः। अखण्डैस्तत्प्रवाहैर्वा। विखण्डितान्यशेषाणि रसान्तराणि येषु यैर्वा तानि। पुनः कीदृशानि—अयन्त्रितोद्वान्तसुधार्णवानि। अयन्त्रितमनर्गलं यथा स्यात्तथोद्वान्ता उत्कृष्टतयोद्गीर्णाः सुधार्णवाः प्रेमामृताम्बुधयो यैस्तानि। किमम्बुजं किं वा चन्द्र इति केवलं हि तत्स्मितानि महादुरन्तसंतापशान्तिजनकानीत्यर्थः॥ उपेन्द्रवज्रा छन्दः॥६६

सुबोधनी

एतच्छ्रुत्वा स्मयमानमालोक्य त्वन्मुखमेवात्र प्रमाणमिति पुनस्तथाह— तव स्मितानि जयन्ति मद्वचनमनुमोद्य सर्वोत्कर्षेण वर्तन्ते। तदेवाह—अखण्डः पूर्णः स्वयं संकुचन्यो निर्वाणरस आनन्दरूपोऽङ्गी शृङ्गाररसस्तस्य प्रवाहैर्हर्षगर्वादिभिः खण्डिता निर्भिद्यात्मसात्कृता अशेषरसाः करुणादयो यैः। अतएव स्वातन्त्र्येणोच्चैर्वमिता आविष्कृता आनन्दसिन्धवो यैः। तेनैव शीतानि॥६६

सारङ्गरङ्गदा

किं च, तव स्मितानि जयन्ति सर्वोपमानानि विजित्य सर्वोत्कर्षेण वर्तन्ते।

4. GB omits अखण्डेति. GB एवंविधाः for एवंभूताः. 5. GB अखण्डाश्च ते निर्वाणरसप्रवाहाश्च तैः for अखण्डैस्तत्प्रवाहैः. GB विशेषेण खण्डितानि for विखण्डितानि. 6. GA inserts इति भावः after तानि. GB reads तथा for पुनः कीदृशानि and omits the phrase अयन्त्रितोद्वान्त etc. 8. GB places the second किं after इति. 11. CD omits एवात्र. CB, CD read तथैव for तथा and insert अखण्डेति after आह. 12. CB मद्वाचं for मद्वचनं. CA omits एव. CB, CD अखण्डनिर्वाणः for अखण्डः. 13. Mss (except CD) संकुचत्. CB, CD omit all words from निर्वाणरसः to शृङ्गाररसः and read instead : रसोऽङ्गी शृङ्गारः. CA यः for अङ्गी. 14. CD विखण्डिता. CD ०रसान्तराः for ०रसाः. 15. CB, CD ततोऽति- for तेनैव. 17. KC तथा, KD तथा अखण्डेति, KP अखण्डेति for किं च. KC निर्जित्य for विजित्य.

कीदृशानि—अखण्डनिर्वाणरसप्रवाहैः सर्वतः प्रसरद्भिः पूर्णानन्दरसपूरैर्विखण्डिता-न्याप्लाव्य न्यक्कृतान्यशेषाणि रसान्तराणि यैः। तथा, अयन्त्रितेनायन्त्रणेन। स्वभावेनेत्यर्थः। उद्भ्रान्ताः सुधार्णवा यैः। तथा, शीतान्यतिशीतलानि। शैत्य-माधुर्यानन्दरसपराकाष्ठारूपाणीत्यर्थः ॥९९

कामं सन्तु सहस्रशः कतिपये सारस्यधौरेयकाः
कामं वा कमनीयतापरिमलस्वाराज्यबद्धव्रताः।
नैवैवं विवदामहे न च वयं देव प्रियं ब्रूमहे
यत्सत्यं रमणीयतापरिणतिस्त्वय्येव पारं गता ॥१००

कृष्णवल्लभा

अथ स्वानुभवेन श्रीकृष्णरहस्यं परमं निर्धार्य तद्रसास्वादैकासक्तचेताः शपथपूर्वकं स्वानुभूतमेवार्थमाह—काममिति। सारस्य स्थिरांशस्य धौरेयका धुरीणाः। यद्वा, सारस्यं सरसता तस्य धौरेयका युक्तिभारैः सारनिर्धारका इत्यर्थः। कामं यथेष्टं कतिपये सहस्रशः सन्तु। कामं वा कमनीयतायाः परिमलः प्रसरस्तस्य स्वाराज्यं परमोत्कर्षस्तत्र बद्धं व्रतं नियमो यैस्तादृशा अपि सहस्रशः सन्तु। हे देव सर्वदा मोदमान, एवं ते तथा विवदन्ते प्रियं च वदन्ति, तथा वयं नैव विवदामहे विमत्या न वदामः।

भासनोपसंभाष

(पा० १. १. ४७) इति वदेस्तङ्। न च प्रियं ब्रूमहे। न च परमतखण्डनार्थम्, न च स्वगोष्ठीप्रियार्थमित्यर्थः। अयं भावः—तत्र कतिपय एव गोपीजन-विनोदिशुद्धगोपालकिशोररूपसारभारं वहन्तः सारान्तरं दूषयन्तः प्रगाढयुक्तिभिः स्थापयन्ति। अपरे तु तद्भावनाप्रधानास्तस्मिन्नेव मधुरशुद्धरसमयविलासवति

3. KP अतिशीतानि for अतिशीतलानि. 6. PS ०परिणति० for ०परिमल०. 7. PS नैवैतैः for नैवैवं. 11. GA सारूप्य- for सारस्य. 16. Mss विदामः for वदामः. 17-18. GB omits all words from भासनो० to तङ्. 18. GA वा for च (before प्रियं). 21. GB ०भावनाः for ०भावनाप्रधानाः.

कमनीयतायाः परमोत्कर्षविश्राम इति। अन्ये तु प्रतिभानम्। तत्र वयं न विप्रतिपद्यामह इति। तर्हि यूयं किं ब्रूथ—यत्सत्यं तदेव वयं शपथपूर्वकं ब्रूमः। किं तत्—रमणीयतायाः परिणतिरुत्कर्षस्त्वय्येव पारं गता। रमणीयतापरमोत्कर्षस्त्वय्येवेत्यर्थः ॥ शार्दूलविक्रीडितं छन्दः ॥१००

सुबोधनी

एतत्तवातिस्तुतिर्न, किं तु सत्यमेवेति सगर्वमाह—हे देव सरसताया भारवाहाः सहस्रशो यथेष्टं सन्तु। तेभ्यस्त्वमतिसरस इति तैः सह विवादं नैव कुर्मः। तथा, कमनीयतानां योऽसाधारणगुणस्तस्य साम्राज्ये बद्धं व्रतं यैर्नित्यकमनीया वा कतिपये कामं सन्तु। तान्प्रति नैवं प्रियं ब्रूमहे। किं तु, यत्सत्यं तदेव ब्रूमः। किं तत्—कमनीयतानां परिणतिर्नराकृतितया त्वय्येवावधिं प्राप्ता। अतः स्वभावोक्त्या न स्तुतिरित्यर्थः ॥१००

सारङ्गरङ्गदा

ननु कति कति सरसमधुरशेखरा लोके सन्ति, किमिति तान् हित्वा मया विवदमानः स्वोक्तिमेव स्थापयन्मामेवात्युक्त्या स्तौषीति तान्प्रति सावहेलं तं प्रति सविनयमाह—हे देव सारस्यधौरेयकाः सरसताभारवाहिनः सहस्रशः कामं सन्तु। तेषां मध्ये कमनीयतापरिमलस्वाराज्यबद्धव्रताः सर्वातिकमनीया वा कतिपये कामं सन्तु। ते ते न सन्तीत्येवं त्वया सह न विवदामहे। न च तव प्रियं ब्रूमहेऽसद्गुणाध्यारोपेण त्वां स्तौमि। किं तु सत्यमेव ब्रूमहे। यद्यतो या रमणीयतापरिणतिः सा त्वय्येत पारं गतावधिं प्राप्ता। अतः स्वभावोक्त्या नायं विवादः स्तुतिर्वेति भावः ॥१००

1. GB परमोत्कर्षं प्रकटयन्ति for विश्राम इति. GB inserts वदन्ति after प्रतिभानं. 6. CB reads स्तुतिः for अतिस्तुतिः and omits किं तु. CD एतत्तव वस्तुनिर्णयः सत्यमेवेति. CC omits सगर्वं. CB, CD insert काममिति after आह. 8. CD inserts ते after यैः. 9. CC नैव. 10. CB, CD रमणीयतानां for कमनीयतानां. CB, CD omit नराकृतितया. 11. CC भाव० for स्वभाव०. CB, CD नेयं for न. 13. KD inserts उपमानान् after तान्. 14. KD सावहेलनं. 15. KD inserts काममिति after आह. 18. KP inserts न after त्वां. 20. KB omits वा.

गलद्व्रीडा लोला मदनविनता गोपवनिता
मदस्फीतं वीतं किमपि मधुरा चापलधुरा।
समुज्जृम्भा गुम्फा मधुरिमकिरां मादृशगिरां
त्वयि स्थाने याते दधति चपलं जन्म सफलम् ॥१०१

कृष्णवल्लभा

संप्रति परममहानन्दसुधारसाभिवर्षिणः श्रीकृष्णादेव सर्वप्राकट्यसफलतां वर्णयन्नाह—गलद्व्रीडेति। हे कृष्ण त्वयि याते प्राप्ते सति चपलं त्वरितमेव जन्म प्राकट्यं सफलं दधति धारयन्ति।

सत्वरं चपलं तूर्णम्

इत्यमरः (१.१.६५)। त्वत्प्राप्त्यनन्तरमेव परमानन्दप्राप्त्या साफल्यं स्यादित्यर्थः। तत् स्थाने युक्तम्। स्थान इत्यव्ययम्। स्थाने क्रीडास्थाने वृन्दावनादाविति वा। ये प्राकट्यस्य साफल्यं दधति ते क इत्याह—गोपवनिताः। गोप्यः कीदृश्यः—गलद्व्रीडाः। गलन्ती व्रीडा लज्जा याभ्यः। अतएव लोलाश्चञ्चलाः सतृष्णा वा। मदनविनता मदनेन कामेन विनता विशेषेण नम्राः। मदनोऽपि विनतो याभ्य इति वा। मदस्फीतं मदेन स्मरभावेन स्फीतं समृद्धम्। वीतं विविधम्, विशिष्टं वा, इतम् इतस्ततः श्रीकृष्णसंगमार्थं गमनम्। ज्ञानं वा महारसोल्लासयुतदृग्वागङ्गचेष्टितविशेषाणाम्। यद्वा, वीतं वीनां श्रीवृन्दावनपक्षिणामितं गतं मदेन हर्षेण स्फीतम्। किमप्यत्याश्चर्यरूपा मधुरा चापलधुरा स्मरचापल्यभारः। यद्वा, मधुरा मथुरा। मादृशस्य तत्परिवारस्य गिरां

1. PS मदनवनिता. 2. PS मधु० for मद०, and गीतं for वीतं. 3. PS समुज्जृम्भो गुम्फो. 4. PS and Caitanyadāsa (also v. l. in Kṛṣṇadāsa) जाते for याते. 6. GB ०जन्मसाफल्यं for प्राकट्यसफलतां. 7. GB गलदिति for गलद्व्रीडेति. 11. GB क्रीडास्थले. 12. GB omits all words from ये to दधति. 12-13. GB inserts अत after इति, and omits all words from गोपवनिताः to गलद्व्रीडाः 14. GB omits मदनविनताः. 15. GB omits अपि after मदनः. GB स्मरमदेन for ०भावेन. 17. The words दृग्वागङ्ग lost in GA. GB omits वीतं. 18. GB inserts सुन्दरा before चापलधुरा.

गुम्फा रचनाः समुज्जृम्भाः। सम्यगुज्जृम्भणमुल्लासो यासां तासां गिराम्। कीदृशाम्—मधुरिमकिराम्। मधुरिमाणं किरन्ति वर्षन्ति या गिरः सदैकपदे रसविशेषोल्लासिन्यस्तासाम्। त्वयि स्थाने वृन्दावननिकुञ्जपुञ्जरूपे प्राप्ते सति गोपीगतिचापल्यवाग्गुम्फनादीनि प्राकट्यं सफलं दधतीति समुदायार्थः॥ शिखरिणी छन्दः ॥१०१

सुबोधनी

पुनर्मौनेन स्ववचनमनुमोदमानमालक्ष्य सहर्षमाह—मत्सदृश्यो या गिरस्तासां गुम्फा ग्रथनानि जन्म सफलं दधति। कस्मिन्सति—त्वयि स्थाने विषये जाते सति। कीदृशाम्—मधुरिमाणमन्तःस्फूर्त्या किरन्त्युद्वमन्ति यास्तासाम्। तज्जन्मनः स्वस्य सादृश्यं व्यञ्जयति—चपलम्। वस्तु ज्योतिः शिशु-रित्यादिष्वनवस्थितेः। यथाहमनवस्थितात्मा तथेदमपीत्यर्थः। तत्कृतः—मदेन हर्षेण स्फीतं वर्धितम्। तदपि कथम्—वीतं विशिष्टविषयमितं प्राप्तम्। अतएव मधुरं च तद् आ सम्यक् चापलं चेति तत्तथा। तस्य धुरातिशयेन किमप्य-निर्वचनीयम्। समासान्तविधेरनित्यत्वादत्प्रत्ययाभावः (पा० ५. ४. ७४)। कीदृश्यो

1-2. The words गुम्फा रचनाः lost in GA, also all words from सम्यक् to तासां. 2. GB reads कीदृशीनां and omits मधुरिमकिरां. 2-3. The words सदैकपदे रस lost in GA. GB सदैकपदैः. 3-5. All words from निकुञ्ज to छन्दः lost in GA. 7. CB, CD read सश्लाघं for सहर्षं, and insert गलदिति after आह. 8. CB, CD omit गुम्फा. CB, CD insert त्वयि विषये प्राप्ते सति चपलमपि before जन्म. 8f. For all words from कस्मिन् सति to the end of the commentary (उत्फुल्लता यासु), which CB, CD omit, they give the following parallel version: यथाहमनवस्थितात्मा तथा चापल्योद्भूता अपि मद्गिरस्त्वयि सर्वसंभवात्सार्थका एव जाता इत्यर्थः। जन्मनश्चापल्ये हेतुः—मदेन त्वत्प्राप्तिहर्षेण वर्धितम्। यतो विशेषेण किमपीतं विशिष्टमाश्रयं प्राप्तम्। कीदृशीनाम्—मधुरिमाणमेव किरन्ति यास्तासाम्। कीदृशी गुम्फा—सम्यगुज्जृम्भणं यत्र। त्वन्मुखे जृम्भणमालोक्यास्या अपि जृम्भा जातेत्यर्थः। अतो गलन्ती व्रीडा यस्याः। यतः सतृष्णा। अतो मदनेन त्वत्प्राप्त्य(CD omits त्वत्)भिलाषेण प्रेम्णा विनतोद्धता (CD omits विनतोद्धता), अतएव वक्रतया गोपवनिता यत्र। अत्र मत्वर्थीयश्च प्रत्ययः। अतश्च मधुरा। तथा, चापल्यस्यातिशयो यत्र (CD omits this sentence)॥ 8. CC आश्रये for विषये. 13. CA omits तथा.

गुम्फाः—गलन्ती व्रीडा यासु। तत्कुतः—लोलाः सतृष्णाः। तदपि कुतः—मदनेन तत्प्राप्त्यभिलाषेण विनता उद्धताः। तत्र हेतुः—वक्तव्यतया गोपवनिता यासु। मत्वर्थीयः। अतएव, सम्यगुज्जृम्भोत्फुल्लता यासु ॥१०१

सारङ्गरङ्गदा

किं च, पूर्वं ते ते मया क्वति न वर्णिताः सन्ति, किं त्विदानीमेव मत्कवित्वादिकं च सफलं जातमिति सहर्षमाह—मादृशां गिरां गुम्फा प्रथनानि त्वयि स्थान आश्रये याते प्राप्ते। वर्गीयजकारपाठः क्वचित्, तत्र जाते भूते सति। जन्म सफलं दधति। उत्तमपदार्थानां त्वत्प्राप्तावेव कृतार्थत्वमिति भावः। तदुत्तमत्वमाह, कीदृशां गिराम्—मधुरिमकिराम्। माधुर्यादिकवित्वगुणयुक्तानामित्यर्थः। कीदृश्यस्ताः—सम्यगुज्जृम्भा यत्र। पूर्वमसद्गुणाध्यासेन वर्णनात्संकुचिता इदानीं ते सहजानन्तगुणवर्णनादुत्फुल्लाः। कीदृशं जन्म—चपलं गत्वरम्, पूर्वं तादृशत्वेन व्यर्थमपि। तदेव तत्समीपे गोपीर्वीक्ष्य

एताः परं तनुभृतः

(भा० १०. ४७. ५८) इत्यादिवत्सश्लाघमाह—न केवलं वराक्यो मद्वाग्गुम्फा एव, किं तु गुणरागादिपूर्णाः श्रीगोपवनिता अपि तथा जन्म सफलं दधति। नन्वासां स्वस्वपतिमतीनां जन्म सफलमेवेति नेत्याह, पूर्वं त्वदप्राप्त्या देहत्यागस्य निश्चितत्वाच्चपलमपि रासारम्भे कासांचित्तथादर्शनात्। तद्गुणानाह—मदनेन त्वद्विषयकप्रेमविशेषेण विनता नम्राः। तत्प्रचुरा इत्यर्थः। तथा हि

प्रेमैव गोपरामाणां काम इत्यगमत्प्रथाम्

1. CA inserts यतः before लोलाः. 3. CC omits मत्वर्थीयः. 6. KP यातं for जातं. KD inserts गलदिति after आह. 9. KC transfers तदुत्तमत्वमाह from here and places it before कीदृश्यस्ताः in line 10. 9-10. KC ०गुणयुजां for ०गुणयुक्तानां. 10. KP सम्यग्जृम्भा. 12. KC, KD omit गत्वरं. 16. KC स्वे स्वे for स्वस्व-. KC, KP तदप्राप्त्या. 18 KP तद्विषयक०, KC तद्विषयैक०. 19. This passage is said to be quoted from the Gautamīya Tantra. See above commentary on verse 3 (p. 32). It is cited also in Kṛṣṇadāsa's *Caitanya-caritāmṛta* (Madhya vii) where the second half of the verse is given as follows: इत्युद्धवादयोऽप्येतं वाञ्छन्ति भगवत्प्रियाः.

इति तन्त्रे। अतः, लोलास्त्वत्प्राप्तये चञ्चलाः सतृष्णा वा। ततः, गलद्व्रीडास्त्यक्तलोकलज्जाः। तदेव तत्कैशोरमाधुर्यं वीक्ष्य सशीत्कारमिदं वय इति विवशुस्तन्माधुर्यस्तम्भितः सगद्गदमाह—इदं किमपि। वय इत्यर्थः। तथा जन्म सफलं दधाति। तदेव व्यञ्जयति—वीतं बाल्यांशेन विगतप्रायम्। नवतारुण्यांशेन कन्दर्पमदेन स्फीतम्। विशेषणाभ्यां कैशोरमित्यर्थः। ननु तदन्यत्र दिव्यादिव्यकिशोरेषु सफलमेव, इत्यत्र नेत्याह—पूर्वमन्यत्र तादृशरासकुञ्जलीलाद्यप्राप्त्या चास्थिरतया च व्यर्थमपि। तथा हि विष्णुपुराणे (५. १३. ६०)—

सोऽपि कैशोरकवयो मानयन्मधुसूदनः।
रेमे स्त्रीरत्नकूटस्थः

इत्यादि। तथा रसामृतसिन्धौ (२. १. ५४)—

वाचा सूचितशर्वरीरतिकलाप्रागल्भ्यया राधिकां
व्रीडाकुञ्चितलोचनां विरचयन्नग्रे सखीनामसौ।
तद्वक्षोरुहचित्रकेलिमकरीपाण्डित्यपारंगतः
कैशोरं सफलीकरोति कलयन्कुञ्जे विहारं हरिः॥

इति। तस्य नृत्यादिचापल्यं दृष्ट्वाह—चापलधुरा चञ्चलातिशयश्च तथा। ननु शंपामनःपवनादौ सापि पूर्णा, नेत्याह—मधुरा। एकेन वपुषासंख्याङ्गनापार्श्वे स्थित्यादिनातिमनोज्ञा। तथा हि रसामृतसिन्धौ (२. १. ४७)—

अघहर कुरु युग्मीभूय नृत्यं मयैव
त्वमिति निखिलगोपीप्रार्थनापूर्तिकामः।
अतनुत गतिलीलालाघवोर्मिं तथासौ
ददृशुरधिकमेतास्तं यथा स्वस्वपार्श्वे॥

1. KB अतः, KD अतएव for ततः. 3. KB तन्माधुर्यं वीक्ष्य स्तम्भितः. 6. KC, KD दिव्यातिदिव्य०. 11. KA and KB do not cite the whole verse, KA giving वाचा सूचितशर्वरी only, KB वाचा सूचितशर्वरीरतिकलाप्रागल्भ्यया only. 15. KC, KD ०चाञ्चल्यं for ०चापल्यं. 16. KP संपावन for शंपामनः०. KA असंख्यानां गोपीनां, KB असंख्यगोपीनां for असंख्याङ्गना०. KP पार्श्वस्थित्या. 17. KA, KB, KP insert मधुरा after स्थित्यादिना 20. KA, KP व्यतनुत.

इति पूर्वं तादृशत्वाभावाच्चपलमपि। त्वयि रम्यास्पदे प्राप्ते मद्वाग्गुम्फा न केवलं सफलाः, किं तु कैशोरलौल्यगोपाङ्गना अपि ॥१०१

भवनं भुवनं विलासिनी श्री-
स्तनयस्तामरसासनः स्मरश्च।
परिचारपरंपराः सुरेन्द्रा-
स्तदपि त्वच्चरितं विभो विचित्रम् ॥१०२

कृष्णवल्लभा

अथ विशुद्धपूर्णमधुरप्रेमरसमयस्य श्रीकृष्णस्य स्वरूपमात्रादुत्कर्षं वर्णयितुं तदन्यत्र स्वस्य चित्रबुद्ध्यभावमाह—भवनमिति। हे विभो। विविधरूपो भवतीति विभुः। अनन्तरूपेण सदा वर्तमानेत्यर्थः। भुवनमेव भवनं गृहम्। श्रीरेव विलासिनी स्त्री। तामरसासनः—तामरसं कमलमासनं यस्य सः।

पङ्केरुहं तामरसं सारसं सरसीरुहम्

इत्यमरः (१.१०.४०)। तामरसासनो ब्रह्मा, स्मरः कामश्च तनयः पुत्रः। सुरेन्द्रा इन्द्रादयः परिचारपरंपराः सेवकसमूहाः। इति तदपि त्वच्चरितं विशुद्धगोपालभावेन कृतं गोपीसहितस्मरविनोदपर्यन्तं विचित्रं विगतचित्रम्। मम कुत्रापि नाश्चर्यबुद्धिरित्यर्थः। विचित्रमिति नपुंसकमनपुंसकेन (पा० १.२.६९) इत्येकशेष एकवत्त्वं च॥ अथवा, हे विभो परिपूर्णतमसमस्तस्वरूपाद्याश्रय तदपि त्वच्चरितमेव विचित्रमद्भुतम्, न तु मद्विधानां मनोहरम्। किं तत्—भवनं भुवनमित्यादि पूर्ववत्॥ औपच्छन्दसिकं छन्दः ॥१०२

2. KA adds on the margin after गोपाङ्गनाः : तव कैशोरमाधुर्यनृत्यादिचापल्यमपि. 3. PS omits this verse. 9. GB विविधः for विविधरूपः. 10. GB inserts लोकत्रयं after भुवनं. 11. GB omits तामरसासनः here, and also in line 13. 14. GA omits सेवकसमूहाः. GB omits इति. 16. GB omits अनपुंसकेन and reads इत्यादि for इति. 17. GB omits एकवत्त्वं च. 18. GB inserts इत्याह after किं तत्.

सुबोधनी

अथ

कामं सन्तु (श्लो० १००)

इत्यादि पूर्वोक्तमनूद्य तद्वैशिष्ट्यं द्रढयति—हे विभो सर्वावतारिन्, यस्मिंस्त्वच्चरिते भुवनं जलं भवनं तन्मध्ये गृहम्, विलासिनी श्रीर्लक्ष्मीः, तनयस्तामरसासनो ब्रह्मा, तदपि चित्रं त्वच्चरित्रम्। किमीदृशमैश्वर्यमयतया—नेत्यपेरर्थः। यत्र च त्वद्भवनं द्वारवत्याख्यम्, तनयः स्मरः प्रद्युम्नः, च-काराद्विलासिन्यो रुक्मिण्यादयः, सुरेन्द्रा अवतारितेन्द्राद्याः परिचारपरंपराः सेवकाः, तदपि किमीदृशं प्रेमभक्तिमयतया,—न। अतः केवलप्रेममयं गोपीभिः सह रासादि त्वच्चरितं सर्वोत्तममेव ॥१०२

सारङ्गरङ्गदा

भावोद्भावितहर्षेर्ष्याप्रौढिदैन्यार्तिमिश्रितम्।
पुनः स तद्वचः श्रोतुं कौतुकी तमवादयत्॥'

ननु　　　ईश्वरः सर्वभूतानां हृद्देशे

(भगवद्गीता १८. ६१) इत्यादौ तमेव प्रतिपद्यस्वेत्यादिगीतादिशास्त्रोक्तभजनीयमीश्वरं हित्वा किमिति गोपकुमारं मामेव सर्वोत्तमत्वारोपेण स्तुवन्नाश्रयसीति तत्तद्भावविवशः सहस्तचालनमाह—हे विभो सर्वावतारिन्, यस्मिंस्त्वच्चरिते भुवनं भवनं

4. CB इत्युक्तमनुवदन् for इत्यादि पूर्वोक्तमनूद्य ; CD is corrupt, it omits all words from अथ to अनूद्य and appears to read सन्त्वित्युक्तं तदेव. CB, CD तदेव for तद्वैशिष्ट्यं. CB inserts भुवनमिति after द्रढयति. 4-10. CB, CD omit all words from सर्वावतारिन् to the end of the commentary (सर्वोत्तममेव) and give the following parallel version instead : यद्यपि (CD omits) भुवनं जलं गृहम्, श्रीर्गृहिणी, पुत्रो ब्रह्मा कामश्च, इन्द्रादयः सेवकाः, तदपि ततोऽपीदं त्वच्चरितं विचित्रं (CD omits) मधुरैश्वर्यमयतयात्यद्भुतमित्यर्थः. 5. CC omits श्रीः. 6. CC omits अपेः. CA omits च after यत्र. 9. CA omits किं. CC केवलं for केवल-. 10. CA ०चरणाब्जं for ०चरितं. 12. KC, KD भावोद्गारि० for भावोद्भावित०. 17. KP ०विशेषविवशः for ०विवशः. KP inserts भुवनं भवनमित्यादि after आह. KA, KB insert एव after भुवनं.

सर्वान्तर्यामित्वादाश्रयः। तत्ततोऽप्यनुमेयैश्वर्यमयचरित्रादद्भुताद्दृश्यमानस्य तदेवं नेत्ररसायनं चरितं विचित्रमुत्तमम्। यद्वा, तदपि त्वच्चरितं तादृशं न भवतीति को नाम विवदते। तदपीति—इदं तु विचित्रमद्भुतमेवेत्यपेरर्थः। एवमग्रेऽपि ज्ञेयम्। नन्वेवं चेत्तर्हि दृश्यैश्वर्या विष्णुवामनाजितादयः सन्ति, तानेव भजेति सस्मितमाह—यत्र सुरेन्द्रा इन्द्रादयः परिचारपरंपराः। अनुगा इत्यर्थः। ततोऽपि युद्धादिमयपालनकेलिरूपात्यद्भुताच्चरितादिदं त्वच्चरितं मधुरैश्वर्यमयं विचित्रमप्युत्तमम्। ननु युद्धादिविमुखो गर्भोदकशायी पुरुषोऽस्तीत्यधोनेत्रचालनमाह—यत्र तामरसासनो ब्रह्मा तनयः, ततोऽपि सृष्ट्यादिकेलिरूपादतिसर्वाद्भुताच्चरितादिदं मधुररसमयं त्वच्चरितमतिसर्वोत्तमम्। ननु त्वं मधुररसरसिकभक्तोऽसि, तत्परमव्योमेशं लक्ष्मीशं भजेति सोर्ध्वभ्रूचालनमाह—यत्र श्रीरेका विलासिनी ततोऽपि मधुररसमयादतिसर्वाद्भुततराच्चरितादिदं

नायं श्रियोऽङ्ग

(भा० १०. ४७. ६०) इत्यादिसंस्तुतविलासिनीकोटिविलासवलितं त्वच्चरितमतिसर्वोत्तमतरम्। नन्वेवं चेत्तर्हि रुक्मिण्यादिरमणं मामेव भजेति सशिरश्चालनमाह—यत्र स्मरश्च तनयः। च-कारात्साम्बादयः। ततोऽपि स्वीयाभिर्दशदशपुत्रवतीभिः संख्याताभिस्ताभिः सह केलिरूपादतिसर्वाद्भुतादद्भुततमाच्चरितादिदं परकीयासंख्यनृत्यत्किशोरीकुलैः सह रासादिकेलिमयं त्वच्चरितमतिसर्वोत्तमतममेव मया सेव्यमिति भावः।

1. KP आश्रयन् for आश्रयः. KA omits तत् before ततः. 2. KC, KD insert विचित्रमद्भुतं before तादृशं. 3. KB omits एव after अद्भुतं. KP omits अपेः; KC, KD read अपर- for it. 4. KC, KD omit तानेव भज. 5. KC, KD सुरेन्द्रादयः for सुरेन्द्रा इन्द्रादयः. 7. KD गर्भोदशायी. 8. KA omits चरितात्. 9. KB, KD तच्चरितं for त्वच्चरितं. KC, KD insert विचित्रं after त्वच्चरितं. KB omits अति-. KC ०रसिकः for ०रसिकभक्तः. 10. KC परव्योमेशं. 11. KB ०अद्भुततत्- for ०अद्भुततरात्. KA त्वच्चरितात् for चरितात्. 13. KA ०स्तुत० for ०संस्तुत०. KP तच्चरितं. 15. KC, KD insert च लक्षशः after साम्बादयः. 16. KP संख्यातीताभिः for संख्याताभिः. KP ०सर्वाद्भुत० for ०सर्वाद्भुताद्भुत०. 17. KC ०अन्य० for ०नृत्यत्०. KD ०किशोरिका० for ०किशोरी०. KP ०केलिमय- for ०केलिमयं. KP inserts विचित्रं after त्वच्चरितं. KA, KD, KP ०सर्वोत्तमं, KC ०सर्वोत्तमोत्तमं for ०सर्वोत्तमतमं.

बहूनि त्वच्चरितानि चित्राण्येव तथाप्यदः ।
मत्सेव्यं मधुरैश्वर्यरूपकेलिभिरुत्तमम् ॥१०२

देवस्त्रिलोकीसौभाग्यकस्तूरीमकराङ्कुरः ।
जीयाद् व्रजाङ्गनानङ्गकेलिलालितविभ्रमः ॥१०३

कृष्णावल्लभा

तर्हि तव मनोहरं वस्तु कीदृगित्यत आह—देव इति। दीव्यति क्रीडति द्योतते मोदते माद्यति वेति देवः श्रीकृष्णो जीयात्। सर्वोत्कृष्टस्वरूपो मम चक्षुर्विषयतया प्रकटो भवत्वित्यर्थः। कीदृशः—त्रिलोकीसौभाग्यकस्तूरीमकराङ्कुरः। त्रयाणां लोकानां समूहस्त्रिलोकीत्युपलक्षणम्। सैव नायिका तस्याः सौभाग्यप्रदः कस्तूरीमकराङ्कुरः पत्राङ्कुर एव। यद्वा, त्रिलोक्यां सौभाग्यप्रदः कस्तूरीमकराङ्कुरो यत्र। आलिङ्गनेन लग्नत्वात्। अतएव—व्रजाङ्गनानङ्गकेलिलालितविभ्रमः। व्रजाङ्गनानामनङ्गकेल्या लालितः पोषितो विभ्रमो विलासो यस्य सः॥ अनुष्टुप् छन्दः॥१०३

सुबोधनी

तच्चरितस्य श्रेष्ठत्वविचित्रत्व०प्रत्यर्यैतस्मिन्निजेष्टदेवत्वं प्रतिपादयन्नाह—देवो जीयात्। येन त्वमपि विशेषितः स ममेष्टदेवः सर्वोपरि विराजताम्। कोऽसौ—व्रजाङ्गनानां प्रेममयकेलिभिर्लालितः संवर्ध्य प्रकटीकृतो यो विभ्रमो विलासः

1. KA ०चरित्राणि विचित्राणि for ०चरितानि चित्राण्येव. 3. PS omits this verse. 7. GB omits द्योतते. 8. GB त्रिलोकीति for the whole phrase त्रिलोकीसौभाग्य etc. 9. GB reads समाहारः for समूहः and inserts सर्वेषां after उपलक्षणं. 10. GB कस्तूर्याः for कस्तूरी-. 11. GB omits the phrase व्रजाङ्गनानङ्गकेलि etc. 15. CB, CD omit all words from श्रेष्ठत्व० to आह and read instead : श्रेष्ठत्वविचित्रतयोर्हेतुमाह—देव इति. CC ०त्यर्यैव तस्मिन्. 16. CB, CD insert इत्यर्थः after विराजतां. CB, CD कोऽयं स इत्याह for कोऽसौ. 17. CB, CD omit all words from संवर्ध्य to ममैव (p. 284, l. 1) and read instead : विष्कृतो (CD तथाविष्कृतो) यो विलासः सः, अतएव.

सः। न केवलं ममैव त्रिलोक्या अपि सौभाग्यव्यञ्जककस्तूरीमकराङ्कुरो यः। त्वन्मधुररसमयविलासश्रवणादिरेव त्रिलोक्याः सौभाग्यालङ्कार इत्यर्थः। तद्रसस्य श्यामत्वात्कस्तूरीसाम्यम् ॥१०३

सारङ्गरङ्गदा

ननु ज्ञातं व्रजलीलैव तेऽभीष्टा, भद्रम्, अत्रापि बाल्यपौगण्डलीले स्त इत्यर्धोक्ते ससंभ्रमं तर्जन्या निर्दिशन् भङ्ग्याह—अयं देवो रासक्रीडापरः किशोरशेखरो जीयात् सर्वोपरि विराजताम्। किं ममान्यैरित्यर्थः। आं किशोरलीलैव तेऽभीष्टा, भद्रम, तत्रापि गोचारणादिलीलास्तीति सभ्रूभङ्गमाह—व्रजाङ्गनानामनङ्गकेलिभिर्लालितः संवर्ध्य मधुरीकृतो विभ्रमो विलासो यस्य। तादृशस्त्वमेवेत्यर्थः। नन्वेतादृशोऽहं सुदुर्लभः

नाद्यापि

(श्लो० ९४) इत्यादौ त्वयापि तथैवोक्तमेवेत्यत्राह—सत्यम्, किं तु तादृशोऽपि भवान्न केवलं ममैव त्रिलोक्या अपि सौभाग्यव्यञ्जककस्तूरीमकराङ्कुरः। तस्यास्त्वमेव तत्कल्पिततद्रूप इत्यर्थः। त्वत्करुणैव त्वां सुलभं करोतीति भावः ॥१०३

प्रेमदं च मे कामदं च मे
वेदनं च मे वैभवं च मे।
जीवनं च मे जीवितं च मे
दैवतं च मे देव नापरम् ॥१०४

1. CB, CD omit अपि. CC ०मकराङ्कः for ०मकराङ्कुरः. CB inserts सः after यः. 2-3. CB, CD omit all words from त्वन्मधुर० to कस्तूरीसाम्यं and read instead: श्यामोज्ज्वलरसविलासस्य तथा वर्णनात्कस्तूरीसाम्यम्। तद्विलासाव(CD omits अव)कलनेनैव त्रिलोक्याः सौभाग्यमिति भावः. 5. KB omits अत्र. 6. KB inserts सः after देवः. KC, KD क्रीडापरः for रासक्रीडापरः. 7. KP omits किं. 8. KD सभ्रूभङ्ग्या. 10. KP दुर्लभः for सुदुर्लभः. 12. KP omits एव after उक्तं. KB omits अत्र. 14. KB, KC, KD त्वत्कल्पित०. KP ०कल्पितः for ०कल्पित-. KC, KD, KP तत्कल्पा.

कृष्णवल्लभा

संप्रति सर्वात्मभावेन श्रीकृष्णचन्द्रस्यैव स्वाश्रयणीयत्वमाह—प्रेमदं चेति। हे देव नापरम्। अपरं त्वदतिरिक्तं मादृशां नास्तीति भावः। तथा हि—प्रेमदं च मे। त्वत्तोऽपरं मम प्रेमदं नास्ति। न हि मदभीप्सितविशुद्धमधुर-प्रेमविशेषोऽन्येन दातुं शक्यः। कामदं च मे नापरम्। मत्कामितानन्द-प्रदत्वात्। वेदनं च मे। वेदनं निश्चयज्ञानं च मे त्वमेव। त्वदतिरिक्तं नान्यज्ज्ञानप्रदमिति भावः। ननु निश्चयज्ञानं नैश्चित्ये सति महापाण्डित्य-संपत्त्या विचारपरतायां स्यान्न त्वन्यथा, तत्राह—वैभवं च मे। वैभवं संपत्त्वमेव। पाण्डित्यविचारसंपत्त्वमेवेत्यर्थः। ननु केवलप्रेम्णि लब्धे जीवननिर्वाहः कथं स्यात्तत्राह—जीवनं च मे। जीव्यते येनोपायेन तज्जीवनं त्वमेव। त्वयैव जीविष्यामीति भावः। तत्किं प्राणधारणमिष्टम्, नेत्याह—जीवितं च मे। जीवितं प्राणधारणमपि त्वमेव। त्वदर्थमेव प्राणधारणेच्छा, न स्वतः। त्वत्सेवा-द्यभावे तदैव गच्छन्तु प्राणाः। किं च—दैवतं च मे। दैवतमिष्टदेवस्त्वमेव। परममहाभक्तिसंभ्रमेण सेव्य इत्यर्थः। यद्वा, दैवतं देवतासमूहः। सर्वदेवकृत्यं मम तव्येवेति भावः। चैरत्रानुक्तसमुच्चयो ज्ञातव्यः॥१०४

सुबोधनी

तमेव निजाभीष्टदातृतया विशिनष्टि—हे देव त्वद्विलास एव ममेष्टदैवतं

3. GB कीदृगित्याह for तथा हि. 7. GB omits अन्यत्. After भावः GB inserts वैभवं च नापरं. GA नैश्चिन्त्ये. 7-8. GB ज्ञानाभ्यासेन for महा-पाण्डित्यसंपत्त्या. 8. GB त्वमेव for च मे. GB omits वैभवं संपत्त्वमेव. 9. GB ज्ञान॰ for पाण्डित्य॰. 10. GB omits जीवनं before त्वमेव, and inserts नापरं after त्वमेव. 12. GB omits जीवितं before प्राण॰. GB inserts नापरं after त्वमेव. GB अन्यथेति for स्वतः. 12-13. GB ॰सेवाभाव एव for ॰सेवाद्यभावे तदैव. 13. GB प्राणा गच्छन्त्विति for गच्छन्तु प्राणाः. GB त्वमेव for च मे. 14. GB inserts नापरः after सेव्यः. 15. GB inserts अस्तु before इति. 17. CA मम for तं. CB, CD insert देवं after तमेव. CC transposes तमेव and निजाभीष्टदातृतया. CB, CD निजाभीष्ट(CD inserts दातृ)तयापादयन्नाह—प्रेमदमिति for निजाभीष्टदातृतया विशिनष्टि. After देव CC inserts प्रियप्रेमाविष्टतया[नु]चरैरनुसंधातुं समर्थस्य. CC ते for त्वत्-

नापरम् । च एवार्थे । नापरमिति सर्वत्रान्वेति । कोऽत्र हेतुः—प्रेमदं च मे । त्वद्विलासश्रवणादेरेव प्रेमोत्पादकत्वात् । ननु बाल्यपौगण्डविलासोऽपि तथा—कामदं च मे । तद्विशिष्टाभिलाषप्रदमित्यर्थः । नैतन्मात्रम्—वेदनं च मे । तत्परिपाटीं वेदयतीति तथा । किं च—वैभवं च मे । स एव मम सर्वसंपदित्यर्थः । किमपरम्—जीवनं च मे । जीवयतीति जीवनहेतुः । किमुत तद्धेतुस्तदपि स एव—जीवितं च मे । त्वद्विलासाश्रयं विना ममान्यत्किंचिदपि नास्तीत्यर्थः ॥१०४

सारङ्गरङ्गदा

पुनः सस्मितं किमपि विवक्षुं तं वीक्ष्यासहिष्णुः ससंभ्रमं सदैन्यमाह—हे देव रासलीलापर मम दैवतमाश्रयणीयं त्वत्किशोरशेखरादपरं न । च एवार्थे । नैवेत्यर्थः । ननु कोऽत्र हेतुरिति तं सूचयन्नाह—प्रेमदं च मेऽपरं न । एवमग्रेऽपि योज्यम् । यतस्त्वत्प्राप्तिहेतोः प्रेम्णस्त्वमेव मे दातेत्यर्थः । ननु कौमारपौगण्डलीलापरोऽहमपि प्रेमदस्तल्लभ्यश्च, तत्राह—कामदं च मे । तज्जातीयप्रेमदं च त्वमेव । अत एतद्भावैकविषयात्किशोरशेखरात्त्वदपरं मम नाश्रयणीयम् । नैतन्मात्रम्—वेदनं च तथा । वेदयतीति कर्तरि ल्युट् । तत्परिपाटीशिक्षकश्च त्वमेवेत्यर्थः । तदुक्तम् (श्लो० १)—

शिक्षागुरुश्च

1. CB, CD read नैवापरं for the first नापरं and omit च एवार्थे. CB, CD insert यतो (CD ततो) मम before प्रेमदं. 2. CB, CD omit मे. CB तद्विलास०. 2-6. CB, CD omit all words from ननु to जीवितं च मे and read instead : ततो (CD अतो) मेऽभिलाषप्रदं च। यतो मे वेदनं च त्वत्प्राप्तिप्रकाररूपज्ञापनं(CD ०ज्ञापकं) च। अतो मे वैभवं च । तच्छ्रवणादिक(CD ०दिकमेव मे)वैभवमित्यर्थः। किमपरम्—मे जीवितं च, यतो मे जीवनहेतुश्च। 5. CC inserts जीवनं after जीवयतीति and reads तत्र हेतुः for जीवनहेतुः. 11. KA, KB त्वमेव for नैव. 12. KP तत्प्राप्ति०. KC, KP omit मे. 13. KC, KD बाल्य० for कौमार०. 14. KC, KD तथा for त्वमेव, after which KB inserts इत्यर्थः. KC, KD एव तत्- for एतत्-. KD किशोरात् for किशोरशेखरात्. KC, KD मया for मम.

इति। किं वा, अये मूढ भक्त्यात्मज्ञानम्, यतो मोक्षः, तत्त्वपेक्ष्यमित्यत्राह— वेदनं तज्ज्ञानं च मे। त्वमेवेत्यर्थः। ननु न भवतु शुद्धभक्तत्वाज्ज्ञानादरः, वैकुण्ठसंपत्तिः प्रार्थ्यैवेत्यत्राह—वैभवं च तथा। त्वमेव मे सर्वसंपदित्यर्थः। किमुच्यते वैभवम्, तदप्राप्तावपि जना जीवन्ति, त्वद्विना त्वहं म्रिय इत्याह— जीवनं च तथा। जीवयतीति जीवनम्। तद्धेतुरित्यर्थः। किमुच्यते तद्धेतुः, तदपि त्वमित्याह—जीवितं च मे त्वदपरं न। तत्किमित्यन्योपदेशैर्मामुपेक्षस इति भावः ॥१०४

माधुर्येण विवर्धन्तां वाचो नस्तव वैभवे।
चापल्येन विवर्धन्तां चिन्ता नस्तव शैशवे ॥१०५

कृष्णवल्लभा

हे विभो किमत्र वक्तव्यम्। वाचां शक्तिरेतादृशी नास्ति, यथा तव रूपलावण्यमाधुर्यादिसंपद्वृद्धिस्तथैव मम वाक्प्रसरः स्यात्। तथापीदं प्रार्थये— माधुर्येणेति। तव वैभवे रूपलावण्यादिसंपत्तौ माधुर्येण सह नोऽस्माकं वाचो विवर्धन्ताम्। तव शैशवे चापल्ये। यद्वा, शिशुसंबन्धितरुणिमा शैशवम्। कैशोरमित्यर्थः। चापल्येन सह नोऽस्माकं चिन्ता अनुस्मृतयो विवर्धन्ताम्। तत्र धैर्यं माभूत्। तच्चापल्येऽस्माकमपि वाङ्नेत्रश्रुतिचापल्यं स्यादित्यर्थः॥ अनुष्टुप् छन्दः ॥१०५

1. KA तत्त्वतप्रेक्ष्यं, KC, KD तदुपेक्ष्यं for तत्त्वपेक्ष्यं. KB omits अत्र before आह. 2. KA omits न but reads ज्ञानानादरः for ज्ञानादरः. KB, KD, KP omit न. KB, KP तज्ज्ञाना० for ज्ञाना०. 3. KD omits अत्र before आह. KP omits मे. 4. KP तद्विना. 6. KB, KP omit मे. KC उपदेशैः for अन्योपदेशैः. 8. PS विजृम्भन्तां for विवर्धन्तां. 11. GB inserts अथ before हे. GB बहूक्तेन for अत्र वक्तव्यं. GB तादृग्वाक्सामर्थ्यं for वाचां शक्तिरेतादृशी. 12. GB ०संपद्वर्धते for ०संपद्वृद्धिः. GB inserts इत्याह after प्रार्थये. 14 GB inserts तत्र समर्थातीर्भवन्तु after विवर्धन्तां. GB inserts तथा before तव शैशवे. GB omits यद्वा but inserts वा after शैशवं.

सुबोधनी

ततस्तदेव प्रार्थयन्नाह—तव वैभवे सौन्दर्यविलासैश्वर्यादौ नो वाचो माधुर्येण विवर्धन्ताम्। तत्तन्माधुरीवर्णनसमर्था भवन्त्वित्यर्थः। तथा, तव शैशवे नश्चिन्तास्त्वत्प्राप्त्युत्कण्ठाश्चापल्येन विवर्धन्ताम्। त्वत्कैशोरस्मरणमपि चापल्येन भवत्वित्यर्थः ॥१०५

सारङ्गरङ्गदा

ततः, साधु लीलाशुक साधु, त्वद्दृढतया प्रीतोऽस्मि, तन्मद्दर्शनं विफलं न स्यात्, प्रार्थय वाञ्छितमिति भङ्ग्या तेनाम्रेडितः स्वेप्सितं भङ्ग्या प्रार्थयन्नाह—तव वैभवे वाग्विषयातीते सौन्दर्यविलासैश्वर्यादौ नोऽस्माकं वाचो माधुर्येण विवर्धन्ताम्। तत्तन्माधुरीवर्णनसमर्था भवन्त्विति भावः। तथा, तव शैशवे कैशोरेऽप्योग्यदेहादीनामपि नश्चिन्ताः प्राप्त्युत्कण्ठया तच्चिन्तनानि चापल्येन विवर्धन्ताम्। अयमेव मे वर इत्यर्थः ॥१०५

यानि त्वच्चरितामृतानि रसनालेह्यानि धन्यात्मनां
ये वा शैशवचापलव्यतिकरा राधावरोधोन्मुखाः।
या वा भावितवेणुगीतगतयो लीला मुखाम्भोरुहे
धारावाहिकया वहन्तु हृदये तान्येव तान्येव मे ॥१०६

कृष्णवल्लभा

अथ परममधुरश्रीकृष्णलीलानामविच्छिन्नप्रवाहरूपेण स्फूर्ति प्रार्थयते—यानीति।

2. CD अतः for ततः. After आह CB, CD insert माधुर्येणेति CB, CD omit all words from वैभवे to नो and read instead : तवाचिन्त्यैश्वर्येऽस्माकं. 3. CB तन्माधुर्य०, CD तत्तन्माधुर्य० for तत्तन्माधुरी०. CA भावः for अथः. 4. CB, CD omit त्वत्प्राप्त्युत्कण्ठाः, and insert एव before विवर्धन्तां. 5. CB inserts एव before भवतु. 10. KC, KD वा for भावः. KD omits कैशोरे. 14. PS राधापराधो०. 15. PS लीलामुखा०.

हे कृष्ण तान्येव तान्येव मे हृदये धारावाहिकया वहन्तु प्रवहन्तु। तानि कानीत्यत आह—यानि धन्यात्मनाम्, धन्य आत्मा येषां तेषाम्, साक्षात्कारानुभवविराजमानमनसां त्वच्चरितामृतानि, तव चरितान्येवामृतानि, रसनालेह्यानि। रसनातादात्म्यापन्नमनसा भावाविष्टेनास्वाद्यानीत्यर्थः। ये वा शैशवचापलव्यतिकराः। शिशुसंबन्धितरुणिमा शैशवं कैशोरम्, तच्चापलं चेति, तेन व्यतिक्रियन्ते संबध्यन्ते चेष्टाविशेषाः। राधाया अवरोधोऽवरोधनं ग्रहणरूपं तत्र तदर्थं वोन्मुखाः। यद्वा, राधैवावरोधः प्रिया तस्यामुन्मुखाः। या वा लीला मुखाम्भोरुहे भावितवेणुगीतगतयो भाविता भावयुतास्ताश्च ता वेणुगीतस्य गतयो गमकादिरूपा इति॥ शार्दूलविक्रीडितं छन्दः ॥१०६

सुबोधनी

अथ दैन्योदयाद्भावितदर्शनं संभाव्य तन्निस्तारोपायं प्रार्थयन्स्वाभीष्टं मुक्तकण्ठतयाह—यानि यानि प्राग्वर्णितानि तच्चरितामृतानि तान्येव तान्येव मे हृदये प्रवाहरूपेण स्फुरन्तु। कीदृशानि—तच्चरितामृतवासितान्तःकरणानामेव पेयानि। तथा—ये वा, चार्थे वा, कैशोरचापल्यसमूहास्ते तेऽपि। कीदृशाः—राधाया अवरोधने उन्मुखास्तत्रोद्यताः। किं च, याश्च मुखाम्भोरुहे लीलाः काममदोद्गारि-

1. GB omits all words from हे कृष्ण to आह. 2. GB omits धन्य आत्मा येषां तेषां. 3. GB omits त्वच्चरितामृतानि. 5. GB omits शैशवचापलव्यतिकराः. 7. GA दानादि० for ग्रहण०. 8 GB inserts श्रीमुखकमले after मुखाम्भोरुहे. GB omits भावितवेणुगीतगतयः. 9. After इति GB inserts: तानि तान्येव मे हृदये धारावाहिकया वहन्तु प्रवहन्तु स्फुरन्त्वित्यर्थः. 11-12. CB, CD omit all words from दैन्योदयात् to आह and read instead: ग्रन्थार्थमुपसंहरंस्तदावेशविवशः स्वाभीष्टमेवोन्मुक्तकण्ठतया विवृणोति. 12. CB inserts यानीति before यानि यानि. 13. CB, CD धारावाहिकतया वहन्तु for प्रवाहरूपेण स्फुरन्तु. 14. CB, CD insert मद्वर्णिता, CC वात्र चार्थे after तथा. CB, CC omit चार्थे वा, CD omits ये वा चार्थे वा. CC inserts ये च before कैशोर०. CC does not repeat ते. 15. CB, CD insert इत्यर्थः after उद्यताः. CB, CD या वा for किं च याश्च.

स्मितादिभङ्ग्यस्तास्ताश्च। कीदृश्यः—स्वमाधुर्येण मिश्रीकृता वेणुगीतस्य गतयो याभिः। सदैतद्दर्शनभाग्यहीनतयैतत्स्फूर्तिरपि स्यादित्यर्थः ॥१०६

सारङ्गरङ्गदा

नन्विदं ते सहजमेव, तद्विशेषः प्रार्थ्यतामित्यत्राह—यानि त्वच्चरितामृतानि श्रीराधया सह निकुञ्जरासलीलादीनि तान्येव तान्येव। न त्वन्यानीत्यर्थः। मे हृदये धारावाहिकया प्रवाहरूपेण वहन्तु। कीदृशानि—धन्यात्मनां रसनालेह्यानि श्रीशुकादिभिरास्वादनीयानि। तथा—ये वा, चार्थे वा-शब्दः, ये च शैशवचापलव्यतिकराः कैशोरचाञ्चल्यविस्तारास्ते त एव तथा वहन्तु। कीदृशः—दानपुष्पाहरणवर्त्मन्यादौ राधाया योऽवरोधस्तत्रोन्मुखाः। सदा तदुत्कण्ठावन्त इत्यर्थः। तथा, या याश्च मुखाम्भोरुहे लीलाः काममदोद्गारिस्मितादिभङ्गीविशेषास्तास्ताश्च तथा वहन्तु। कीदृशः—भाविताः स्वमाधुर्यमिश्रीकृता उत्पादिता वा वेणुगीतस्य नूतनगतयो याभिस्ताः ॥१०६

भक्तिस्त्वयि स्थिरतरा भगवन्यदि स्या-
द्दैवेन नः फलति दिव्यकिशोरमूर्तिः।
मुक्तिः स्वयं मुकुलिताञ्जलि सेवतेऽस्मा-
न्धर्मार्थकामगतयः समयप्रतीक्षाः ॥१०७

कृष्णवल्लभा

संप्रति पूर्णमधुररसमयश्रीकृष्णस्वरूपं समस्तशक्तिगुणादिपरमोत्कर्षविश्राम-

1. CB, CD ता अपि for ताश्च. CB, CD स्वेन for स्वमाधुर्येण. CB, CD सूक्ष्मादिगतयः for गतयः 2. CB, CD omit all words from सदैतत् to स्यात् and read instead : सदै(CD तदै)तद्दर्शनभाग्यं मे कथं स्यादतः प्रवाहरूपेणैतत्स्फूर्तिरेवास्तु (CD ०वास्ति). CC एव तत्० for एतत्०. 4. Some Mss तच्चरिता०. 5. KP does not repeat तान्येव. 7. KC वा for वा-शब्दः. KP omits च after ये. 11. KD omits तथा. 13. PS स्थिरतया 14. PS फलितदिव्यकिशोरवेषे Gopāla Bhaṭṭa ०किशोरवेषः.

स्थानम्, तदनुभवाय तदैकान्तिकमहाभक्तिमानपि भगवन्मात्रे साधनरूपां परमां भक्तिं कुर्वाण आह —भक्तिस्त्वयीति। हे भगवन् भगवत्स्वरूपमात्र, यदि त्वयि स्थिरतरा भक्तिः स्यात्तर्हि दैवेन भाग्येन। यद्वा, देवानां समूहो दैवं तेन। मदभीष्टस्वरूपश्रीकृष्णस्यैव रूपभेदानां भगवतां शुभसंकल्पेनेत्यर्थः। दिव्यकिशोरवेषः—दिव्यमद्भुतं किशोरं वपुरेव वेषो भूषणं यस्य सः। फलति प्रव्यक्तः सन्मम दीर्घाया आशावल्याः फलतां प्राप्नोतीत्यर्थः। ननु सर्वतो वैराग्यं चेदशेषनिवृत्त्या स्वात्मसुखरूपां मुक्तिं गृह्णीत, न चेद्विरागो धर्मनिष्ठामाश्रयत, अर्थान्वा गृह्णीत कामसुखान्वा, नेत्याह—मुक्तिरिति। मुक्तिः सालोक्यादिरूपा श्रीकृष्णनामोच्चारणमात्र एव स्वयमप्रार्थितैव मुकुलिताञ्जलि। मुकुलितोऽञ्जलिर्यस्मिन्कर्मणि तद्यथा भवति तथा। नोऽस्मान्सेवते। धर्मार्थकामरूपा गतयोऽपि समयमवसरं प्रतीक्षन्ते। मनागपि तत्र दृष्ट्यभावात्। कदास्मासु कृपादृष्टिः स्यात्तदा तान्वयं भजाम इत्यर्थः॥ वसन्ततिलकं छन्दः॥१०७

सुबोधनी

नन्वेतत्सर्वं त्वय्यास्त एव, तत्किमिति याचस इत्याशङ्क्याह—हे भगवन् यदि मे भक्तिः स्थिरतरा त्वयि स्यात्तदा दिव्यकिशोरमूर्तिर्भगवान् दैवेन स्वत एव प्राप्तः स्यात्, किं प्रार्थनया। मुक्तिस्तु मुकुलिताञ्जलि यथा स्यात्तथा स्वयमेवास्मान्सेवते। अनाद्यविद्यामुन्मोच्य स्वां स्फोरयतीत्यर्थः। धर्मार्थ-

6. GB अभिव्यक्तः for प्रव्यक्तः. 7. GB तद्यशेष० for अशेष०. GB गृहाण for गृह्णीत. 8. GB आश्रय for आश्रयत. GB omits गृह्णीत. 9. GB omits मुकुलिताञ्जलि. 10. GB omits यस्मिन्कर्मणि and reads यथा तथा for तद्यथा भवति तथा. 11. After प्रतीक्षन्ते GB inserts इति प्रतीक्षाः. 12. GB reads तथा for तदा, and omits तान्. 14. CC इदं for एतत्. CB, CD omit all words from ननु to आह and read instead : मयि तत्साधनासद्भावात्केवल(CD केवलं)कृपयैव त्वया तत्संपादनीय(CD तत्संभावनीयमित्याह) भक्तिरिति. 15. CB, CD transpose भक्तिः and स्थिरतरा. CA त्वपि for त्वयि. CB, CD भवान् for भगवान्. 16. CB, CD insert सदा after एव. CA inserts तत्- before प्रार्थनया. CB, CD insert इत्यर्थः after प्रार्थनया. CD omits तु. 17. CD भजते for सेवते. CB, CD अनुभावयति for स्फोरयति.

कामानां फलान्यपि त्वच्चरणसेवाकालप्रतीक्षकाः स्युः। अतस्तद्भावात्त्वां प्रार्थयामीति भावः ॥१०७

सारङ्गरङ्गदा

ननु पुरुषार्थचतुष्टयं पञ्चमपुरुषार्थमत्प्रेमफलं मां च साक्षात्प्राप्तं हित्वा मल्लीलास्फूर्तिं किमिति प्रार्थयस इत्यत्र भक्तिसिद्धान्तोट्टङ्कनपूर्वकं स्वचातुरीं भङ्गया कथयन्नाह—हे भगवन् सर्वज्ञ यया लीलास्फूर्तिरूपया प्रेमलक्षणया भक्त्या त्वं साक्षात्प्राप्तोऽसि सा त्वयि भक्तिः स्थिरतरा यदि स्यात्तदा दैवेन स्वत एव दिव्यकिशोरमूर्तिरीदृग्भगवान् फलति प्राप्तो भवति। मुक्तिस्तु मुकुलिताञ्जलि यथा स्यात्तथा मां गृहाण गृहाणेति वदन्त्यस्मान्सेवते। धर्मार्थकामगतयस्तु पश्चात्स्थित्वा कदाचिदस्मानीक्षते वेति समयप्रतीक्षास्तत्प्रतीक्षका भवन्ति। तत्किमित्यात्मानं दत्वा वरेण मां छन्दयसीति भावः ॥१०७

जय जय जय देव देव देव
त्रिभुवनमङ्गलदिव्यनामधेय।
जय जय जय देव कृष्णदेव
श्रवणमनोनयनामृतावतार ॥१०८

कृष्णवल्लभा

अथ परममहाभक्तिसंभ्रमेण श्रीकृष्णं स्तौति—जय जयेति। हे जय देव।

1. CC ०कामफलानि for कामानां फलानि. CD ०प्रतीक्षाः for ०प्रतीक्षकाः. 1-2. CB, CD कृपयैव स्फोरयेत्यर्थः for त्वां प्रार्थयामीति भावः. 4. KP ०मयं प्रेम० for ०मत्प्रेम०. 5. KD मल्लीलादिस्फूर्तिं. KC स्वभङ्गया, KD स्वभङ्गि (!) for स्वचातुरीं भङ्गया. 6. KP inserts भक्तिस्त्वयीति after आह. KC, KD ०स्फूर्तिप्रेम० for ०स्फूर्तिरूपया प्रेम०. 7. KC, KD, KP भवान् for भगवान्. 8. KC, KD मुक्तिः स्वयं for मुक्तिस्तु. 9. KC, KD आत्मानं for अस्मान्. 10. KP स्थिता for स्थित्वा. 11. KC, KD insert भवान् after किमिति and read छन्दयति for छन्दयसि. 12. PS transposes the second and fourth pādas. 14. PS देव देव for कृष्णदेव.

जयतीति जयः, दिव्यतीति देवः। समस्तभगवत्स्वरूपोत्कृष्टेत्यर्थः। कीदृश—देवदेव। देवानां ब्रह्मादीनामपि देव आराध्यस्तत्संबुद्धौ। जय जयेति संभ्रमे वीप्सा। पुनः कीदृश—त्रिभुवनमङ्गलदिव्यनामधेय। त्रिभुवनमङ्गलस्वरूपं दिव्यमद्भुतं नामधेयं यस्य स तत्संबुद्धौ। पुनरावृत्त्या तदेव वदति—हे जय देव हे कृष्णदेव जय जय। कीदृश—श्रवणमनोनयनामृतावतार। श्रवणमनोनयनामृतस्वरूपोऽवतारो यस्य। श्रवणमनोनयनेष्वमृतस्य परमानन्दविशेषस्यावतारेति वा॥ पुष्पिताग्रा छन्दः॥१०८

सुबोधनी

ततः सस्मितकृपाकटाक्षमालोक्य सहर्षमाह—हे देव जय। अयोग्येऽपि त्वच्चरितादिस्फोरणेनोत्कर्षमाविष्कुरु। वीप्सात्यानन्दावेशतः। तत्संपादयन्नाह—त्रिभुवनानामपि मङ्गलं तद्गुणलीलादिस्फुरणं यस्मात्तादृशासाधारणं नामधेयं यस्य हे तादृश। तन्नामैव विशिनष्टि—हे कृष्णदेव कृष्णनामरूपदेव जय। वीप्सात्राश्चर्ये। आश्चर्यमेवाह—श्रवणमनोनयनानाममृतरूपं प्राकट्यं यस्य। नयनाभिरामतोक्त्याश्चर्यत्वं नाम्नो व्यक्तम्।

2. GA omits तत्संबुद्धौ here, and also in line 4. 3. GB तथा for पुनः कीदृश. GB omits त्रिभुवनमङ्गलदिव्यनामधेय etc. 5. GB inserts इति after जय जय and omits कीदृश श्रवणमनोनयनामृतावतार. 9. CB, CD कृपा० for सस्मितकृपा०. CB, CD insert जयेति after आह. CD omits हे देव जय. 9-10. After जय and आह respectively CB, CD insert अत्यानन्दा(CD inserts दरा)वेशाद्वीप्सा and transpose it and the sentence अयोग्येऽपि to आविष्कुरु. 10. CB, CD omit वीप्सात्यानन्दावेशतः. CB, CD तत्साधनमुपदिशन् for तत्संपादयन्. 11. CD omits अपि. CD त्वद्गुण०. CD तत्र हेतुः यत्र त्वन्मुखेऽसाधारणं for यस्मात्तादृशं. CB, CC तादृशं for तादृशासाधारणं. 12. CB, CD insert हे after कृष्णदेव. CB ०रूप for रूपदेव. 13. CB, CD omit आश्चर्यमेवाह and read instead : कृष्णनाम्नोऽद्भुतमहिमोक्तिः। नामनामिनोरभेदस्फूर्त्याह। तदेवाह. CD drops श्रवण. CB, CD insert हे तादृश after यस्य. 13f. CB, CD omit all words from नयनाभिराम० to स्मृतेः. (p. 294, l. 2). 13-14. CC नाम्नो नयनाभिरामोक्त्या व्यक्तं, omitting आश्चर्यत्वं.

नामचिन्तामणिः कृष्णश्चैतन्यरसविग्रहः

(पद्यावली २५) इत्यादावभिन्नत्वं नामनामिनोरिति स्मृतेः ॥१०८

सारङ्गरङ्गदा

ततः, अयि लीलाशुक मत्कर्णामृतरूपाणि वृन्दावनधात्रामङ्गलाचरणमारभ्य केयं कान्तिः (श्लो० ९५) इत्यन्तानि त्वद्भाषितानि श्रुत्वा पुनस्तच्छ्रोतुकामेन मया त्वमुच्चालितोऽसि, तदिदं तद्वचोविजृम्भितं मत्कर्णामृतनामास्तु, त्वमेव मे माधुर्यादिवर्णनं जानासीति सस्नेहतन्मधुरवाक्यं शृण्वन्नेवानन्दोच्छलितः सन्नाह—हे देव जय, हे देव जय, हे देव जय। अत्यादरानन्दाभ्यां वीप्सा। त्रिभुवनस्य मङ्गलं दिव्यं मनोहरं च नामधेयं यस्य, हे तादृश। किं वा, हे देवदेवदेव। देवा मर्त्यपूज्याः, तद्देवास्तत्पूज्यास्त्वत्पार्षदाः, हे तद्देव तदीश्वर जय। यथोक्तं द्वितीयस्कन्धे—

हरे-
रनुव्रता यत्र सुरासुरार्चिताः

(भा० २. ९ १०) इति। हे त्रिभुवनमङ्गल जय। दिव्यमानन्दमयं स्वस्वरूपं नामधेयं यस्य हे तादृश जय। हे देव जय हे कृष्णदेव जय। श्रवणमनोनयनानाममृतवदवतारः प्राकट्यं यस्य हे तादृश जय ॥१०८

1. This is given as Vyāsa's verse in Padyāvalī no. 25 ; but in Bhakti-rasāmṛta (*ad* 1. 2. 42) it is definitely ascribed as यथा पाद्मे. It is quoted anonymously in Hari-bhakti-vilāsa p. 1292. 2. CA reads इत्यादि for इत्यादौ, and omits अभिन्नत्वं नामनामिनोरिति. 4. KB अथ for ततः, and मङ्गलं for मङ्गलाचरणं. 7. KB ०कर्णामृतं नामास्तु. 8. KP सस्नेहं तन्मधुर०. KD ०मधुर० for ०तन्मधुर०. KP inserts जय जयेति after आह. 9. KB transposes the words आदर and आनन्द. 10. KP देव देव for देवदेवदेव. 11. KB repeats जय thrice. Mss तृतीयस्कन्धे. 14. KP omits जय after ०मङ्गल. KC, KD insert च after स्वस्वरूपं. 16. KC, KD omit all words from अवतारः to तादृश जय.

तुभ्यं निर्भरहर्षवर्षविवशावेशस्फुटाविर्भव-
द्भूयश्चापलभूषितेषु सुकृतां भावेषु निर्भासिने ।
श्रीमद्गोकुलमण्डनाय मनसां वाचां च दूरस्फुर-
न्माधुर्यैकमहार्णवाय महसे कस्मैचिदस्मै नमः ॥१०६

कृष्णवल्लभा

संप्रति यथानुभवमनुवर्णयन्नमति—तुभ्यमिति । कस्मैचिदनिर्वचनीयतत्त्वाय महसे ज्योतिषेऽस्मै पुरः स्फुरमाणाय तुभ्यं नमः । एतेन निराकारब्रह्मज्योतिषः साकारभगवद्रूपज्योतिः सर्वतो विलक्षणमिति दर्शितम् । वैलक्षण्यं त्वनुभूयत एव, प्रत्यक्षत्वात् । कीदृशाय तुभ्यम्—सुकृतां शोभनमेकान्तभावेन त्वत्परिचरणरूपं कृतकर्म येषां तेषां भावेषु भाववदन्तःकरणेषु निर्भासिने नितरां भासमानाय । प्रकाशमानायेति यावत् । भावेषु कीदृशेषु—निर्भरहर्षवर्षविवशावेशस्फुटाविर्भवद्भूयश्चापलभूषितेषु । निर्भरमतिशयो यो हर्षवर्षः श्रीकृष्णदर्शनायोल्लासरूपस्तेन विवश आयतो य आवेशश्चित्तस्य कथमप्यनिवार्यतीव्रतमौघस्तेन स्फुटं यथा स्यात्तथाविर्भवत्प्रकटीभवद्भूयः प्रचुरतरं यच्चापलं तद्दर्शनायैव, तेन भूषितेष्वलंकृतेषु । पुनः कीदृशाय तुभ्यम्—श्रीमद्गोकुलमण्डनाय । श्रीमत्परमसंपत्तिमद्गोकुलं तस्य मण्डनाय । व्रजवासिमात्रप्रेमानुसारेण तत्र तत्र तदा तदाविर्भवत इत्यर्थः । पुनः कीदृशाय—मनसां वाचां च दूरस्फुरन्माधुर्यैकमहार्णवाय । दूरं स्फुरन्माधुर्यस्यैको मुख्यो महार्णवो यत्र तस्मै । मनोवचसी यन्माधुर्यं निरूपयितुमसमर्थे इत्यर्थः ॥ शार्दूलविक्रीडितं छन्दः ॥१०६

2. PS निर्भासते for निर्भासिने. 3. PS महते for मनसां, and विदूरायते for च दूरस्फुरत्-. 4. PS ०रसार्णवाय for ०महार्णवाय. 8. GB omits साकारभगवद्रूपज्योतिः. GB विलक्षणतोक्ता for विलक्षणमिति दर्शितं. 8-9. GB शास्त्रे प्रसिद्धं for त्वनुभूयत एव प्रत्यक्षत्वात्. 10. GB कृतं for कृत. GB भक्तियुक्त- for भाववत्-. 11. GB omits भावेषु and the phrase निर्भरहर्षवर्ष etc. 12. GB ०दर्शनजोल्लास०. 13. GB ०वृत्तिः for ०ओघः. 14. GA omits आविर्भवत्प्रकटीभवत. 15. GB omits तुभ्यं श्रीमद्गोकुलमण्डनाय. 16. GB ०व्रजवासिमात्रस्य प्रेमा०. 16-17. GB तथा for पुनः कीदृशाय. 18. GB inserts तत् after माधुर्यं.

सुबोधनी

पुनस्तदनुभवानन्दावेशात्तन्माधुर्यापारतास्फूर्त्या वर्णयितुमशक्नुवन्ससंभ्रमं नमति —अनिर्वाच्यायास्मै तुभ्यं नमः। कुतोऽनिर्वाच्यत्वम्—महसे माधुर्यपुञ्जरूपाय। तथापि, वाचां दूरे स्फुरन्ति यानि माधुर्याणि तेषां मुख्यमहार्णवाय। तर्हि मनसा विचारय—मनसां च तादृशाय। एवं चेत्तत्कथं ज्ञातम्—सुकृतां त्वत्प्रेमविशेषभाजां भावेषु भावाक्रान्तचित्तेषु प्रकाशनशीलाय। कीदृशेषु—निर्भरहर्षाणां यद्वर्षं तेन विवशत्वापादको य आवेशस्तेन प्रकटीभवद्यत्प्रचुरचापलं तद्दर्शनोत्कण्ठा तेन भूषितेषु। तत्र हेतुः—श्रियो राधाद्याः, तद्युक्तं यद्गोकुलं तदेव भूषणं यस्य ॥१०९

सारङ्गरङ्गदा

पुनस्तन्माधुर्यातिशयानुभवादानन्दोन्मत्ततया तद्वर्णयितुकामेन तदशक्त्या नमस्कारेणैव स्ववाचमुपसंहरतात्मना कौतुकेन विवदमानेन तेन सह विवदमान आह —कस्मैचिदनिर्वाच्यायास्मै महसे माधुर्यपुञ्जरूपाय तुभ्यं नमः। ननु

2. CB, CD omit all words from पुनः to नमति and read instead : पुनस्त(CD पुनयत्त)न्माधुर्यानुभवानन्दावेशेन नामनामिनोरभेदेनैव नमश्चाह—तुभ्यमिति. CA inserts तुभ्यं निर्भरेति after नमति. 3. CC अनिर्वाच्यतां for ०वाच्यत्वं. CB, CD यतो for कुतोऽनिर्वाच्यत्वं, and वाचकवाच्याभेदरूपाय for माधुर्यपुञ्जरूपाय. 4. CB, CD अतएव मनसां for तथापि, inserting च after वाचां. CB, CD मुख्यार्णवाय. 5. CB, CD omit all words from तर्हि to सुकृतां. CC दूरे for तादृशाय. CC transposes तत् and कथं and reads ज्ञानं for ज्ञातं. 6. CB, CD read यतः स्वत्प्रेम० for त्वत्प्रेम० and omit भावेषु. CC प्रकाशमानाय for प्रकाशनशीलाय. 7. CB, CD अत्यानन्दवृष्ट्या for निर्भरहर्षाणां यद्वर्षं तेन. CC inserts तन्माधुर्यस्फूर्त्यानन्दानां before यद्वर्षं. CB, CD अतिप्रकटी० for प्रकटी०. CD प्रकट० for प्रचुर०. 8. CC omits तत् ; CB, CD read त्वत् ० for it. CB omits तेन. 8-9. CB, CD omit all words from तत्र हेतुः to भूषणं यस्य and read instead : अतएव श्रीमद्गोकुलस्य (CD ०गोकुलमण्डलायतनस्य) भूषणरूपाय. 11. KC, KD ०नुभवानन्दो०. 12. KC, KD च for एव. KC inserts सह before कौतुकेन.

तन्माधुर्यमेव वर्णय श्रोतुकामोऽस्मि, तत्राह, कीदृशे—वाचां दूर एव स्फुरन्ति यानि माधुर्याणि तेषां प्रधानार्णवाय। नन्वेवं चेन्मनसा विभावय, तत्राह—मनसां च तादृशाय। अनाविर्भाव्यायेत्यर्थः। ननु वाङ्मनसोरग्राह्यत्वात्कस्यापि गोचर एव नास्ति, तत्राह—सुकृतां त्वत्प्रेमविशेषभाजां भावेषु भावाक्रान्तचित्तेषु निर्भासिने प्रकाशशीलाय। कीदृशेषु—निर्भरहर्षाणां यद्वर्षं तेन विवशा ये ते चावेशेन त्वत्प्राप्त्युत्कण्ठाकृतया त्वत्स्फूर्त्या स्फुटमाविर्भवन्ति यानि भूयश्चापलानि तैर्भूषिताश्च ये तेषु। नन्वेतेन किं निराकारब्रह्मत्वेन मां निरूपयसीत्यत्र नेत्याह—गोकुलस्य मण्डनाय मधुरोज्ज्वलनीलमणिवद्रूपणाय। अतः केवलं तुभ्यं नमोऽस्त्वित्यर्थः ॥१०९

ईशानदेवचरणाभरणेन नीवो-
दामोदरस्थिरयशःस्तवकोद्भवेन।
लीलाशुकेन रचितं तव कृष्णदेव
कर्णामृतं वहतु कल्पशतान्तरेऽपि ॥११०

कृष्णावल्लभा

एवं प्रेमरसोक्तिमनुकृत्य संप्रति श्रीकृष्णं प्रार्थयते—ईशानेति। हे कृष्णदेव तव कर्णयोरमृतरूपं लीलाशुकेन लीलाशुकवद्वर्तमानेन मया रचितं यथानुभवगुणरूपलीलामाधुर्यादिवर्णनरूपं संपादितं कल्पशतान्तरेऽपि, अस्मिन्कल्पेऽन्यस्मिन्नपि कल्पशते, वहतु। यथा भावेन मया वर्णितं तथैव भावव्यञ्जकतया त्वत्कर्णामृतरूपेणैव वर्तताम्। कीदृशेन—ईशानदेवचरणाभरणेन। ईशानं शिवं देवयति

3. KP आविः- for अनाविः-. 5. KD, KP insert च after ये. 5-6. KC तत्प्राप्त्यु°. 6. KC, KD, KP तत्स्फूर्त्या. 5-7. KD omits all words ते चावेशेन to ये तेषु. 7. KC, KD आह for नेत्याह. 9. Līlāśuka here makes, as interpreted by Caitanyadāsa, a reverential mention of his parents, Dāmodara and Nīvī, and his Guru Īśānadeva. See Introd. p. xxix, and Addenda. 10. PS स्तवकोद्गमेन. 11. PS देव कृष्ण for कृष्णदेव. 14. The words from एवं to अनुकृत्य lost in GA; also वद्वर्तमानेन मया रचितं in l. 15; मया वर्णितं and भावव्यञ्जक in l. 17. 16. GA omits संपादितं. 17. GB भावनया for भावेन. 18. GB प्रवर्ततां for वर्ततां. GB omits ईशानदेवचरणाभरणेन. GB देवं for शिवं.

क्रीडयतीति। यद्वा, ईशानस्य देव आराध्यः। ईशानाः सर्वे दीव्यन्ति द्योतन्ते यस्मादिति वा। ईशानदेवः श्रीकृष्णः। तच्चरणावेवाभरणं यस्य तेन। पुनः कीदृशेन—नीवीदामोदरस्थिरयशःस्तवकोद्भवेन। नीवी मूलधनं प्रेमैव, तदेव दाम, तेनोदुच्चैरियर्ति वशतां प्राप्नोतीति नीवीदामोदरः। प्रेमैकलभ्य इत्यर्थः। तस्य यत्स्थिरयशस्तस्य स्तवको बहूनामेकत्र संचयः, तस्योद्भव आविर्भावो यस्मिंस्तेन॥ वसन्ततिलकं छन्दः ॥११०

सुबोधनी

अथ स्वकृतं तत्प्रीतयेऽर्थयन्नाह—हे कृष्णदेव लीलाशुकेन मया रचितमिदं कल्पशतमध्येऽपि तव कर्णयोरास्वाद्यं वहतु तद्योग्यतां प्राप्नोतु। तत्र हेतुः—ईशान उपक्रमोक्तो मदीशः श्रीगुरुः, देवो ममेष्टदेवस्त्वं शिक्षागुरुः, तयोश्चरणाभरणवत्सेवको यस्तेन। तत्रापि हेतुः—भविष्योत्तरोक्तकार्त्तिकमाहात्म्यरीत्या प्रियानीव्या दाम उदरे यस्य, तस्य ते नित्ययशसो यः स्तवकः पितृमात्रोस्तच्छ्रवणादिफलम्, तदुद्भवेन। अनेन स्वपितृमात्रोस्तद्यशःश्रवणकीर्तनाद्याविष्टान्तरतः स्वजन्म सूचितम्। अतस्तत्तत्संबन्धेनैव ममेदं त्वत्कर्णपेयं भवत्वित्यर्थः ॥११०

1 GA omits इति. GB ईशान अस्य for ईशानस्य. 2-3. GB reads तथा for पुनः कीदृशेन and omits the phrase नीवीदामोदर etc. 4. GB omits इत्यर्थः. 5. GB बहुसंचयः समूह इति यावत् for बहूनामेकत्र संचयः. 8. CB, CD read स्वीकृतं छकृतं for स्वकृतं, and insert ईशानेति after आह. CC, CD प्रार्थयन् for अर्थयन्. 9. CD °शतान्तमध्ये. CD भवतु for वहतु. CB, CD insert इत्यर्थः after प्राप्नोतु. 9-10. CB, CD omit all words from तत्र हेतुः to शिक्षागुरुः and read instead: तद्दत्तसंबन्धेनैव तत्कृपया संपादयन्नाह, कीदृशेन—ईशानो मदीश्वरः श्रीगुरुः, तथा देवो ममेष्टदेवो भगवान्. 10. CC omits ममेष्टदेवः. CB, CD omit चरणा-. 11. CB, CD किं च for तत्रापि हेतुः. For the reference to भविष्योत्तर see below. CB, CD omit भविष्योत्तरोक्त-, and read कार्त्तिकमाहात्म्योक्तरीत्या. 12. CC omits तस्य. CB, CD read दामोदरस्य for ते. 12-13. CB स्वप्रकाशः, CD प्रकाशः for पितृमात्रोस्तच्छ्रवणादिफलं. 13. CB, CD तद्भवेन for तदुद्भवेन. CC पितृ° for स्वपितृ°. CA °यशःस्मरण° for °यशःश्रवण°. CB, CD °कीर्तन° for °कीर्तनादि°, and अन्तरतया for अन्तरतः. CB CD आत्मनो जन्म for स्वजन्म. CD inserts इति after स्वजन्म. 14. CB तत्° for तत्तत्. CC तत्र for त्वत्-.

सारङ्गरङ्गदा

ततः, अये लीलाशुक मत्कर्णामृतरूपत्वद्भाषितेनाप्यायितोऽस्मि, तत्प्रार्थय पुनः किमप्यभीष्टमित्यत्र, देव त्वदेतत्साक्षाद्दर्शनेन पूर्णोऽस्मि, किं मया प्रार्थ्यम्, तथापीदमपि देहीत्याह—हे कृष्णदेव लीलाशुकेन मया रचितं तत्र कर्णामृतमिदं कल्पशतान्तरेऽपि त्वद्भक्तिरसिकजनचित्तमाप्नोत्य वहतु। कीदृशा मया— ईशानः सर्वेश्वरश्चासौ देवः क्रीडारतश्च तस्य। ईशा राधा, सा चाननमानः, तस्या मम वानः प्राणश्चायं देवश्च। स च तयोर्वा चरणा एव शिरोहृदयाभरणानि यस्य तेन। अत्र पक्षे छन्दोऽनुरोधात्त्र-शब्दस्याप्रयोगः। तथा, नीवीदामोदरस्य नीवीदाम उदरे यस्य। कार्त्तिक्यां खण्डितया श्रीराधया काञ्च्या बद्धोदरस्य। तथा हि भविष्योत्तरोक्तलीलार्थबद्धश्लोकः—

संकेतावसरे च्युते प्रणयतः संरब्धया राधया
प्रारभ्य भ्रुकुटिं हिरण्यरशनादाम्ना निबद्धोदरम्।
कार्त्तिक्यां जननीकृतोत्सववरप्रस्तावनापूर्वकं
चाटूनि प्रथयन्तमात्तपुलकं ध्यायेम दामोदरम्॥

इति। यद्वा, मम नीवी मूलधनरूपश्च दामोदरश्च तस्य। तव यः स्थिरयशः-स्तवकोऽम्लानयशःकुसुमगुच्छः स एवोद्भवो विभवः संपद्यस्य तेन। ईशानदेवस्य शिवस्येति नीवीदामोदरयोर्मातृपित्रोरिति च केचिदाहुः॥११०

2. KA, KB अतः for ततः. KC, KD ०मृतरूपेण त्वद्भाषितेन. 3. KB कियद्यत् for किमपि. KP तदेतत्० for त्वदेतत्०. KA omits एतत्. 4. KP inserts ईशानेति after आह. 6. KA inserts यद्वा before ईशा. KC, KD श्रीराधा for राधा. KP inserts प्राणः after चाननमानः. 7. KA, KP omit आनः after मम वा. KP omits एव. 8. KB omits तथा. 3. In the Prīti-saṃdarbha (Anuccheda 367) Jīva Gosvāmin gives the following verses as quoted by the Vrata-ratnākara from the Kārttika-māhātmya of the Bhaviṣyottara: तस्मिन्दिने च भगवान्रात्रौ राधागृहं ययौ। सा च क्रुद्धा तमुदरे काञ्चीदाम्ना बबन्ध ह॥ कृष्णस्तु सर्वमावेद्य निजगेहमहोत्सवम्। प्रियां प्रसादयामास ततः सा तममोचयत्॥ 11. KP संरज्ज्वया (!). 12. KA, KB, KP भ्रूकुटीं. 13. KP ०वरे for ०वर-. 17. KP मातापित्रोः. KB, KC, KD omit च.

धन्यानां सरसानुलापसरणीसौरभ्यमभ्यस्यतां
कर्णानां विवरेषु काममपि सुधावृष्टिं दुहानं मुहुः ।
वन्यानां सुदृशां मनोनयनयोर्मग्नस्य देवस्य नः
कर्णानां वचसां विजृम्भितमहो कृष्णस्य कर्णामृतम् ॥१११

कृष्णवल्लभा

एवं संप्रार्थ्य श्रीकृष्णकर्णामृतस्वरूपं वदन्स्तौति—धन्यानामिति । अहो रसिका नोऽस्माकं वचसां विजृम्भितं विलासरूपं श्रीकृष्णकर्णामृतं श्रियो राधायाः कृष्णस्य कर्णयोरमृतवदास्वादयन्तु । अस्य महिमा किं वाच्य इत्यर्थः । कीदृशम्—धन्यानां श्रीकृष्णभावरहस्यनिष्ठानां कर्णानां विवरेषु मुहुर्वारंवारं काममप्यनिर्वचनीयां सुधावृष्टिं दुहानं प्रपूरयत् । दुहेरुभयपदित्वात् । धन्यानां कीदृशानाम्—सरसानुलापसरणीसौरभ्यमभ्यस्यताम् । सरसः श्रीकृष्णविलासप्रतिपादकत्वाद्योऽनुलापो मुहुर्भाषणमास्वादातिशयेन पुनः पुनः कथनं स एव सरणी वर्तनी तत्संवन्धि तदभिव्यज्यमानं यत्सौरभ्यं श्रीकृष्णविलासानन्दरसतदभ्यस्यतां पुनः पुनरास्वाद्यताम् ।

1. Caitanyadāsa and Kṛṣṇadāsa (two Mss as in text) ०लहरी० for ०सरणी०. 3. PS वश्यानां for वन्यानां. 4. The difficulty of the construction, over which the commentators worthily spend their ingenuity, as well as the mere repetition of the word, makes it likely that कर्णानां in the last pāda is a mislection ; but both the South Indian version and our Mss give no other reading. As in the case of धन्यानां and वन्यानां, one would expect a reading like, वर्णानां, the graphical confusion of व and क in Devanagari Mss being not unusual. 4. Gopāla Bhaṭṭa श्रीकृष्णकर्णामृतम्. 8. GB आस्वाद्य for आस्वादयन्तु. GB कथं for किं. 9. GB ०भक्ति० for ०भाव०. 10. Mss प्रपूरयन्तं for प्रपूरयत्. 10-11. GB transposes कीदृशानां and धन्यानां, and reads सरसेति for the phrase सरसानुलाप etc. 12. GA तदेव for स एव. GA, GB सरणिः, contrary to metre. 13. GB वर्त्मनी. Mss तं for तत before अभ्यस्यतां.

अनुलापो मुहुर्भाषा (१. ६. १६)

सरणिः पद्धतिः पद्या वर्तन्येकपदीति च (२. १. १५)

इत्यमरः। किं च—वन्यानां सुदृशां श्रीवृन्दावनोद्भवविलासिनीनां मनोनयनयोर्मग्नस्य नोऽस्माकं देवस्य श्रीकृष्णस्य कर्णानां विवरेषु सुधावृष्टिं दुहानमित्यन्वयः। यद्वा, तासां तन्मनोनयनयोर्मग्नस्य श्रीकृष्णस्य च कर्णानामिति। अन्यत्समानम्॥ शार्दूलविक्रीडितं छन्दः ॥१११

सुबोधनी

अतस्तदनुमोदमानमालक्ष्य स्ववचसां तत्तत्सुखदत्वं विचिन्त्य सविस्मयानन्दमाह—नृणां नो वचसां विजृम्भितं देवस्य ते कर्णामृतमित्यहो आश्चर्यम्। कस्य देवस्य—कृष्णस्य सर्वाकर्षकानन्दस्य। तत्र स्वानुभवं प्रमाणयति—मनोनयनयोर्मग्नस्य। अर्थात्स्वस्यैव। न केवलं कृष्णस्य तत्प्रेयसीनामपीत्याह—वन्यानां श्रीवृन्दावनभुवां श्रीमदीश्वरीप्रभृतीनां व्रजसुन्दरीणामपि कर्णानां विवरेषु कामपि सुधावृष्टिं मुहुः प्रपूरयत्। अहो अत्याश्चर्यम्। अतएव धन्यानां भक्तिविशेषवतामपि कर्णविवरेषु तथा कुर्वत्। ननु तेषामश्रुतवाणीश्रवणाद्युक्तं तत्—भवन्मधुररससहितो योऽनुलापः प्रियया सह मुहुर्भाषणं तस्य

2. GB वर्त्मन्येक०. 3. GA केषां for किं च. 4. GA inserts च after श्रीकृष्णस्य 5. GA कृष्णस्य for श्रीकृष्णस्य. 8. CB, CD ततस्तदमृततया for अतस्तत्, and आलोक्य for आलक्ष्य. 8-9. CB, CD omit all words from स्ववचसां to आह and read instead : सहर्षमाह धन्यानामिति. 9. CB, CD omit ते. 10. CB, CD insert इत्यत आह after देवस्य. CB, CD आत्मानुभवमाह for स्वानुभवं प्रमाणयति. 11. CB, CD अस्माकं for स्वस्य. CA ०सखीनां for ०प्रेयसीनां. 12. CB, CD omit वन्यानां. 13. CB, CD omit मुहुः. CB, CD read पूरयत् for प्रपूरयत्, and omit अहो अत्याश्चर्यं. CC अतः for अतएव. 14. CB, CD omit भक्तिविशेषभाजां and कर्णविवरेषु. 13f. CB omits the rest of the commentary from ननु to इत्यर्थः (P. 302, l. 2) and reads instead : कीदृशाम्—स्निग्धं यन्मुहुर्भाषणं (CD स्निग्धो योऽनुलापो मुहुर्भाषणं) तस्य या नर्मपरिपाटी तस्या निकटस्थित्या यदनुभवस्तन्मनसि चिन्तयताम्। अहो अस्माकं भाग्यमित्यर्थः। 15. CA भगवन्० for भवन्०.

या लहर्यस्तासां सौरभ्यं तज्जन्यं सुखमनुभवतामपि। अहो अस्य कारुण्यमद्भुतमित्यर्थः ॥१११

सारङ्गरङ्गदा

ततः, अये मम ह्यासां मत्प्रेयसीनां च सरसविदग्धमद्भक्तानां च स्वगुणत एव तवैतत्कर्णयोरमृतमेव, तथापि मद्गिरामपीदमस्त्विति स्ववचसां तत्तत्सुखदत्वं विचिन्त्य सविस्मयानन्दमाह—इदं नोऽस्माकं वचसां विजृम्भितं देवस्य तव कर्णामृतमित्यहो। मद्भाग्यमिति भावः। तत्रापि—कृष्णस्य सकलकेलिकलाचतुररसिकशिरोमणेः। नन्वेतादृशविरहसंयोगप्रलापसंलापमयत्वान्न तच्चित्रमिति चेत्, तत्राह—सुदृशां विरहे मनसि, संयोगे नयनयोर्मध्यस्य। तत्तत्प्रलापसंलापाभ्यां हृतेन्द्रियस्येत्यर्थः। तत्रापि—वन्यानां लक्ष्मीप्रार्थ्यवैदग्ध्यानां वृन्दावनसंबन्धिनीनाम्। किं च, न परं भक्तोक्तिप्रियत्वात्तवैव, किं त्वासामपि कर्णानां विवरेषु सुधावृष्टिं दुहानं प्रपूरयदित्यहो चित्रम्। स्वदशाद्वयप्रलपितसाम्यादासामेव न केवलं किं तु त्वद्भक्तानामपीत्याह—धन्यानां त्वद्भक्तिविशेषवतामपि कर्णानां विवरेषु तथा कुर्वत्। इति चित्रमिति भावः। ननु तेषामश्रुतचरसरसवाणीश्रवणाद्युक्तमेतदिति चेत्, तत्राह, कीदृशाम्—भवन्मधुरभक्तिरससहितो योऽनुलापो मुहुर्भाषणं तस्य या लहर्यस्तासां सौरभ्यमभ्यस्यतामपि। पूर्वं त्वयैव तथोक्तत्वादिति भावः ॥१११

1. CC त्वत्- for अस्य. 4. KD अतः for ततः. KC, KD, KP insert च after ह्यासां. KC omits मत्प्रेयसीनां च. KD omits च before सरस०. KD स्वगुणतया. 6. KD inserts धन्यानामिति after आह. KC omits अस्माकं. 7. KC omits भावः. 10. KD धन्यानां, KP रम्याणां for वन्यानां. 11. KC ननु for किं च न. KC omits किं तु. 12. KA विचित्रं for चित्रं. 14. KP कुर्वतः for कुर्वत्. KB विचित्रं for चित्रं. KA omits इति चित्रमिति भावः. 15. KD अश्रुत० for अश्रुतचर०. KB omits एतत्. 16. KA, KB सरण्यः for लहर्यः. KB inserts उक्तिपरिपाट्यः before तासां. KA omits अपि; KP reads इति for it. 17. KD, KP तथैव. KB तथोक्तं for तथोक्तत्वात्.

अनुग्रहद्विगुणविशाललोचनै-
रनुस्मरन्मृदुमुरलीरवामृतैः ।
यतो यतः प्रसरति मे विलोचनं
ततस्ततः स्फुरतु तवैव वैभवम् ॥११२

इति लीलाशुकरचितं कृष्णकर्णामृतं समाप्तम् ॥

कृष्णवल्लभा

अथैवमुपसंहरन्स्वाभीष्टरूपलीलं श्रीकृष्णमनवरतं चक्षुर्गोचरे स्फुरन्तं प्रार्थयते —अनुग्रहेति । हे कृपासिन्धो, इदमेवाहं प्रार्थये—यतो यतो मे विलोचनं प्रसरति, ततस्ततस्तत्र वैभवं वयोरूपलावण्यकेलिमाधुर्यादिमच्छ्रीविग्रहरूपं स्फुरतु प्रकाशताम् । किं कुर्वत्—मृदुमुरलीरवामृतैः, मृदूनि सरसानि यानि मुरलीरवा एवामृतानि तैः, सहानुस्मरत् । यदा यदा मुरलीध्वनिर्भवति तदा तदा मामनुस्मरदित्यर्थः । यद्वा, अनुस्मरदिति विलोचनविशेषणम् । अनुस्मरत् प्रागदृश्मिति शेषः । अन्तःकरणस्य लोचनतादात्म्यापन्नत्वात् । मृदुमुरलीरवामृतैः सहेति मृदूनि मुरलीरवामृतानि यत्र वैभवे तान्यपि स्फुरन्त्वित्यर्थः । कीदृशैः—अनुग्रहद्विगुणविशाललोचनैः । अनुग्रहेण कृपया द्विगुणविशाले लोचने येषु तैः ॥ रुचिरा छन्दः—

जभौ सजौ गिति रुचिरा चतुर्ग्रहैः (छन्दोमञ्जरी २) ॥११२

कृष्णकर्णामृतस्यैषा टीका श्रीकृष्णवल्लभा ।
रतिं तनोत्वविरतं श्रीकृष्णचरणाब्जयोः ॥

2. PS अनुस्वनद्वेणुगलद्रवामृतैः for the pāda, contrary to the metre of the verse. 5. For different readings of the colophon in the Mss, see Description of Mss. 7. GA omits अथ. 10. GB omits मुरलीरवामृतैः. 13. GA ज्ञेयम् for शेषः. 13-14. GB तव मुरलीनादामृतानि तव वैभवं च for all words from मुरलीरवामृतैः सह to तान्यपि, which are omitted. 14-15. GB omits the phrase अनुग्रहद्विगुण etc.

श्रीमद्राविडनीवृदम्बुधिविधुः श्रीमान्नृसिंहोऽभव-
द्भट्टश्रीहरिवंश उत्तमगुणग्रामैकभूस्तत्सुतः ।
तत्पुत्रस्य कृतिस्त्वियं वितनुतां गोपालनाम्नो मुदं
गोपीनाथपदारविन्दमकरन्दानन्दिचेतोलिनः ॥

वल्लवीकेलिकल्लोलवल्लावण्यसागरे ।
रमतां मन्मनो नित्यं वृन्दावनविहारिणि ॥

इति श्रीद्राविडहरिवंशभट्टैकचरणशरणश्रीगोपालभट्टविरचिता
श्रीकृष्णकर्णामृतटीका श्रीकृष्णवल्लभा समाप्ता ॥

सुबोधनी

पुनः सस्नेहं श्रीराधया सह कृपयावलोकयन्तं तं वीक्ष्यानन्दाविष्टः प्रेमदैन्ययोः पारस्पारिकहेतुतया दैन्योदयान्निरन्तरतद्दर्शनायोग्यमात्मानं मत्वा भावितद्वियोगनिस्तरणोपायं प्रार्थयन्नाह—हे देव, यत्र यत्र मे विलोचनं प्रसरति, तत्र तत्र सहजविशालान्यपि मद्विषयानुग्रहेण द्विगुणानि विशालानि यानि युवयोर्लोचनानि तैः किमप्यनुस्मरद्गायन्तो ये मृदुमुरलीरवास्त एवामृतानि तैश्च सहानया मदीश्वर्या सहितस्य तवैव वैभवं सौन्दर्यवैदग्ध्यविलासादिमयं चरितमेव सदा स्फुरतु ॥

पुरोऽभीक्ष्णस्थितौ सार्धं गमने योग्यतात्मनः ।
नेति लीलाशुकः स्फूर्तिं हृदि दैन्यादयाचत ॥११२

4. GA ०चेतोलिनं. 5. GB ०लव० for ०वलत्०. 7-8. This colophon is given in both the complete Mss (GA, GB) of Kṛṣṇa-vallabhā. 10-11. CB, CD omit all words from श्रीराधया to मत्वा and read instead : आलोकयन्तं वीक्ष्य दैन्योदयात्. 11. CC ०तत्तद्दर्शन० for ०तद्दर्शन०. 11-12. CB, CD भावितद्दर्शनवियोग०. 12. CB, CD प्रार्थयते—अन्विति for प्रार्थयन्नाह. CD omits all words from हे देव to प्रसरति. CA लोचनं for विलोचनं. 13. CB, CD omit विशालानि. CB, CD विलोचनानि for लोचनानि. 14. CB, CD स्मृत्वा स्मृत्वा for अनुस्मरत्. CB, CD omit मदीश्वर्या. 14-15. CC मदीश्वर्यादिसहितस्य. 15. CB, CD transpose एव and वैभवं. CB विभुतयानेकदुर्घटघटनासमर्थमेतत् for सौन्दर्यवैदग्ध्यविलासादिमयं. 16 CB, CD अभीक्ष्णं for अभीक्ष्ण-. CA ०स्थितः for ०स्थितौ.

श्रीगोविन्दपदसेवाप्रभावादुदिता स्वयम् ।
टीका चैतन्यदासात्स्यात्कृष्णकर्णामृताश्रया ॥

इति चैतन्यदासविरचिता कृष्णकर्णामृतटीका सुबोधनी समाप्ता ॥

सारङ्गरङ्गदा

ततः, अयि लीलाशुक सत्यं त्वद्विशुद्धप्रगाढप्रेमविलसितमेवैतत्ते वचः, ईदृगनुरागस्याहमेव मूल्यमिति त्वयाहं वशीकृत एव, किं तु त्वमधुनेवात्रागतोऽसि, तदेतद्देहास्वाद्यश्रीवृन्दावनरासावलोकसुखानि कतिचिद्दिनान्यनुभव, पश्चादचिरादेव मदेतल्लीलां प्रवेक्ष्यसीत्याश्वास्यान्तर्दिधित्सुं सस्नेहपूर्वकं श्रीराधया सह कृपयावलोकयन्तं तं वीक्ष्य तद्दर्शनवियोगातिविकलः सदैन्यं तद्दिनातिवाहनोपायं प्रार्थयन्नाह—हे देव यतो यतो यत्र यत्र मे विलोचनं प्रसरति। कीदृशम्—तदनुस्मरन्निरन्तरं तवैव माधुर्यं स्मरत्। ततस्ततस्तत्र तत्र सहजविशालान्यपि मद्विषयानुग्रहेण द्विगुणविशालानि यानि युवयोर्लोचनानि तैः। तथा, मृदुमुरलीरवामृतैश्च सहानया सहितस्य तवैव वैभवं सौन्दर्यवैदग्ध्यविलासादिमयं स्फुरतु। अनु निरन्तरं स्फुरत्विति वा ॥

अक्ष्णोरग्रे सदा तिष्ठ नय वा मां पदान्तिकम् ।
इति दीनः कथं ब्रूयां नेत्राग्रे स्फुरतात्सदा ॥११२

जयतां सुरतौ पङ्गोर्मम मन्दगतेर्गती ।
मत्सर्वस्वपदाम्भोजौ राधामदनमोहनौ ॥

1. CB, CD omit this verse. 2. CA ०दासाः स्यात्. 3. For readings of the colophon in the Mss, see Description of Mss. 5. KC अतः for ततः. KP तद्विशुद्ध०. 6. KP अधुनैव. 7. KC इह for देह-. KC अनुभवं कुरु for अनुभव. 9. KB ०वियोगभराति० for ०वियोगाति०. KD inserts अनुग्रहेति after आह. 11. KP omits निरन्तरं तवैव माधुर्यं स्मरत्. KB तत् for तवैव. 12. KP द्विगुणं for द्विगुण-. The Ms KD breaks off with युवयोः without completing the commentary. 18. The Ms KC ends with राधामदनमोहनौ without completing the commentary, but marks it as verse 1. 17. This verse occurs in Kṛṣṇadāsa's Caitanya-caritāmṛta Ādi 1. 15 ; Madhya 1. 3 and Antya 1. 5 as a Maṅgala-śloka.

जयति मधुरराधाकृष्णलीलारसोद्य-
न्मदनविधिसुधाभिः सार्थसंज्ञामकार्षीत् ।
विषयविषविसंज्ञां यो रसज्ञां नटीं मे
सरसभजनलास्ये सूत्रधारस्वरूपः ॥
अक्षुण्णे पथि मेऽन्धस्य स्खलत्पादगतेर्मुहुः ।
स्वकृपायष्टिदानेन सन्तः सन्त्ववलम्बनम् ॥
श्रीरूपचरणाब्जालिकृष्णदासेन वर्णिता ।
कृष्णकर्णामृतस्यैषा टीका सारङ्गरङ्गदा ॥

इति कृष्णदासविरचिता कृष्णकर्णामृतटीका सारङ्गरङ्गदा समाप्ता ॥

3. KB ०रसज्ञां for ०विसंज्ञां. 5. KP दुर्गमे for अक्षुण्णे. KB, KP स्खलत्पद०. This verse occurs in Kṛṣṇadāsa, *op. cit.*, Antya 1. 2 (v. l. दुर्गमे). 7. KP निर्मिता for वर्णिता. 8. KA continues, after this verse, कृपासुधासरिद्यस्य etc., which is a repetition of the second introductory verse of the commentary (see above, p. 7). 8. For readings at the end of Mss, see Description of Mss. There is no formal colophon to this commentary in any of our complete Mss.

APPENDIX

APPENDIX

I

Additional Verses given in the Second and Third Āśvāsas of Pāpayallaya Sūri's text (South Indian Version)

Second Āśvāsa

अभिनवनवनीतस्निग्धमापीतदुग्धं
दधिकणपरिदिग्धं मुग्धमङ्गं मुरारेः ।
दिशतु भुवनकृच्छ्रच्छेदि तापिञ्छगुच्छ-
च्छविनवशिखिपिञ्छालाञ्छितं वाञ्छितं नः॥१

यां दृष्ट्वा यमुनां पिपासुरनिशं
व्यूहो गवां गाहते
विद्युत्वानिति नीलकण्ठनिवहो
यां द्रष्टुमुत्कण्ठते ।
उत्तंसाय तमालपल्लवमिति
च्छिन्दन्ति यां गोपिकाः
कान्तिः कालियशासनस्य वपुषः
सा पावनी पातु नः ॥२

देवः पायात्पयसि विमले यामुने मज्जतीनां
याचन्तीनामनुनयपदैर्वञ्चितान्यंशुकानि ।
लज्जालोलैरलसविलसैरुन्मिषत्पञ्चबाणै-
र्गोपस्त्रीणां नयनकुसुमैरर्चितः केशवो नः ॥३

मातर्नातः परमनुचितं यत्खलानां पुरस्ता-
दस्ताशङ्कं जठरपिठरीपूर्तये नर्तितासि ।
तत्क्षन्तव्यं सहजसरले वत्सले वाणि कुर्यां
प्रायश्चित्तं गुणगणनया गोपवेशस्य विष्णोः ॥४

अङ्गुल्यग्रैररुणकिरणैर्मुक्तसंरुद्धरन्ध्रं
वारं वारं वदनमरुता वेणुमापूरयन्तम् ।
व्यत्यस्ताङ्घ्रिं विकचकमलच्छायविस्तारनेत्रं
वन्दे वृन्दावनसुचरितं नन्दगोपालसूनुम् ॥५

मन्दं मन्दं मधुरनिनदैर्वेणुमापूरयन्तं
वृन्दं वृन्दावनभुवि गवां चारयन्तं चरन्तम् ।
छन्दोभागे शतमखमुखध्वंसिनां दानवानां
हन्तारं तं कथय रसने गोपकन्याभुजङ्गम् ॥६

वेणीमूले विरचितघनश्यामपिञ्छावचूडो
विद्युल्लेखावलयित इव स्निग्धपीताम्बरेण ।
मामालिङ्गन्मरकतमणिस्तम्भगम्भीरबाहुः
स्वप्ने दृष्टस्तरुणतुलसीभूषणो नीलमेघः ॥७

कृष्णे हृत्वा सिचयनिचयं कूलकुञ्जाधिरूढे
मुग्धा काचिन्मुहुरनुनयैः किं न्विति व्याहरन्ती।
सभ्रूभङ्गं सदरहसितं सत्रपं सानुरागं
छायाशौरेः करतलगतान्यंशुकान्याचकर्ष ॥८

अपि जनुसि परस्मिन्नात्तपुण्यो भवेयं
तटभुवि यमुनायास्तादृशो वंशनालः।
अनुभवति यदेष श्रीमदाभीरसूनो-
रधरमणिसमीपन्यासधन्यामवस्थाम् ॥९

अयि परिचिनु चेतः प्रातरम्भोजनेत्रं
कबरकलितचञ्चत्पिञ्छदामाभिरामम्।
वलभिदुपलनीलं वल्लवीभागधेयं
निखिलनिगमवल्लीमूलकन्दं मुकुन्दम् ॥१०

अयि मुरलि मुकुन्दस्मेरवक्त्रारविन्द-
श्वसनमधुरसज्ञे त्वां प्रणम्याद्य याचे।
अधरमणिसमीपं प्राप्तवत्यां भवत्यां
कथय रहसि कर्णे मद्दशां नन्दसूनोः ॥११

सजलजलदनीलं वल्लवीकेलिलोलं
श्रितसुरतरुमूलं विद्युदुल्लासिचेलम्।
नतसुरमुनिजालं सन्मनोबिम्बलीलं
सुररिपुकुलकालं नौमि गोपालबालम् ॥१२

अधरबिम्बविडम्बितविद्रुमं
मधुरवेणुनिनादविनोदिनम्।
कमलकोमलकम्रमुखाम्बुजं
कमपि गोपकुमारमुपास्महे ॥१३

अधरे विनिवेश्य वंशनालं
विवराण्यस्य सलीलमङ्गुलीभिः।
मुहुरन्तरयन्मुहुर्विवृण्व-
न्मधुरं गायति माधवो वनान्ते ॥१४

वदने नवनीतगन्धवाहं
वचने तस्करचातुरीधुरीणम्।
नयने कुहनाश्रुमाश्रयेथा-
श्चरणे कोमलताण्डवं कुमारम् ॥१५

अमुना किल गोपगोपनार्थं
यमुनारोधसि नन्दनन्दनेन।
दमुना वनसंभवः पपे नः
किमुनासौ शरणार्थिनां शरण्यः ॥१६

जगदादरणीयजारभावं
जलजापत्यवचोविचारगम्यम्।
तनुतां तनुतां शिवेतराणां
सुरनाथोपलसुन्दरं महो नः ॥१७

सा कापि सर्वजगतामभिरामसीमा
कामाय नो भवति गोपकिशोरमूर्तिः।
या शेखरे श्रुतिगिरां हृदि योगभाजां
पादाम्बुजे च सुलभा व्रजसुन्दरीणाम् ॥१८

अत्यन्तबालमतसीकुसुमप्रकाशं
दिग्वाससं कनकभूषणभूषिताङ्गम्।
विस्रस्तकेशमरुणाधरमायताक्षं
कृष्णं नमामि शिरसा वसुदेवसूनुम् ॥१९

हस्ताङ्घ्रिनिक्वणितकङ्कणकिङ्किणीकं
मध्ये नितम्बमवलम्बितहेमसूत्रम्।
मुक्ताकलापमुकुलीकृतकाकपक्षं
वन्दामहे व्रजचरं वसुदेवभाग्यम् ॥२०

वृन्दावनद्रुमतलेषु गवां गणेषु
वेदावसानसमयेषु च दृश्यते यत् ।
तद्वेणुवादनपरं शिखिपिञ्छचूडं
ब्रह्म स्मरामि कमलेक्षणमभ्रनीलम् ॥२१

व्यत्यस्तपादमवतंसितबर्हिबर्हं
साचीकृताननिवेशितवेणुरन्ध्रम् ।
तेजः परं परमकारुणिकं पुरस्ता-
त्प्राणप्रयाणसमये मम संनिधत्ताम् ॥२२

घोषप्रघोषशमनाय मथो गुणेन
मध्ये बबन्ध जननी नवनीतचोरम् ।
तद्बन्धनं त्रिजगतामुदराश्रयाणा-
माक्रोशकारणमहो नितरां बभूव ॥२३

शैवा वयं न खलु तत्र विचारणीयं
पञ्चाक्षरीजपपरा नितरां तथापि ।
चेतो मदीयमतसीकुसुमावभासं
स्मेराननं स्मरति गोपवधूकिशोरम् ॥२४

राधा पुनातु जगदच्युतदत्तचित्ता
मन्थानमाकलयती दधिरिक्तपात्रे ।
तस्याः स्तनस्तबकचञ्चललोलदृष्टि-
र्देवोऽपि दोहनधिया वृषभं निरुन्धन् ॥२५

गोधूलिधूसरितकोमलकुन्तलाग्रं
गोवर्धनोद्धरणकेलिकृतप्रयासम् ।
गोपीजनस्य कुचकुङ्कुममुद्रिताङ्गं
गोविन्दमिन्दुवदनं शरणं भजामः ॥२६

यद्रोमरन्ध्रपरिपूर्तिविधावदक्षा
वाराहजन्मनि बभूवुरमी समुद्राः ।
तं नाम नाथमरविन्ददृशं यशोदा
पाणिद्वयान्तरजले स्नपयांबभूव ॥२७

परमिममुपदेशमाद्रियध्वं
निगमवनेषु नितान्तचारखिन्नाः ।
विचिनुत भवनेषु वल्लवीना-
मुपनिषदर्थमुलूखले निबद्धम् ॥२८

देवकीतनयपूजनपूतः
पूतनारिचरणोदकधौतः ।
यद्यहं स्मृतधनंजयसूतः
किं करिष्यति स मे यमदूतः ॥२९

भासतां भवभयैकभेषजं
मानसे मम मुहुर्मुहुर्मुहुः ।
गोपवेषमुपसेदुषः स्वयं
यापि कापि रमणीयता विभोः ॥३०

कर्णलम्बितकदम्बमञ्जरी-
केसरारुणकपोलमण्डलम् ।
निर्मलं निगमवागगोचरं
नीलिमानमवलोकयामहे ॥३१

साचिसंचलितलोचनान्तरं
सामिकुट्मलितकोमलाधरम् ।
वेगवल्गितकराङ्गुलीमुखं
वेणुनादरसिकं भजामहे ॥३२

स्यन्दने गरुडमण्डितध्वजे
कुण्डिनेशतनयाधिरोपिता ।
केनचिन्नवतमालपल्लव-
श्यामलेन पुरुषेण नीयते ॥३३

मा यात पान्थाः पथि भीमरथ्या
दिगम्बरः कोऽपि तमालनीलः ।
विन्यस्तहस्तोऽपि नितम्बबिम्बे
धूर्तः समाकर्षति चित्तवित्तम् ॥३४

अङ्गनामङ्गनामन्तरे माधवो
माधवं माधवं चान्तरेणाङ्गना ।
इत्थमाकल्पिते मण्डले मध्यगः
संजगौ वेणुना देवकीनन्दनः ॥३५

केकिकेकादृतानेकपङ्केरुहा-
लीनहंसावलीहृद्यताहृद्यता ।
कंसवंशाटवीदाहदावानलः
संजगौ वेणुना देवकीनन्दनः ॥३६

कापि वीणाभिराराविणा कम्पितः
कापि वीणाभिराकिङ्किणीनतितः ।
कापि वीणाभिरामान्तरं गापितः
संजगौ वेणुना देवकीनन्दनः ॥३७

चारुचन्द्रावलीलोचनैश्चुम्बितो
गोपगोवृन्दगोपालिकावल्लभः ।
वल्लवीवृन्दवृन्दारकः कामुकः
संजगौ वेणुना देवकीनन्दनः ॥३८

मौलिमालालसन्मत्तभृङ्गीलता-
भीतभीतप्रियाविभ्रमालिङ्गितः ।
स्रस्तगोपीकुचाभोगसंमेलितः
संजगौ वेणुना देवकीनन्दनः ॥३९

चारुचामीकराभासभामाविभु-
र्वैजयन्तीलताभासितोरःस्थलः ।
नन्दवृन्दावने वासितामध्यगः
संजगौ वेणुना देवकीनन्दनः ॥४०

बालिकातालिकाताललीलालया-
सङ्गसंदर्शितभ्रूलताविभ्रमः ।
गोपिकागीतदत्तावधानः स्वयं
संजगौ वेणुना देवकीनन्दनः ॥४१

पारिजातं समुद्धृत्य राधावयो-
रूपया मासभासा गुणैरङ्गने ।
शीतशीते वटे यामुनीये तटे
संजगौ वेणुना देवकीनन्दनः ॥४२

अग्रे दीर्घतरोऽयमर्जुनतरु-
स्तस्याग्रतो वर्तनी
सा घोषं समुपैति तत्परिसरे
देशे कलिन्दात्मजा ।
तस्यास्तीरतमालकाननतले
चक्रं गवां चारय-
न्गोपः क्रीडति दर्शयिष्यति सखे
पन्थानमव्याहतम् ॥४३

गोधूलिधूसरितकोमलगोपवेषं
गोपालबालकशतैरनुगम्यमानम् ।
सायंतने प्रतिगृहं पशुबन्धनार्थं
गच्छन्तमच्युतशिशुं प्रणतोऽस्मि नित्यम् ॥४४

निधिं लावण्यानां निखिलजगदाश्चर्यनिलयं
निजावासं भासां निरवधिकनिःश्रेयसरसम् ।
सुधाधारासारं सुकृतपरिपाकं मृगदृशां
प्रपद्ये माङ्गल्यं प्रथमधिदैवं कृतधियाम् ॥४५

आताम्रपाणिकमलप्रणयप्रतोद-
मालोलहारमणिकुण्डलहेमसूत्रम् ।
आविःश्रमाम्बुकणमम्बुदनीलमव्या-
दाद्यं धनंजयरथाभरणं महो नः ॥४६

नखनियमितकण्डून्पाण्डवस्यन्दनाश्वा-
ननुदिनमभिषिञ्चन्नञ्जलिस्थैः पयोभिः ।
अवतु विततगात्रस्तोत्रसंस्यूतमौलि-
र्दशनविधृतरश्मिर्देवकीपुण्यराशिः ॥४७

व्रजयुवतीसहाये यौवनोल्लासिकाये
सकलशुभविलासे कुन्दमन्दारहासे ।
निवसतु मम चित्तं तत्पदायत्तवृत्तं
मुनिसरसिजभानौ नन्दगोपस्य सूनौ ॥४८

अरण्यानीमार्द्रस्मितमधुरबिम्बाधरसुधा-
सरण्या संक्रान्तैः सपदि मदयन्वेणुनिनदैः ।
धरण्या सानन्दोत्पुलकमुपगूढाङ्घ्रिकमलः
शरण्यानामाद्यः स जयतु शरीरी मधुरिमा ॥४९

मुग्धं स्निग्धं मधुरमुरलीमाधुरीधीरनादैः
कारं कारं करणविवशं गोकुलं व्याकुलत्वम् ।
श्यामं कामं युवजनमनोमोहनं मोहनत्वं
चित्ते नित्यं निवसतु महो वल्लवीवल्लभं नः ॥५०

विदग्धगोपालविलासिनीनां
संभोगचिह्नाङ्कितसर्वगात्रम् ।
पवित्रमाम्नायगिरामगम्यं
ब्रह्म प्रपद्ये नवनीतचोरम् ॥५१

आनन्देन यशोदया समदनं
गोपाङ्गनाभिश्चिरं
साशङ्कं बलविद्विषा सकुसुमैः
सिद्धैः पथि व्याकुलम् ।
सेर्ष्यं गोपकुमारकैः सकरुणं
पौरैर्जनैः सस्मितं
यो दृष्टः स पुनातु नो मुररिपुः
प्रोक्षिप्तगोवर्धनः ॥५२

अन्तर्गृहे कृष्णमवेक्ष्य चोरं
बद्ध्वा कवाटं जननीं गतैका ।
उलूखले दामनिबद्धमेनं
तत्रापि दृष्ट्वा स्तिमिता बभूव ॥५३

रत्नस्थले जानुचरः कुमारः
संक्रान्तमात्मीयमुखारविन्दम् ।
आदातुकामस्तदलाभखेदा-
द्विलोक्य धात्रीवदनं रुरोद ॥५४

उपासतामात्मविदः पुराणाः
परं परस्तान्निहितं गुहायाम् ।
वयं यशोदाशिशुबाललीला-
कथासुधासिन्धुषु लीलयामः ॥५५

विक्रेतुकामा किल गोपकन्या
मुरारिपादार्पितचित्तवृत्तिः ।
दध्यादिकं मोहवशादवोच-
द्गोविन्द दामोदर माधवेति ॥५६

उलूखलं वा यमिनां मनो वा
गोपाङ्गनानां कुचकुड्मलं वा ।
मुरारिनाम्नः कलभस्य नून-
मालानमासीत्त्रयमेव भूमौ ॥५७

करारविन्देन पदारविन्दं
मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं
बालं मुकुन्दं मनसा स्मरामि ॥५८

शंभो स्वागतमास्यतामित इतो
वामेन पद्मासन
क्रौञ्चारे कुशलं सुखं सुरपते
वित्तेश नो दृश्यसे ।
इत्थं स्वप्नगतस्य कैटभजितः
श्रुत्वा यशोदा गिरः
किं किं बालक जल्पसीति रचितं
धूधूकृतं पातु नः ॥५९

मातः किं यदुनाथ देहि चषकं
किं तेन पातुं पय-
स्तन्नास्त्यद्य कदास्ति वा निशि निशा
का वान्धकारोदये ।
आमील्याक्षियुगं निशाप्युपगता
देहीति मातर्मुहु-
र्वक्षोजाम्बरकर्षणोद्यतकरं
कृष्णः स पुष्णातु नः ॥ ६०

कालिन्दीपुलिनोदरेषु मुसली
यावद्गतः खेलितुं
तावत्कर्बुरिकापयः पिब हरे
वर्धिष्यते ते शिखा ।
इत्थं बालतया प्रतारणपराः
श्रुत्वा यशोदागिरः
पायान्नः स्वशिखां स्पृशन्प्रमुदितः
क्षीरेऽर्धपीते हरिः ॥६१

कैलासे नवनीतति क्षितितले
प्राग्जग्धमृल्लोष्टति
क्षीरोदेऽपि निपीतदुग्धति
लसत्स्मेरप्रफुल्ले मुखे ।
मात्राजीर्णधिया दृढं चकितया
नष्टास्मि दृष्टः कया
धू धू वत्सक जीव जीव चिर-
मित्युक्तोऽवताद्वो हरिः ॥६२

किंचित्कुञ्चितलोचनस्य पिबतः
पर्यायपीतं स्तनं
सद्यः प्रस्नुतदुग्धबिन्दुमपरं
हस्तेन संमार्जतः ।
मात्रैकाङ्गुलिलालितस्य चिबुके
स्मेराननस्याधरे
शौरेः क्षीरकणान्विता निपतिता
दन्तद्युतिः पातु नः ॥६३

उत्तुङ्गस्तनमण्डलोपरिलस-
त्प्रालम्बमुक्तामणे-
रन्तर्बिम्बितमिन्द्रनीलनिकर-
च्छायानुकारिद्युति ।
लज्जाव्याजमुपेत्य नम्रवदना
स्पष्टं मुरारेर्वपुः
पश्यन्ती मुदिता मुदेऽस्तु भवतां
लक्ष्मी विवाहोत्सवे ॥६४

कृष्णेनाम्ब गतेन रन्तुमधुना
मृद्भक्षिता स्वेच्छया
तथ्यं कृष्ण क एवमाह मुसली
मिथ्याम्ब पश्याननम् ।
व्यादेहीति विदारिते च वदने
दृष्ट्वा समस्तं जग-
न्माता यस्य जगाम विस्मयपदं
पायात्स नः केशवः ॥६५

स्वाती सपत्नी किल तारकाणां
मुक्ताफलानां जननीति रोषात् ।
सा रोहिणी नीलमसूत रत्नं
कृतास्पदं गोपवधूकुचेषु ॥६६

नृत्यन्तमत्यन्तविलोकनीयं
कृष्णं मणिस्तम्भगतं मृगाक्षी ।
निरीक्ष्य साक्षादिव कृष्णमग्रे
द्विधा वितेने नवनीतमेकम् ॥६७

वत्स जागृहि विभातमागतं
जीव कृष्ण शरदां शतं शतम् ।
इत्युदीर्य सुचिरं यशोदया
दृश्यमानवदनं भजामहे ॥६८

ओष्ठं जिघ्रन्शिशुरिति धिया
चुम्बितो वल्लवीभिः
कण्ठं गृह्णन्रुणितपदं
गाढमालिङ्गिताङ्गः
दोष्णा लज्जापदमभिमृश-
न्नङ्कमारोपितात्मा
धूर्तस्वामी हरतु दुरितं
दूरतो बालकृष्णः ॥६९

एते लक्ष्मण जानकीविरहितं
मां खेदयन्त्यम्बुदा
मर्माणीव च घट्टयन्त्यलममी
क्रूराः कदम्बानिलाः ।
इत्थं व्याहृतपूर्वजन्मचरितो
यो राधया वीक्षितः
सेर्ष्यं शङ्कितया स नः सुखयतु
स्वप्नायमानो हरिः ॥७०

ओष्ठं मुञ्च हरे बिभेमि भवता
पानैर्हता पूतना
कण्ठाश्लेषममुं जहीहि दलिता
वालिङ्गनेनार्जुनौ ।
मा देहि च्छुरितं हिरण्यकशिपु-
र्नीतो नखैः पञ्चता-
मित्थं वारितरात्रिकेलिरवता-
ल्लक्ष्म्याः पहासाद्धरिः ॥७१

रामो नाम बभूव हुं तदबला
सीतेति हुं तौ पितु-
र्वाचा पञ्चवटीवने विहरत-
स्तामाहरद्रावणः ।
निद्रार्थं जननीकथामिति हरे-
र्हुंकारतः शृण्वतः
सौमित्रे क धनुर्धनुर्धनुरिति
व्यग्रा गिरः पान्तु नः ॥७२

बालोऽपि शैलोद्धरणाग्रपाणि-
र्नीलोऽपि नीरन्ध्रतमः प्रदीपः ।
धीरोऽपि राधानयनावबद्धो
जारोऽपि संसारहरः कुतस्त्वम् ॥७३

बालाय नीलवपुषे नवकिङ्किणीक-
जालाभिरामजघनाय दिगम्बराय ।
शार्दूलदिव्यनखभूषणभूषिताय
नन्दात्मजाय नवनीतमुषे नमस्ते ॥७४

सव्ये पायसभक्तमाहितरसं बिभ्रन्मुदा
पाणौ शारदचन्द्रमण्डलनिभं हैयंगवीनं

कण्ठे कल्पितपुण्डरीकनखमप्युद्दामदीप्तं दध-
द्देवो दिव्यदिगम्बरो दिशतु नः
सौख्यं यशोदाशिशुः ॥७५

किङ्किणिकिणिकिणिरभसैं-
रङ्गनभुवि रिङ्गणैः सदाटन्तम् ।
कुंकुणुकुणुपदयुगलं
कङ्कणकरभूषणं हरिं वन्दे ॥७६

संबाधे सुरभीणा-
मम्बामायासयन्तमनुयान्तीम् ।
लम्बालकमवलम्बे
तं बालं तनुविलग्नजम्बालम् ॥७७

अञ्चितपिञ्छाचूडं
संचितसौजन्यवल्लवीवलयम् ।
अधरमणिनिहितवेणुं
बालं गोपालमनिशमवलम्बे ॥७८

प्रह्लादभागधेयं
निगमान्तमहागुहान्तराधेयम् ।
नरहरिपदाभिधेयं
विबुधविधेयं ममानुसंधेयम् ॥७९

संसारे किं सारं
कंसारेश्चरणयुगलपरिवसनम् ।
ज्योतिः किमन्धकारे
यदन्धकारेरनुस्मरणम् ॥८०

कलशनवनीतचोरे
कमलादृक्कुमुदचन्द्रिकापूरे ।
विहरतु नन्दकुमारे
चेतो मम गोपसुन्दरीजारे ॥८१

कस्त्वं बाल बलानुजः किमिह रे
मन्मन्दिराशङ्कया
युक्तं तन्नवनीतपात्रविवरे
हस्तं किमर्थं न्यसेः ।
मातः कंचन वत्सकं मृगयितुं
मा गा विषादं क्षणा-
दित्येवं वरवल्लवीप्रतिवचः
कृष्णस्य पुष्णातु नः ॥८२

गोपालाजिरकर्दमे विहरसे
विप्राध्वरे लज्जसे
ब्रूषे गोधनहुंकृतैः स्तुतिशतै-
र्मौनं विधत्से विदाम् ।
दास्यं गोकुलपुंश्चलीषु कुरुषे
स्वाम्यं न दान्तात्मसु
ज्ञातं कृष्ण तवाङ्घ्रिपङ्कजयुगं
प्रेमाचलं मञ्जुलम् ॥८३

नमस्तस्मै यशोदाया
दायादायास्तु तेजसे ।
यद्धि राधामुखाम्भोजं
भोजं भोजं व्यवर्धत ॥८४

अवताराः सन्त्वन्ये
सरसिजनयनस्य सर्वतोभद्राः ।
कृष्णादन्यः को वा
प्रभवति गोगोपगोपिकामुक्त्यै ॥८५

मध्येगोकुलमण्डलं प्रतिदिशं
चाम्भारवैर्जृम्भिते
प्रातर्दोहमहोत्सवे नववन-
श्यामं रणन्नूपुरम् ।
फालेबालविभूषणं कटिरण-
त्सत्किङ्किणीमेखलं
कण्ठेऽव्याघ्रनखं च शैशवकला-
कल्याणकात्स्न्यं भजे ॥८६

सजलजलदनीलं दर्शितोदारलीलं
करतलधृतशैलं वेणुवाद्यै रसालम् ।
व्रजजनकुलपालं कामिनीकेलिलोलं
कलितललितमालं नौमि गोपालबालम् ॥८७

स्मितललितकपोलं स्निग्धसंगीतलोलं
ललितचिकुरजालं चौर्यचातुर्यलीलम् ।
शतमखरिपुकालं शातकुम्भाभचेलं
कुवलयदलनीलं नौमि गोपालबालम् ॥८८

मुरलिनिनदलोलं मुग्धमायूरबालं
दलितदनुजजालं धन्यसौजन्यलीलम् ।
परहितनवहेलं पद्मसद्मानुकूलं
नवजलधरनीलं नौमि गोपालबालम् ॥८९

सरसगुणनिकायं सच्चिदानन्दकायं
शमितसकलमायं सत्यलक्ष्मीसहायम् ।
शमदमसमुदायं शान्तसर्वान्तरायं
सुहृदयजनदायं नौमि गोपालरायम् ॥९०

लक्ष्मीकलत्रं ललिताब्जनेत्रं
पूर्णेन्दुवक्त्रं पुरुहूतमित्रम् ।
कारुण्यपात्रं कमनीयगात्रं
वन्दे पवित्रं वसुदेवपुत्रम् ॥९१

मदमयमदमयदुरगं
यमुनामवतीर्य वीर्यशाली यः ।
मम रतिमरतिरस्कृति-
शमनपरः स क्रियात्कृष्णः ॥९२

मौलौ मायूरबर्हं मृगमदतिलकं
चारुलालाटपट्टे
कर्णद्वन्द्वे च तालीदलमतिमृदुलं
मौक्तिकं नासिकायाम् ।
हारो मन्दारमालापरिमलभरिते
कौस्तुभस्योपकण्ठे
पाणौ वेणुश्च यस्य व्रजयुवतियुतः
पातु पीताम्बरो नः ॥९३

मुरारिणा वारिविहारकाले
मृगेक्षणानां मुषितांशुकानाम् ।
करद्वयं वा कचसंहतिर्वा
प्रमीलनं वा परिधानमासीत् ॥९४

यासां गोपाङ्गनानां लसदसिततरा
लोललीलाकटाक्षा
यन्नासाचारुमुक्तामणिरुचिनिकर-
व्योमगङ्गाप्रवाहे ।
मीनायन्तेऽपि तासामतिरभसचल-
च्चारुलीलालकान्ता
भृङ्गायन्ते यदङ्घ्रिद्वयसरसिरुहे
पातु पीताम्बरो नः ॥९५

यद्वेणुश्रेणिरूपस्थितसुषिरमुखो-
द्गीर्णनादप्रभिन्ना
एणाक्ष्यस्तत्क्षणेन त्रुटितनिजपति-
प्रेमबन्धा बभूवुः ।
अस्तव्यस्तालकान्ताः स्फुरदधरकुच-
द्वन्द्वनाभिप्रदेशाः
कामावेशप्रकल्प्यप्रकटितपुलकाः
पातु पीताम्बरो नः ॥९६

देवक्या जठराकरे समुदितः
क्रीतो गवां पालिना
नन्देनानकदुन्दुभेर्निजसुता-
पण्येन पुण्यात्मना ।
गोपालावलिमुग्धहारतरलो
गोपीजनालंकृतिः
स्थेयाद्वो हृदि संततं स मधुरः
कोऽपीन्द्रनीलो मणिः ॥९७

पीठे पीठनिषण्णबालकगले
तिष्ठन्स गोपालको
यन्त्रान्तःस्थितदुग्धभाण्डमवभि-
द्याच्छाद्य घण्टारवम् ।
वक्त्रोपान्तकृताञ्जलिः कृतशिरः-
कम्पं पिबन्त्यः पयः
पायादागतगोपिकानयनयो-
र्गण्डूषफूत्कारकृत् ॥९८

यज्ञैरीजिमहे धनं ददिमहे
पात्रेषु नूनं वयं
वृद्धान्भेजिमहे तपश्चकृमहे
जन्मान्तरे दुश्चरम् ।
येनास्माकमभूदनन्यसुलभा
भक्तिर्भवद्वेषिणी
चाणूरद्विषि भक्तकल्मषमुषि
श्रेयःपुषि श्रीजुषि ॥९९

त्वयि प्रसन्ने मम किं गुणेन
त्वय्यप्रसन्ने मम किं गुणेन ।
रक्ते विरक्ते च वरे वधूनां
निरर्थकः कुङ्कुमपत्रभङ्गः ॥१००

गायन्ति क्षणदावसानसमये
सानन्दमिन्दुप्रभा
रुन्धत्यो निजदन्तकान्तिनिवहै-
र्गोपाङ्गना गोकुले ।
मथ्नत्यो दधि पाणिकङ्कण-
क्वणत्कारानुकारं जवा-
द्व्यावल्गद्वसनाञ्चला यमनिशं
पीताम्बरोऽव्यात्स नः ॥१०१

अंसालम्बितवामकुण्डलधरं
मन्दोन्नतभ्रूलतं
किंचित्कुञ्चितकोमलाधरपुटं
साचिप्रसारेक्षणम् ।
आलोलाङ्गुलिपल्लवैर्मुरलिका-
मापूरयन्तं मुदा
मूले कल्पतरोस्त्रिभङ्गललितं
जाने जगन्मोहनम् ॥१०२

मल्लैः शैलेन्द्रकल्पः शिशुरितरजनैः
पुष्पचापोऽङ्गनाभि-
र्गोपैस्तु प्राकृतात्मा दिवि कुलिशभृता
विश्वकायोऽप्रमेयः ।
क्रुद्धः कंसेन कालो भयचकितदृशा
योगिभिर्ध्येयमूर्ति-
र्दृष्टो रङ्गावतारे हरिरमरगणा-
नन्दकृत्पातु युष्मान् ।।१०३

संविष्टो मणिविष्टरेऽङ्कतलम-
ध्यासीनलक्ष्मीमुखे
कस्तूरीतिलकं मुदा विरचयन्
हर्षात्कुचौ संस्पृशन् ।
अन्योन्यस्मितचन्द्रिकाकिशलयै-
राराधयन्मन्मथं
गोपीगोपपरीवृतो यदुपतिः
पायाज्जगन्मोहनः ।।१०४

आकृष्टे वसनाञ्चले कुवलय-
श्यामा त्रपाधःकृता
दृष्टिः संवलिता रुचा कुचयुगे
स्वर्णप्रभे श्रीमति ।
बालः कश्चन चूतपल्लव इति
प्रान्तस्मितास्यश्रियं
श्लिष्यंस्तामथ रुक्मिणीं नतमुखीं
कृष्णः स पुष्णातु नः ।।१०५

उर्व्यां कोऽपि महीधरो लघुतरो
दोर्भ्यां धृतो लीलया
तेन त्वं दिवि भूतले च सततं
गोवर्धनो गीयसे ।
त्वां त्रैलोक्यधुरं वहामि कुचयो-
रग्रे न तद्गण्यते
किं वा केशव भाषणेन बहुना
पुण्यैर्यशो लभ्यते ।।१०६

संध्यावन्दन भद्रमस्तु भवते
भोः स्नान तुभ्यं नमो
भो देवाः पितरश्च तर्पणविधौ
नाहं क्षमः क्षम्यताम् ।
यत्र क्वापि निषद्य यादवकुलो-
त्तंसस्य कंसद्विषः
स्मारं स्मारमघं हरामि तदलं
मन्ये किमन्येन मे ।।१०७

हे गोपालक हे कृपाजलनिधे
हे सिन्धुकन्यापते
हे कंसान्तक हे गजेन्द्रकरुणा-
पारीण हे माधव ।
हे रामानुज हे जगत्त्रयगुरो
हे पुण्डरीकाक्ष मां
हे गोपीजननाथ पालय परं
जानामि न त्वां विना ।।१०८

कस्तूरीतिलकं ललाटफलके
वक्षःस्थले कौस्तुभं
नासाग्रे नवमौक्तिकं करतले
वेणुं करे कङ्कणम् ।

सर्वाङ्गे हरिचन्दनं च कलय-
न्कण्ठे च मुक्तावलिं
गोपस्त्रीपरिवेष्टितो विजयते
गोपालचूडामणिः ॥१०६

कालिन्दीबहुलप्रवाहरभसं
संस्तम्भयंस्तत्क्षणा-
च्छैलान्विद्रवयन्मृगान्विवशय-
न्गोवृन्दमानन्दयन् ।
गोपान्संभ्रमयन्मुनीन्मुकुलय-
न्सप्त स्वराञ्जृम्भय-
न्नोंकारार्थमुदीरयन्विजयते
वंशीनिनादः शिशोः ॥११०

Third Āśvāsa

अस्ति स्वस्त्ययनं समस्तजगता-
मभ्यस्तलक्ष्मीस्तनं
वस्तु ध्वस्तरजस्तमोभिरनिशं
न्यस्तं पुरस्तादिव ।
हस्तोदस्तगिरीन्द्रमस्तकतरु-
प्रस्तारविस्तारित-
स्रस्तस्वस्तरुसूनसंस्तरलस-
त्प्रस्ताविराधास्तुतम् ॥१

राधाराधितविभ्रमाद्भुतरसं
लालित्यरत्नाकरं
साधारण्यपदव्यतीतसहज-
स्मेराननाम्भोरुहम् ।
आलम्बे हरिनीलगर्वगुरुतां
सर्वस्वनिर्वापणं
बालं वैणविकं विमुग्धमधुरं
मूर्धाभिषिक्तं महः ॥२

करिणामलङ्घ्यगतिवैभवं भजे
करुणावलम्बितकिशोरविग्रहम् ।
यमिनामनारतविहारि मानसे
यमुनावनान्तरसिकं परं महः ॥३

अतन्त्रितत्रिजगदपि व्रजाङ्गना-
नियन्त्रितं विपुलविलोचनाज्ञया ।
समन्ततः सरसतरं विजृम्भतां
निरन्तरं मम हृदये परं महः ॥४

कन्दर्पप्रतिमल्लकान्तिविभवं
कादम्बिनीबान्धवं
वृन्दारण्यविलासिनीव्यसनिनं
वेषेण भूषामयम् ।
मन्दस्मेरमुखाम्बुजं मधुरिम-
व्यामृष्टबिम्बाधरं
वन्दे कन्दलितार्द्रयौवनवनं
कैशोरकं शार्ङ्गिणः ॥५

आमुक्तमानुषममुक्तनिजानुभाव-
मारूढविग्रहमगूढविदग्धलीलम् ।
आमृष्टयौवनममृष्टकिशोरभाव-
माद्यं महः किमपि माद्यति मानसं मे ॥६

ते ते भावाः सकलजगतीलोभनीयप्रभावा
नानातृष्णासुहृदि हृदि मे काममाविर्भवन्तु ।
लीलावेणुक्वणितलसितस्मेरवक्त्रारविन्दा-
न्नाहं जाने मधुरमपरं नन्दपुण्याम्बुपूरात् ॥७

सुकृतिभिरादृते सरसवेणुनिनादसुधा-
रसलहरीविहारनिरवग्रहकर्णपुटे ।
व्रजवरसुन्दरीमुखसरोरुहसारसिके
महसि कदा नु मज्जति मदीयमिदं हृदयम् ॥८

तृष्णातुरे चेतसि जृम्भमाणे
मुष्णन्मुहुर्मोहमहान्धकारम् ।
पुष्णातु नः पुण्यदयैकसिन्धोः
कृष्णस्य कारुण्यकटाक्षकेलिः ॥९

निखिलनिगममौलिलालितं
पदकमलं परमस्य तेजसः ।
व्रजभुवि बहुमन्महेतरां
सरसकरीषविशेषरूषितम् ॥१०

उदारमृदुलस्मितव्यतिकराभिरामाननं
मुदा मुहुरुदीर्णया मुनिमनोम्बुजाम्रेडितम् ।
मदालसविलोचनव्रजवधूमुखास्वादितं
कदा नु कमलेक्षणं कमपि बालमालोकये ॥११

व्रजजनमदयोषिल्लोचनोच्छिष्टशेषी-
कृतमपि चपलाभ्यां लोचनाभ्यामुभाभ्याम् ।
सकृदपि परिपातुं ते वयं पारयामः
कुवलयदलनीलं कान्तिपूरं कदा नु ॥१२

घोषयोषिदनुगीतयौवनं
कोमलस्तनितवेणुनिस्वनम् ।
सारभूतमभिरामसंपदां
धाम तामरसलोचनं भजे ॥१३

लीलया ललितयावलम्बितं
मूलगेहमिव मूर्तिसंपदाम् ।
नीलनीरदविकासविभ्रमं
बालमेव वयमाद्रियामहे ॥१४

वन्दे मुरारेश्चरणारविन्द-
द्वन्द्वं दयादर्शितशैशवस्य ।
वन्दारुवृन्दारकवृन्दमौलि-
मन्दारमालाविनिमर्दभीरु ॥१५

यस्मिन्नृत्यति यस्य शेखरभरैः
क्रौञ्चद्विषश्चन्द्रकी
यस्मिन्दृप्यति यस्य घोषसुरभिं
जिघ्रन्वृषो धूर्जटेः ।
यस्मिन्सज्जति यस्य विभ्रमगतिं
वाञ्छन् हरेः सिन्धुर-
स्तद्वृन्दावनकल्पकद्रुमवनं
तं वा किशोरं भजे ॥१६

अरुणाधरामृतविशेषितस्मितं
वरुणालयानुगतवर्णवैभवम् ।
तरुणारविन्ददलदीर्घलोचनं
करुणामयं कमपि बालमाश्रये ॥१७

लावण्यवीचीरचिताङ्गभूषां
भूषापदारोपितपुण्यबर्हाम् ।
कारुण्यधारालकटाक्षमालां
बालां भजे वल्लववंशलक्ष्मीम् ॥१८

41A.

मधुरैकरसं वपुर्विभोस्त-
न्मथुरावीथीचरं भजामहे ।
नगरीमृगशावलोचनानां
नयनेन्दीवरवर्षवर्षितम् ॥१६

पर्याकुलेन नयनान्तविजृम्भितेन
वक्त्रेण कोमलमदस्मितविभ्रमेण ।
मन्द्रेण मञ्जुलतरेण च जल्पितेन
नन्दस्य हन्त तनयो हृदयं धिनोति ॥२०

कन्दर्पकण्डूलकटाक्षवन्दी-
रिन्दीवराक्षीरभिलष्यमाणान् ।
मन्दस्मिताधारमुखारविन्दा-
न्वन्दामहे वल्लवधूर्तपादान् ॥२१

लीलाटोपकटाक्षनिर्भरपरिष्वङ्गप्रसङ्गाधिक-
प्रीते रीतिविभागसंगरलसद्वेणुप्रणादामृते ।
राधालोचनलालितस्य ललितस्मेरे मुरारेर्मुदा
माधुर्यैकरसे मुखेन्दुकमले
मग्नं मदीयं मनः ॥२२

शरणागतवज्रपञ्जरे
शरणे शार्ङ्गधरस्य वैभवे ।
कृपया धृतगोपविग्रहे
कियदन्यन्मृगयामहे वयम् ॥२३

जगत्त्रयैकान्तमनोज्ञभूमि-
श्चेतस्यजस्रं मम संनिधत्ताम् ।
रामासमास्वादितसौकुमार्यं
राधास्तनाभोगरसज्ञमोजः ॥२४

वयमेते विश्वसिमः
करुणाकरकीर्तिकिंवदन्त्याङ्कः ।
अपि च विभो तव ललिते
चपलतरा मतिरियं बाल्ये ॥२५

मधुरिमभरिते मनोभिरामे
मृदुलतरस्मितमुद्रिताननेन्दौ ।
त्रिभुवननयनैकलोभनीये
महसि वयं व्रजभाजि लालसाः स्मः ॥२६

मुखारविन्दे मकरन्दबिन्दु-
निष्यन्दलीलामुरलीनिनादे ।
व्रजाङ्गनापाङ्गतरङ्गभङ्ग-
संग्रामभूमौ तव लालसाः स्मः ॥२७

आताम्रायतलोचनांशुलहरी-
लीलासुधाप्यायितै-
र्गीताम्रेडितदिव्यकेलिभरितैः
स्फीतं व्रजस्त्रीजनैः ।
स्वेदाम्भःकणभूषितेन किमपि
स्मेरेण वक्त्रेन्दुना
पादाम्भोजमृदुप्रचारसुभगं
पश्यामि दृश्यं महः ॥२८

पाणौ वेणुः प्रकृतिसुकुमाराकृतौ बाल्यलक्ष्मीः
पार्श्वे बालाः प्रणयसरसा-
लोकितापाङ्गलीलाः ।
मौलौ बर्हं मधुरवदनाम्भोरुहे मौग्ध्यमुद्रे-
त्यार्द्राकारं किमपि कितवं
ज्योतिरन्वेषयामः ॥२६

आरूढवेणुतरुणाधरविभ्रमेण
माधुर्यशालिवदनाम्बुजमुद्वहन्ती ।
कैशोरके वयसि कापि च कान्तियष्टि-
रालोक्यतां किमनया वनदेवता वः ॥३०

अनन्यसाधारणकान्तिकान्त-
माक्रान्तगोपीनयनारविन्दम् ।
पुंसः पुराणस्य नवं विलासं
पुण्येन पूर्णेन विलोकयिष्ये ॥३१

साष्टाङ्गपातमभिवन्द्य समस्तभावैः
सर्वान्सुरेन्द्रनिकरानिदमेव याचे ।
मन्दस्मितार्द्रमधुराननचन्द्रबिम्बे
नन्दस्य पुण्यनिचये मम भक्तिरस्तु ॥३२

एषु प्रवाहेषु स एव मन्ये
क्षणोऽपि गण्यः पुरुषायुषेषु ।
आस्वाद्यते यत्र कयापि वृत्त्या
नीलस्य बालस्य निजं चरित्रम् ॥३३

निसर्गसरसाधरं निजदयार्द्रदिग्येक्षणं
मनोज्ञमुखपङ्कजं मधुरसार्द्रमन्दस्मितम् ।
रसज्ञहृदयास्पदं रमितवल्लवीलोचनं
पुनः पुनरुपास्महे भुवनलोभनीयं महः ॥३४

स कोऽपि बालः सरसीरुहाक्षः
सा च व्रजस्त्रीजनपादधूलिः ।
मुहुस्तदेतद्युगलं मदीये
मोमुह्यमानेऽपि मनस्युदेतु ॥३५

मयि प्रयाणाभिमुखे च वल्लवी-
स्तनद्वयीदुर्ललितः स बालः ।
शनैः शनैः श्रावितवेणुनिस्वनो
विलासवेषेण पुरः प्रतीयताम् ॥३६

अतिभूमिमभूमिमेव वा
वचसां वासितवल्लवीस्तनम् ।
मनसामपरं रसायनं
मधुराद्वैतमुपास्महे महः ॥३७

जननान्तरेऽपि जगदेकमण्डने
कमनीयधाम्नि कमलायतेक्षणे ।
व्रजसुन्दरीजनविलोचनामृते
चपलानि सन्तु सकलेन्द्रियाणि मे ॥३८

मुनिश्रेणीवन्द्यं मदभरलसद्वल्लववधू-
स्तनश्रोणीबिम्बस्तिमित-
नयनाम्भोजसुभगम् ।
पुनः श्लाघाभूमिं पुलकितगिरां नैगमगिरां
घनश्यामं वन्दे किमपि
महनीयाकृति महः ॥३९

अनुचुम्बतामपि चलेन चेतसा
मनुजाकृतेर्मधुरिमश्रियं विभोः ।
अयि देव कृष्ण दयितेति जल्पता-
मपि नो भवेयुरपि नाम तादृशः ॥४०

किशोरवेषेण कृशोदरीदृशां
विशेषदृश्येन विशाललोचनम् ।
यशोदया लब्धयशोनवाम्बुधे-
र्निशामये नीलनिशाकरं कदा ॥४१

प्रकृतिरवतु नो विलासलक्ष्म्याः
प्रकृतिजडं प्रणतापराधवीथ्याम् ।
सुकृतिकृतपदं किशोरभावे
सुकृतिकृतप्रणिधानपात्रमोजः ॥४२

अपहसितसुधामदावलेपै-
रधिकमनोहरमार्द्रमन्दहासैः ।
व्रजयुवतिविलोचनावलेह्यं
रमयतु धाम रमावरोधनं नः ॥४३

अङ्कुरितस्मेरदशाविशेषै-
रश्रान्तहर्षामृतवर्षमक्ष्णाम् ।
संक्रीडतां चेतसि गोपकन्या-
धन्यस्तनस्वस्त्ययनं महो नः ॥४४

मृगमदपङ्कसंकरविशेषितवन्यमहा-
गिरितटगण्डगैरिकघनद्रवविद्रुमितम् ।
अजितभुजान्तरं भजत गोपवधूपृथुल-
स्तनकलशस्थलीघुसृणमर्दनकर्दमितम् ॥४५

आमूलपल्लवितलीलमपाङ्गजालै-
रासिञ्चती भुवनमादृतगोपवेषा ।
बाल्याकृतिर्मृदुलमुग्धमुखेन्दुबिम्बा
माधुर्यसिद्धिरवतान्मधुविद्विषो नः ॥४६

विरणन्मणिनूपुरं व्रजे
चरणाम्भोजमुपास्व शार्ङ्गिणः ।
सरसे सरसि श्रियाश्रितं
कमलं वा कलहंसनादितम् ॥४७

शरणमशरणानां शारदाम्भोजनेत्रं
निरवधिमधुरिम्णा नीलवेषेण रम्यम् ।
स्मरशरपरतन्त्रस्मेरनेत्राम्बुजाभि-
र्व्रजयुवतिभिरव्याद् ब्रह्म संवेष्टितं नः ॥४८

सुव्यक्तकान्तिभरसौरभदिव्यगात्र-
मव्यक्तयौवनपरीतकिशोरभावम् ।
गव्यानुपालनविधावनुशिष्टमव्या-
दव्याजरम्यमखिलेश्वरवैभवं नः ॥४९

अनुगतममरीणामम्बरालम्बिनीनां
नयनमधुरिमश्रीनर्मनिर्माणसीम्नाम् ।
व्रजयुवतिविलासव्यापृतापाङ्गमव्या-
त्त्रिभुवनसुकुमारं देवकैशोरकं नः ॥५०

आपादमाचूडमतिप्रसक्तै-
रापीयमाना यमिनां मनोभिः ।
गोपीजनज्ञातरसावताद्वो
गोपालभूपालकुमारमूर्तिः ॥५१

दिष्ट्या वृन्दावनमृगदृशां विप्रयोगाकुलानां
प्रत्यासन्नं प्रणयचपलापाङ्गवीचीतरङ्गैः ।
लक्ष्मीलीलाकुवलयदलश्यामलं धाम कामा-
न्पुष्णीयाद्वः पुलकमुकुलाभोगभूषाविशेषम् ॥५२

जयति गुहशिखीन्द्रपिञ्छमौलिः
सुरगिरिगैरिककल्पिताङ्गरागः ।
सुरयुवतिविकीर्णसूनवर्ष-
स्नपितविभूषितकुन्तलः कुमारः ॥५३

मधुरमन्दशुचिस्मितमञ्जुलं
वदनपङ्कजमङ्गजवेल्लितम् ।
विजयतां व्रजबालवधूजन-
स्तनतटीविलुठन्नयनं विभोः ॥५४

अलसविलसन्मुग्धस्निग्धस्मितं व्रजसुन्दरी-
मदनकदनखिन्नं धन्यं महद्वदनाम्बुजम् ।
तरुणमरुणज्योत्स्नाकात्स्न्र्यस्मितस्नपिताधरं
जयति विजयश्रेणीमेणीदृशां मदयन्महः ॥५५

राधाकेलिकटाक्षवीक्षितमहा-
वक्षःस्थलीमण्डना
जीयासुः पुलकाङ्कुरास्त्रिभुवना-
स्वादीयसस्तेजसः ।
क्रीडान्तप्रतिसुप्तदुग्धतनया-
मुग्धावबोधक्षण-
त्रासारूढदृढोपगूहगहनाः
साम्राज्यसान्द्रश्रियः ॥५६

स्मितस्नुतसुधाधरा मदशिखण्डिबर्हाङ्किता
विशालनयनाम्बुजा व्रजविलासिनीवासिताः ।
मनोज्ञमुखपङ्कजा मधुरवेणुनादद्रवा
जयन्ति मम चेतसश्चिरमुपासिता
वासनाः ॥५७

जीयादसौ शिखिशिखण्डकृतावतंसा
सांसिद्धिकी सरसकान्तिसुधासमृद्धिः ।
यद्बिन्दुलेशकणिकापरिणामभाग्या-
त्सौभाग्यसीमपदमश्नुते पञ्चबाणः ॥५८

आयामेन दृशोर्विशालतरयो-
रक्षय्यमार्द्रस्मित-
च्छायाधर्षितशारदेन्दु ललितं
चापल्यमात्रं शिशोः ।
आयासानपरान्विधूय रसिकै-
रास्वाद्यमानं मुहु-
र्जीयादुन्मदवल्लवीकुचभरा-
धारं किशोरं महः ॥५९

स्कन्धावारपदं व्रजः कतिपये
गोपाः सहायादयः
स्कन्धालम्बिनि वत्सदाम्नि धनदा
गोपाङ्गनाः स्वाङ्गनाः ।
शृङ्गारा गिरिगैरिकं शिव शिव
श्रीमन्ति बर्हाणि वा
शृङ्गग्राहिकया तथापि तदिदं
प्राहुस्त्रिलोकेश्वरम् ॥६०

श्रीमद्बर्हिशिखण्डमण्डनजुषे
श्यामाभिरामत्विषे
लावण्यैकरसावसिक्तवपुषे
लक्ष्मीसरःप्रावृषे ।
लीलाकृष्टरसज्ञधर्ममनसे
लीलामृतस्रोतसे
के वा न स्पृहयन्ति हन्त महसे
गोपीजनप्रेयसे ॥६१

आपाटलाधरमधीरविलोलनेत्र-
मामोदनिर्भरितमद्भुतकान्तिपूरम् ।
आविःस्मितामृतमनुस्मृतिलोभनीय-
मामुद्रितानन्महो मधुरं मुरारेः ॥६२

जागृहि जागृहि चेतो
नचिराय कृतार्थता भवतः ।
अनुभूयतामिदमिदं
पुरः स्थितं पूर्णनिर्वाणम् ॥६३

चरणयोररुणं करुणार्द्रयोः
कचभरे बहुलं विपुलं दृशोः ।
वपुषि मञ्जुलमञ्जनमेचके
वयसि बालमहो मधुरं महः ॥६४

मालाबर्हमनोज्ञकुन्तलभरां
वन्यप्रसूनोक्षितां
शैलेयद्रवक्लृप्तचित्रतिलकां
शश्वन्मनोहारिणीम् ।
लीलावेणुरवामृतैकरसिकां
लावण्यलक्ष्मीमयीं
बालां बालतमालनीलवपुषं
वन्दे परां देवताम् ॥६५

गुरु मृदुपदे गूढं गुल्फे घनं जघनस्थले
नलिनमुदरे वीरं बाह्वोर्विशालमुरःस्थले ।
मधुरमधरे मुग्धं वक्त्रे विशालविलोचने
बहु कचभरे वन्यं वेषे मनोज्ञमहो महः ॥६६

जिहानं जिहानं नु जानेन मौग्ध्यं
दुहानं दुहानं सुधां वेणुनादैः ।
लिहानं लिहानं सुदीर्घैरपाङ्गै-
र्महानन्दसर्वस्वमेकं नमेत्तम् ॥६७

लसद्बर्हापीडं ललितललितस्मेरवदनं
भ्रमत्क्रीडापाङ्गं प्रणतजनतानिर्वृतिपदम् ।
नवाम्भोदश्यामं निजमधुरिमाभोगभरितं
परं देवं वन्दे परिमिलितकैशोरकरसम् ॥६८

सारस्यसामग्र्यमिवाननेन
माधुर्यचातुर्यमिव स्मितेन ।
तारुण्यकारुण्यमिवेक्षणेन
चापल्यसाफल्यमिदं दृशोर्मे ॥६९

रागान्धगोपीजनवन्दिताभ्यां
योगीन्द्रभृङ्गेन्द्रनिषेविताभ्याम् ।
आताम्रपङ्केरुहविभ्रमाभ्यां
स्वामिन्पदाभ्यामयमञ्जलिस्ते ॥७०

अर्धानुलापान्व्रजसुन्दरीणा-
मकृत्रिमाणां च सरस्वतीनाम् ।
आर्द्राशयेन श्रवणाञ्चलेन
संभावयन्तं तरुणं गृणीमः ॥७१

मनसि मम संनिधत्तां
मधुरमुखा मन्थरापाङ्गा ।
करकलितललितवंशा
कापि किशोरी कृपालहरी ॥७२

रक्षन्तु नः शिक्षितपाशुपाल्या
बाल्यावृता बर्हिशिखावतंसाः ।
प्राणप्रियप्रस्तुतवेणुगीताः
शीता दृशोः शीतलगोपकन्याः ॥७३

स्मितस्तबकिताधरं शिशिरवेणुनादामृतं
मुहुस्तरललोचनं मदकटाक्षमालाकुलम् ।
उरस्तटविलीनया कमलया समालिङ्गितं
भुवः स्थलमुपागतं भुवनदैवतं पातु नः ॥७४

नयनाम्बुजे भजत कामदुघं
हृदयाम्बुजे किमपि कारुणिकम् ।
चरणाम्बुजे मुनिकुलैकधनं
वदनाम्बुजे व्रजवधूविभवम् ॥७५

निर्वासनं हन्त रसान्तराणां
निर्वाणसाम्राज्यमिवावतीर्णम् ।
अव्याजमाधुर्यमहानिधान-
मव्याद्व्रजानामधिदैवतं नः ॥७६

खेलतां मनसि खेचराङ्गना-
माननीयमृदुवेणुनिस्वनैः ।
कालमेघकलहोद्वहं महः
कानने किमपि नः कृपास्पदम् ॥७७

गोपीनामभिमतगीतवेषहर्षा-
दापीनस्तनभरनिर्भरोपगूढम् ।
केलीनामवतु रसैरुपास्यमानं
कालिन्दीपुलिनचरं परं महो नः ॥७८

एणीशावविलोचनाभिरलस-
श्रोणीभरप्रौढिभि-
र्वेणीभूतरसक्रमाभिरभितः
श्रेणीकृताभिर्वृताः ।
पाणी नाम विनोदयन्रतिपते-
स्तूणीशयैः सायकै-
र्वाणीनामपदं परं व्रजजन-
क्षोणीपतिः पातु नः ॥७९

कालिन्दीपुलिने तमालनिविड-
च्छाये पुरः संचर-
त्तोये तोयजपत्रपात्रनिहितं
दध्यन्नमश्नाति यः ।
वामे पाणितले निधाय मधुरं
वेणुं विषाणं कटि-
प्रान्ते गाश्च विलोकयन्प्रतिकलं
तं बालमालोकये ॥८०

यद्गोपीवदनेन्दुमण्डनमभू-
त्कस्तूरिकापत्रकं
यल्लक्ष्मीकुचशातकुम्भकलशे
व्याकोचमिन्दीवरम् ।
यन्निर्वाणनिधानसाधनविधौ
सिद्धाञ्जनं योगिनां
तन्नः श्यामलमाभिरस्तु हृदये
कृष्णाभिधानं महः ॥८१

फुल्लेन्दीवरमिन्दुकान्तवदनं
बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं
पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं
गोगोपसंघावृतं
गोविन्दं कलवेणुनादनिरतं
दिव्याङ्गभूषं भजे ॥८२

रक्षन्तु त्वामसितजलजैरञ्जलिः पादमूले
मीना नाभीसरसि हृदये मारबाणा मुरारेः ।
हाराः कण्ठे हरिमणिमया वक्त्रपद्मे द्विरेफाः
पिञ्छाचूडाश्चिकुरनिचये घोषयोषित्कटाक्षाः ॥८३

दधिमथननिनादैस्त्यक्तनिद्रः प्रभाते
निभृतपदमगारं वल्लवीनां प्रविष्टः ।
मुखकमलसमीरैराशु निर्वाप्य दीपा-
न्कबलितनवनीतः पातु गोपालबालः ।।८४

प्रातः स्मरामि दधिघोषविधूतनिद्रं
निद्रावसानरमणीयमुखारविन्दम् ।
हृद्यानवद्यवपुषं नयनाभिराम-
मुन्निद्रपद्मनयनं नवनीतचोरम् ।।८५

फुल्लहल्लकवतंसकोज्ज्वल-
द्रल्लमागमगवीगवेषितम् ।
वल्लवीचिकुरवासिताङ्गुली-
पल्लवं कमपि वल्लवं भजे ।।८६

स्तेयं हरेर्हरति यन्नवनीतचौर्यं
जारत्वमस्य गुरुतल्पकृतापराधम् ।
हत्यां दशाननहतिर्मधुपानगोष्ठीं
यत्पूतनास्तनपयः स पुनातु कृष्णः ।।८७

मार मारम मदीयमानसे
माधवैकनिलये यदृच्छया ।
हे रमारमण वार्यतामसौ
कः सहेत निजवेश्मलङ्घनम् ।।८८

आकुञ्चितं जानु करं च वामं
न्यस्यावनौ दक्षिणहस्तपद्मे ।
आलोकयन्तं नवनीतभाण्डं
बालं भजे कृष्णमुपानताङ्गम् ।।८९

मन्दारमूले मदनाभिरामं
बिम्बाधरापूरितवेणुनादम् ।
गोगोपगोपीजनमध्यसंस्थं
गोपं भजे गोकुलपूर्णचन्द्रम् ।।९०

जानुभ्यामभिधावन्तं बाहुभ्यामपि सुन्दरम् ।
सकुण्डलालकं बालं गोपालं चिन्तयेदुषः ।।९१

विहाय कोदण्डशरौ मुहूर्तं
गृहाण पाणौ मणिचारुवेणुम् ।
मयूरबर्हं च निजोत्तमाङ्गे
सीतापते राघव रामचन्द्र ।।९२

अयं क्षीराम्भोधेः पतिरिति गवां पालक इति
श्रितोऽस्माभिः क्षीरोपनयनधिया गोपतनयः ।
अनेन प्रत्यूहो व्यरचि सततं येन जननी-
स्तनादप्यस्माकं सकृदपि पयो दुर्लभमभूत्।।९३

हस्तमाक्षिप्य यातोऽसि
बलात्कृष्ण किमद्भुतम् ।
हृदयाद्यदि निर्यासि
पौरुषं गणयामि ते ।।९४

तमसि रविरिवोद्यन्मज्जतामम्बुराशौ
प्लव इव तृषितानां स्वादुवर्षीव मेघः ।
निधिरिव निधनानां दीर्घतीव्रामयानां
भिषगिव कुशलं नो दातुमायाति शौरिः ।।९५

कोदण्डं मसृणं सुगन्धि विशिखं
चक्राब्जपाशाङ्कुशं
हैमीं वेणुलतां करैश्च दधतं
सिन्दूरपुञ्जारुणम् ।

कन्दर्पाधिकसुन्दरं स्मितमुखं
गोपाङ्गनावेष्टितं
गोपालं मदनाधिपं तमभजं
त्रैलोक्यरक्षामणिम् ॥९६

सायंकाले वनान्ते कुसुमितसमये
सैकते चन्द्रिकायां
त्रैलोक्याकर्षणाङ्गं सुरनरगणिका-
मोहनापाङ्गमूर्तिम् ।
सेव्यं श्रृङ्गारभावैर्नवरसभरितै-
र्गोपकन्यासहस्रै-
र्वन्देऽहं रासकेलीरतमतिसुभगं
वश्यगोपालकृष्णम् ॥९७

बालं नीलाम्बुदाभं नवमणिविलस-
त्किङ्किणीजालबद्ध-
श्रोणीजङ्घातयुग्मं विपुलरुरुनख-
प्रोल्लसत्कण्ठभूषम् ।
फुल्लाम्भोजाभवक्त्रं हतशकटमरु-
त्पूतनाद्यं प्रसन्नं
गोविन्दं वन्दितेन्द्राद्यमरवरमजं
पूजयेद्वासरादौ ॥९८

वन्द्यं देवैर्मुकुन्दं विकशितकुरु-
विन्दाभमिन्दीवराक्षं
गोपीगोवृन्दवीतं जितरिपुनिवहं
कुन्दमन्दारहासम् ।
नीलग्रीवाग्रपिञ्छाकलनसुविलस-
त्कुन्तलं भानुमन्तं
देवं पीताम्बराढ्यं यज यज दिनश-
स्तं रमायै मुकुन्दम् ॥९९

चक्रान्तध्वस्तवैरिव्रजमजितम-
पास्तावनीभारमाद्यै-
रावीतं नारदाद्यैर्मुनिभिरभिनुतं
तत्त्वनिर्णीतिहेतोः ।
मन्त्री तं निर्मलाङ्गं निरुपमरुचिरं
चिन्तयेन्नीलभासं
सायं विश्वोदयस्थित्यपहरणपदं
मुक्तिदं वासुदेवम् ॥१००

कोदण्डमैक्षवमखण्डमिषुं च पौष्पं
चक्राब्जपाशसृणिकाञ्चनवंशनालम् ।
बिभ्राणमष्टविधबाहुभिरर्कवर्णं
ध्यायेद्धरिं मदनगोपविलासवेषम् ॥१०१

या प्रीतिर्विदुरार्पिते मुररिपो
कुन्त्यर्पिते यादृशी
या गोवर्धनमूर्ध्नि या च पृथुके
स्तन्ये यशोदार्पिते ।
भारद्वाजसमर्पिते शबरिका-
दत्तेऽधरे योषितां
या प्रीतिर्मुनिपत्निभक्तिरचितेऽ-
प्यत्रापि तां तां कुरु ॥१०२

APPENDIX

II

Additional Verses given in Bilvamaṅgala-kośa-kāvya[1] (with variants, additions and omissions from Kṛṣṇa-stotra, a version of the same work)

यं वेद वेदविदपि प्रियमिन्दिराया
यन्नाभिनीररुहगर्भगृहो न धाता ।
गोपालबालललना वनमालिनं तं
गोधूलिधूसरशरीरमरीरमंस्ताः ॥१

कनककमलमालः केशिकंसादिकालः
समरभुवि करालः प्रेमवापीमरालः ।
अखिलभुवनपालः पुण्यवल्लीप्रवाल-
स्तव भवतु विभूत्यै नन्दगोपालबालः ॥२

हे कृष्ण[2] कृष्ण कृतवृष्णिकुलावतार
संसारवारणविदारणसिंह विष्णो ।
गोपीजनोपहृतलोचनपद्ममाल
गोपाल पालय कृपालय मामपायात् ॥३

यश्चिन्तितोऽपि विनिहन्त्यशुभानि पुंसां
यो योगिनामपि मनोविषयादपेतः ।
ज्ञानात्मने सकलवेदमयाय तस्मै
नारायणाय भवबन्धभिदे नमोऽस्तु ॥४

उपासतां ब्रह्मविदः पुराणाः
सनातनं ब्रह्म निबद्धचित्ताः ।
वयं यशोदासुतबालकेलि-
कथासुधासिन्धुषु मज्जयामः ॥५

या शेखरे श्रुतिगिरां हृदि योगभाजां
पादाम्बुजेषु सुलभा व्रजसुन्दरीणाम् ।
सा कापि सर्वजगतामभिरामसीमा
क्षेमाय वो भवतु गोपकिशोरमूर्तिः ॥६

[1] Printed in Bengali characters, with a Bengali prose translation by Yogīndranātha Bāgci, and published by Rāmadeva Miśra, at the Radharaman Press, Berhampur-Murshidabad Śaka 1829 = 1907 A.D. See Introduction, pp. xxiif. The text (R) appears to have been reproduced from a bad Ms, and there are numerous corrupt passages, misprints and unmetrical lines. Another version of this text is found in the Kṛṣṇa-stotra (J), printed with a Bengali verse-translation by Jayagopāla Tarkālaṃkāra, Calcutta B.E. 1224 = 1817 A.D., the work being entitled Bilvamaṅgala-gosvāmi-kṛtaṃ Śrī-kṛṣṇa-stotram. This is apparently the Kṛṣṇa-stotra referred to by Eggeling; see Introduction pp. xxii, lxxxiii. Our text mainly follows R, with occasional variations from J.

[2] R श्री for हे.

यद्गोपीवदनेन्दुभित्तिषु गतं
कस्तूरिकाविभ्रमं
यल्लक्ष्मीकुचशातकुम्भकलशे
व्याकोषमिन्दीवरम् ।
यन्निर्वाणनिधानसाधनविधौ[1]
सिद्धाञ्जनं योगिनां
तद्वः श्यामलमाविरस्तु हृदये
कृष्णाभिधेयं महः ॥७

गोपिकानयनचातकावली-
पारणोत्सवपरंपरार्पिका[2] ।
कापि दीप्यति विभूषणप्रभा-
चञ्चला जलदराजिरञ्जिका ॥८

उदूखलं वा यमिनां मनो वा
व्रजाङ्गनानां कुचकुट्मलं वा ।
मुरारिनाम्नः कलभस्य विष्णो-
रालानमासीत्त्रयमेव लोके ॥९

यो लीलया गोकुलगोपनाय
गोवर्धनं भूधरमुद्दधार ।
खिन्नः[3] सकम्पः स बभूव राधा-
पयोधरक्ष्माधरदर्शनेन ॥१०

विन्यस्य वेणुमधरे विवरांस्तदीया-
नव्यग्रमङ्गुलिभिरन्तरयन्विवृण्वन्[4] ।
गायन्कलं शिखिशिखण्डकृतावतंसो
मध्ये गवां विजयते विचरन्मुकुन्दः ॥११

परमिममुपदेशमाद्रियध्वं
निगमवनेषु नितान्तचारखिन्नाः ।
विचिनुत भवनेषु वल्लवीना-
मुपनिषदर्थमुदूखले निबद्धम् ॥१२

नीलकण्ठनवपिच्छशेखरं[5]
नीलमेघललिताङ्गवैभवम् ।
बालमम्बुजपलाशलोचनं
लोलकुण्डलधरं[6] भजे महः ॥१३

निरर्थकं तीर्थकदर्थनाभिः
क्रियेत गात्रं[7] किमपायपात्रम् ।
सुखं शयानः शरणे शरण्यं
श्रये श्रियः कान्तमनन्तमन्तः ॥१४

मन्थानमुज्झ मथितुं दधि न क्षमस्त्वं
बालोऽसि वत्स विरमेति यशोदयोक्तः ।
क्षीराब्धिमन्थनविधिस्मृतिजातहासो
वाञ्छास्पदं दिशतु नो[8] वसुदेवसूनुः ॥१५

अखिलभुवनबन्धोर्वैरमिन्दोः सरोजै-
रनुचितमिति मत्वा यः स्वपादारविन्दम् ।
घटयितुमिव मायी योजयत्याननेन्दौ[9]
वटदलपुटशायी मङ्गलं वः कृषीष्ट ॥१६

1 J ०विधान० for ०निधान०. 2 J परंपराधिका. 3 J खिन्नः. 4 R व्यग्राग्र० for अव्यग्र०, and विरम्य for विवृण्वन्. 5 J ०पुच्छ for ०पिच्छ. 6 J लोलकुन्तलभरं. 7 R कायः for गात्रं. 8 J वः for नः. 9 R योजयित्वा for योजयति.

स पाञ्चजन्यः करपङ्कजाभ्यां
निवेशितः कृष्णमुखारविन्दे ।
रराज गोक्षीरमृणालपाण्डुः
सरोजमध्यस्थ इवैकहंसः ॥१७

भजे महः कामगवीनवीन-
हैयंगवीनाशनबद्धतृष्णम्[1] ।
उदूखले शृङ्खलितं रुदन्तं
कर्मान्तरव्यग्रधिया जनन्या ॥१८

शैशवार्पितधिया शनैः शनै-
र्मातुरङ्कमभिवीक्ष्य सादरम् ।
गच्छमानमरविन्दलोचनं
जानुना हृदय तं भजानिशम् ॥१९

मृषैव भाण्डानयनार्पितक्रिया-
च्छलेन लोलागतयो[2] नतभ्रुवः ।
अतर्पिताः कृष्णमुखावलोकने
मुहुर्यशोदासदनं[3] समाययुः ॥२०

अहं परं वेद्मि न वेत्ति मत्परा
स्मरोत्सुकानामपि गोपसुभ्रुवाम् ।
अभूदहंपूर्विकया महान्कलि[4]-
र्बलिद्विषः केशकलापगुम्फने ॥२१

प्रातः स्मरामि दधिघोषविधूतनिद्रं
निद्रावसानरमणीयमुखारविन्दम् ।
हृद्यानवद्यवपुषं नयनाभिराम-
मुन्निद्रपद्मनयनं नवनीतचौरम् ॥२२

अधरबिम्बविडम्बितविद्रुमं[5]
मधुरवेणुनिनादविनोदिनम् ।
अमलकोमलकान्तमुखाम्बुजं[6]
कमपि गोपकुमारमुपास्महे ॥२३

वत्स जागृहि विभातमागतं
कृष्ण जीव शरदां शतं शतम् ।
इत्युदीर्य बहुशो[7] यशोदया
दृश्यमानवदनं भजे महः ॥२४

अस्तु नित्यमरविन्दलोचनः
श्रेयसे मम सुरार्चिताकृतिः ।
यस्य पादसरसीरुहामृतं
सेव्यते भ्रमरवन्मुनीश्वरैः ॥२५

अरुणाधरामृतविशेषितस्मितं
वरुणालयानुगतवर्णवैभवम् ।
तरुणारविन्ददलदीर्घलोचनं
करुणामयं किमपि धाम चिन्तये[8] ॥२६[9]

कन्दर्पप्रतिमल्लकान्तिविभवं[10]
कादम्बिनीबान्धवं
वृन्दारण्यविलासिनीव्यवसिता-
वेशेन भूषामयम् ।

1 R ०वृद्धकृष्णां for ०बद्धतृष्णां. 2 J लोलोद्गतयः. 3 J ०भवनं for ०सदनं. 4 R महाकलिः. 5 R drops बिम्ब. 6 J ०कोमलकुन्दमुखद्विजं. 7 R वचनं for बहुशः. 8 J चकास्तु चिरम् for चिन्तये. 9 J transposes nos. 26 and 27. 10 R ०प्रतिमेन्दु०.

मन्दस्मेरमुखाम्बुजं मधुरिम-
व्यामृष्टबिम्बाधरं[1]
वन्दे कन्दलितार्द्रयौवनभरं
कैशोरकं शार्ङ्गिणः ॥२७

बर्हापीडमनोहराणि मधुर-
स्मेराननेन्दून्यहो
गर्हाकोटिनिवेशिताम्बुधिमहा-
गर्भाणि गात्रश्रिया ।
अर्हाणि व्रजसुन्दरीस्तनभुवा-
मार्द्राणि तेजांसि मे
दुर्वाराणि दुरासदानि न[2] कथं
धुन्वन्ति धैर्यं दृशोः ॥२८

एषु प्रवाहेषु स एव मन्ये[3]
क्षणोऽपि गण्यः पुरुषायुषेषु ।
आसाद्यते यत्र कयापि वृत्त्या
नीलस्य बालस्य निजं चरित्रम् ॥२९

पाणौ वेणुः प्रकृतिसुकुमाराकृतौ बाल्यलक्ष्मीः
पार्श्वे बालाप्रणयकुपितालोकिते कापि लीला[4]।
मौलौ बर्हं मधुरवदनाम्भोरुहे मौनमुद्रा
हृद्याकारं किमपि कितवं
ज्योतिरालोकये नु[5] ॥३०

बालाय नीलवपुषे तनुकिङ्किणीक-
ध्वानाभिरामजघनाय दिगम्बराय ।
शार्दूलदिव्यनखभूषणभूषिताय
नन्दात्मजाय नवनीतमुषे[6] नमोऽस्तु ॥३१

आताम्रपाणिकमलव्रणयिप्रतोद-
मालोलहारमणिकुण्डलहेमसूत्रम् ।
आबिभ्रदम्बुकणमम्बुदनीलमव्या-
दाद्यं धनंजयरथाभरणं महो नः[7] ॥३२

गोधूलिधूसरितभास्वरकुन्तलाग्रं
गोवर्धनोद्धरणकेलिकृतप्रयासम् ।
गोपीस्तनस्तबककुङ्कुमपिङ्गलाङ्गं
गोविन्दमिन्दुवदनं भज साधु चेतः ॥३३

परितस्थुषि पारिजातमूले
मुरलीमोहितनैचिकीकदम्बे[8] ।
घनरोचिषि रोचतां मनो मे
वनमालावति वल्लवीसहाये ॥३४

कर्णलम्बितकदम्बमञ्जरी-[9]
केसरारुणकपोलमण्डलम् ।
निर्मलं निगमवागगोचरं
नीलिमानमवलोकयामहे ॥३५

1 R ०नेत्रोत्सवं for ०बिम्बाधरं. 2 R च for न. 3 R निरर्थवेषु for स एव मन्ये. 4 R लोकते कापि बाला (corrupt) for ०लोकिते कापि लीला. 5 J आलोकयेमः. 6 J भवबन्धभिदे for नवनीतमुषे. 7 J वः for नः. 8 R omits मुरली, contrary to metre. R ०हृदये for ०कदम्बे. 9 R कर्णावलम्बित०, contrary to metre.

संबाधे सुरभीणा-
मम्बामायासयन्तमनुयान्तीम् [1] ।
लम्बालकमवलम्बे
तं बालं तनुविलग्नजम्बालम् ॥३६

सन्तु सहस्रं विपदः
संततमेताश्च संपदस्तास्ताः [2] ।
अन्तरनन्तं (?) [3] सुचिरं
चिन्तय चिन्तामणिं चेतः (?) [4] ॥३७

पर्याकुलेन नयनान्तविजृम्भितेन
कर्त्रेण कोमलमृदुस्मितविभ्रमेण [5] ।
मन्द्रेण मञ्जुलतरेण च जल्पितेन
नन्दस्य हन्त तनयो हृदयं जहार [6] ॥३८

लीलालोलकटाक्षनिर्भर-
परिष्वङ्गप्रसङ्गाधिक-
प्रीते रीतिविभङ्गभङ्गि-
विलसद्वेणुप्रणादामृते ।
राधालोचनलालितस्य
ललितस्मेरे [7] मुरारेर्महा-
माधुर्यैकरसे मुखेन्दुकमले
मग्नं मदीयं मनः [8] ॥३९

अम्लानं यद्वदनकमलं
दिव्यमव्याजरम्यं [9]
नैवाद्राक्षीन्नयनयुगलं
मन्दभाग्यं मदीयम् ।
आवद्धोऽयं प्रणयरसिकै-
रञ्जलिर्मे [10] विकल्पै-
श्चेतस्तावद्भवतु चपलं
जन्मजन्मान्तरेषु ॥४०

घोषयोषिदनुगीतवैभवं
कोमलस्फुरितवेणुनिस्वनम् ।
सारभूतमभिरामसंपदां
धाम तामरसलोचनं भजे ॥४१

उदारमृदुलस्मितव्यतिकराभिरामाननं
मुदा [11] मुहुरुदीर्णया मुनिमनोम्बुजाम्रेडितम् ।
मदालसविलोचनं व्रजवधूसमास्वादितं
कदा नु [12] कमलेक्षणं कमपि बालमालोकये॥४२

राधाराधितविभ्रमाद्भुतरसं
लालित्यरत्नाकरं
साधारण्यपदव्यतीतसहज-
स्मेराननाम्भोरुहम् ।

[1] R reads मायामयं तमनुयान्तं contrary to metre ; J is damaged in this line ; this is the reading of KK ii. 77 (see above p. 316). [2] R सहस्रविपदः and संततमेताः समन्ततस्तास्ताः. [3] The reading of J is not clear, being damaged ; R reads, contrary to metre, खलमनन्तं. [4] The line is metrically defective. [5] R ०तर० for ०मृदु०. [6] R पुनातु for जहार. [7] J ०लोचनलाञ्छितस्य. J inserts, after no. 39, KK iii. 24 जगत्त्रयैकान्त० (v. l. जगत्त्रयीकान्त०, भूमि for भूमिः). [9] R ०दिव्याप्ति० for ०मव्याज०. [10] J मिर्- for मे. [11] J मुहुः for मुदा. [12] J तु for नु.

आलम्बे किल[1] नीलरत्नगुरुता-
सर्वस्वनिर्वासनं
बालं वैणविकेषु मुग्धमधुरं
मूर्धाभिषिक्तं महः ॥४३

मन्दस्मितस्नपितमुग्धमुखारविन्दे
मन्दानिलाकुलितकोमलकाकपक्षे ।
गोगोपगोपवनिताजनपुण्यपूरे[2]
गोपालबालतिलके रमतां मनो मे ॥४४

वृन्दावने वृक्षलतालिसंकुले
मन्दानिलोद्वीजनशीतशीतले ।
रन्ध्राणि वेणोः परिपूरयन्स्वनै[3]-
र्मुहुर्हरत्येष व्रजौकसां[4] मनः ॥४५

बर्हेणाञ्चितमूर्धजो गजपति-
भिन्नाञ्जनश्यामलो
वेणुं लोलकराङ्गुलीभिरनिशं
विन्यस्य वक्त्राम्बुजे ।
गायन्गानरसेन गाः प्रमुदिता[5]
वृन्दावने चारय-
न्गोपस्त्रीपरिवेष्टितो विजयते
गोपालचूडामणिः ॥४६

लक्ष्मीकान्तमनन्तकान्तिविभवं
त्रैलोक्यचिन्तामणिं
गोपं गोपतनूजगोपनरतं
गोपाङ्गनागोपितम् ।
आलीढाधरवेणुमुद्रितमुखं[6]
स्मेरस्मरस्मारकं
बालं बालतमालनीलममलं
गोपालमालोकये ॥४७

आयते सुविपुले परिलोले
कोमले विलुलितारुणलेखे[7] ।
शीतले शतपलाशदलाभे[8]
लोचने मुररिपो रुरुचाते ॥४८

पद्ममस्तु भवतां विभूतये[9]
सूतिकाभवनमादिवेधसः ।
श्यामला भुजगभोगशायिनी
देवता भवति यस्य दीर्घिका ॥४९

मनसि मम संनिधत्तां
मधुरस्मितमन्थरापाङ्गा ।
करकलितललितवंशा
कापि किशोरी कृपालहरी ॥५०

श्यामलं विपिनकेलिलम्पटं
कोमलं कमलपत्रलोचनम् ।
दोहदं व्रजविलासिनीदृशां
शीतलं मनसि जृम्भतां महः[10] ॥५१

1 J आलम्बेमहि for आलम्बे किल. 2 R गोपाल० for गोगोप० and ०कर्ण० for ०पुण्य०. 3 J मुदा for स्वनैः. 4 J एव दिवौ० for एष व्रजौ०. 5 J प्रमुदितो. 6 J ०करं for ०मुखं. 7 R विनुता० for विलुलिता० contrary to metre. 8 R अरविन्दपलाशदलाभ-, contrary to metre. 9 J हि for वि-. 10 After no. 51, J inserts KK iii. 73 रक्षन्तु नः (v. l. बाल्यार्द्रताः for बाल्यावृताः, प्राणाः श्रियः for प्राणप्रिय-, and नीतान्तराण्दरगोपकन्याः for the fourth pāda).

स्मितस्तबकिताधरं शिशिरवेणुनादामृतं
मुहुस्तरललोचनामदकटाक्षमालाकुलम्[1] ।
उरःस्थलविलीनया[2] कमलया समालिङ्गितं
भुवस्तलमुपागतं भुवनदैवतं पातु नः[3] ॥५२

नयनाम्बुजे भजत कामदुघं
हृदयाम्बुजे किमपि कारुणिकम् ।
चरणाम्बुजे कुलधनं[4] यमिनां
वदनाम्बुजे व्रजवधूविभवम् ॥५३

गोपीनामभिमतसङ्गीतहर्षा[5]-
दापीनस्तनभरनिर्भरेण गूढम् ।
केलीनामवतु[6] रसैरुपास्यमानं
कालिन्दीपुलिनचरं परं[7] महो नः ॥५४

एणीशावविलोचनाभिरलस-
श्रोणीभिरप्रौढिभिः[8]
प्रेमाबद्धरसक्रमाभिरभितः
श्रेणीकृताभिर्वृतः ।
गोपीप्रेम विवर्धयन्नतिपते-
स्तूणीशयैः सायकै-
स्तर्णालीमपि लालयन्व्रजपद-
क्षौणीपतिः पातु नः ॥५५

अस्तु स्वस्त्ययनं समस्तजगता-
मभ्यस्तलक्ष्मीस्तनं
वस्तु ध्वस्तरजस्तमोभिरनिशं
न्यस्तं पुरस्तादिव[9] ।
हस्तोदस्तगिरीन्द्रमस्तकतरु-[10]
प्रस्तारनिस्ताडित-
ग्रस्तस्वस्तरुमूलसंभवरस-
प्रस्तारधाराप्लुतम्[11] ॥५६

मधुरैकरसं परं विभो-
र्मथुरावीथीचरं भजे महः[12] ।
नगरीमृगशावलोचना-
नयनेन्दीवरवर्षधर्षितम् ॥५७

कष्टादष्टाङ्गयोगेन
यं नापुर्मुनयोऽपि ये ।
एकाङ्गयोगेनाभीर-
भीरवस्तमरीरमन् ॥५८

निन्दन्तं दनुसूनुसैरिभविनि-
स्पन्दं दधानं परि-
स्पन्दं मन्दतरं मुखेन्दुगुरुता-
मिन्दिन्दिरान्दोलितम् ।

[1] J ०लोचनं मद०. [2] J ०निलीनया. [3] J वः for नः. [4] R superfluously inserts किमपि before कुलधनं. [5] J ०मङ्गशीतवर्षा०. [6] R अतुल- for अवतु. [7] R drops परं. [8] This verse is omitted in J. R reads एणश्याम०. [9] R इति for इव. [10] J ०भर० for ०तरु०. [11] After no. 56, J inserts KK iii. 16 यस्मिन्नृत्यति (v. l. तृप्यति, सुरभीः, विभ्रमशतं, ०द्रुमवनालम्बं किशोरं). [12] J भजामहे.

निन्दन्मन्दरबालसुन्दरदृशा
कन्दर्पकान्तिं श्रियः
कन्दं नन्दकुलोद्भवं मम दृशो-
र्द्वन्द्वस्य वन्दे मुदे[1] ॥५९

नवनीलमेघरुचिरः परः पुमा-
नवनीतले विधृतगोपविग्रहः[2] ।
नमनीयमूर्तिरमरैरपि स्वयं
नवनीतभिक्षुरधुना स चिन्त्यताम्[3] ॥६०

चरणयोररुणं करुणार्द्रयोः
कचभरे बहुलं विमलं दृशोः ।
वपुषि मञ्जुलमञ्जनमेचके[4]
वयसि बालमहो मधुरं महः ॥६१

आमूलपल्लवितजीवमपाङ्गवर्षै[5]-
रासिञ्चती भुवनमादृतगोपवेषा ।
बालाकृतिर्मधुरमुग्धमुखेन्दुबिम्ब-
माधुर्यसिद्धिरवतान्मधुविद्विषो नः ॥६२

शरणमशरणानां दुःखदारिद्र्यभाजां[6]
